


श्री श्री सीताराम श्री श्री सीताराम श्री श्री सीताराम श्री श्री सीताराम श्री श्री सीताराम श्री श्री श्री

टी० सु० सुं०
१

श्री[illegible] श्रीसीतारामाभ्यां नमः प्राप्तः पायोधिपारं रघुपतिदयिता वीक्षिका यत्र पन्नः पौलस्त्यप्राणापीडाप्रणयपटिमा पा
रं पांडित्यपात्रं श्रीदृश्रेमां वपुः प्रणतपरपदं श्रापकोपप्रकार्येषु यो संपारयिष्यन्न्यभ्युपत्ति पठितः पावमानिः प्रनातु र
घुपतेर्दयिता वीक्षिकायाः श्रीजानक्याः पादपद्मप्रपन्नः स्वयं १ प्राप्य मारुतः स्वताहितं देहं जातबत्तः जातमति
ज्ञातसस्मदो मानसम्पतमसोवि धूतये च भवतार घूतमो २ पूर्वस्मिन् कांडे जगाम त्वं को मनसा हनूमानिति
मनसागमनमुक्तमिदानीं कायेनापि गमनं कर्तुमैच्छदित्याह ततो रावणनीताया इत्यादि नानतः प्राकृ क

ततो रावणनीतायाः सीतायाः शत्रुकर्शनः इयेष पदमन्वेष्टुं चारणाचरिते पथि
१ दुष्करं निष्प्रतिद्वंद्वं चिकीर्षन्कर्म वानरः समुदग्रशिरोग्रीवो गवां पतिरिवाबभौ
२ अथ वैदूर्यवर्णेषु शाद्वलेषु महाबलः धीरः सलिलकल्पेषु विचचार यथासुखम् ३

ततो हनूमान् रावणनीतायाः रावणेनापहृतायाः सीतायाः पदमवस्थितिस्थानमन्वेष्टुं चारणाचरि
ते पथि चारणादेवजातयस्तैराचरितः क्रियमाणसंचारस्ताद्दशे पथि आकाशमार्गे गंतुमियेषेत्यन्वयः १ निष्प्रतिद्वंद्वं नि
ष्क्रांतं प्रतिद्वंद्वं प्रतिबंधकं सहायांतरं च यस्मिन्नन्यैर्दुष्करं कर्म समुद्रलंघनपूर्वकसीतान्वेषणरूपं चिकीर्षन्समुदग्रमुन्नते
शिरोग्रीवा च यस्य स वानरो गवां पतिर्वृषभ इवाबभौ शोभते स्म २ अथ वैदूर्यवर्णेषु मरकतच्छायेषु सलिलकल्पेषु त

रामा०
१

प्रवृद्धः केसरीव विचचारेति पूर्वेणासंबंधः ४ नीलेत्यादि श्लोकत्रयमेकं वाक्यं पत्रयच्छेदो ऽध्याहर्तव्यः स्वभावसिद्धैः प्रोलस्व
भावसिद्धैर्नीललोहितादिवर्णैर्विमलैर्धातुभिः समलंकृतं कामरूपीभिः सपरिच्छदैः सालंकारैर्यक्षादिभिरभीक्ष्णमावि

दयन्त

द्विजान्विश्रामयन्धीमानुरसापादपान्हरन् मृगांश्चसंवहन्नतिघ्नन्प्रववृधे केसरी ४
नीललोहितमांजिष्ठपद्मवर्णैः सितासितैः स्वभावसिद्धैर्विमलैर्धातुभिः समलंकृतम् ५
कामरूपिभिराविष्टमभीक्ष्णं सपरिच्छदैः यक्षकिंनरगंधर्वैर्देवकल्पैः सपन्नगैः ६
सततस्य गिरिवर्यस्य तले नागवरावृते तिष्ठन्कपिवरस्तत्र ह्रदे नागइवाबभौ ७ स सूर्याय
महेंद्राय पवनाय स्वयंभुवे भूतेभ्यश्चांजलिं कृत्वा चकार गमने मतिम् ८ अंजलिं प्रा
ङ्मुखः कुर्वन्पवनायात्मयोनये ततो हि ववृधे गंतुं दक्षिणो दक्षिणां दिशम् ९ सीता

ष्टं यत्तस्य गिरिवर्यस्य तले तत्र नागवरैरासमंतादावृते तिष्ठन्स कपिर्ह्रदे नाग इव बभौ गिरौ ह्रदस्यासाम्यं श्यामलत्वेन ५ ६
७ प्रत्येष्ठदेवताप्रार्थनापूर्वकं यात्रारंभ इत्याह स सूर्यायेति पवनाय पूयते येन स्वस्तानेन योगिवृंदः स पवनः श्रीरा
मस्तस्मै रसर्पः स्वयंभुवे चतुर्मुखाय भूतेभ्यः देवयोनिभ्यः ८ आत्मयोनये पवनाय स्वजनकवायवे ऽसर्पद्दक्षिणाः कुशलः ९

ग॰ वा॰ सुं॰
६

६१ पण्डुरदंष्ट्र इति स्वरूपकथनं न तु परिवेषिभास्करोपयोगि ६२ स्फिग्देशेन कटिप्रदेशेन तन्मात्रस्यातिताम्रत्ववर्णनादन्यत्रात्य ताम्रवर्णत्वं गम्यत एवं दारित धातुमद्गिरुपमासंगच्छते ६३ गर्जति जगर्ज ६४ उत्तरान्तात् उत्तरोर्द्ध्वदिग्भागात् सानुबंधा सपुच्छा

लांगूलं च समाविद्धं प्लवमानस्य शोभते अंबरे वायुपुत्रस्य शक्रध्वज इवोच्छ्रितम् ६१ लांगूल चक्रो हनुमान् पण्डुरदंष्ट्रोनिलात्मजः व्यरोचत महाप्राज्ञः परिवेषीव भास्करः ६२ स्फिग्देशेनाभिताम्रेण रराज स महाकपिः महता दारितेनेव गिरिर्गैरिकधातुना ६३ तस्य वानरसिंहस्य प्लवमानस्य सागरम् कक्षान्तरगतो वायुर्जीमूत इव गर्जति ६४ खे यथा निपतत्युल्का उत्तरान्ताद्विनिःसृता दृश्यते सानुबंधा च तथा स कपिकुंजरः ६५ पतत्पतंगसंकाशो व्यायतः शुशुभे कपिः प्रवृद्ध इव मातंगः कक्ष्यया बध्यमानया ६६ ६६ ६६ ६६

उल्कापुच्छे पुच्छापततीर देवविप्रो यथा पुच्छसाहित्यात् ६५ पतत्पतंगसंकाशः गच्छत्सूर्यसदृशः व्यायतो दीर्घः कपिः कक्ष्यया कक्षाबंधनेन बध्यमानया जनमध्ये बंधनरज्ज्वा प्रवृद्धो दीर्घीभूतो मातंग इव शुशुभे ६६

गौरीपीतामतएव कनकप्रभां इष्टां वराभ्याति प्रियेयं अंतःपुरस्त्रीणामीश्वरीं कपिर्मंदोदरीं ददर्शेत्यन्वयः ५२ समारुतात्मजः तां एव पूर्वोक्तां ते परमं वेशयानामतिरूपां भूषितां तां दृष्ट्वा सीतेति तर्कयामास संभावयामास तदेवाह रू

गौरीं कनकवर्णाभामिष्टामंतःपुरेश्वरीम् कपिर्मंदोदरीं तत्र शयानां चारुरूपिणीम् ५२
तां दृष्ट्वा स महाबाहुर्भूषितां मारुतात्मजः तर्कयामास सीतेति रूपयौवनसंपदा ५३ हर्षेण महता युक्तो ननंद हरियूथपः दृष्ट्वा सीतेति तत्राभूद्धीनश्चारित्रदर्शनात् ५४ आस्फोटयामास चुचुंब पुच्छं ननंद चिक्रीड जगौ जगाम स्तंभानरोहन्निपपात भूमौ निदर्शयन्स्वां प्रकृतिं कपीनाम् ५५ ॥ हरिः ॐ इत्यार्षे रामायणे वाल्मीकीये सुंदरकांडे दशमः सर्गः ॥ १०

पयौवनसंपदा नत्वौ चित्यालोचनं कृतवानिति भावः ५३ हर्षो मुखविकासादिः अथानंदो मानसः चारित्रस्वपादि ५४ आनंदे कार्यमाह आस्फोटयामासेति आस्फोटः पुच्छचुंबनादिजातिधर्मः जगाम स्तंभा न्निति स तु कपिः एवं चेष्टाहेतुः स्वां कपीनां प्रकृतिं निदर्शयन्निति ५५ इति दशमः सर्गः १० १० १० राम०

तो बुद्धिं सीतासंभावनया प्रवृत्तां कापेयविषयां बुद्धिं अवधूय त्यक्त्वा अवस्थितः स्थिरतास्वभावेन प्रतिष्ठितः सीतां प्रति सीता
विषयामितरामन्यां चिंतां पूर्वचिंताविघटिकां जगाम कृतवान् १ तामेव चिंतामभिनयति न रामेणेत्यादिश्लोकद्व

अवधूय च तां बुद्धिं बभूवावस्थितस्तदा जगाम चापरां चिंतां सीतां प्रति महाकपिः १ न रामेण
वियुक्ता सा स्वप्तुमर्हति भामिनी न भोक्तुं नाप्यलंकर्तुं न पानमुपसेवितुम् २ नान्यं नरमुपस्था
तुं सुराणामपि चेश्वरं नहि रामसमः कश्चिद्विद्यते त्रिदशेष्वपि ३ अन्येयमिति निश्चित्य पा
नभूमिं ददर्श स पानभूमौ हरिश्रेष्ठः सीतासंदर्शनोत्सुकः ४ क्रीडितेनापराः क्लांता गीते
न च तथापरा नृत्तेन चापराः क्लांताः पानविप्रहतास्तथा ५

येन अन्यं नरमुपस्थातुं मैथुनक
र्तुं नार्हति तत्र हेतुर्नहि रामसम इति २ ३ यद्येवमतोऽन्येयमनुभूतेति निश्चित्य तत्र गृहे पानभूमौ पानशालायां च चार सम्य
सम्यगन्वेषणाय इति शेषः ४ क्रीडितेन अक्षादिक्रीडया क्लांताः सत्यस्तथैव निद्रिता इति शेषः पानेन विप्रहताः
अतिनिद्रिताः स्त्रियो ददर्शेत्युत्तरेणान्वयः ५

मुरजेषु मृदंगेषु पीठिकासु वा यथाविभागं वेषु च यथाप्रसङ्गम् एव संस्थिताः स्थिता एव निद्रिताः संविष्टाः सुप्ताः ददर्शेति सं
बन्धः ६ रूपसंलापशीलेन निद्रोन्मुखावस्थायां तत्स्वरूपविषयो यः संलापो वर्णनं तच्छीलेन युक्तम् उपपन्नं य
था भवति तथा गीतस्य भरतशास्त्रस्यार्थस्य भाषणशीलेन ७ देशकालाभियुक्तेन तद्विषयस्थानकुशलेन युक्त

मुरजेषु मृदंगेषु पीठिकासु च संस्थिताः तथास्तरणमुख्येषु संविष्टाश्चापराः स्त्रियः ६ अंग
नानां सहस्रेण भूषितेन विभूषणैः रूपसंलापशीलेन युक्तगीतार्थभाषिणा ७ देशकालाभि
युक्तेन युक्तवाक्याभिधायिना रताभिरतसंसुप्तं ददर्श हरियूथपः ८ तासां मध्ये महाबाहुः शु
शुभे राक्षसेश्वरः गोष्ठे महति मुख्यानां गवां मध्ये यथा वृषः ९ स राक्षसेन्द्रः शुशुभे ताभिः
परिवृतः स्वयम् करेणुभिर्यथारण्ये परिकीर्णो महाद्विपः १० सर्वकामैरुपेतां च पानभूमिं
महात्मनः ददर्श कपिशार्दूलस्तस्य रक्षःपतेर्गृहे ११

वाक्याभिधायिना प्रवरसरोचितभाषिणा अंगना
नां सहस्रेण सह रताभिरतसंसुप्तं रते अभिरतश्चासौ संसुप्तं रते अभिरतश्चासौ संसुप्तश्चेति कर्मधारयः तं रतिश्रान्त्या सुप्तं रावणं ददर्शेत्यर्थः ८
परिकीर्णः परिवेष्टितः १० सस्त्रीकरावणगृहे सम्यगन्विष्य पुनर्बहिः पानभूमिमागत्य विचिनोति सर्वकामैरिति पूर्वं तु
त्वा दिदृक्षतस्य स्त्रीमात्रदर्शनं इदानीं सर्वकामोपेतत्वदर्शनमिति विशेषः ११

तदेव प्रपंचयति मृगाणामिति १२ १३ पुनः पुनर्वर्णनाहादिमृगादिकथनं वृत्तस्य लवर्जितया भूयस्त्वप्रकाशनाय वार्ध्रीणसः पक्षि विशेषः कृष्णग्रीवो रक्तशिराः श्वेतपक्षो विहंगमः स वै वार्ध्रीणसः प्रोक्तः इति विष्णुधर्मोक्तेः पशुविशेषश्च वार्ध्रीणसः ख ड्गमृग इति हलायुधः दध्ना सौवर्चलेन लवणविशेषेण चाप्यायुतान् संस्कृतान् शल्यकान् श्वाविधान् ॥१४॥ क्रकरान्

मृगाणां महिषाणां च वाराहाणां च भागशः तथान्यस्तानि मांसानि पानभूमौ ददर्श सः १२ रौक्मे षु च विशालेषु भाजनेष्वर्धभक्षितान् ददर्श कपिशार्दूलो मयूरान्कुक्कुटांस्तथा १३ वराह वार्ध्रीणसकान् दधिसौवर्चलायुतान् शल्यकान्मृगमायूरान्हनूमानन्ववैक्षत १४ क्रकरान्विविधान्सिद्धांश्चकोरानर्धभक्षितान् महिषानेकशल्यांश्च मेषांश्च कृतनिष्ठि तान् १५ लेह्यानुच्चावचान्पेयान्भोज्यान्युच्चावचानि च तथाम्ललवणोत्तंसैर्विविधै राग षाडवैः १६

पक्षिविशेषान् कुररक्रकरौ समाविति अमरः एकशल्यान् तत्स्वाविशेषान् कृतनिष्ठितान् कृते निष्ठिते निष्ठा संपाको येषां तान् १५ प्रश्च रसोऽन्नं वा रसश्च उत्तंसो जिह्वा जाड्यपरिहर्ता येषु भक्ष्यमाणेषु तैः रागषाडवैः सितामध्वा दिमधुरो द्राक्षा दाडिमजो रसः मनोरसः खिरकवित्कैतो रागः सांद्रश्चैतत्षाडवः स्मृतः इत्युक्तेः १६

रा० वा० सुं०
५२

श्चपविद्धैः विकीर्णैः महाधनैर्बहुमूल्यैः पानभाजनेषु विक्षिप्तैर्विविधैः फलैरपि कृतपुष्पोपहारां भूरधिकां श्रियं पु
ष्यतीत्यन्वयः १७ तत्र तत्र चित्तस्थलेषु विन्यस्तैः सुश्लिष्टैः समुन्नतमधिकं वा उत्कृष्टैः सौवर्णै रत्नमयशयनासनैः पा
नभूमिर्वह्निं विनापि प्रदीप्तेवोपलक्ष्यते १८ बहुप्रकारैः बहूपादानभेदैस्तत्तद्वयविविधैः विविधरसवद्भिः वरसं

हारनूपुरकेयूरैरपविद्धैर्महाधनैः पानभाजनविक्षिप्तैः फलैश्च विविधैरपि कृतपुष्पो
पहारा भूरधिकां पुष्यति श्रियम् १७ तत्र तत्र च विन्यस्तैः सुश्लिष्टैः शयनासनैः १८ पा
नभूमिर्विना वह्निं प्रदीप्तेवोपलक्ष्यते बहुप्रकारैर्विविधैर्वरसंस्कारसंस्कृतैः १९ मांसैः कु
शलसंपृक्तैः पानभूमिगतैः पृथक् दिव्याः प्रसन्ना विविधाः सुराः कृतसुरा अपि २० २०

स्कारेण श्रेष्ठसंस्कारकद्रव्ययोगेन संस्कृतैः १९ कुशलसंपृक्तैः निपुणपाचकपक्वैः मांसैः सहोपभोग्यमानगुणाः
सुरा ददर्श तत्र दिव्याः सुराः सुमद्रुमपनोसन्नवारुणीजातिजाः प्रसन्ना निष्कल्मषाः कृतसुराः शौण्डिकैरुत्पादिताः २०

कृतसुगन्धीतरसे दानाह प्राकेणासवेत्यादि प्राक्षीतोपादानेनासवः प्राकैणासवः मधूपादानो माध्वीकः माध्वीकाद्राक्षात
दुपादानको वा माध्वीकः मधूकपुष्पादिजः पुष्पासवः खर्जूरफलादिजः फलासवः वासचूर्णैः सुगन्धिद्रव्यचूर्णैः
सुघटा ग्रधिवासिताः कपिनादृष्टा इति शेषः २१ ग्रपभूमिवर्तीनि बहुधेदे प्रबुसंस्थितैर्मणिस्तैः संतताम्ना प्राभूमिः

प्राकेणासवमाध्वीकाः पुष्पासवफलासवाः वासचूर्णैश्च विविधैर्वासितास्तैः प्रपू
कपचक २१ संततानुगभूमिर्मिणीन्येर्नवहुसंस्थितैः २२ हिरण्मयैश्च कलशैर्भो
जनैः स्फाटिकैरपि जांबूनदमयैश्चान्यैः करकैरभिसंवृता २३ राजतेषु च कुंभेषु
जांबूनदमयेषु च पानभूमिं कपिस्तत्र ददर्श ह २४ सोऽपश्यच्छातकुंभानि
सीधोर्मणिमयानि च तानि तानि च पूर्णानि भाजनानि महाकपिः २५ २५ २५

गुगुभेरत्नर्द्धमेकान्वयं गुडुंभेगुभेरसैर्न्वयैः २३ राजहिरण्मयैरजतमयैः कलशैः स्फाटिकैर्भोजनैरपिजांबू
नदमयैः स्वर्णमयैरन्यैः करकैर्दीर्घैश्च संवृता गुगुभेरत्नन्वयः २३ राजतेषु जांबूनदमयेषु च कुंभेषु पानभूमिं
संभृत ग्रप्रासपानो भूमिस्तत्र कपिर्ददर्श २४ समहाकपिः शातकुंभानि मणिमयानि तानि तानि सीधोर्मधुस्य भाजना

[illegible] २५

क्वचिद्दध्यावशेषाणि दध्यवशिष्टपानानि क्वचित्पीतानि पीतासवानि क्वचिन्नैव च पीतानि पूर्णासवान्येव पा
नानि पानभाजनानि ददर्श २६ विभागशः इदममुकमिदममुकमिति विभागेन पप्रपन्न विचचार २७ क्व
चित्त्वभिन्नैरित्यादि मह योगेन तीयाप्रभिन्नैः कारकैः लोडितैर्घटैः सह संपक्वमाल्यानि स्फुल्लानि च प

क्वचिदर्धावशेषाणि क्वचित्पीतान्यशेषतः क्वचिन्नैव प्रपीतानि पानानि स ददर्श ह २६
क्वचिद्भक्ष्यांश्च विविधान् क्वचित्पानानि भागशः क्वचिदर्धावशेषाणि पश्यन्वै विचचा
रह २७ क्वचित्प्रभिन्नैः करकैः क्वचिदालोडितैर्घटैः क्वचित्संपृक्तमाल्यानि जला
नि च फलानि च २८ शयनान्यत्र नारीणां शून्यानि बहुधा पुनः परस्परं समाश्लिष्य
काश्चित्सुप्ता वराङ्गनाः २९ क्वचिच्च वस्त्रमन्यस्या अपहृत्योपगुह्य च उपगम्याबला
सुप्ता निद्राबलपराजिता ३० तासामुच्छ्वासवातेन वस्त्रं माल्यं च गात्रजम् नात्यर्थं स्पंद
ते चित्रं प्राप्य मंदमिवानिलम् ३१

प्रपन्नविचचारेति पूर्वेणान्वयः २८ शून्यानि पति शून्यानि ग्वत्तए
परस्परं
परस्परं समाश्लिष्येति २९ स्वहस्तवस्त्रा गृहीत्वोपगूह्य श्वशा ... उपगम्य तत्क्षेत्र स्थाने प्राप्य निद्राबलेन परा
जिताऽबला सुप्ता तां च पप्रपन्न विचचारेति संबंधः ३० गात्रजं गात्रस्थं ३१

१४ यथापानभूमितोपि वहिः गत्वा तत्रस्थिते पुष्पके प्रकृतिकालरवनिर्गमकालेपि बहुगन्धो वायुरनुत्रिप्रख्यानुभूतार
स्याहचंदनस्य चेत्यादि सार्धश्लोकद्वयमेकान्वयं सीधुमधुमारुत स्नंदनादेः स्नानानां चंदनानां स्नानार्हचंद
नानां धूपानां गन्धाधिवासधूपानां च विविधं गन्धमुद्वहन्प्रववौ १प्रवृत्तः सुरभिः घ्राणतर्पणः गन्धो विमानेम्

चंदनस्य च शीतस्य सीधोर्मधुरसस्य च विविधस्य च माल्यस्य पुष्पस्य विविधस्य च बहुधा
मारुतस्तस्य गंधं विविधमुद्वहन् ३२ स्नानानां चंदनानां चंदनानां च धूपानां चैव मूर्छितः
प्रववौ सुरभिर्गन्धो विमाने पुष्पके तदा ३३ श्यामावदातास्तत्रान्याः काश्चित्कृष्णा वराङ्गनाः
काश्चित्कांचनवर्णाङ्ग्यः प्रमदा राक्षसालये ३४ तासां निद्रावशत्वाच्च मदनेन विमूर्छितम्
पद्मिनीनां प्रसुप्तानां रूपमासीद्यथैव हि ३५ एवं सर्वमशेषेण रावणान्तःपुरं कपिः दद
र्श सुमहातेजा न ददर्श च जानकीम् ३६

मूर्छितो व्याप्त इति सर्वे घः ३२ ३३ तत्रान्याः काश्चित् श्यामा
श्यामावदाताः श्वेताः कृष्णाः काश्चित्कृष्णाः काश्चित्कांचनवर्णाङ्ग्यः प्रमदास्ताः सर्वत्र सुप्ता इति शेषः ३४ निद्रा
वशत्वात् मदनेन तद्धेतुकरत्या च मूर्छितं क्रान्तं तासां रूपं प्रसुप्तानां रात्रौ मुकुलितानां पद्मिनीनां यथा रूपं रमणीयं त
थैवासीदित्यर्थः ३५ एवं प्रकारेण सर्वं रावणान्तःपुरमशेषेण प्रतिव्यक्त्या ददर्श जानकीं तु न ददर्श ३६ ॥

रा०वा० सुं० ततो निरीक्षमाणानंतरं नेक्षेत नग्नां परस्त्रियमिति शास्त्रश्रवणादिति शेषः तदेवाह धर्मेति धर्मलोपनिमित्तं यत्साध्वसं भयं
५८ तेन शंकितो भीत इत्यर्थः ३७ धर्मलोपं दर्शयति परदारेति परदारावरोधस्य परदाररूपांतःपुरस्य प्रसुप्तस्य तत्समये वस्ते-
नान्ताविपर्यासेन नग्नशायस्य निरीक्षणमिदमत्यर्थं मम धर्मलोपं करिष्यतीति संबंधः ३८ मे दृष्टिः कदाचिदपि परदाराणां वि-

निरीक्षमाणश्च ततस्ताः स्त्रियः स महाकपिः जगाम महतीं शंकां धर्मसाध्वसशंकितः ३७ पर-
दारावरोधस्य प्रसुप्तस्य निरीक्षणम् इदं खलु ममात्यर्थं धर्मलोपं करिष्यति ३८ न हि मे परदा-
राणां दृष्टिर्विषयवर्तिनी अयं चात्र मया दृष्टः परदारपरिग्रहः ३९ तस्य प्रादुरभूच्चिंता
पुनरन्या मनस्विनः निश्चितैकांतचित्तस्य कार्यनिश्चयदर्शिनी ४० ४० ४० ४०

षयवर्तिनी न हि परदारसंबंधिविषयप्राणन हि तदा अयं परदाररूपपरिग्रहो दृष्टः तादृशादर्शनमपि धर्मलोपका-
रीति भावः ३९ अथ पुनर्विचारे तत्तदलोपबुद्धिरप्युत्पन्नेत्याह तस्येति निश्चितैकांतचित्तस्य निश्चितैकरूपचित्त-
स्य तस्य मनस्विनः पुनरन्या पूर्वचिंताविरोधिनी चिंता कार्यदर्शिनी कर्तव्याकर्तव्यनिर्णायतमयी प्रादुरभूत् ४०
रा०म०
५८

तोचिंतामभिनयति काममिति मयासर्वाविश्वस्ताइतरालोकनशंकारहिताराणवणास्त्रियः कामंयथेच्छं दृष्टाश्च
थापिमेमनसः किंचिद्वैकृत्यंस्वल्पोपिविकारोनोपपद्यतेनप्राप्नोति ४१ ततःकिंतत्राहमनोहीति शुभाशुभा
स्ववस्थासुपुण्यपापकर्मसु इंद्रियाणांप्रवर्त्तनेमनोहेतुः तच्चमेमनः सुव्यवस्थितंपरदारेषुनरागवत् ४२

कामंदृष्टामयासर्वाविश्वस्तारावणस्त्रियः नतुमेमनसःकिंचिद्वैकृत्यमुपपद्यते ४१ म
नोहिहेतुःसर्वेषामिंद्रियाणांप्रवर्तते शुभाशुभास्ववस्थासुतच्चमेसुव्यवस्थितम् ४२
नान्यत्रहिमयाशक्यावैदेहीपरिमार्गितुम् स्त्रियोहिस्त्रीषुदृश्यंतेस्त्रियःसंपरिमार्गणे
४३ यस्यसत्वस्ययायोनिस्तस्यांतत्परिमार्ग्यते नशक्यंप्रमदानष्टामृगीषुपरिमार्गितुम्
४४ तदिदंमार्गितंतावच्छुद्धेनमनसामया रावणांतःपुरंसर्वंदृश्यतेनचजानकी ४५

ननुपरदारदर्शनमपिपरिहरणीयंतत्राहनान्यत्रेति स्त्र्यन्यत्रस्त्रीव्यतिरिक्तेषुस्त्रियःपरिमार्गणेकर्तव्येस्त्रीष्वे
वहिस्त्रियोदृश्यंतेलोकैरितिशेषः ४३ सजातीयेष्वेवमार्गणंप्रसिद्धमित्याहयस्येति यस्यसत्वस्यप्राणिनःया
योनिःसमानजातिः तस्यांतत्परिमार्ग्यतेलोकइतिशेषः तस्मैवोपपत्तिमाहनशक्यमिति ४४ ४५

उपरिष्टात्खेगच्छता स्वशरीरेणोवगाढया सागरे ततः प्रविष्टया छायया प्रतिबिंबेन चैकाकारः सन् सागरे मारुताविष्टा वायुप्रेरिता नौरिवासीत् नौश्चोपरिविद्यमानपदार्थेन सह सागरे वायुवशाद्वेगेनत्वं च चलागच्छतीति तदुपमा ६७ स तु समुद्रः सोन्मा

उपरिष्टाच्छरीरेण छायया चावगाढया सागरे मारुताविष्टा नौरिवासीत्तदा कपिः ६७ यं यं देशं समुद्रस्य जगाम स महाकपिः स तु तस्यांगवेगेन सोन्माद इव लक्ष्यते ६८ सागरस्योर्मिजालानामुरसा शैलवर्ष्मणा अभिघ्नंस्तु महावेगः पुप्लुवे स महाकपिः ६९ कपिवातश्च बलवान्मेघवातश्च निर्गतः सागरं भीमनिर्ह्रादं कंपयामासतुर्भृशम् ७० विकर्षन्नूर्मिजालानि बृहंति लवणांभसि पुप्लुवे कपिशार्दूलो विकिरन्निव रोदसी ७१ मेरुमंदरसंकाशानुद्धतान्स महार्णवे अत्यक्रामन्महावेगस्तरंगान्गणयन्निव ७२

द इव सा यस्मात् इव लक्ष्यते भ्रमणफेनजलोद्गमनघोषादिमत्वादियमुपमा ६८ शैलवर्ष्मणा शैलसदृशेन वर्ष्म देहप्रमाणयोरिति कोशः अनेन सागरोर्मीणामसुन्नतत्वं सूचितं ६९ कपिवातः कपिनोत्थापितो वातः मेघमंडलगो वातः ७० रोदसी द्यावापृथिव्यौ विकर[illegible]न्निव पर्यक्षिपन्निव ७१ अतीत्याती अत्यगमनात् गणयन्नि

४६ अपक्रम्य गवाक्षात् ततः बहिः कस्मात् इति प्रोक्तः ४७ तां सीतामन्यत्र विचेतुं प्रचक्रमे ४८ इत्येकादशः सर्गः ११ अ
थ बहुदुःखचिंताकुलोऽन्विष्य मे वपुनः पुनरन्वेषयति स्मे साहसत स्येति तस्य भवनस्य रावणस्य मध्ये संस्थितः

देवगंधर्वकन्याश्च नागकन्याश्च वीर्यवान् ॥ अवेक्षमाणो हनुमान्नैवापश्यत जा
नकीम् ४६ तामपश्यन्कपिस्तत्र पश्यंश्चान्या वरस्त्रियः ॥ अपक्रम्य तदा वीरः प्रध्या
तुमुपचक्रमे ४७ स भूयः सर्वतः श्रीमान्मारुतिर्यत्नमास्थितः ॥ आपानभूमिमुत्सृज्य तां
विचेतुं प्रचक्रमे ४८ ॥ हरिः ॐ इत्यार्षे रामायणे वाल्मीकीये सुंदरकांडे एकादशः सर्गः ११ ॥
स तस्य मध्ये भवनस्य संस्थितो लतागृहांश्चित्रगृहान्निशागृहान् ॥ जगाम सीतां प्रति दर्श
नोत्सुको न चैव तां पश्यति चारुदर्शनाम् १ स चिंतयामास ततो महाकपिः प्रियामपश्य
न्रघुनंदनस्य ध्रुवं न सीता ध्रियते यथा न मे विचिन्वतो दर्शनमेति मैथिली २ २ २ २

सीतां प्रति दर्शनोत्सुकः स हनुमान् लतापिहितगृहान् चित्रगृहान् रात्रिनिवासयोग्यगृहान् विचेतुं जगाम तां चारु
दर्शनां न चैव पश्यति नैवापश्यदित्यर्थः १ जानकीं विचिन्वतो मे दर्शनं यथा यस्मान्नैति तस्मान्न ध्रियते न जीव

स्वशीलेन पातिव्रत्येन रक्षिता तामपि सती इत्यार्थ्यपथे सन्मार्गे स्थिता सा वाला प्रतिदुष्टमति दुष्टं कर्म यस्य तेन सकलसज्जना-
नर्थकारिणा राक्षसानां प्रवरेण रावणेन हता भवेन्नूनम् ३ विरूपाणि न्यूनाधिकानि रूपाणि शरीराणि यासां ता विरूपरूपाः ताः वि-
कृताः विकृतवेषाः विवर्चसो निस्तेजस्काः महाननाः इति विशालमुखाः दीर्घाणि विरूपाणि दर्शनानि च दृष्टि-

सा राक्षसानां प्रवरेण वाला स्वशीलसंरक्षणतत्परा सती ॥ एनेन नूनं प्रतिदुष्टकर्मणा हता भवेदा-
र्यपथे परे स्थिता ३ विरूपरूपा विकृता विवर्चसो महानना दीर्घविरूपदर्शनाः समीक्ष्य ता रा-
क्षसराजयोषितो भयाद्धि नष्टा जनकेश्वरात्मजा ४ सीतामदृष्ट्वा ह्यनवाप्य पौरुषं विहृत्य का-
लं सह वानरैश्चिरम् न मेऽस्ति सुग्रीवसमीपगा गतिः सुतीक्ष्णदण्डो बलवांश्च वानरः ५ दृष्टमं-
तः पुरं सर्वं दृष्टा रावणयोषिताः न सीता दृश्यते साध्वी वृथा जातो मम श्रमः ६

यासां ताः राक्षसराजयोषितः समीक्ष्य भयात् जनकेश्वरात्मजा विनष्टा नूनं ४ पौरुषं समुद्रलंघनरूप पराक्रमं सा-
ध्यप्रयोजनं कालं विहृत्य सुग्रीवकृतं कालमतिक्रम्य सुग्रीवस्य समीपं गम्यते यया सा गतिः मार्गो नास्ति तत्र हेतुः सुता-
क्ष्णेति ५६

रा०वा०सुं०
५६

मातुःसुग्रीवसमीपगमने जांबवदादिसमीपगमनमपि दुर्लभमित्याह किन्त्विति किन्नु वक्ष्यंतीति त्रिंतो कृत्वा पुनर्विन्वार्य
यद्गतं क्ष्येतत्त्वयमेवानुवदति गत्वेत्यादि वदस्व इति वक्ष्यंतीत्यन्वयः ७ किं प्रवक्ष्यामितान्यतीतिप्रोक्षः नाक्रमपीत्यर्थः
यदेवमतोध्रुवमितिति कालस्य सुग्रीवकल्पितस्य व्यतिवर्तते प्रतिक्रमे ध्रुवं प्रायमुपेष्यंतिप्रायोपवेशनेन प्राणां

किंनुमां वानराः सर्वेगतं वक्ष्यंतिसंगताः गत्वातत्रत्वयावीर किं कृतं तद्वदस्वनः ७ अदृष्ट्वाकिं
प्रवक्ष्यामितामहंजनकात्मजाम् ध्रुवंप्रायमुपेष्यंतिकालस्यव्यतिवर्तने ८ किं वावक्ष्यति
वृद्धश्चजांबवानंगदश्चसः गतंपारंसमुद्रस्यवानराश्चसमागताः ९ अनिर्वेदः [illegible]
श्रियोमूलमनिर्वेदः परंसुखम् भूयस्तत्रविचेष्यामिनयत्रविचयःकृतः १० अनिर्वेदोहिसत
तंसर्वार्थेषुप्रवर्तकः करोतिसफलंजंतोः कर्मयत्तत्करोतिसः ११

स्यन्तीत्यर्थः ८ किं वा वक्ष्यति
मोऽधिकरिष्यतीत्यर्थः समागतामिलिता अन्ये वानराश्च धिक्करिष्यंति ९ एवं त्वरामात्रे निर्विद्य पुनरुत्साहमवलंब्या
ह अनिर्वेद इति अनिर्वेदः अखेदबुद्धिराहित्यं उत्साह इत्यर्थः १० यत्कर्म स करोति तज्जंतोः कर्म अनिर्वेदः सफलं करो
तीत्यर्थः ११ रा०सुं०
५६

तस्मादनिर्वेदकरं उत्साहजनं यत्नं चित्तस्थैर्यं चेष्टे करोमि १२ १३ निष्कुटान्तररथ्याः गृहारामस्थगता वीथीः विमानानि पुष्पकादीनि १४ भूमीगृहान् भूविलगृहान् चैत्यगृहान् चैत्यमंडपान् गृहातिगृहकान् गृहानतीत्यान्ति दूरे

तस्मादनिर्वेदकृतं यत्नं चेष्टेहमुत्तमम् अदृष्टांश्च विचेष्यामि देशान् रावणपालितान् १२ आपानशालाविचितास्तथा पुष्पगृहाणि च चित्रशालाश्च विचिता भूयः क्रीडागृहाणि च १३ निष्कुटान्तररथ्याश्च विमानानि च सर्वशः इति संचिंत्य भूयोपि विचेतुमुपचक्रमे १४ भूमीगृहांश्चैत्यगृहान् गृहातिगृहकानपि उत्पतन्निपतंश्चापि तिष्ठन् गच्छन् पुनः क्वचित् १५ अपावृण्वंश्च द्वाराणि कपाटान्यवघट्टयन् प्रविशन्निष्पतंश्चापि प्रपतन्नुत्पतन्नपि सर्वमप्यवकाशं स विचचार महाकपिः १६

स्वैरविहारार्थं निर्मितगृहान् विचेतुमुपचक्रमे इत्यनुकर्षः उत्पतन् उन्नतमारोहन् निपतन् ततोवरोहन् १५ अवघट्टयन् प्रपातयन् निष्पतन् निर्गच्छन् प्रपतन् विलगृहादीनि चाल्यानानि प्रथमम् अवरुह्य ततः समुद्गच्छन् उत्पतन् उन्नतमारोहन् १६ १६

रा० वा० सुं० ५७

यं स कपिर्न जगाम सतादृशस्थानं चतुरंगुलमात्रोप्यवकाशो न विद्यते १७ प्राकारांतरवीथ्यः प्राकारमध्यवर्तिमार्गाः कुमारा
दिगृहवीथ्यः वेदिकाश्चैत्यसंश्रयाः चतुष्पथवृक्षाधारभूतवेदिकाः श्वभ्राः गर्ताः १८ १९ राघवनंदिनी रामप्रिया

चतुरंगुलमात्रोपि नावकाशः स विद्यते रावणांतःपुरे तस्मिन्यं कपिर्न जगाम सः १७ प्रा
कारांतरवीथ्यश्च वेदिकाश्चैत्यसंश्रयाः श्वभ्राश्च पुष्करिण्यश्च सर्वं तेनावलोकित
म् १८ राक्षस्यो विविधाकारा विरूपा विकृतास्तथा दृष्टा हनूमता तत्र न तु सा जनकात्म
जा १९ रूपेणाप्रतिमा लोके परा विद्याधरस्त्रियः दृष्टा हनूमता तत्र न तु राघवनंदिनी २०
नागकन्या वरारोहाः पूर्णचंद्रनिभाननाः दृष्टा हनूमता तत्र न तु सा जनकात्मजा २१
प्रमथ्य राक्षसेंद्रेण नागकन्या बलाद्धृताः दृष्टा हनूमता तत्र न सा जनकनंदिनी २२
सोपश्यंस्तां महाबाहुः पश्यंश्चान्या वरस्त्रियः विषसाद महाबाहुर्हनूमान्मारुतात्मजः
२३ उद्योगं वानरेंद्राणां प्लवनं सागरस्य च व्यर्थं वीक्ष्यानिलसुतश्चिंतां पुनरुपागतः
२४ अवतीर्य विमानाच्च हनूमान्मारुतात्मजः चिंतामुपजगामाथ शोकोपहतचेतनः २५

के

रा म० ५७

२० २१ प्रमथ्य प्रसह्य नागकन्या बलाद्धृता रावणेन वेदीकृता तां तां तथा हरात् पूर्वं तु दृष्टां नागकन्यां तां तथा हृतां मत्वा न पुनरुक्तिः २४ २५

इति द्वादशः सर्गः॥ १२ स वेगवान्हनूमान् विमानात्प्राकारे संक्रम्य घनांतरे विद्युदिवासीदित्यन्वयः १ अनेनैव प्रमेयेन प्राकार
इंद्रनीलाद्भुतरत्नवाम्प्रते १ रावणस्य निवेशनात् गृहात्संपरिक्रम्य पुनः परिक्रमतो न दृष्ट्वा जानकीं चादृष्ट्वा अब्रवी

हरिः ॐ इत्यार्षे रामायणे वाल्मीकीये सुंदरकांडे द्वादशः सर्गः॥ १२॥ विमानात्तु ससंक्रम्य
प्राकारं हरियूथपः हनूमान्वेगवानासीद्यथा विद्युद्घनांतरे १ संपरिक्रम्य हनुमान्रावणस्य
निवेशनात् अदृष्ट्वा जानकीं सीतामब्रवीद्वचनं कपिः २ भूयिष्ठं लोडिता लंका रामस्य च
रता प्रियम् नहि पश्यामि वैदेहीं सीतां सर्वांगशोभनाम् ३ पल्वलानि तटाकानि सरांसि सरित
स्तथा नद्योनूपवनांताश्च दुर्गाश्च धरणीधराः लोडिता वसुधा सर्वा न च पश्यामि जा
नकीम् ४ इह संपातिना सीता रावणस्य निवेशने आख्याता गृध्रराजेन न च पश्यामि ताम
हम् ५

त्वयमिति शेषः २ भूयिष्ठं लोडिता बहुशोन्विष्टाः ३ सरितः क्षुद्रनद्यः अनूपवनांताः जलप्रचुरवनप्रदेशाः ४ नन्व
नुपलब्धिश्रमात् सीताया अनिश्चयपराजयात्त्वत आह इहेति रावणनिवेशने आख्याता तत्र च सम्पातिना दृष्टेत्यनेन किमिदमिति ५

बहुप्रकारं चिंतयति किं न्विति सीता रामं अयं कृतिजत्वेनायोनिजा वैदेही जगत्प्रसिद्धविदेहवंशसंकाशा मैथिली सदाचारयुक्त
सत्त्वरूपा वा सुन्दरा सर्वधर्मोत्कर्षवती जनकात्मजा पूर्णवित्तस्त्री विवशा प्राप्य विरा वणोदग्धचारिणा उपतिष्ठेत प्राप्नुयात् किंतु
न प्राप्नुयादेवेत्यर्थः ६ तोर्थ्यं दर्शनं कुतस्तत्र हेतुं तु संक्षेते क्षिप्रमिति रामबाणानां रामबाणेभ्यः विभ्यतः कपान्द्र हेतिश्रो

किंनुसीताथवैदेहीमैथिलीजनकात्मजा उपतिष्ठेतविवशारावणंदुष्टचारिणम् ६ क्षिप्रमु
त्पततोमन्येसीतामादायरक्षसः बिभ्यतोरामबाणानामंतरापतिताभवेत् ७ अथवाह्रियमा
णायाःपथिसिद्धनिषेविते मन्येपतितमार्यायाहृदयंप्रेक्ष्यसागरम् ८ रावणस्योरुवेगेनभुजा
भ्यांपीडितेनच तयामन्येविशालाक्ष्यात्यक्तंजीवितमार्यया ९ उपर्युपरिसानूनंसागरंक्रम
तस्तदाविचेष्टमानापतितासमुद्रेजनकात्मजा १० अहोक्षुद्रेणचानेनरक्षंतीशीलमात्म
नः अबंधुर्भक्षितासीतारावणेनतपस्विनी ११ षः ७ सागरं प्रेक्ष्य भीतमिति शेषः हृदयं सागरे पतितमि
ति मन्ये हृदयस्य भयस्थानत्वेन तन्मूलतया तच्छरीरं लक्ष्यते यद्वा हृदये तितं मन उत्क्रान्तं मन उत्क्रमणात् सैव मरणात्वात्
८ पीडितेन पीडनेन ९ उपर्युपरि सागरस्य सन्निहितोपरिप्रदेशे विचेष्टमाना विलुठन्ती १० अहो इति खेदः ११

ननु बहुभक्षणासामर्थ्यादनुगमनाभावाच्च तेन भक्षणमसंभावितमत आह अथवेति दुष्टभावाभिः सापत्न्यप्रयुक्तक्रोधाभिः न्यस्तदेहा सती देहाभविष्यतीभवेदित्यर्थः १२ १३ १४ निहिता मन्ये हा दोस्यापिताला त्वम्पते मुहुर्मुहुः प्लवयति १५ पीड्यमानापि सीता रावणस्य वशं न व्रजेदित्याह जनकस्येति १६ ननु किमेतावद्दृशाविचारेणागत्वाय

अथवा राक्षसेन्द्रस्य पत्नीभिरसितेक्षणा । अदुष्टा दुष्टभावाभिर्भक्षिता सा भविष्यति ॥ १२ ॥ संपूर्णचन्द्रप्रतिमं पद्मपत्रनिभेक्षणम् । रामस्य ध्यायती वक्त्रं पञ्चत्वं कृपणा गता ॥ १३ ॥ हा राम लक्ष्मणेत्येवं हायोध्येति च मैथिली । विलप्य बहु वैदेही न्यस्तदेहा भविष्यति ॥ १४ ॥ अथवा निहिता मन्ये रावणस्य निवेशने । नूनं लालप्यते मेदा पंजरस्थेव सारिका ॥ १५ ॥ जनकस्य कुले जाता रामपत्नी सुमध्यमा । कथमुत्पलपत्राक्षी रावणस्य वशं व्रजेत् ॥ १६ ॥ विनष्टां वा प्रनष्टां वा मृतां वा जनकात्मजाम् । रामस्य प्रियभार्यस्य न निवेदयितुं क्षमम् ॥ १७ ॥

एवं तर्हि निवेद्यतामत आह विनष्टामित्यादि अस्य कुचिद्वर्तत इति शेषः प्रनष्टादर्शनेति धात्वन्तरस्मरणाददृष्टामतीं कुचिदस्तीति वक्तुमक्षमं सर्वतोऽन्विष्टत्वात् प्रनष्टामगत्वेन च मदर्शनं यस्याः सा दृष्टेत्यर्थः एतदपि न वक्तुं क्षमं स्वयं मदृष्टत्वात् एवं मृतेत्यपि वक्तुं न शक्यं तासाधकादृष्टतरप्रमाणाभावात् तस्माद्रामस्याग्रे किमपि वक्तुं न शक्नोमीत्यर्थः १७

रा०वा०सुं० ५९

तदेव स्पष्टयति निवेद्यमान इति न दृष्टेति निवेद्यमाने दोषः वक्ष्यमाणरामप्राणत्यागरूपः अनिवेदने स्वामिवंचनारूपो दोषः तस्मान्निवेदनानिवेदनरूपमुभयमपि विषमं दुरनुष्ठेयं प्रतिभाति १८ तदनन्तरं किं विधाक्यमस्मिल्लिति अस्मिन्का

निवेद्यमाने दोषः स्याद्दोषः स्यादनिवेदने । कथं नु खलु कर्तव्यं विषमं प्रतिभाति मे ॥ १८ ॥ अस्मिन्नेवंगते कार्ये प्राप्ते काले क्षमे च किम् । भवेदिति मतं भूयो हनूमान्प्रविचारयन् ॥ १९ ॥ यदि सीतामदृष्ट्वाहं वानरेन्द्रपुरीमितः । गमिष्यामि ततः को मे पुरुषार्थो भविष्यति ॥ २० ॥ ममेदं लङ्घनं व्यर्थं सागरस्य भविष्यति । प्रवेशश्चैव लङ्कायां राक्षसानां च दर्शनम् ॥ २१ ॥ किं वा वक्ष्यति सुग्रीवो हरयो वापि संगताः । किष्किन्धामनुसंप्राप्तं तौ वा दशरथात्मजौ ॥ २२ ॥ गत्वा तु यदि काकुत्स्थं वक्ष्यामि परुषं वचः । न दृष्टेति मया सीता ततस्त्यक्ष्यति जीवितम् ॥ २३ ॥

र्ये एवं गते एवं विषमत्वं प्राप्ते सति प्राप्तकाले कालोचितं किं स्यात् मे किं वक्तुं युक्तं भवेदिति भूयो मतं पक्षं विचारयन्नभूदिति शेषः १९ विचारमेवाह यदीत्यादिना को भविष्यति न कोपीत्यर्थः २० २१ किं वा वक्ष्यतीत्यत्र साध्येव वक्ष्यतीत्यर्थः २२ न दृष्टेत्यप्रियं यदि वक्ष्यामि ततस्त्यक्ष्यत्येवेति तरं २३

रा०म० ५९

परुषं कर्णकठोरं श्रुत एव दारुणं भयंकरं तीक्ष्णं मर्महृत् क्रूरमसुखे इंद्रियाणां पातनं संतापकं सीतानिमित्तं सीताविषये रामः २४

परुषं दारुणं तीक्ष्णं क्रूरमिंद्रियपातनम् सीतानिमित्तं दुर्वाक्यं श्रुत्वा स न भविष्यति २४ ते
तु कृच्छ्रगतं दृष्ट्वा पंचत्वगतमानसम् भृशानुरक्तो मेधावी न भविष्यति लक्ष्मणः २५ वि
नष्टौ भ्रातरौ श्रुत्वा भरतोपि मरिष्यति भरतं च मृतं दृष्ट्वा शत्रुघ्नो न भविष्यति २६ पुत्रा
न्मृतान् समीक्ष्याथ न भविष्यंति मातरः कौशल्या च सुमित्रा च कैकेयी च न संशयः २७
कृतज्ञः सत्यसंधश्च सुग्रीवः प्लवगाधिपः रामं तथागतं दृष्ट्वा ततस्त्यक्ष्यति जीवितम् २८
दुर्मना व्यथिता दीना निरानंदा तपस्विनी पीडिता भर्तृशोकेन रुमा त्यक्ष्यति जीवितम् २९
वालिजेन तु दुःखेन पीडिता शोककर्शिता पंचत्वमागता राज्ञी तारापि न भविष्यति ३०
मातापित्रोर्विनाशेन सुग्रीवव्यसनेन च कुमारोप्यंगदस्तस्माद्विजहिष्यति जीवितम् ३१

पंचत्वगतमानसं मरणे कृतनिश्चयं २५ २६ २७ ततः दिवसस्य एमदर्शनात् २८ २९ वालिमरणजेन पंचत्वमागता पंचत्वं
प्राप्तुं निश्चयवती ३० तस्मात्तदनंतरम् ३१

रा०व्या०सुं० तस्यवेगेनसमुद्धूतं उर्ध्वंक्षिप्तंयत्तत्एवसजलदंजलदसहचरंमेघमंडलपर्यंतमूर्ध्वंगतंअंबरस्थंजलमाततंविततंशारदाभ्रमिवशार
१
न्मेघखंडवशोभतइत्यादितिभावः ७३ तिमयोमहामत्स्याः नक्राःग्राहाः झषामकराः विवृताःवेगाज्जलोत्सारणेनव्यक्तदेहाः वस्त्रा
पकर्षणेनवस्त्रापहारेणशरीराणिशरीरिणामिवयथाइव ७४ ७५ छायाप्रमाणवर्णनेनतच्छरीरप्रमाणमपिवर्णितप्रायं स्वयंमाध्या

तस्यवेगसमुद्धूतं जलंसजलदंतदा अंबरस्थंविबभ्राजेशारदाभ्रमिवाततम् ७३ तिमिनक्र
झषाः कूर्मा दृश्यंतेविवृतास्तदा वस्त्रापकर्षणेनेवशरीराणिशरीरिणाम् ७४ क्रममाणं
समीक्ष्याथभुजंगाःसागरालयाः व्योम्नितंकपिशार्दूलंसुपर्णमिवमेनिरे ७५ दशयोजन
विस्तीर्णात्रिंशद्योजनमायता छायावानरसिंहस्यजलेचारुतराभवत् ७६ श्वेताभ्रघन
राजीववायुपुत्रानुगामिनी तस्यसाशुशुभेछायापतितालवणांभसि ७७ शुशुभेसमहा
तेजामहाकायोमहाकपिः वायुमार्गेनिरालंबेपक्षवानिवपर्वतः ७८ येनासौयातिब
लवान्वेगेनकपिकुंजरः तेनमार्गेणसहसाद्रोणीकृतइवार्णवः ७९

ह्निकीछाया ७६ श्वेताभ्रघन
राजीवश्वेतश्वेतशब्देनस्वच्छतोच्यते घनशब्देनसांद्रता तथाचनिर्मलाभ्रसांद्रपंक्तिरिवेत्यर्थः ७७ ७८ द्रोणीहर्म्यादौजले
निर्गमकाष्ठयंत्रं तज्जलधारायुक्तइवकृतोद्रोणीकृतःमेघमुक्तदाधारेनतेम्योजलस्रावणादितिभावः ७९

राम०७

३२ यशस्विना कपिना येन सान्त्वादिभिर्लालिताः प्राणांस्त्यक्ष्यन्तीति ३३ निरोधेषु गुहादिसंवृतदेशेषु ३४ सपुत्रदारा इत्यादेः कपिकुं-

भर्तृजेन तु दुःखेन स्वभिभूता वनौकसः शिरांस्यभिहनिष्यन्ति तलैर्मुष्टिभिरेव च ३० सान्त्वेना-
नुप्रदानेन मानेन च यशस्विना लालिताः कपिना येन प्राणांस्त्यक्ष्यन्ति वानराः ३१ न व-
नेषु न शैलेषु न निरोधेषु वा पुनः क्रीडामनुभविष्यन्ति समेत्य कपिकुञ्जराः ३२ सपुत्रदा-
राः सामात्या भर्तृव्यसनपीडिताः शैलाग्रेभ्यः पतिष्यन्ति समेत्य विषमेषु च ३३ विषमुद्बन्ध-
ने वापि प्रवेशं ज्वलनस्य वा उपवासमथो शस्त्रं प्रचरिष्यन्ति वानराः ३४ घोरमारोदनं मन्ये
गते मयि भविष्यति इक्ष्वाकुकुलनाशश्च नाशश्चैव वनौकसाम् ३५ सोऽहं नैव गमिष्या-
मि किष्किन्धां नगरीमितः न हि शक्ष्याम्यहं द्रष्टुं सुग्रीवं मैथिलीं विना ३६ मय्यगच्छति
चेहस्थे धर्मात्मानौ महारथौ आशया तौ धरिष्येते वानराश्च मनस्विनः ३७ ३७७

जरा इति विशेष्यं ३५ शस्त्रं शस्त्रघाते प्रचरिष्यन्ति करिष्यन्तीत्यर्थः ३६ आरोदनं आसमन्तादुद्रोदनं ३७ ३८ इहस्थो मय्य-
गच्छति गमनरहिते आशया सीतावृत्तान्तश्रवणप्रत्याशया धारयिष्यतः प्राणानिति शेषः ३७

हस्तादानः हस्तपतितफलादिग्राहकः तम्भोजीतियावत् एवंमुखादानोमुखपतितभोजीनियतोनियतेंद्रियः वृक्षमूलि
को वृक्षमूलनिवासी ४० अरण्यानीमुत्तमाग्निं ४१ उपविष्टस्यप्रायमुपविष्टस्यलिंगिनोलिंगेगोप्तारं ममस्यास्तीतिलिंगिन
मात्मानमित्यर्थः साधयिष्यतः शरीराद्विमोचयिष्यतः श्वापदानिश्वापदाः व्याघ्रादयः ४२ नचात्म

हस्तादानोमुखादानोनियतोवृक्षमूलिकः वानप्रस्थोभविष्याम्यस्मिन् पुण्याजनकात्मजाम्
४० सागरानूपजेदेशेबहुमूलफलोदके चितिंकृत्वाप्रवेक्ष्यामिसमिद्धमरणीसुतम् ४१
उपविष्टस्यवाततस्यलिंगिनेसाधयिष्यतः शरीरंभक्षयिष्यंतिवायसाःश्वापदानिच ४२
इदमप्यृषिभिर्दृष्टंनिर्याणमितिमेमतिः सम्परायःप्रवेक्ष्यामिनचेयरूपाभिजानकीम् ४३
सुजातमूलासुभगाकीर्तिमालायशस्विनी प्रभग्नाचिरराज्यायममसीतामपस्पृतः ४४

स्यादोषोपीत्याह इदमितिवक्ष्यमाणंनिर्याणंमरणंसम्परायःयुद्धः ४३ सीतामपस्पृतोममयशस्विनीयशाः सेयादिका
मतस्यख्यातिर्यशः सुजातमूलासुजातकारणावतीकीर्तिरूपामालाजीवतः साकीर्तिः चिरराज्येस्वयंपंचिरायेस
र्थः चिरायभग्नाःस्या स्यंतिकलंकितेत्यर्थः ४४

रा० ती० सुं०
६१

श्यामस्यापाणायेक्षणया तापसः एष एव ज्यायानित्याह तापस इति तापसः जटाकाषायादिचिन्हो यतिः वा शब्दोऽवधारणे ४५
गत्वा दृष्ट्वागमनेनिश्चितमासन्नदोषमाह यदीति नभविष्यतितजीविष्यति ४६ एवमागमनेनिश्चितेमरणे जीवितयोः
किंश्रेयस्त्वत्राह विनाश इति विनाशे चिरंमदागमनेसीताविनाशाश्चित्वयेन प्रागुक्ता बहवो दोषाः स्युः जीवंस्तुममा

तापसो वा भविष्यामि नियतो वृक्षमूलिकः नेतः प्रतिगमिष्यामि तामदृष्ट्वासितेक्षणाम्
४५ यदितः प्रतिगच्छामि सीतामनधिगम्य ताम् अंगदः सहितैः सर्वैर्वानरैर्नभविष्यति ४६
विनाशे बहवो दोषा जीवन्प्राप्नोति भद्रकम् तस्मात्प्राणान्धरिष्यामि ध्रुवो जीवति संग
मः ४७ एवं बहुविधं दुःखं मनसा धारयन्मुहुः नाध्यगच्छत्तदा पारं शोकस्य कपिकुंजरः
४८ ततो विक्रममासाद्य धैर्यवान्कपिकुंजरः एवमेनं वा वधिष्यामि दशग्रीवं महाबलम्
कामपत्नी हृता येन प्रत्याचीर्णं भविष्यति ४९

त्वाबध्यमानानानाविधोपायाश्रयणेन भद्रकं प्राप्नो
ति तस्मात्प्राणान्धरिष्यामि यतो मयि जीवति सति संगमः सुवेसंगमो भगवतो रामभद्रस्य ध्रुवः संभावित इत्यर्थः
काक्वलिंगमत्रालंकारः ४७ कविवाक्यमेवमित्यादि ४८ कपिकुंजर इत्यस्य इति चिंतयामासेति शेषः ननु रावण
णवधेन किं साधितं स्यात्तत्राह प्रत्याचीर्णं विरनिर्यातनं कृतं भविष्यतीत्यर्थः ४९

रा० सुं०
६१

ननुमयाहतत्वादिदंवचोऽविश्वसनीयंस्यात्सीताऽन्वेषणेनरामदुःखानिवृत्तिस्थ्रेस्ततःपक्षांतरमप्यवेक्षितएवेसति तद्द्रष्टासोपिते
माप्यतत्स्याग्रायः ५० रावणस्यवध्यानयनेपिसीतोरक्षसाहन्यतेतितदःखोभयएवेस्ततःपक्षांतरंचिंतयामासप्रावासी

ग्रथचैनंसमुत्क्षिप्यउपर्युपरिसागरम् रामायोपहरिष्यामिपशुंपशुपतेरिव ५० इतिचिंतां
समापन्नःसीतामनधिगम्यताम् ध्यानशोकपरीतात्माचिंतयामासवानरः ५१ यावत्सीतांनप
श्यामिरामपत्नींयशस्विनीम् तावदेतांपुरींलंकांविचिनोमिपुनःपुनः ५२ संपातिवचना
च्चापिरामंयद्यानयाम्यहम् ग्रपश्यन्राघवोभार्यांनिर्दहेत्सर्ववानरान् ५३ इहैवनियता
हारोवत्स्यामिनियतेंद्रियः नमत्कृतेविनश्येयुःसर्वेतेनरवानराः ५४ ग्रशोकवनि
काचापिमहतीयंमहाद्रुमा इमामधिगमिष्यामिनहीयंविचितामया ५५ ५५ ५५

तामिति वर्तमानसामीप्येभविष्यतिलट् ५१ ५२ यदिपूर्वमेवसंपातिवचनप्रमाणेनरामोऽत्रानीयेत तदामहाश्र
माद्दःस्यादित्याहसंपातिवचनादिति ५३ तस्मादिहैवनियताहारोवत्स्यामिनविनश्येयुःसीतामदृष्ट्वामद्गमनानंतरमि
वेतिभावः ५४ ५५

तत्राप्य प्राप्तिशोकयादेवानुकूल्यं संपादयतीव सूनिति चादिष्टदेवान् ५६ तपस्विनेसिद्धीमिवतपः फलमिव: ५७ चिंतया विग्रथितानिसंवेष्ट्य निव्याकुलानि इंद्रियाणियस्यसः ५८ प्रतिसातेनमस्कारानुतिष्ठतिनमोस्तु राम्मायेत्ति ५९ ग्वसोकव

वसूनरुद्रांस्तथादित्यानश्विनौमरुतोपिच नमस्कृत्यागमिष्यामिरक्षसांशोकवर्धनः ५६
जित्वातुराक्षसान्देवीमिक्ष्वाकुकुलनंदिनीम् संप्रदास्यामिरामायसिद्धीमिवतपस्विने ५७
समुहूर्तमिवध्यात्वाचिंताविग्रथितेंद्रियः उदतिष्ठन्महावाहुर्हनूमान्मारुतात्मजः ५८
नमोस्तुरामायसलक्ष्मणायदेव्यैचतस्यैजनकात्मजायै नमोस्तुरुद्रेंद्रयमानिलेभ्यो
नमोस्तुचेदाग्निमरुद्गणेभ्यः ५९ सतुतेभ्योनमस्कृत्यसुग्रीवायचमारुतिः दिशःसर्वाः
समालोक्यसोशोकवनिकांगतः ६० सगत्वामनसापूर्वमशोकवनिकांशुभाम् उत्तरंचिं
तयामासवानरोमारुतात्मजः ६१ ध्रुवंतुरक्षोबहुलाभविष्यतिवनाकुला अशोकवनिका
पुण्यासर्वसंस्कारसंस्कृता ६२

निकांगतः मनसेति शो पः ६० मनसागत्वागंतुनिश्चित्यसेत्यर्थः उत्तरंगमनोत्तरकर्तव्य
कृत्यं ६१ चिंताहेतुं दर्शयति ध्रुवमितिरक्षोबहुलाराक्षसबहुलावनाकुलाकाननाबृ तासर्वसंस्कारैः खननसेकादिरूपकर्षसंस्का

रैः संस्कृताभविष्यति ६२

अत्राशो कवलिकापां विहिता नियुक्ताः विश्वात्मा वायुः नाति क्षोभं अपि तु कंपनपूर्वं नात्र संचरतीत्यर्थः ६३ एवंभूते प
देशे कथं गमनमित्याशंक्याह संक्षिप्त इति मयायमात्मा देहः रामार्थं एम प्रयोजनसिद्ध्यर्थं एवरतात्पार्थं एवकात् ह्रस्वत्वा
र्थं संक्षिप्तः अत्यल्पीकृतः एवं मया कार्यानुकूलो यत्नः कृतः कार्यसिद्धिं तु देवाः सर्षिगणास्त्विद्धा ददंति ६४ पुनः स

रक्षिताश्चात्र विहितास्ते न रक्षंति पादपान् भगवानपि विश्वात्मा नाति क्षोभं प्रवात्यसौ ६३
संक्षिप्तोयं मयात्मा च रामार्थे वानरस्य च सिद्धिं मे संविधास्यंति देवाः सर्षिगणास्त्विह ६४
ब्रह्मा स्वयंभूर्भगवान् देवाश्चैव तपस्विनः सिद्धिं मतिश्च वायुश्च पुरुहूतश्च वज्रभृत ६५
वरुणः पाशहस्तश्च सोमादित्यौ तथैव च अश्विनौ च महात्मानौ मरुतः सर्व एव च ६६
सिद्धिं सर्वाणि भूतानि भूतानां चैव यः प्रभुः दास्यंति मम ये चान्ये ह्यदृष्टाः पथिगोचराः ६७
तदुन्नसं पांडुरदंतमव्रणं शुचिस्मितं पद्मपलाशलोचनम् द्रक्ष्ये तदार्यावदनं कदान्वहं प्र
सन्नताराधिपतुल्यवर्चसम् ६८

ग्रीतमनाः कार्यसिद्धये स्मरति ब्रह्मेत्यादि देवा भगवद्वपवदेवाः तानेव
दर्शयति अश्विनि श्चेत्यादि सिद्धिं दिशंत्वित्यन्वयः ६५ ६६ भूतानां प्रभुः प्रजापतिः पथि गोचरा ये यांते पथिगोचराः मार्गव
र्त्तिनो दृष्टा अदृष्टाश्च ये ते पि सिद्धिं दास्यंति ६७ उन्नतानासापस्य तदुन्नसं अव्रणम् नघम् ६८

सुदारुणा त्वेष्यत्वं कृतवेषधारिणा एवशोनेति शेषः ६९ इति त्रयोदशः सर्गः १३ समहातेजाः मुहूर्तमिव कंचित्कालं ध्यात्वा उ
त्रिवनं मिथ्नितं तां सीतां मनसाधिगम्य ध्यात्वा तस्य रावणस्य वेश्मनः गृहात् प्राकारं वनप्राकारं अवप्लुतः उल्लंघितवान् प्राप्तः १ सतु
महाकपिः वसंतादौ वसंतादिसर्वर्तुषु सन्निहितैः पुष्पैः पुष्पिताग्रान् विविधान् द्रुमान् ददर्श २ भव्यान् मनुज्ञ फला

भुद्रेण हितेनेनन्द्र ग्रामस्मृतिना सुदारुणा त्वं कृतवेषधारिणा बलाभिभूता ह्यवला तपस्विनी
कथंन्दुमे दृष्टिपथेद्य साभवेत् ॥६९॥ इत्यार्षे रामायणे वाल्मीकीये सुंदरकांडे त्रयोदशः
सर्गः ॥१३॥ समुहूर्तमिव ध्यात्वा मनसा चाधिगम्य ताम् अवप्लुतो महातेजाः प्राकारं तस्य
वेश्मनः १ सतु संहृष्टसर्वांगः प्राकारस्थो महाकपिः पुष्पिताग्रान्वसंतादौ ददर्श विविधा
न द्रुमान् २ सालानशोकान् भव्यांश्च चंपकांश्च सुपुष्पितान् उद्दालकान्नागवृक्षांश्चू
तान्कपिमुखानपि ३ तथाम्रवणसंछन्नां लताशतसमावृतां ज्यामुक्त इव नाराचः पुप्लु
वे वृक्षवाटिकाम् ४ सप्रविश्य विचित्रां तां विहगैरभिनादितां राजतैः कांचनैश्चैव पादपैः सर्वतो

न नागवृक्षान् नागकेसरवृक्षान् कपिमुखान् कपिमुखाकारफलवतश्चूतान् ३ रामे रामस्यामुक्तो नाराचरव पुष्प
वाटिकां पुप्लुवे ४ सहनुमान्पुष्पवाटिकां प्रविश्य तां ददर्श विचित्रां विचित्रपर्यंतां राजतैः रजतादिवर्णैः ५५ ५५

चित्रकाननां चित्रद्रुमखंडां उदितादित्यसंकाशां प्रभयेति शेषः ६ पुष्पाण्युपगच्छंतीति पुष्पोपगाः पुष्पसंपन्नास्तैः फलो
पगैः फलसंपन्नैः ७ प्रहृष्टमनुजे प्रहृष्टजने काले वसंतादावित्यर्थः ८ राजपुत्रीमार्गमाणः सुखप्रसुप्तान्विहगान्बो

विहगैर्मृगसंघैश्च विचित्रां चित्रकाननाम् उदितादित्यसंकाशां ददर्श हनुमान्बली ६
वृतां नानाविधैर्वृक्षैः पुष्पोपगफलोपगैः कोकिलैर्भृंगराजैश्च मत्तैर्नित्यनिषेविताम् ७
प्रहृष्टमनुजे काले मृगपक्षिसमाकुलाम् मत्तबर्हिणसंघुष्टां नानाद्विजगणायुताम् ८
मार्गमाणो वरारोहां राजपुत्रीमनिंदिताम् सुखप्रसुप्तान्विहगान्बोधयामास वानरः ९ उत्प
तद्भिर्द्विजगणैः पक्षैः सालाः समाहताः अनेकवर्णा विविधा मुमुचुः पुष्पवृष्टयः १० पुष्पा
वकीर्णः शुशुभे हनुमान्मारुतात्मजः अशोकवनिकामध्ये यथा पुष्पमयो गिरिः ११ सर्वा
दिशोभिधावंतं वृक्षखंडगतं कपिम् दृष्ट्वा सर्वाणि भूतानि वसंत इति मेनिरे १२ वृक्षे
भ्यः पतितैः पुष्पैरवकीर्णा पृथग्विधैः रराज वसुधा तत्र प्रमदेव विभूषिता १३

धयामास शाखाचंक्रमणेनेति भावः ९ समाहताः सालाः वृक्षाः अनेकवर्णाः कुटसालत्रयप्रसरः पुष्पवृष्टयः पुष्पवृ
ष्टीः १० ११ वसंत इति मेनिरे इति अन्येष्विह वने अशोकमवेशत्वाद् संततार्थं वृक्षसंचारो वितर्कः पिरूपमास्थाय चरती
वि

रामायण सुं ३४

विप्रकंपिताः बहुकंपिताः १४ निर्धूतपत्रशिखराः शिखराण्यग्राणि येषां ते धूर्ता इव द्यूतधूर्ताः १५ १६ स्कंधमात्रस्य

रा० वा० सुं० आश्रयाः नतु पुष्पादीनां यत्र ते तथा अगमाः असेव्याः मारुतेनेव तत्सुतेन हनुमता विनिर्धुताः कंपिताः १७ मृदितवर्णि
६४

तरस्विना ते तरवस्तरसा विप्रकंपिताः कुसुमानि विचित्राणि ससृजुः कपिना तदा १४

निर्धूतपत्रशिखराः शीर्णपत्रफलद्रुमाः निक्षिप्तवस्त्राभरणा धूर्ता इव पराजिताः १५

हनूमता वेगवता कंपितास्ते नगोत्तमाः पुष्पपत्रफलान्याशु मुमुचुः फलशालिनः १६

विहंगसंघैर्हीनास्ते स्कंधमात्राश्रया द्रुमाः बभूवुरगमाः सर्वे मारुतेनेव निर्धुताः १७ वि

धूतकेशी युवतिर्यथा मृदितवर्णिका निपीतशुभदंतोष्ठी नखैर्दंतैश्च विक्षता १८ त

था लांगूलहस्तैस्तु चरणाभ्यां च मर्दिता तथैवाशोकवनिका प्रभग्नवरपादपा १९

महालतानां दामानि व्यधमत्तरसा कपिः यथा प्रावृषि वेगेन मेघजालानि मारुतः २०

स तत्र मणिभूमीश्च राजतीश्च मनोरमाः तथा कांचनभूमीश्च विचरन् ददृशे कपिः २१

कामृदितांगरागा निपीतः शुभदंतयुक्तः ओष्ठो यस्याः सा १८ लांगूलहस्तैरित्यत्रैक वचनाभाव आर्षः १९ दामानि जा
ग

लानि २० २१

वापीरित्यादि श्लोकपंचकमेकेवाक्यं उक्तविशेषणविशिष्टावापीर्ददर्शेति पूर्वेणान्वयः २२ मुक्ताप्रवालरूपाएव सिकतायासांताः ॥ स्फटिकांतरकुट्टिमाः प्रभ्यंतरनिबद्धभूमियुताः २३ नल्पूहोदात्यूहः दात्यूहः कालकंठकरत्यमरः २४

वापीश्चविविधाकाराः पूर्णाः परमवारिणा महार्हैर्मणिसोपानैरुपपन्नास्ततस्ततः २२ मुक्ताप्रवालसिकताः स्फाटिकांतरकुट्टिमाः कांचनैस्तरुभिश्चित्रैस्तीरजैरुपशोभिताः २३ वद्धपद्मोत्पलवनाश्चक्रवाकोपशोभिताः नत्यूहरुतसंघुष्टा हंससारसनादिताः २४ दीर्घाभिर्द्रुमयुक्ताभिः सरिद्भिश्च समंततः अमृतोपमतोयाभिः शिवाभिरुपसंस्कृताः २५ लताशतैरवतताः संतानकुसुमावृताः नानागुल्मावृतवनाः करवीरकृतांतराः २६ ततो बुधरसे कांतं पवित्रमिव रंगिरिम् विचित्रकूटं कूटैश्च सर्वतः परिवारितम् २७ शिलागृहैरवततं नानावृक्षसमावृतम् २८ शीकपिशार्दूलोरम्यं जातिपर्वतम् २८

द्रुमयुक्ताभिः तीरद्रुमयुक्ताभिः

वापीनां सरिदुपसंस्कृतत्वं नित्यपूर्णजलत्वाय २५ संतानकुसुमावृताः कल्पवृक्षकुसुमावृताः ॥ गुल्मावृतवनाः वनं जलं करवीरैः कृतमंतरंगवाह्यस्थानीयं यासांताः २६ ततः वापीदर्शनानंतरं २७ जगतिनोकेरम्यं सुदरवस्तुष्वोपि

२८ ... (margin) त

संपातेतिसं चरंत्सस्मिन्निसंपातोमार्गस्तस्मिन्मेघजालानिविकर्षन्मारुतोयथावभूवेतिशेषः ८० चकाशिरेमारुतेनकृष्यमाणानीवेति शेषः ८१ ८२ तस्यउपस्तीतिशेषः ८३ तेनहितंतापेत्यन्वयः वायुःसिषेवेश्रमापनयनायेतिभावः ८४ ८५ कपिवरंविगतक्लमं वीक्ष्य

संपातेपक्षिसंघानांपतिराजइवव्रजन् हनूमान्मेघजालानिविकर्षन्मारुतोयथा ८० पांडुरारुणवर्णानिनीलमांजिष्ठकानिच कपिनाकृष्यमाणानिमहाभ्राणिचकाशिरे ८१ प्रविशन्नभ्रजालानिनिष्पतंश्चपुनःपुनः प्रच्छन्नश्चप्रकाशश्चचंद्रमाइवदृश्यते ८२ प्लवमानंतुतंदृष्ट्वाप्लवंगंत्वरितंतदा ववर्षुःपुष्पवर्षाणिदेवगंधर्वदानवाः ८३ तताननहितंसूर्यःप्लवंतंवानरेश्वरम् सिषेवेचतदावायूरामकार्यार्थसिद्धये ८४ ऋषयस्तुष्टुवुश्चैनंप्लवमानंविहायसा जगुश्चदेवगंधर्वाःप्रशंसंतोवनौकसम् ८५ नागाश्चतुष्टुवुर्यक्षारक्षांसिविविधाःखगाः प्रेक्ष्यसर्वेकपिवरंसहसाविगतक्लमम् ८६ तस्मिन्प्लवगशार्दूलेप्लवमानेहनूमति इक्ष्वाकुकुलमानार्थीचिंतयामाससागरः ८७

नागादयस्तुष्टुवुः ८६ इक्ष्वाकुकुलस्यस्वोत्पादकस्यमानार्थी पूजार्थी ८७ ८७ ८० ९७ ८७ ९७ ८७ ९६

रा० प्र० सुं०
६५

तस्मान्नगान्निपतितां निःसृतां नदीं ददर्श तत्पानशीलाः कुपितकान्तासाम्येनाह स्कंधादिति प्रियस्य स्कंधात्स
मुत्पत्य कोपादुत्प्लुत्य पतितां भूमिं प्राप्तां प्रियामिव २९ परितोऽहवशाद्दधः प्रसृतप्राप्ता द्वारेण जले निपतिताग्रैः पा
दपैः प्रियेशतिक्रुद्धां प्रियतमीपादन्यत्र जिगमिषुं प्रियबंधुभिः सखीभिर्वार्यमाणां प्रमदामिवोपशोभितां ३० प्र

ददर्श च नगात्तस्मान्नदीं निपतितां कपिः स्कंधादिव समुत्पत्य प्रियस्य पतितां प्रियाम् २९
जले निपतिताग्रैश्च पादपैरुपशोभिताम् वार्यमाणामिव क्रुद्धां प्रमदां प्रियबंधुभिः ३०
पुनरावृत्ततोयां च ददर्श स महाकपिः प्रसन्नामिव कांतस्य कांतां पुनरुपस्थिताम् ३१
तस्यादूरात्स पद्मिन्यो नानाद्विजगणायुताः ददर्श कपिशार्दूलो हनूमान्मारुतात्मजः ३२
कृत्रिमां दीर्घिकां चापि पूर्णां शीतेन वारिणा मणिप्रवरसोपानां मुक्तासिकतशोभिताम्
३३ विविधैर्मृगसंघैश्च विचित्रां चित्रकाननाम् प्रासादैः सुमहद्भिश्च निर्मितां विश्व

तत एव कांतस्य प्रसन्नां पुनरुपस्थितां कांतामिव पुनरावृत्ततोयां शैलप्रतिघातात्परावृत्तजलां ददर्श ३१ तस्य पर्वतस्
स्य पद्मिन्यः पद्मिनीः प्रकृत्रिमदीर्घिकाः ददर्श ३२ कृत्रिमां दीर्घिकामित्यादिसार्धश्लोकद्वयस्य ददर्शेति पूर्वेण रा० म०
ययान्वयः उच्यमानविशेषणां कृत्रिमां दीर्घिकामपि ददर्श सिकताशोभितामित्यत्र मुक्ता सार्धः ३३ प्रासादैरित्यस्य ६५
युक्तामिति शेषः ३४

ये केचित्तत्र वृक्षास्तत्र सर्वेपि पुष्पफलसंपन्ना राजवेसर्पैः ३५ सच्छत्राः छत्राकारसंस्थानवंतः तेन च शीतलच्छायत्वे
न चितं सवितर्दीकाः सवेदिकाः रजतादिमहावेदिकोपरिकृतसौवर्णवेदिका इत्यर्थः ... धृतत्वरान्वयि ३६
ए कोमुख्यां वृक्षांतरसंबंधरहितो कांचनीत इत्यर्थः शिंशपापिच्छितो नागद्रुः शिंशपा इति कोशः ३७ ३८ मेरोः प्रभया

काननैः कृत्रिमैश्चापि सर्वतः समलंकृताम् ये केचित्पादपास्तत्र पुष्पोपगफलोपगाः ३५
सच्छत्राः सवितर्दीकाः सर्वे सौवर्णवेदिकाः लताप्रतानैर्बहुभिः पर्णैश्च बहुभिर्वृताम् ३६
कांचनीं शिंशपामेकां ददर्श स महाकपिः वृतां हेममयीभिस्तु वेदिकाभिः समंततः ३७ सो
ऽपश्यद्भूमिभागांश्च गर्तप्रस्रवणानि च सुवर्णवृक्षानपरान्ददर्श शिखिसंनिभान् ३८
तेषां द्रुमाणां प्रभया मेरोरिव दिवाकरः अमन्यत तदा वीरः कांचनोस्मीति वानरः ३९ तां कां
चनैस्तरुगणैर्मारुतेन च वीजितां किंकिणीशतनिर्घोषां दृष्ट्वा विस्मयमागमत् ४०

दिवाकर इव तेषां द्रुमाणां प्रभया कांचनोस्मीत्यमन्यत कांचनवर्णमात्मशरीरं वीक्षते इत्यर्थः ३९ तान् कांचनानि
ति किंकिणीशतेषु फलादिवत्सहजाः अत एव विस्मयमागमत् ४० ४० ४० ४० ४० ४०

तेषां तरूणां मध्ये सुपुष्पिताग्रानिति तरुणाः कोमलांकुराः पल्लवाश्च येषां तान् दृष्ट्वा विस्मयं प्राप्त इति पूर्वेणान्वयः तांबस्याः
पर्यंतवृक्षारुढा दृष्टास्तामारुह्य चिंतयामासेति शेषः ४१ चिंताप्रकारमेवाह इतो द्रक्ष्यामीति इमामारुह्य द्रक्ष्यामीत्य

सुपुष्पिताग्रान् रुचिरांस्तरुणांकुरपल्लवान् तामारुह्य महावेगः शिंशपां पर्णसंवृता
म् ४१ इतो द्रक्ष्यामि वैदेहीं रामदर्शनलालसाम् इतश्चेतश्च दुःखार्तां संपतंतीं यदृच्छ
या ४२ अशोकवनिका चेयं दृढं रम्या दुरात्मनः चंदनैश्चंपकैश्चापि वकुलैश्च विभूषि
ता ४३ इयं च नलिनी रम्या द्विजसंघनिषेविता इमां सा राजमहिषी नूनमेष्यति जानकी ४४
सा रामा राजमहिषी राघवस्य प्रिया सदा वनसंचारकुशला ध्रुवमेष्यति जानकी ४५ ४५

र्थः स्यबूलोपे पंचमी ४२ चंदनादिभिर्भूषिता रम्या यमशोकवनिका दुरात्मनो रावणस्यैव दृढं ध्रुवं राक्षसांतरस्यैवं विधत्व
दर्शनात् ४३ नलिनी चेयं रम्या सा च राजमहिषीत्वाद्रम्यप्रिया च तदिमां नलिनीं नूनमेष्यति ४४ सा प्रसिद्धा रामा रामवियु
क्ता राजमहिषीत्वादेव उद्यानवनसंचारकुशला ध्रुवमेष्यति ४५

अथमे वा धैर्यशाद्वरेणा बुद्धिस्थैर्याधैर्येण वर्त्तते अपवेति सर्वं चेत्यर्थः ४६ ४७ अशोकवनिकातः शिंशुपापादपदेशोसी
तायाः आगमने हेत्वंतरमुत्प्रेक्षते वनेचराणामिति मृगपक्ष्यादीनामित्यर्थः स्पृहयते कुशलमिति शेषः ४८ संध्या

अथवा मृगशावाक्षी वनस्यास्य विचक्षणा वनमेष्यति सार्येह रामचिंतानुकर्षिता ४६
रामशोकाभिसंतप्ता सा देवी वामलोचना वनवासरता नित्यमेष्यते वनचारिणी ४७
वनेचराणां सततं नूनं स्पृहयते पुरा रामस्य दयिता भार्या जनकस्य सुता सती ४८ संध्या
कालमनाः श्यामा ध्रुवमेष्यति जानकी नदीं चेमां शुभजलां संध्यार्थे वरवर्णिनी ४९
तस्याश्चाप्यनुरूपेयमशोकवनिका शुभा शुभा या पार्थिवेंद्रस्य पत्नी रामस्य संमता ५०
यदि जीवति सा देवी ताराधिपनिभानना आगमिष्यति सावश्यमिमां शीतजलां नदीम् ५१

दिनरात्र्योः संधिरूपः अनुष्ठानकालो यस्य कर्मणः तत्र मनो यस्याः सा श्यामा संध्यार्थे संध्याकालकृत्यं समाप्त्वा तदर्थं शु
भजलामिमां नदीं ध्रुवमेष्यति ४९ या पार्थिवेंद्रस्य रामस्य पत्नी संमता नपतिव्रतेति सर्वजनस्य तस्याः शुभा रम्ये नदी अशोक
वनिका च अनुरूपा योग्या ५० ५१

रा० वा० सुं० ६७

एवमशोकवनिकां गत्वा प्रतीक्षमाणः सीतागमनमिति शेषः मनुजेन्द्रपत्नीं अवेक्षमाणः इतस्ततोऽवलोकयन् पर्णघने पत्रसान्द्रे सुपुष्पिते शिंशपावृक्षे निलीनः सन् सर्वं वनं ददर्शेत्यन्वयः ५२ इति चतुर्दशः सर्गः १४ स हनुमान् तत्रस्थः शिंशपास्थः मैथिलीं मार्गमाणः मैथिलीमार्गणादेतोः अन्वेषणहेतोः क्रियायामिति शानच् वीक्षमाणः इतस्ततोऽवलोकयन् महीं।

एवं तु गत्वा हनुमान्महात्मा प्रतीक्षमाणो मनुजेन्द्रपत्नीम् अवेक्षमाणश्च ददर्श सर्वं सुपुष्पिते पर्णघने निलीनः ॥५२॥ हरिः ॐ इत्यार्षे रामायणे वाल्मीकीये सुन्दरकाण्डे चतुर्दशः सर्गः ॥१४॥ स वीक्षमाणस्तत्रस्थो मार्गमाणश्च मैथिलीम् अवेक्षमाणश्च महीं सर्वां तामन्ववैक्षत॥ १ सन्तानकलताभिश्च पादपैरुपशोभिताम् दिव्यगन्धरसोपेतां सर्वतः समलंकृताम् २ तां स नन्दनसंकाशां मृगपक्षिभिरावृताम् हर्म्यप्रासादसंबाधां कोकिलाकुलनिःस्वनाम् ३ ३ ३ ३

पाद

चावेक्षमाणः महीं शिंशपाधो वीक्षमाणः अशोकवनिकां तामन्ववैक्षतेत्यन्वयः १ तां विशिनष्टि संतानकलताभिः सहितैः पादपैरित्यर्थः २ तां स ददर्शेत्यन्वयः नन्दनसंकाशां नन्दनसदृशां वाघनेकोपादियवत्तु मताम् ३ २२

मैथिलीम् अवेक्षमाणश्च ५ मूल

रा० ६७

वल्कासनैः कुथ्येन लतागौल्मैरुपेता उपर्युपरिभूमियुक्ता गृहा बहुभूमिगृहा ४ सर्वर्तुषु कुसुमानि येषां तैः पादपैर्युक्तां ह्रीं यौदयप्रभां उद्यानभूषित
मकीर्तिं ५ तत्रस्थः श्रीं प्रपश्यन् योमारुतिर शोकपुष्पैः प्रदीप्तामिवाशोकवनिकामुद्देक्षत तेत्पुत्प्रेक्षा श्लकृ चळं तत्रावि विनि
ष्पतद्भिः श्विवैः पुष्पाण्येव वर्त्तं सवत्प्रतीयमानानि येषां तैर्विहगैर्निविडं शाखामपि तिष्पत्र शाखावां क्रियमाणां बहुपक्षि

कांचनोत्पलपद्मानि वापीभिरुपशोभिताम् वल्कासनकुथ्योपेतां बहुभूमिगृहावृताम् ४
सर्वर्तुकुसुमैरम्यैः फलवद्भिश्च पादपैः पुष्पितानामशोकानां श्रियानाह्वयोदयप्रभाम ५
प्रदीप्तामिवतत्रस्थो मारुतिः समुदैक्षत निष्पत्रशाखां विहगैः क्रियमाणामिवासकृत्
६ विनिष्पतद्भिः शतशश्चित्रैः पुष्पावतंसकैः समूलपुष्परचितैरशोकैः शोकनाशनैः ७

पक्षापिहितपत्रां तया पत्ररहितशाखामिव स्थितामित्यर्थः ६ किं च समूलपुष्परचितैः मूलादारभ्य पुष्पैरशो
कैः पुष्पभारेण पुष्पसमूहेन जनितातिभारे रतरां वातिभारेवशाखा दति प्रश्नशाखा तया भूमिं स्पृशद्भिः कर्णिकारैः
किंशुकैश्च पुष्पैः सदेशासिषां प्रभया सर्वाः प्रदीप्ता इवस्थित इति शेषः ७

८ पुन्नागा इत्यादि श्लोकद्वयमेकान्वयं तत्र ते सहस्रशः शोभंते स्म इति संबंधः ९ १० अथ पुनः प्रकारांतरेण शोकवनं वर्णि-
रा० वा० सुं०
६८
यति नंदनमित्यादि श्लोकचतुष्टयेन विबुधोद्यानं नंदनं पद्यानंदनं आह्लादकं तद्वदाह्लादकं चैत्ररथं कुबेरवनं प

पुष्पभारातिभारैश्च स्पृशद्भिरिव मेदिनीम् कर्णिकारैः कुसुमितैः किंशुकैश्च सुपु-
ष्पितैः ८ स देशः प्रभया तेषां प्रदीप्त इव सर्वतः पुन्नागाः सप्तपर्णाश्च चंपकोद्दालकास्तथा
९ विवृद्धमूला बहवः शोभंते स्म सुपुष्पिताः शातकुंभनिभाः केचित्केचिदग्निशिखोपमाः
१० नीलांजननिभाः केचित्तत्राशोकाः सहस्रशः नंदने विबुधोद्याने चित्रे चैत्ररथे यथा
११ अतिवृत्तमिवाचिंत्यं दिव्यं रम्यं श्रियायुतम् द्वितीयमिव चाकाशं पुष्पज्योतिर्गणायुतम् १२
पुष्परत्नशतैश्चित्रं पंचमं सागरं यथा सर्वर्तुपुष्पैर्निचितं पादपैर्मधुगंधिभिः १३ १३।

यथा चित्रं तद्वच्चित्रं ११ तद्दृश्यमप्यतिवृत्तमिव दृश्यति क्रमेण वर्णितम् अथाकाशसाधारणमसाधारणधर्ममाह पुष्पेति
पुष्पाण्येव ज्योतिर्गणाः नक्षत्रगणास्तैरायुतं १२ पुष्परत्नैरेव रत्न शतैः १३ १३

रा०म०
६८

एवंविधामशोकमुद्यानमशोकवनिकांतर्गतं ददर्शेत्यनुकर्षः १४ शैलेंद्रो हिमवान् अशोकवनिकायामित्यादिश्लोक
त्रयमेकं वाक्यं तस्यां पूर्वविवरितायां १५ चैत्यं वर्तुलाकारत्वाद्गृहपतनमिव मिव प्रासादस्तं भसहस्रेणाधारभूतेनस्थितं १६

नानानिनादैरुद्यानं रम्यं मृगगणैर्द्विजैः अनेकगंधप्रवहं पुण्यगंधं मनोहरम् १४ शै
लेंद्रमिव गंधाढ्यं द्वितीयं गंधमादनम् अशोकवनिकायां तु तस्यां वानरपुंगवः १५ स
ददर्शाविदूरस्थं चैत्यप्रासादमूर्जितम् मध्ये स्तंभसहस्रेण स्थितं कैलासपांडुरम् १६ प्र
वालकृतसोपानं तप्तकांचनवेदिकम् मुष्णंतमिव चक्षूंषि द्योतमानमिव श्रिया १७ नि
र्मलं प्रांशुभावत्वादुल्लिखंतमिवांबरम् ततो मलिनसंवीतां राक्षसीभिः समावृताम् १८
उपवासकृशां दीनां निःश्वसंतीं पुनःपुनः ददर्श शुक्लपक्षादौ चंद्ररेखामिवामलाम् १९

१७ प्रांशुभावत्वात् उन्नतस्वरूपत्वात् ततस्तस्मात् दुःखसंततिं व्यसनानाम कोविदां स्वामित्वस्य गंधस्य ददर्शेति
क्रियया संबंधः मलिनसंवीतां मलिनवस्त्रोपेतां १८ शुक्लपक्षादाविव्यनेन वर्द्धिष्णुत्वं द्योत्यते १७ एवं सीताम्

रा०वा०सुं०
६९

मंदप्रख्यायमानेन इदं तदिति कथंचिद् ज्ञायमानेन रूपेणोपलक्षिताम् २० क्लिष्टेन जीर्णेन सपंकां मलवच्छरीरां विपद्मांप
द्मिनीमिव लक्ष्मीमिव सरसीमिव वा स्थिताम् २१ अंगारकेनेव तत्तुल्येन ग्रहेण राकेतुना पीडितां रोहिणीमिव २२ कृशांदी

मंदप्रख्यायमानेनरूपेणरुचिरप्रभाम् पिनद्धांधूमजालेनशिखामिवविभावसोः २० पी
तेनैकेनसंवीतांक्लिष्टेनोत्तमवाससा सपंकामनलंकारांविपद्मामिवपद्मिनीम् २१ पीडितां
दुःखसंतप्तांपरिक्षीणांतपस्विनीम् ग्रहेणांगारकेणेवपीडितामिवरोहिणीम् २२ अश्रु
पूर्णमुखींदीनांकृशामनशनेनच शोकध्यानपरांदीनांनित्यंदुःखपरायणाम् २३ प्रियंज
नमपश्यंतींपश्यंतींराक्षसीगणम् स्वगणेनमृगींहीनांश्वगणेनावृतामिव २४ नीलना
गाभयावेण्याजघनंगतयैकया नीलयानीरदापायेवनराज्यामहीमिव २५ २५ २५

नामिति पुनरुक्तिः कार्श्यदैन्ययोरतिशयप्रदर्शनाय २३ पिनद्धां धूमजालेन प्रियं जनं पतिदेवरादिरूपं अपश्यंतीं स्वगणेन मृगीं ना
गणेन २४ जघनं पर्यंतभागांतं प्राप्तया पृष्ठभागीयवेण्या द्वयोर्हि सैनैकया नीलनागाभया कृष्णसर्पतुल्यया वेण्योपलक्षि
तां नीरदापाये शरदि नीलया वनराज्योपलक्षितां महीमिव स्थितां २५

रा०म०
६९

पूर्वोक्तविशेषणविशिष्टां तां विलोक्य उपपादिभिः सीतात्वनिश्चयोपपादनसमर्थैः कारणैर्वक्ष्यमाणलिङ्गैः सीते
ति तर्कयामास संशयितवानित्यर्थः तत्कारणेष्वन्यमभिज्ञानमाह ह्रियमाणेति यथारूपां दृष्टा दग्वेषवर्णादि
मतीं अनुभूतां तां यथारूपेयं मे दृष्टिश्च त्वमभिज्ञानमनुमयवपन्नामिति भावः २६ २७ पूर्णचंद्राननत्वादिगुणाव

सुखार्हां दुःखसंतप्तां व्यसनानामकोविदाम् तां विलोक्य विशालाक्षीमधिकं मलिनां कृशा
म् २६ तर्कयामास सीतेति कारणैरुपपादिभिः ह्रियमाणा तदा तेन रक्षसा कामरूपिणा २७
यथारूपा हि सा दृष्टा तथारूपेयमंगना पूर्णचंद्राननां सुभ्रूं चारुवृत्तपयोधराम् २८ कु
र्वतीं प्रभया देवीं सर्वा वितिमिरा दिशः तां नीलकेशीं बिंबोष्ठीं सुमध्यां सुप्रतिष्ठिताम् २९ सी
तां पद्मपलाशाक्षीं मन्मथस्य रतिं यथा इष्टां सर्वस्य जगतः पूर्णचंद्रप्रभामिव ३० ३० ३०

तां निरीक्ष्य तस्य बुद्धिः संदिहे दिहे इत्यवच्छिन्नश्लोकेनान्वयः सुभ्रूं सुभ्रुवं २८ सर्वा दिशो वितिमिराः कुर्वतीं नीलकंठीं सौ
भाग्यसूचककंठनीलमणिमयकंठाभरणप्रभयानीलकंठीं सुप्रतिष्ठितां सुप्रतिष्ठितसर्वावयवसंस्थानां २९ चंद्रप्र
भासादृश्यं सर्वानंदकरत्वेन ३०

चिंताप्रकारमेवाह साहाय्यमिति विवक्षतां वागिंद्रियवतां शासिनां सर्ववाच्यः सर्वनिंदावाग्विषयो भविष्यामीत्यर्थः ८८ उक्तमेव
रा० वा० सुं० विवृणोति अहमिति तत्तस्मादेव अवसादितुं अवसन्नं श्रमं गंतुं नार्हति सागरेणाभिवर्धित इत्युक्त्या कश्चिद्दृष्टः स्याग
८

साहाय्यं वानरेंद्रस्य यदि नाहं हनूमतः करिष्यामि भविष्यामि सर्ववाच्यो विवक्षताम् ८८
अहमिक्ष्वाकुनाथेन सगरेण विवर्धितः इक्ष्वाकुसचिवश्चायं तं नार्हत्यवसादितुम् ८९
तथा मया विधातव्यं विश्रमेत यथा कपिः शेषं च मयि विश्रांतः सुखी सोतितरिष्यति ९०
इति कृत्वा मतिं साध्वीं समुद्रश्छन्नमंभसि हिरण्यनाभं मैनाकमुवाच गिरिसत्तमम् ९१
त्वमिहासुरसंघानां पातालतलवासिनाम् देवराज्ञा गिरिश्रेष्ठ परिघः सन्निवेशितः ९२ त्व
मेषां ज्ञातवीर्याणां पुनरेवोत्पतिष्यताम् पातालस्याप्रमेयस्य द्वारमावृत्य तिष्ठसि ९३

ख्यातस्याप्येतत्संबंध इति ज्ञायते ८९ शेषं मार्गशेषं ९० अंभसि स्वोंभसि छन्ने हिरण्यनाभं हिरण्यप्रधाने हिरण्मयमित्यर्थः
नाभिः प्रधाने कस्तूर्यामिति विश्वः ९१ पक्षभेदभयात्समुद्रप्रवेशानंतरं पातालस्थराक्षसनिरोधार्थं द्वारनिरोधकपरिघव
न्मैनाकः स्थापित इत्यर्थः ९२ ज्ञातवीर्याणां देवराजेनेति शेषः एषां असुराणाम् ९३ राम ८

रा०वा०सुं०
७०

नियतां भूशयनादिनियमवतीं तापसीमिव तापसीमिव भूमावासीनां भुजगेंद्रवधूसादृश्यं दर्शयन् धूमच्छन्नत्वेन रक्षःकुलःना
शकत्वेन च ३१ न राजन्तीं अराजन्तीं विभावसोः शिखामिव याति धूमतेजसा ज्वलंतीं ३२ स्मृतिर्मन्वादिवाक्यं दीर्घ्यशार्थः
संदिग्धां मन्दसंदेहवतीं ऋद्धिं संपदं निपतितां क्षीणां विहतां नास्तिकबुद्ध्येति भावः प्रतिहतां स्वविषयालाभादिति

भूमौ सुतनुमासीनां नियतामिव तापसीम् निश्वासबहुलां भीरुं भुजगेंद्रवधूमिव ३१ शोक
जालेन महता विततेन न राजतीम् संसक्तां धूमजालेन शिखामिव विभावसोः ३२ तां स्मृ
तीमिव संदिग्धां ऋद्धिं निपतितामिव विहतामिव च श्रद्धामाशां प्रतिहतामिव ३३ सोपस
र्गां यथा सिद्धिं बुद्धिं सकलुषामिव अभूतेनापवादेन कीर्तिं निपतितामिव ३४ रामोपरोधव्यथि
तां रक्षोगणपीडिताम् अबलां मृगशावाक्षीं वीक्षमाणां ततस्ततः ३५ बाष्पाम्बुपरिपूर्णे
न कृष्णवक्राक्षिपक्ष्मणा वदनेनाप्रसन्नेन निश्वसंतीं पुनः पुनः ३६ ३६ ३६ ३६

भावः ३३ सोपसर्गां सविघ्नां सकलुषां रागद्वेषादिकालुष्यवतीं अभूतेनापवादेन केवलमारोपितेन कलंकेन ३४ रा
मोपरोधः रामसेवाप्रतिबंधः ३५ कृष्णानि वक्राणि च अक्षिपक्ष्माणि यत्र तेन ३६

स्नानादिराहित्यात्त्वगादिमलरूपः पंकः नक्षत्रराजश्चंद्रः ३७ सीतां मुहुर्निरीक्ष्य तस्य हनुमतो बुद्धिः संदिदेहे प्रत्यभिज्ञा बाधकाकार्श्यमालिन्यादिति रोहितरूपत्वात्संदिग्धा बभूवेत्यर्थः आम्नायानाम योगेन अप्रत्याहतानाम भावेन प्रशिथिलामस्थिरपदां विद्यामिव ३८ बाधकप्रमा किंचित्करत्वमाह दुःखेनेति रुच्छ्रेणेत्यर्थः दुःखबोध्यत्वे हेतुरनलंकृतामिति सं।

मलपंकधरां दीनां मंडनार्हाममंडिताम् प्रभां नक्षत्रराजस्य कालमेघैरिवावृताम् ३७ तस्य संदि
दिहे बुद्धिस्तथा सीतां निरीक्ष्य च आम्नायानामयोगेन विद्यां प्रशिथिलामिव ३८ दुःखेन बुबु
धे सीतां हनूमाननलंकृताम् संस्कारेण यथा हीनां वाचमर्थान्तरं गताम् ३९ तां समीक्ष्य विशा
लाक्षीं जपुत्रीमनिंदिताम् तर्कयामास सीतेति कारणैरुपपादयन् ४० ४० ४० ४०

स्कारो गात्रस्नानानुलेपनादिरंगसंस्कारः वाचो व्याकरणस्नानादिजः संस्कारः देव्या अर्थान्तरगतत्वं देशान्तरगतत्वं वाचस्तु विवक्षितार्थादन्यार्थबोधकत्वं वाचो यथा व्याकरणाद्यभ्यास दुःखेन व्युत्पत्तिं संपाद्य बुध्यते तद्वत्सीता बुबुधे ३९ कारणैरुपपादयन् सीतानिश्चयहेतुभिस्तर्कमुपपत्तिमंतं संपादयन् ४०

इदानीं सीताल्वोपपादकमाह वैदेह्या इति तदा त्वश्यानसमये वै पांगेषु यान्याभरणजालान्यन्वकीर्तयत् तान्याभरणजाला-
नि तत्त द्गात्रशोभीन्यलक्षयदिति शिष्टमभिसंग्रामा प्रयासिद्धं ४१ अथ कस्मिन् गात्रे किमाभरणं दृष्टमित्यत्राह सुकृतौ
इति निर्मितौ कर्णवेष्टौ कुंडले कुंडले कर्णवेष्टनमित्यमरः श्वदंष्ट्रौ कर्णाभरणविशेषौ कर्णाहूपांगे न प्रतिष्ठितौ उ

चा

वैदेह्या यानि चांगेषु तदा वै नान्वकीर्तयत् तान्याभरणजालानि गात्रशोभीन्यलक्षयत
४१ सुकृतौ कर्णवेष्टौ च श्वदंष्ट्रौ पि सुसंस्थितौ मणिविद्रुमचित्राणि हस्ताभरणानि
च ४२ प्रायाणि चिरयुक्तत्वात् पद्मसंस्थानवंति च तान्येवैतानि मन्येहं यानि रामोन्व
कीर्तयत् ४३ तत्र यान्यवहीनानि तान्यहं नोपलक्षये यान्यस्या नावहीनानि तानि
नीमानि न संशयः ४४

पलक्षये इति शेषः हस्तेषु हस्ताभरणेषु च यानि मणिविद्रुमचित्राण्याभरणानि तानि मे गो-
ज्ञानि तथे वस्तुस्थितान्युपलक्षये ४२ चिरयुक्तत्वात् चिरकालमसंस्कृतदेहस्थितत्वेनासंस्कृतत्वात् प्रायाणि यथिस्था-
मवर्णान्यपि तत्पद्मसंस्थानवंति रामो ऋसन्नि वेशावंति यानि रामोन्वकीर्तयत् तान्येवैतानीति मन्ये ४३ तत्र यान्यकेया-
न्याभरणानि अवहीनानि पतितानि तानि यानि नावहीनानि तत्र न पतितानि अस्याः सकाशात् तानीमानी निःसंदेहः ४४

कानित्युक्तानीतिलयावगतानित्याह पीतमिति स्रस्तमंतरिक्षाद्भ्रष्टं नगासक्तं वृक्षैर्गतं प्लवंगमैः एभिर्वानरादिभिर्दृष्टम्
४५ करुणमूकेवत्कभूषणान्यासां अप्यनयैव हृतत्वात्माह अनयेदेति ४६ इदमुत्तरीयं वसनं चिरधृतत्वात् क्लिष्टवत्त-
रं श्यनादिना म्लादितं तथापि इतरत् त्यक्तमुत्तरीयं यथापादप्रावरणियुक्तं यथा श्रीमत् तद्वर्णं तथा श्रीमन्नूनम् ४७

पीतेकनकपट्टाभेस्रस्तेतत्ववनेशुभम् उत्तरीयंनगासक्तंतदादृष्टंप्लवंगमैः ४५ भूषणानि च
मुख्यानि दृष्टानि धरणीतले अनयैवापविद्धानि स्वनवन्ति महान्ति च ४६ इदं चिरगृहीतत्वा
द्वसनं क्लिष्टवत्तरम् तथाहि नूनं तद्वर्णं तथा श्रीमद्यथेतरत् ४७ इयं कनकवर्णाङ्गी रा
मस्य महिषी प्रिया प्रनष्टापि सती यास्य मनसो न प्रणश्यति ४८ इयं सा यत्कृते रामश्च
तुर्भिरिह तप्यते कारुण्येनानृशंस्येन शोकेन मदनेन च ४९ सीता रामा रामसीता

स्वन

एवंजातनिश्चय आह इयमिति इयं रामस्य प्रियामाता महिषी तिष्ठत्वा प्रनष्टा दर्शनमप्राप्तापि अस्या रामस्य मनसः स
काशान्न प्रणश्यति नादृष्टा भवति नित्यं सन्निहिता भवतीत्यर्थः ४८ कारुण्यादिभिश्चतुर्भिर्यत्कृते रामः परितप्यते
सेयमिति संबंधः ४९

कारुण्यादीनां परितापहेतुत्वं विभज्य दर्शयति स्त्रीति अपत्नीका लेस्त्रियोरक्षणीया इत्युक्तेस्तदकरणे कृतकारुण्यात्परितप्य
ते आनृशंस्यमक्रूरत्वं आश्रितसंरक्षकस्वभावत्वमिति यावत् तस्मादाश्रितानरक्षितेतिपरितप्यते आत्मार्धभूतपत्नी
नाशोजातइति शोकेनपरितप्यते प्रियानष्टेतिमदनेनपरितप्यते ५० अथसीतारामयोरन्योन्याभिरूप्यानुगुण्यमा
ह अस्या इति अस्याःसीतायाः यथाविधं रूपं अंगप्रत्यंगसौष्ठवं तथाविधमेव रामस्यापिरूपं रामस्य यथाविधरूपं तथा

स्त्री प्रनष्टेति कारुण्यादाश्रितेत्यानृशंस्यतः पत्नी नष्टेति शोकेन प्रियेति मदनेन च ५०
अस्या देव्या यथारूपमंगप्रत्यंगसौष्ठवम् रामस्य च यथारूपं तस्येयमसितेक्षणा ५१
अस्या देव्या मनस्तस्मिंस्तस्य चास्यां प्रतिष्ठितम् तेनेयं स च धर्मात्मा मुहूर्तमपि जीवति ५२

विधमेव अस्या रूपं अत इयमसितेक्षणा तस्य योग्येति शेषः ५१ अथानयोरन्योन्यानुरागमाह अस्यादेव्या इति येना
स्यामनस्तस्मिन् रामे प्रतिष्ठितं तेनरामस्य चास्यां प्रतिष्ठितं तेनेत्यहेतुना इयं स च जीवतीति संबंधः मनःसन्निधानेनवियो
गभावादिति भावः मुहूर्तमपीत्यस्यान्यथेत्यादिः नजीवेदितिशेषः ५२ ५२ सीतारामाभ्यां सीतारामाभ्यां नमः

सीताविरहेरामस्य शरीरकार्श्यप्राणधारणेच विचित्रमित्याह दुष्करमित्यादि श्लोकद्वयेन प्रवृत्तेनेति वर्त्तितेन चित्तसन्निधानेन दुष्करं कृतवान् तत्राह धारयतीमिव वर्त्तमानसामीप्ये लट् दधारेत्यर्थः ५३ एवं सीतां मलिनसंवीतत्वोपवासकृशत्वशोकध्यानपरायणत्वादिपातिव्रत्यधर्मवतीं दृष्ट्वा हृष्टः सन् रामं स्मारन्

दुष्करं कृतवान् रामो हीनो यदनया विभुः धारयत्यात्मनो देहं न शोकेनावसीदति ५३
एवं सीतां तदा दृष्ट्वा हृष्टः पवननन्दनः जगाम मनसा रामं प्रशशंस च तं प्रभुम् ॥ ५४ ॥ हरिः ॥
ॐ इत्यार्षे रामायणे वाल्मीकीये सुन्दरकाण्डे पञ्चदशः सर्गः ॥ १५ ॥ प्रशस्य तु प्रशस्त
व्यां सीतां तां हरिपुङ्गवः गुणाभिरामं रामं च पुनश्चिन्तापरोभवत् १ स मुहूर्त्तमिव ध्यात्वा
बाष्पपर्याकुलेक्षणः सीतामाश्रित्य तेजस्वी हनूमान्विललापह २ २ २ २ २

प्रभुं वुद्धिस्थं प्रशस्य पुनः प्राप्युपयुक्तपातिव्रत्यधर्मनिष्ठत्वदर्शनात् रामस्यागम्योत्तरोराम इति सन्तोषो दित्यर्थः ५४ इति पञ्चदशः सर्गः १५ चिन्तापरः सीताविषयदुःखेनेति भावः १ सीतामाश्रित्य सीता मुद्दिश्य २ रामराम राम रा

रा०वा०सु०
७३

गुरुविनीतस्य गुरुभिः शिक्षितस्य लक्ष्मणस्य गुरुरपि प्रिया रामप्रिया सीतापि यदि दुःखार्ता दुःखपीडिता तर्हि कालो दुरतिक्रम इति हि निश्चितमित्यर्थः दुःखोपायप्रयुक्तत्वस्य काल एव प्रसिद्धत्वादिति भावः ननु न दुःखे सुखे वा कालमात्रजन्यके मानुष्ठानवैफल्यं स्यादतः तस्यापेक्षकालजन्यत्वेपि स्वलीलया जगत्त्रातुमाविर्भूतयोः परमेश्वरयोः सीतारामयोर्द्वयोः कर्मतत्त्वस्य सर्वतन्त्रविद्धत्वात् कथं दुःखमिति चेत्सत्यं वस्तुतश्चिदानन्दकन्दयोर्दुःखाभावेपि स्मर्तॄणां चित्तभूमिशुद्ध्य

मान्या गुरुविनीतस्य लक्ष्मणस्य गुरुप्रिया । यदि सीतापि दुःखार्ता कालो हि दुरतिक्रमः ३
रामस्य व्यवसायज्ञा लक्ष्मणस्य च धीमतः । नात्यर्थं क्षुभ्यते देवी गङ्गेव जलदागमे ४
तुल्यशीलवयोवृत्तां तुल्याभिजनलक्षणाम् । राघवोऽर्हति वैदेहीं तं चेयमसितेक्षणा ५

लीलेति कामिवद्वृथैव करुणारसादिसेचनविनोदो भगवतोरित्यनवद्यं ३ नन्वेवंविधदुःखार्तिप्राप्ते जीवनहानिरेव स्यादत आह रामस्येति व्यवसायज्ञा पराक्रमज्ञा सा सती नात्यर्थं क्षुभ्यते नैराश्यमूलकं प्राणत्यागरूपादिक्षोभं न प्राप्नोति जलदागमे वर्षाकालेपि गङ्गा यथा रत्नतरङ्गकुद्धनदीवत् दुर्धरवेगं न प्राप्नोतीति तद्वत् ४ तुल्यशीलवयोवृत्तां रामतुल्यस्वभाववयश्चारित्रां तुल्याभिजनं कुलं लक्षणानि सामुद्रिकोक्तानि ५

न वैदेहीमाभां न वीतरूपां हिमाभां चेत्यर्थः मनसा रामं जगाम स्मृतवान् रूप इति सस्मारेत्यर्थः ६ अस्या हेतोः सर्वात्मना स्वस्य दर्शनप्राप्त्यर्थः ७

ततो दृष्ट्वा न वैदेहीमाभां लोककान्तामिव श्रियम् जगाम मनसा रामं वचनं चेदमब्रवीत् ६ अस्या
हेतोर्विशालाक्ष्या हतो वाली महाबलः रावणप्रतिमो वीर्ये कबन्धश्च निपातितः ७ विराध
श्च हतः संख्ये राक्षसो भीमविक्रमः वने रामेण विक्रम्य महेन्द्रेणेव शम्बरः ८ चतुर्दश सहस्रा
णि रक्षसां भीमकर्मणाम् निहतानि जनस्थाने शरैरग्निशिखोपमैः ९ खरश्च निहतः सं
ख्ये त्रिशिराश्च निपातितः दूषणश्च महातेजा रामेण विदितात्मना १० ऐश्वर्यं वानराणां
च दुर्लभं वालिपालितम् अस्या निमित्ते सुग्रीवः प्राप्तवांल्लोकविश्रुतः ११ सागरश्च म
याक्रान्तः श्रीमान्नदनदीपतिः अस्या हेतोर्विशालाक्ष्या पुरीयं च निरीक्षिता १२ यदि रामः
समुद्रान्तां मेदिनीं परिवर्तयेत् अस्याः कृते जगच्चापि युक्तमित्येव मे मतिः १३

शम्बरोयं प्रद्युम्नहतादन्य एव ८ ९ १० अस्या निमित्ते सप्तम्यर्थे षष्ठी निमित्तभूतायां सत्यामित्यर्थः ११ १२ परिवर्तयेत् अधरो
त्तरं कुर्यात् संहरेदिति यावत् १३

एवंभूतेऽर्थेऽकृत्स्नमुपपादयति राज्यं चेति राज्यमुत्कृष्टं वा सीता उत्कृष्टा वा इति विचार्यमाणे सतीति शेषः कलौ लोके श्रेष्ठ १४ अधिकमेवोपपादयति इयमिति १४ तेन कुले भर्तृदृढव्रतेत्यनेन चारित्र्यातिशयः १५ मेदिनीं भित्त्वेत्यनेनायोनिजत्वात् मानुषदिव्यरूपत्वं दर्शितं १६ शौर्यशीलस्य

राज्यं वा त्रिषु लोकेषु सीता वा जनकात्मजा । त्रैलोक्यराज्यं सकलं सीताया नाप्नुयात्कलाम् १४
इयं सा धर्मशीलस्य जनकस्य महात्मनः । सुता मैथिलराजस्य सीता भर्तृदृढव्रता १५ उत्थिता मेदिनीं भित्त्वा क्षेत्रे हलमुखक्षते । पद्मरेणुनिभैः कीर्णा शुभैः केदारपांसुभिः १६ विक्रान्तस्यार्यशीलस्य संयुगेष्वनिवर्तिनः । स्नुषा दशरथस्यैषा ज्येष्ठा राज्ञो यशस्विनी १७ धर्मज्ञस्य कृतज्ञस्य रामस्य विदितात्मनः । इयं सा दयिता भार्या राक्षसीवशमागता १८ सर्वान्भोगान्परित्यज्य भर्तृस्नेहबलात्कृता । अचिन्तयित्वा कष्टानि प्रविष्टा निर्जनं वनम् १९ १००

वि

श्रेष्ठस्वभावस्य १७ एवंभूतेयं भार्या राक्षसीवशमागता कालप्राबल्यादिति भावः १८ भर्तृस्नेहबलात्कृता बलात्प्रवर्तिता १९

भर्तृशुश्रूषणोपरा भर्तृशुश्रूषायां तत्परा सतीत्यर्थः संवृतात्स्वाचेत्याचिरायासप्रश्रयेतिपुच्च २० पूर्ववदेवाहसेयमिति यातनो राक्षसीभिः संपाद्यमानेतीव्रदुःखं अनर्थानामापदामनर्हेत्यर्थः २१ शीलसंपन्नां ईदृशादुःखेविपिनचारित्र प्रच्यवरहिताम् प्रपां पानीयशालां २३

संतुष्टा फलमूलेन भर्तृशुश्रूषणोपरा या परां भजते प्रीतिं वनेपि भवनेपि वा २० सेयं कनकवर्णांगी नित्यं सुस्मितभाषिणी सहते यातनामेतामनर्थानामभागिनी २१ इमां तु शीलसंपन्नां द्रष्टुमिच्छति राघवः रावणेन प्रमथितां प्रपामिव पिपासितः २२ अस्या नूनं पुनर्लाभाद्राघवः प्रीतिमेष्यति राजा राज्यपरिभ्रष्टः पुनः प्राप्येव मेदिनीम् २३ कामभोगैः परित्यक्ता हीना बंधुजनेन च धारयत्यात्मनो देहं तत्समागमकांक्षिणी २४ नैषा पश्यति राक्षस्यो नेमान्पुष्पफलद्रुमान् एकस्थहृदया नूनं राममेवानुपश्यति २५

२३ काम्यंत इति कामः ते च ते भोगाः स्रक्चंदनाद्यस्तैस्त्यक्ता २४ राक्षस्यः राक्षसीरित्यर्थः एकनूनं न पश्यतीति पृच्छिताद्दृशं हृदयं यस्याः सा किं तदेकं लक्ष्यं तत्राह नूनं राममेवेति २५

प्राक्लितिश्वसीति प्रोक्षः तस्मात्पिहितपातालमुखस्य वसन् वह्निशङ्क्या वर्द्धमान ऊर्ध्वमुत्तिष्ठ ९४ त्वामुपरितत्वोपरिप्रदेशं प्रा

तिर्यगूर्ध्वमधश्चैव प्राक्लितिप्रोत्नवर्धितुम् तस्मात्वां चोदयामि त्वामुत्तिष्ठ गिरिसत्तम ९४
स एष कपिशार्दूलस्त्वामुपर्येति वीर्यवान् हनूमान्नाम कार्यार्थे भीमकर्मा खमाप्लुतः ९५
अस्य साह्यं मया कार्यमिक्ष्वाकुकुलवर्तिनः मम चेक्ष्वाकवः पूज्याः परं पूज्यतमास्तव ९६
कुरु साचिव्यमस्माकं न नः कार्यमतिक्रमेत् कर्तव्यमकृतं कार्यं सतां मन्युमुदीरयेत् ९७ स
लिलादूर्ध्वमुत्तिष्ठ तिष्ठत्वेष कपिस्त्वयि अस्माकमतिथिश्चैव पूज्यश्च प्लवतां वरः ९८
चामीकर महाभाग देवगन्धर्वसेवित हनूमांस्त्वयि विश्रान्तस्ततः शेषं गमिष्यति ९९ का
कुत्स्थस्यानृशंसस्य मैथिल्याश्च विवासनम् श्रमं च प्लवगेन्द्रस्य समीक्ष्योत्थातुमर्हसि १००

प्रोक्तिति तस्मात् विश्रामाय त्वमुत्तिष्ठेति पूर्वेणान्वयः ९५ ९६ अतः साचिव्यकरणात् नः अस्माकं कार्यं प्रयोजनं नातिक्रमेत् नलंघ्य तामित्यर्थः कार्यमिति क्रमेण अनिष्पन्नमाह कर्तव्यमिति ९७ ९८ चामीकर हिरण्यात्मक ९९ श्रीरामचंद्राय नमः ॥ सीताराम १००

रा० वा० सुं०
१५

तमेवेमंत्रवीजमाह मतीनामेति श्रोभनं श्रोभा २६ प्रभूणमः स्वपनया हीनः सन् स्वात्मनो देहं धारयतीति श्रो केन नाव
सीदतीति च यत् एतदुष्करं कुरुत इति संबंधः २७ स्वसितः केशांतो यस्याः तां ममापि तिर्यग्योनेरपि किमुत परमद

मतीनामपरं नार्याभूषणां भूषणादपि एवाहिरहितात्तेन श्रोभनाहीन श्रोभते २६ दुष्क
रं कुरुते समे हीनो यदनया प्रभुः धारयत्यात्मनो देहं न दुःखेनावसीदति २७ समाम
सितकेशांता शांतपत्रनिभेक्षणाम सुखो हि दुःखितो ज्ञात्वा ममापि व्यथितं मनः २८ क्षि
तिक्षमा पुष्करसंनिभाक्षी या रक्षिता राघवलक्ष्मणाभ्याम् सा राक्षसीभिर्विकृतेक्षणाभिः
संरक्ष्यते संप्रति वृक्षमूले २९ हिमहतनलिनीव नष्टशोभा व्यसनपरंपरया निपीड्य
माना सहचररहितेव चक्रवाकी जनकसुता पराम्दशां प्रपन्ना ३०

याल्लो रामस्येति भावः २८ क्षितिसु
स्याः क्षमाय स्याः सा दृष्टिमात्रेण रावणस्यापि भस्मीकरणात् संरक्ष्यते परैरनपहार्या गोप्यते उत्सर्पः २९ रूपरतां श्रोच्याम ३०

नकेवलमशोकएव अशोकजनकः अंबुदोपी त्याह हिमव्यपायेन वसंतसमीपप्राप्तकालेनोपलक्षितोनैकसहस्ररश्मिः शीतर
श्मिरभ्युत्थितः सन् शोकंजनयतीति वचनविपरिणामेन संबंधः ३० सीतयामिलेवइयं सीतेवेतिनिविष्टबुद्धि
सः।

यस्याहिपुष्पावनताग्रशाखाः शोकं दृढं वैजनयंत्यशोकाः हिमव्यपायेन च शीतरश्मि
रभ्युत्थितोनैकसहस्ररश्मिः ३१ इत्येवमर्थंकपिरन्ववेक्ष्यसीतेयमित्येवनिविष्टबुद्धिः
संश्रित्यतस्मिन्निषसाद वृक्षेबलीहरीणामृषभस्तरस्वी॥ ३२॥ इति श्रीमद्रामायणे
वाल्मीकीये सुंदरकांडे षोडशः सर्गः॥ १६ ततः कुमुदखंडाभोनिर्मलोनिर्मलोदयः प्रजगाम नभश्चंद्रो हंसोनीलमिवोदकम् १ साचिव्यमिव कुर्वन्स प्रभयानिर्मलेनभः चंद्र
मा रश्मिभिः शीतैः सिषेवे पवनात्मजम् २

संश्रित्य ततः परानुष्ठेयचिकीर्षया तस्मिन् शिंशुपावृक्षेनिष
साद ३२ इति षोडशः सर्गः। १६। कुमुदखंडं कुमुदसमूहस्तदाभश्चंद्रोनभोजगाम अंबुप्रकाशपरभागप्राप्तः हंसोनीलमुद
कमिव उभयत्र नीलत्वं प्रतीत्याकविसंप्रदायेनच बोध्यं १ सचंद्रमाः प्रभया कौत्यासाचिव्यं साहाय्यं कुर्वन्निव शीतैः स्वरश्मि
भिः पवनात्मजं सिषेवे २

स हनूमान् सीतां शोकभारैर्न्यस्तां अपध्वोनीतामिव निमज्जमानामिव ददर्श ३ दिदृक्षमाणः प्रकटतया तां द्रष्टुमिच्छुः ४ कर्णौ प्रावरणे शिरसः प्राच्छादकौ यस्याः शंकुवत्कर्णौ यस्याः मस्तकोच्छ्वासनासिकां ऊर्ध्वमुखनासिकामित्यर्थः ५ अतिकायो त्तमांगीं अतिकायं महदुत्तमांगं शिरो यस्याः तनुदीर्घशिरोधरां कृशस्थूलदीर्घग्रीवामित्यर्थः ध्वस्तकेशीं स्वल्पकेशीं अकेशीं शि

स ददर्श ततः सीतां पूर्णचंद्रनिभाननाम् शोकभारैरिव न्यस्तां भारैर्नावमिवांभसि ३
दिदृक्षमाणो वैदेहीं हनूमान्मारुतात्मजः स ददर्शाविदूरस्था राक्षसीर्घोरदर्शनाः ४
एकाक्षीमेककर्णांच कर्णप्रावरणां तथा अकर्णां शंकुकर्णांच मस्तकोच्छ्वासनासिकाम् ५
अतिकायोत्तमांगीं च तनुदीर्घशिरोधराम् ध्वस्तकेशीं तथाकेशीं केशकंबलधारिणीम् ६
लंबकर्णललाटां च लंबोदरपयोधराम् लंबोष्ठीं चुबुकोष्ठीं च लंबास्यां लंबजानुकाम् ७
ह्रस्वां दीर्घां च कुब्जां च विकटां वामनां तथा करालां भग्नवक्त्रां च पिंगाक्षीं विकृताननाम् ८

रःकेशः केवलधारिणीमिव ६ लंबकर्णां लंबे कर्णौ ललाटे यस्याः तां चिबुके ओष्ठो यस्याः तां ७ कुब्जां स्थगुमतीं विकटां वक्रप्रपदां करालां भयंकरां [illegible] मुखं [illegible] इतिसर्गस्य पूर्वेण संबंधः ८ ८ ८ ८ ८ ८ ८

विकृताऽस्यादेरुत्तरेणाद्दर्शितत्वेनान्वयः विकृताः विकृतवेषाः कंठोपस्कारकूटाभ्यां आयुधविशेषः ९ निखातशिरसः क

विकृताः पिंगलाः कालीः क्रोधनाः कलहप्रियाः कालायसमहाशूलकूटमुद्गरधारिणीः ९ वा
हमकरशार्दूलमहिषाजशिवामुखाः गजोष्ट्रहयपादाश्च निखातशिरसोऽपराः १० एकहस्तैक
पादाश्च खरकर्णाश्च कर्णिकाः गोकर्णा हस्तिकर्णाश्च हरिकर्णास्तथापराः ११ अनासाश्च
तिनासाश्च तिर्यङ्नासाविनासिकाः गजसन्निभनासाश्च लंबोष्ठाः शूलनासिकाः १२ ह
स्तिपादा महापादा गोपादाः पादचूलिकाः अतिमात्रशिरोग्रीवा अतिमात्रकुचोदराः १३ अ
तिमात्रास्यनेत्राश्चार्धाक्षमीचीरदशनाः शूलमुद्गरहस्ताश्च क्रोधनाः कलहप्रियाः १५

वेधवद्गर्तप्रदेशागतशिरसः १० हरिकर्णाः सिंहकर्णाः ११ गजसन्निभनासाः शुंडादंडोपेतनासाः १२ पादचूलिकाः पादे
संलग्नाः चूडाशिरःकेशा यासां ताः अतिमात्रं अतिमात्रं अतिप्रमाणम् १३ १४ १५

दीर्घजिह्वाननास्तथा अजामुखी हस्तिमुखी गोमुखी सूकरीमुखी १४ हयोष्ट्रखरवक्त्राश्च

रा०टी०सुं०
११

सुरामांससदाप्रियेष्वासीनाः १६ १७ स्कंधवंतं प्रशस्तशाखोपशाखावंतं वृक्षश्रेष्ठं उपावृक्षं परिवार्य तन्मूलादीषद्दूरे आसीनाः स्थिताः तस्याधस्तात्तन्मूलसमीपे १८ इत आरभ्य वह्निशिखामिवेत्यंतमेकवाक्यं १९ च्युतादिवःस्वर्गप्रदेशः भूमौ निपतितां तारामिव चारि

करालाधूम्रकेशिन्यो राक्षसीर्विकृताननाः पिबंतिसततंपानंसुरामांससदाप्रियाः १६ मांसशोणितदिग्धांगीमांसशोणितभोजनाः तांददर्शकपिश्रेष्ठोरोमहर्षणदर्शनाः १७ स्कंधवंतमुपासीनाःपरिवार्यवनस्पतिम् तस्याधस्ताच्चतांदेवींराजपुत्रीमनिंदिताम् १८ लक्षयामासलक्ष्मीवान्हनूमान्जनकात्मजाः निष्प्रभांशोकसंतप्तांमलसंकुलमूर्धजाम् १९ क्षीणपुण्यांच्युतांभूमौतारांनिपतितामिव चारित्रव्यपदेशाढ्यांभर्तृदर्शनदुर्गताम् २० भूषणैरुत्तमैर्हीनांभर्तृवात्सल्यभूषिताम् राक्षसाधिपसंरुद्धांबंधुभिश्चविनाकृताम् २१ वियूथांसिंहसंरुद्धांबद्धांगजवधूमिव चंद्ररेखांपयोदांतेशारदाभ्रैरिवावृताम् २२

त्रव्यपदेशाढ्यां पातिव्रत्यसद्वृत्तसंपन्नां भर्तृदर्शने दुर्लभे यस्यास्तां २० उत्तमभूषणाभावे शोभाहीनामपि भर्तृवात्सल्येन तत्प्रियत्वेन शोभावतीं विनाकृतां रहितां २१ पयोदांते वर्षांते च द्रुरेखायाः स्पष्टास्पष्टत्व द्योतनाय इदं विशेषणम् २२

राम०००
११

असंस्पर्शात् भर्तृस्पर्शाभावात् अयुक्तां वायुक्तां वीणा वादकवादन क्रियारहितां वल्लकीं वीणामिव स्थितां अयुक्तां राक्षसीवशे राक्षो
धीनत्वे ऽयोग्यां २३ शोकसागरमाप्लुतां तत्र समग्रां ताभिः राक्षसीभिः सग्रहां क्रूरग्रहाविष्टां रोहिणीमिव स्थिताम् अकुसुमलतां

क्लिष्टरूपामसंस्पर्शादयुक्तामिव वल्लकीम् सतीं भर्तृहिते युक्तामयुक्तां राक्षसीवशे २३ अशोक
वनिकामध्ये शोकसागरमाप्लुताम् ताभिः परिवृतां तत्र सग्रहामिव रोहिणीम् ददर्श हनुमांस्तत्र
लतामकुसुमामिव २४ सा मलेन च दिग्धांगी वपुषा चाप्यलंकृता मृणाली पंकदिग्धेव वि
भाति च न भाति च २५ मलिनेन तु वस्त्रेण परिक्लिष्टेन भामिनीम् संवृतां मृगशावाक्षीं ददर्श
हनुमान्कपिः २६ तां देवीं दीनवदनामदीनां भर्तृतेजसा रक्षितां स्वेन शीलेन सीतामसितलो
चनाम् २७ तां दृष्ट्वा हनुमान्सीतां मृगशावनिभेक्षणाम् मृगकन्यामिव त्रस्तां वीक्षमाणां समं
ततः २८

सादृश्यमाभरणत्यागात् २४ वपुषालंकृता स्वभावरमणीयेत्यर्थः विभाति न विभाति चेति स्वभावसौंदर्यसंस्काराच्छोभते मलादिग्ध
त्वान्न शोभते चेत्यर्थः २५ भर्तृतेजसा भर्तृपराक्रमानुसंधानेनादीनहृदयाम् २७ २८

रा० वा० सुं० ७८

दुःखस्य दुःखसागरस्य ऊर्म्याधेयेनाधारस्य निगरणे बोध्यं २९ क्षमां सहनशीलां विनाभरणशोभिनीं आभरणानुगमनपेक्ष्यैव सौंदर्येण शोभमानां ३० राघवं नमश्चक्रे इति भगवतो राघवस्यानुग्रहादेवेयं मया दृष्टेति पुनः पुनः स्मृत्वा नमस्कारं कृतवान् ३१

दहन्तीमिव निश्वासैर्वृक्षान्पल्लवधारिणः संघातमिव शोकानां दुःखस्योर्मिमिवोत्थिताम् २९
तां क्षमां सुविभक्ताङ्गीं विनाभरणशोभिनीम् प्रहर्षमतुलं लेभे मारुतिः प्रेक्ष्य मैथिलीम् ३०
हर्षजानि च सोऽश्रूणि तां दृष्ट्वा मदिरेक्षणाम् मुमोच हनुमांस्तत्र नमश्चक्रे च राघवम् ३१ नमस्कृत्य च रामाय लक्ष्मणाय च वीर्यवान् सीतादर्शनसंहृष्टो हनूमान्संवृतोऽभवत् ॥३२॥ इत्यार्षे रामायणे सुंदरकांडे सप्तदशः सर्गः ॥१७॥ तथा विप्रेक्षमाणस्य वनं पुष्पितपादपम् विचिन्वतश्च वैदेहीं किंचिच्छेषा निशाभवत् १

संवृतोऽभवत् राक्षसीनां दर्शनपरिहाराय सूक्ष्मरूपमवलंब्य वृक्षमूलसमीपस्थशाखासु निलीनोऽभवत् ३२ इति सप्तदशः सर्गः पुष्पितपादपवनं तथा पूर्वोक्तप्रकारेण विप्रेक्षमाणस्य पश्यतः वैदेहीं विचिन्वतश्च हनूमतः किंचिच्छेषा निशाभवदित्यन्वयः विप्रेक्षमाणो विचिन्वतिचेत्यस्य यस्य च भावेनेति षष्ठी १ १ १ १ १ १ १ १ १ १

राम० ७८

विरात्रे रात्रिविपर्यासे अपररात्रे इत्यर्थः षडंगानि शिक्षादीनि तद्युक्तवेदविदुषां क्रतुश्रेष्ठयाजिनां ब्राह्मणरूपाणां ब्रह्मराक्षसानां वेदघोषान् शुश्राव २ ३ निद्रावशात् प्रादेव स्रस्तमाल्यांबरधरः ४ भृशं नियुक्तः गाढमिति वेशितचित्तः कामं कामवेगं ५ नगैर्वृक्षैः

षडंगवेदविदुषां क्रतुप्रवरयाजिनाम् शुश्राव ब्रह्मघोषांश्च विरात्रे ब्रह्मरक्षसाम् २ प्रध्मतं
गत्वा वादित्रैः शब्दैः श्रोत्रमनोहरैः प्राबोध्यत महाबाहुर्दशग्रीवो महाबलः ३ विबुध्य तु म
हाभागो राक्षसेंद्रः प्रतापवान् स्रस्तमाल्यांबरधरो वैदेहीमन्वचिंतयत् ४ भृशं नियुक्तस्तस्यां
च मदनेन मदोत्कटः न स तं राक्षसः कामं शशाकात्मनिगूहितुम् ५ स सर्वाभरणैर्युक्तो बिभ्र
च्छ्रियमनुत्तमाम् तां नगैर्विविधैर्जुष्टां सर्वपुष्पफलोपगैः ६ वृतां पुष्करिणीभिश्च नानापु
ष्पोपशोभिताम् सदामत्तैश्च विहगैर्विचित्रां परमाद्भुतैः ७ ईहामृगैश्च विविधैर्वृतां दृष्टिमनो
हरैः वीथीः संप्रेक्षमाणश्च मणिकांचनतोरणाम् ८ नानामृगगणाकीर्णां फलैः प्रपतितै
र्वृताम् अशोकवनिकामेव प्राविशत् संततद्रुमाम् ९ अंगनाशतमात्रं तु तं व्रजंतमनुव्रजत्
महेंद्रमिव पौलस्त्यं देवगंधर्वयोषितः १० ६ ७ वीथीः अशोकवनिकामार्गान् मत वीथ्यः ८ ९ देवादियोषितां

महेंद्रमिव तं पौलस्त्यं रावणं व्रजंतमनुव्रजन् अडभाव आर्षः १०

कांचनीः कांचनदंडारोपिताः दीपिकाः काश्चिज्जगृहुः बालव्यजनहस्ताश्च काश्चिदन्व व्रजन्निति शेषः तालवृंतानीत्यस्य जगृहुरिति अनेनान्वयः कांचनैहेमैरिति शिशिरयोरपि पृथिता भावो ध्वनितः ११ भृंगारैः कलशविशेषैः धत्तूरकुसुमसदृशाजलपात्रैरिति यावत् मेडुलोम्ना वृत्तपर्यंताः वृसीशसनविशेषानतपाश्चिनामिमतरणादिना अस्यन्तु स्वयमेनेत्ति विशेषः १२ पानस्य पूर्णांपा

दीपिकाः कांचनीः काश्चिज्जगृहुस्तत्र योषितः बालव्यजनहस्ताश्च तालवृंतानि चापराः ११
कांचनैश्च विभृंगारैर्जगृहुः सलिलमग्रतः मेडुलोम्ना वृत्तीश्च विवराश्चान्याः पद्मतोयपः १२ का
श्चिद्रूप्यमयीं पात्रीं पूर्णां पानस्य भ्राजतीम् दक्षिणादक्षिणेनैव तदा जग्राह पाणिना १३ राजहंस
प्रतीकाशं छत्रं पूर्णशशिप्रभम् सौवर्णदंडमपरा गृहीत्वा पृष्ठतो ययौ १४ निद्रामदपरीता स्त्री
रावणस्योत्तमाः स्त्रियः अनुजग्मुः पतिं वीरं घनं विद्युल्लता इव १५ व्याविद्धहारकेयूराः समा
मृदितवर्णकाः समागलितकेशांताः सस्वेदवदनास्तथा १६ घूर्णंतो मदशेषेण निद्रया
च शुभाननाः स्वेदक्लिष्टांगकुसुमाः सुमाल्याकुलमूर्धजाः १७

नेन पूर्णां शेषष्ठी भ्राजतीं देदीप्यमानां दक्षिणा चतुरा १३ १४ १५ व्याविद्धाः स्थानादीषच्चलिताः हाराः केयूराश्च यासां
ताः समवगाम्य मृदितो मष्टो वर्णको ऽनुलेपनं यासां ताः १६ समाल्यासपुष्पाशाकुला मूर्धजा यासां ताः १७ १७ १७ रा०सं०
७९

मदिरलोचनाः मदकरवीक्षणाः बहुमानात् भर्तृकृतसंमानात् कामात् १८ मदोद्धतैः मदं प्राप्तात् तथा चितागतिर्यस्य १९ २० द्वा रदेशं अशोकवनिकाद्वारदेशं २१ गंधतैलेन गंधवासिततैलं २२ कामेन दर्पेण मदेन च युक्तं जिह्मे वक्रे ताम्रे आयते ईक्षणे यस्य

शय्यातेनैर्ऋतपतिं नार्यो मदिरलोचनाः बहुमानाच्च कामाच्च शिश्रिये भार्यास्तमन्वयुः १८ सच
कामपराधीनः पतिस्तासां महाबलः सीतासकृन्नामदोमदोचितगतिर्बभौ १९ ततः कांची
निनादैश्चनूपुराणां च निस्वनम् अशृणोद्वपरमस्त्रीणां कपिर्मारुतनंदनः २० तेजाप्रतिमक
र्माणामचिंत्यबलपौरुषम् द्वारदेशमनुप्राप्तं ददर्श हनुमान्कपिः २१ दीपिकाभिरनेकाभिः
समंतादवभासितम् गंधतैलेनावसिक्ताभिर्ध्रियमाणाभिरग्रतः २२ कामदर्पमदैर्युक्तं जिह्म
ताम्रायतेक्षणम् समक्षमिवकंदर्पमपविद्धशरासनम् २३ मथितामृतफेनाभमरजो वस्त्र
मुत्तमं सपुष्पमवकर्षंतं विमुक्तं सक्तमंगदे २४

तं अपविद्धशरासनं त्यक्तेक्षुचापं समक्षं प्रत्यक्षं कंदर्पमिव स्थि
तं २१ मथितेत्यादमृतं तथा फेनं यथा मृतफेनवच्छुक्लाप्रभा यस्य तत् अरजो धौतं सपुष्पं पुष्पमालासहितं विमुक्तं स्थानाच्चु
तं अंगदे सक्तं वस्त्रमवकर्षंतं अंगदादाकृष्य यथा स्थाने स्थापयंतमित्यर्थः २४ ४२

रा० वा० सुं० ७

निशम्यवचनमिति स्पष्टः १०१ १०२ १०३ हिरण्यनाभस्वविवरणं शातकुंभमयैरिति सुवर्णप्रचुरैरित्यर्थः आदित्योदयसंकाशैः आदित्योदयतुल्यैः शृंगैरुपलक्षितःपर्वतः शृंगाणि दर्शयामासेति योजना १०४ शात्रवसंकाशं शात्रवत् श्यामसमाकाशं कां

हिरण्यनाभोमैनाकोनिशम्यलवणांभसः उत्पपातजलात्तूर्णंमहाद्रुमलतावृतः १०१ सा
गरस्यजलंभित्वाबभूवात्युच्छ्रितस्तदा यथाजलधरंभित्वादीप्तरश्मिर्दिवाकरः १०२
समहात्मामुहूर्तेनपर्वतःसलिलावृतः दर्शयामासशृंगाणिसागरेणनियोजितः १०३
शातकुंभमयैःशृंगैःसकिन्नरमहोरगैः आदित्योदयसंकाशैरालिखद्भिरिवांबरम् १०
४ तस्यजांबूनदैःशृंगैःपर्वतस्यसमुत्थितैः आकाशंशस्त्रसंकाशमभवत्कांचनप्रभम् १०५
जातरूपमयैःशृंगैर्भ्राजमानैर्महाप्रभैः आदित्यशतसंकाशःसोभवद्गिरिसत्तमः १०६
तमुत्थितमसंगेनहनूमानग्रतःस्थितम् मध्येलवणतोयस्यविघ्नोयमितिनिश्चितः १०७
सतमुच्छ्रितमत्यर्थंमहावेगोमहाकपिः उरसापातयामासजीमूतमिवमारुतः १०८

चनप्रभंकनकगौरमासीदित्यर्थः १०५ १०६ असंगेनअपविलंबेननिश्चितःनिश्चितवान् केनेति शिष्टा १०७ तमसर्षमुच्छ्रि

तम० ७

तंदृष्ट्वातच्छृंगंपातयामासेसर्पः १०८ २२

पत्रविटपे तत्रविटपत्रशाखायां लीनो हनूमान् समीपमुपसंक्रान्तमवस्थितं निध्यातुं अयममुक इति विशेषतो लक्षितुमुपचक्रमे उपक्रमं चकार २५ २६ प्रमदावनं प्रमदानां क्रीडार्हवनं अग्रतः पुरोभागे २७ क्षीबो मत्तः शङ्कुकर्णः गोकर्णस्तत्र लम्बकर्णस्तेन हनुमता दृष्टः २८ २९ यः प्रमदावनं प्रविष्टः ... सोयमेवेत्यन्वयः तस्माद्रावणोयमिति चिंत्य प्लवङ्गमः ततः रावणा

तं पत्रविटपे लीनः पत्रपुष्पघनावृतः समीपमुपसंक्रान्तं निध्यातुमुपचक्रमे २५ अवेक्षमाणस्तु तदा ददर्श कपिकुञ्जरः रूपयौवनसंपन्ना रावणस्य वरस्त्रियः २६ ताभिः परिवृतो राजा सुरूपाभिर्महायशाः तन्मृगद्विजसंघुष्टं प्रविष्टः प्रमदावनम् २७ क्षीबो विचित्राभरणः शङ्कुकर्णो महाबलः तेन विश्रवसः पुत्रः स दृष्टो राक्षसाधिपः २८ वृतः परमनारीभिस्ताराभिरिव चन्द्रमाः तं ददर्श महातेजास्तेजोवन्तं महाकपिः २९ रावणोयं महाबाहुरिति संचिन्त्य वानरः सोयमेव पुरा शेते पुरमध्ये गृहोत्तमे अवप्लुतो महातेजा हनुमान्मारुतात्मजः ३० स तथाप्युग्रतेजाः सन्निर्धूतस्तस्य तेजसा पत्रगुह्यान्तरे सक्तो मतिमान्संवृतोभवत् ३१

चेष्टितावलोकनार्थमग्रविटपादवरूढ इत्यर्थः ३० यद्यपि सः समुद्रलंघनकर्ता मारुतात्मजो हनूमानुग्रतेजास्तथापि तस्य रावणस्य तेजसा निर्धूतः सन् पत्रगुह्यान्तरे पत्रगूढप्रदेशे सक्तः संवृतो गूढोऽभवत् यतो मतिमान् स्वामिकार्यसाधक इत्यर्थः ३१

उपावर्तत समीपं प्राप्तः ३२ इत्यष्टादशः सर्गः तस्मिन्नित्यादि श्लोकद्वयमेकं वाक्यं तस्मिन्नेव काले आगमनकाल एव तेन
रावणेन ततो दृष्ट्वा तत्र दूरं ददर्श एवं दृष्ट्वा ततः दर्शनानन्तरं प्रावेपतेति संबन्धः १२ रुदती उपविष्टाभूदिति शेषः भीतस्वभा

सतामसितकेशान्तां पृथुश्रोणीं संहतस्तनीम् दिदृक्षुरसितापाङ्गीमुपावर्तत रावणः १२
हरिः ॐ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये सुन्दरकाण्डे ऽष्टादशः सर्गः॥ १८ ॥ तस्मिन्नेव ततः काले राजपुत्री त्वनिन्दिता रूपयौवनसंपन्नं भूषणोत्तमभूषितम् १ ततो दृष्ट्वैव वैदेही रावणं राक्षसाधिपम् प्रावेपत वरारोहा प्रवाते कदली यथा २ ऊरुभ्यामुदरं छाद्य बाहुभ्यां च पयोधरौ उपविष्टा विशालाक्षी रुदती वरवर्णिनी ३ दशग्रीवस्तु वैदेहीं रक्षितां राक्षसीगणैः ददर्श दीनां दुःखार्तां नावं सन्नामिवार्णवे ४ असंवृतायामासीनां धरण्यां संशितव्रताम् छिन्नां प्रपतितां भूमौ शाखामिव वनस्पतेः ५ ५ ५

वो नक्ष्या स्वभावोक्तिरन्नालंकारः ३ अर्णवे सन्नां शीर्णां नावमिव ४ असंवृतायां आस्तरणरहितायां संशित
व्रतां एवं व्रतां धारयन्तीं दृढं व्रतमित्यवकुर्वाणाम् ५

ए० रा० सुं० ८१

मलमेव मंडनं तेन चित्रांगीं कर्दमगात्रीं ईदृशीं यां ददर्श सा पंकदिग्धा पंकरूषिता मृणाली वा विभाति न विभाति च स्वरूपशोभया विभाति मलावधारणाच्च न विभातीत्यर्थः ६ संकल्पोत्तचिंतनं तद्रूपा ये हयास्तैर्युक्तैः मनोरथैरेव राघवसमीपं यान्तीमिव ७ अपश्यन्तीं तामिव स्थितां ८ आविष्टां मन्त्रादिभिरभिभूतां अतएव चे

मलमंडनचित्रांगीं मंडनार्हाममंडिताम् । मृणालीपंकदिग्धेव विभाति न विभाति च ६
समीपं राजसिंहस्य रामस्य विदितात्मनः । संकल्पहयसंयुक्तैर्यान्तीमिव मनोरथैः ७
शुष्यन्तीं रुदतीमेकां ध्यानशोकपरायणाम् । दुःखस्यान्तमपश्यन्तीं रामां राममनुव्रताम् ८
चेष्टमानामथाविष्टां पन्नगेन्द्रवधूमिव । धूप्यमानां ग्रहेणेव रोहिणीं धूमकेतुना ९
वृत्तशीले कुले जातामाचारवति धार्मिके । पुनः संस्कारमापन्नां जातामिव च दुष्कुले १०

ष्टमानां पन्नगेन्द्रवधूमिव स्थितां धूमवर्णेन केतुना ग्रहेण धूप्यमानां संतप्यमानां रोहिणीमिव ९ वृत्तं मर्यादानुवृत्ते घनं शीलं सत्स्वभावः वृत्तशीले आचारवति विहितकर्मानुष्ठानवति धार्मिके यज्ञादिकर्मप्रधाने एवंभूते कुले जातां एतादृशे एव कुले पुनः संस्कारं यागाग्निहरणसंस्कारमापन्नामपि दुष्कुले जातामुत्पन्नां तत्रैव प्राप्तसंस्कारामिव च मलिनां स्थितामित्यर्थः स्त्रीणां विवाहस्यैवोपनयनत्वात् द्वितीयजन्मस्थानत्वादिति भावः १०

एम० ८१

सन्नां क्षीणां विमानितां अश्रद्धया नादृतां ११ आपत्तीं प्राणापमिधनादिरूपां आप्तां रात्र इति शेषः कालेऽप्राप्तकालेऽदिग्धां दीप्तां दह्यमानामिव पूजां देवपूजां १२ पौर्णमासीं तन्निशां पद्मिनीं विध्वस्तां हिमादिहतां १३ तमोध्वस्तां उपक्षी-

सन्नामिव महाकीर्तिं श्रद्धामिव विमानिताम् पूजामिव परिक्षीणामाशां प्रतिहतामिव ११ आपत्तीमिव विध्वस्तामाशां प्रतिहतामिव दीप्तामिव अदिग्धां काले पूजामपहतामिव १२ पौर्णमासीमिव निशां राहुग्रस्तेन्दुमण्डलाम् पद्मिनीमिव विध्वस्तां हतशूरां चमूमिव १३ प्रभामिव तमोध्वस्तामुपक्षीणामिवापगाम् वेदीमिव परामृष्टां शान्तामग्निशिखामिव १४ उत्कृष्टपर्णकमलां वित्रासितविहङ्गमाम् हस्तिहस्तपरामृष्टामाकुलामिव पद्मिनीम् १५ पतिशोकातुरां शुष्कां नदीं विस्रावितामिव परया मृजया हीनां कृष्णपक्षे निशामिव १६

णां आपगां स्वल्पजलामित्यर्थः परामृष्टां पतितैराक्रान्तां १४ उत्कृष्टानि त्रुटितानि पर्णानि कमलानि यस्यास्तां १५ विस्रावितां रोधोभङ्गादिना निर्जलीकृतां शुष्कां मृजया उद्वर्तनादिना परिशोधनेन हीनाम् १६

टी० वा० सुं०
८२

सुजाताङ्गीं सुदराङ्गीं १७ गृहीतां धृतां बद्धां १८ अयत्नत इति केशसंस्काराभावादयत्नतः सिद्धये शिरोभूषः १९ अल्पा
हारां जलमात्राहारां देवतां ततः पापमलाभेन तदनपेक्षणाच्च २० प्राञ्जलिं बद्धाञ्जलिं रघुमुख्यस्य कर्तुः सकाशात् दश

सुकुमारीं सुजाताङ्गीं रत्नगर्भगृहोचिताम् तप्यमानामिवोष्णेन मृणालीमचिरोद्धृताम् १७ ग
हीतामालितां स्तंभे यूथपेन विनाकृताम् निःश्वसन्तीं सुदुःखार्तां गजराजवधूमिव १८ ए
कया दीर्घया वेण्या शोभमानामयत्नतः नीलया नीरदापाये वनराज्या महीमिव १९ उ
पवासेन शोकेन ध्यानेन च भयेन च परिक्षीणां कृशां दीनामल्पाहारां तपोधनाम् २० आ
याचमानां दुःखार्तां प्राञ्जलिं देवतामिव भावेन रघुमुख्यस्य दशग्रीवपराभवम् २१ स
मीक्षमाणां रुदतीमनिन्दितां सुपक्ष्मताम्रायतशुक्ललोचनाम् अनुव्रतां राममतीव मैथिलीं
प्रलोभयामास वधाय राक्षसः २२ ॥ इत्यार्षे रा० सुंदरकाण्डे एकोनविंशः सर्गः ॥ १९ ॥॥॥॥॥॥

श्री

ग्रीवविषयकपराभवं भावेन मनसा देवतामायाचमानामिव प्रार्थयन्तीमिव स्थितामिति संबन्धः २१ क्रोधेन रोद
नेन वा ताम्रे प्रान्ते शुक्ले लोचने यस्यास्तां वधाय वधायैव स्पर्धः २२ एकोनविंशः सर्गः १९ सीताराम॥॥॥

टी० सु०
८२

परिवृतां राक्षसीभिरिति शेषः साकारैः साभिप्रायैः आकारस्त्विङ्गितादिकृती स्मरः न्यदर्शयत स्वाभिप्रायमिति शेषः सीतायै स्वा
भिप्रायं प्रकाशितवानित्यर्थः १ नागोगजः स्तनोदरं गूहमाना भयादिव भयादेव आत्मानं स्वशरीरं मदर्शनं नेतुमिच्छ
सि तत्किमिति शेषः २ नैव भीतिर्मत्तस्ते पुत्र हेत्याह कामये इत्यादि ३ अन्येच भयहेतवो न संतीत्याह नेहेति मत्तः मदागम

स तां परिवृतां दीनां निरानन्दां तपस्विनीम् साकारैर्मधुरैर्वाक्यैर्न्यदर्शयत रावणः १ मां दृ
ष्ट्वा नागनासोरु गूहमाना स्तनोदरम् अदर्शनमिवात्मानं भयान्नेतुं त्वमिच्छसि २ कामये
त्वां विशालाक्षि बहुमन्यस्व मां प्रिये सर्वाङ्गगुणसंपन्ने सर्वलोकमनोहरे ३ नेह केचिन्मनु
ष्या वा राक्षसाः कामरूपिणः व्यपसर्पतु ते सीते भयं मत्तः समुत्थितम् ४ स्वधर्मो रक्षसां भीरु
सर्वदैव न संशयः गमनं वा परस्त्रीणां हरणं संप्रमथ्य वा ५ एवं चैवमकामां तु न त्वां स्प्रक्ष्या
मि मैथिलि कामं कामः शरीरे मे यथाकामं प्रवर्त्तताम् ६

नात्समुत्थितं पुरुषांतरस्याभावनयास्त्रातेभयं व्य
पसर्पतु अन्येषामभावात् ४ परदारेच्छापरस्त्रापहारश्च कथं हस्वधर्म इति तत्र पापं बलात्कृत्य ५ एवं चेदेवमपि व
लोत्कारस्तु नापि प्रकामामपि कामनारहितां त्वां न स्प्रक्ष्यामि कामो मन्मथः यथाकामं यथेच्छं कामं तद्विषये
च्छां प्रवर्त्ततां प्रवर्त्तयतु तस्य पश्चात्तस्य लाभाय संपादकत्वादिति भावः ६

ग्नतः सर्वं घाभयंनकार्यमित्याहदेवीति दविसर्जितः पुरपूज्ये हृहमयिमद्विषयेप्रणयस्तप्रसीद एकवेणी प्रसीमेति
तवेणी धरां प्राप्यामृष्ट्यनं नौपयिकानि नश्यक्षानि पुष्कमौपयिकमित्यमरः ८ गां प्राप्यविचित्रमाल्यादीनि
लभस्वेत्पर्थः ९ १० हेहविग्नहेमांप्राप्यहिमांप्राप्यापिभूषणादीनां कथमनर्हास्या इति संबंधः ११ यदि संदेतेसंजा

देविनेहभयंकार्यमयिविश्वासिहिप्रिये प्रणयस्वचतेत्वेनमैवंभूः श्रोकेत्वालमा ७ ॥
एकवेणीं धरां प्राप्यध्यानेमलिनमंबरम् भस्यानेपुपवासश्वनैतान्यौपयिकानि
ते ८ विचित्राणिचमाल्यानिचंदनान्यगुरूणिच विविधानिचवासांसिदिव्यान्याभर
णानिच ९ महार्हाणिचपानानिशयनान्यासनानिच गीतंनृत्यंचवाद्यंचलभमांप्रा
प्यमैथिलि १० स्त्रीरत्नमसिमैवंभूःकुरुगात्रेषुभूषणम् मांप्राप्यहिकथंवास्यास्त्वमन
र्हासुविग्रहे ११ इदंतेचारुसंजातंयौवनंव्यतिवर्तते यदतीतंपुनर्नैतिस्रोतःश्रोतस्विनी
नामिव १२ त्वांकृत्वोपरतोमन्येरूपकर्त्तासविश्वसृक् नहिरूपोपमाह्यन्यातवास्तिशुभद
ते १३

ते यौवनं वयातिवर्त्तते अतिक्रम्यगच्छति स्रोतस्विनीनां जलप्रवाहानां स्रोतः तेन प्रवहज्जलमिव अतीतं न पुनरेति प्रतीतोभुंक्ष्वभोगानि
ति फलितोर्थः १२ रूपकर्त्तादिव्यरूपस्रष्टा त्वां कृत्वा निर्माय उपरतो दिव्यरूपनिर्माणाद्विरत इति मन्ये हि यतस्तव रूपोपमानास्ति यदि पुनः सउ
नमरूपनिर्मातोपरतोतस्याद्देवत्तवोपमेति भावः १३

सु० बा० सुं० ८३

सुं० ८३

नातिवर्तेत न क्षुभ्येतेत्यर्थः १४ निबध्यते बद्धं जायते १५ मोहं नैतद्दशा भविष्यामीति बुद्धिं १६ १७ तव हेतोस्त्वत्प्रीत्यर्थं १८ प्रतिबलो युद्धे जेता

त्वां समासाद्य वैदेहि रूपयौवनशालिनीम् कः पुमान्नातिवर्तेत साक्षादपि पितामहः १४ यद्यत्पश्या
मि ते गात्रं शीतांशुसदृशानने तस्मिंस्तस्मिन्पृथुश्रोणि चक्षुर्मम निबध्यते १५ भव मैथिलि भार्या
मे मोहमेतं विसर्जय बह्वीनामुत्तमस्त्रीणां ममाग्रमहिषी भव १६ लोकेभ्यो यानि रत्नानि संप्रम
थ्य हृतानि मे तानि मे भीरु सर्वाणि राज्यं चैतदहं च ते १७ विजित्य पृथिवीं सर्वां नानानगरमा
लिनीम् जनकाय प्रदास्यामि तव हेतोर्विलासिनि १८ नेह पश्यामि लोकेऽन्यं यो मे प्रतिबलो भ
वेत् पश्य मे सुमहद्वीर्यमप्रतिद्वन्द्वमाहवे १९ असकृत्संयुगे भग्ना मया विमृदितध्वजाः अ
शक्ताः प्रत्यनीकेषु स्थातुं मम सुरासुराः २० इच्छया क्रियतामद्य प्रतिकर्म तवोत्तमम् सुप्रभा
ण्यपि सज्जन्तां तवाङ्गे भूषणानि हि २१ साधु पश्यामि ते रूपं संयुक्तं प्रतिकर्मणा प्रतिकर्माभि
संयुक्ता दाक्षिण्येन वरानने २२

१९ प्रत्यनीकेषु प्रतिसैनिकभावेषु २० प्रतिकर्म प्रसाधनमलंकरणमिति यावत् २१
प्रतिकर्मणा युक्तं ते रूपं पश्यामि भाविकश्चालंकारः पश्येयमित्यर्थः दाक्षिण्येन मद्विषयककृपया प्रतिकर्माभिसंयुक्ता भवेति शेषः २२

२३ ललस्व प्रीतिं कुरु मत्प्रसादात् ममप्रसादात् ललन्त्याः मदीयप्रसादजनितप्रभावेन वर्द्धमानायाः २४ ऋद्धिं पराक्रमादिसंपदं श्रियं धनादिसंपदं २५ निक्षिप्तविजयः निरस्तविजयसाधनः गृहीत एव गतश्रीः त्वादिगुणाः जीवनसंदेहे पराक्रमादिसंभावना दूरतर इत्यर्थः

रा० वा० सुं० ८४

भुंक्ष्व भोगान्यथाकामं पिब भीरु रमस्व च यथेष्टं च प्रयच्छ त्वं पृथिवीं वा धनानि च २३ ल-
लस्व मयि विस्रब्धा धृष्टमाज्ञापयस्व च मत्प्रसादाल्ललन्त्याश्च ललन्तां बान्धवास्तव २४ ऋ-
द्धिं ममानुपश्य त्वं श्रियं भद्रे यशस्विनि किं करिष्यसि रामेण सुभगे चीरवाससा २५ निक्षि-
प्तविजयो रामो गतश्रीर्वनगोचरः व्रती स्थंडिलशायी च शंके जीवति वा न वा २६ नहि वैदे-
हि रामस्त्वां द्रष्टुं वाप्युपलप्स्यते पुरो बलाकैरसितैर्मेघैर्ज्योत्स्नामिवावृताम् २७ न चापि
मम हस्तात्त्वां प्राप्तुमर्हति राघवः हिरण्यकशिपुः कीर्तिमिंद्रहस्तगतामिव २८ चारुस्मिते-
चारुदति चारुनेत्रे विलासिनि मनो हरसि मे भीरु सुपर्णः पन्नगं यथा २९

२६ द्रष्टुं वापि प्राप्तिस्तु दूरतरेत्यर्थः उपलप्स्यते प्राप्स्यतीत्यर्थः पुरोऽग्नेबलाकायै बांते एनेसरवलाकैर्नीलैर्मेघैः आवृतां ज्योत्स्नामिव २७ इंद्रहस्तगतां कीर्तिं कीर्तितुल्यां भार्यामिंद्रदत्तां नारदमुखेन प्रार्थनया यथा हिरण्यकशिपुः प्राप्तवान् नैवं एव त्वां प्राप्स्यतीति वै धर्म्ये दृष्टांतः २८ २९ रा० ८४

स्वेषु दारेषु मंदोदर्यामपि ३० ऐश्वर्यमाधिपत्यं ३१ ३२ ३३ ३४ पिब मध्विति शेषः ललई स्पवती भव ललंतु प्राप्तसमस्ताभिलाषा भवंतु ३५

क्लिष्टकौशेयवसनां तन्वीमप्यनलंकृताम् त्वां दृष्ट्वा स्वेषु दारेषु रतिं नोपलभाम्यहम् ३० अंतःपुरनिवासिन्यः स्त्रियः सर्वगुणान्विताः यावंत्यो मम सर्वासामैश्वर्यं कुरु जानकि ३१ मम ह्यसितकेशांते त्रैलोक्यप्रवराः स्त्रियः तास्त्वां परिचरिष्यंति श्रियमप्सरसो यथा ३२ यानि वैश्रवणे सुभ्रु रत्नानि च धनानि च तानि लोकांश्च सुश्रोणि मां च भुंक्ष्व यथासुखम् ३३ न रामस्तपसा देवि न बलेन न विक्रमैः न धनेन मया तुल्यस्तेजसा यशसापि वा ३४ पिब विहर रमस्व भुंक्ष्व भोगान् धननिचयं प्रदिशामि मेदिनीं च मयि लल ललने यथासुखं त्वं त्वयि च समेत्य ललंतु बांधवास्ते ३५ कुसुमिततरुजालसंततानि भ्रमरयुतानि समुद्रतीरजानि कनकविमलहारभूषितांगी विहर मया सह भीरु काननानि ३६॥ इत्यार्षे रामायणे वाल्मीकीये सुंदरकांडे विंशः सर्गः॥ २०॥

३६ इति विंशः सर्गः २० २०

सादितोऽवसादितोऽधःकृतइतियावत् कृत्वैवमंबंदृष्ट्वाजहर्षस्वोत्थानप्रयोजनावेदनान्ननादशब्दंकृतवान् १०९ तदेववि

सतदासादितस्तेनकपिनापर्वतोत्तमः बुध्वातस्यहरेर्वेगंजहर्षचननादच्च १०९ तमा
काशगतंवीरमाकाशेसमुपस्थितः प्रीतोहृष्टमनावाक्यमब्रवीत्पर्वतःकपिम् ११० मा
नुषंधारयन्रूपमात्मनःशिखरेस्थितः उवाचहरिशार्दूलंमैनाकःपवनात्मजम् १११
दुस्करंकृतवान्कर्मत्वमिदंवानरोत्तम निपत्यममशृंगेषुविश्रमस्वयथासुखम् ११२
राघवस्यकुलेजातैरुदधिःपरिवर्धितः सत्वांरामहितेयुक्तंप्रत्यर्चयतिसागरः ११३ कृ
तेचप्रतिकर्त्तव्यमेषधर्मःसनातनः सोयंतत्प्रतिकारार्थीत्वत्तःसन्मानमर्हति ११४

वरणेनितम्भिमिति ११० १११ ११२ राघवस्यकुलेजातैःसागरपुत्रैः ११३ कृतेउपकारेसोयमुदधिःतत्प्रतिकार्यीत सोपकारस्यप्रत्युपकारार्थीत्वत्तः त्वासकाशात् संमानमर्हतित्वत्स्वीकाररूपांपूजांप्राप्तुंयोग्यामवतीसर्थः ११४

रा० बा० सुं०
८५

दीनमिति क्रियाविशेषणं १ पतिमेव चिंतयन्ती प्रत्युवाचेति संबंधः तृणमंतरतः कृत्वा एवं तृणं राक्षस त्वत्तो मया गण्यते नहीत्वान्तरत्व
व्यवधानकरणं प्रत्युवाचेति पुनरभिधानं वचनप्रकारविशेषकं पुनार्थं दुःखार्ता यांप्रति शुचिस्मितत्वाभिधानं वस्तुतः त्वभावे

तस्य तद्वचनं श्रुत्वा सीता रौद्रस्य रक्षसः आर्ता दीनस्वरा दीनं प्रत्युवाच ततः शनैः १ दुःखा
र्ता रुदती सीता वेपमाना तपस्विनी चिंतयंती वरारोहा पतिमेव पतिव्रता तृणमंतरतः कृ
त्वा प्रत्युवाच शुचिस्मिता २ निवर्तय मनो मत्तः स्वजने क्रियतां मनः न मां प्रार्थयितुं
युक्तस्त्वं सिद्धिमिव पापकृत् ३ अकार्यं न मया कार्यमेकपत्न्या विगर्हितम् कुलं संप्रा
प्तया पुण्यं कुले महति जातया ४ एवमुक्त्वा तु वैदेही रावणं तं यशस्विनी रावणं पृष्ठ
तः कृत्वा भूयो वचनमब्रवीत् ५ नाहमौपयिकी भार्या परभार्या सती तव साधु धर्ममवे
क्षस्व साधु साधुव्रतं चर ६ नस्मितवत्प्रतीयमानत्वात् २ स्वजने स्वीयभार्यादिजने सिद्धिं ब्रह्मलोके ३ एकप
त्न्या एकः पतिर्यस्यास्तया पतिव्रतयेत्यर्थः पुण्यं कुलं संप्राप्तया विवाहसंबंधेनेति शेषः ४ पृष्ठतः कृत्वा पराङ्मुखी स्थित्वा ५ अहं
परभार्या तव नौपयिकी योग्या न यतः सती पतिव्रतेत्यर्थः साधु विलिप्रवेक्षस्व पश्य साधूनां व्रते नियमे चर कुर्वित्यर्थः ६ ६

राम०
८५

यथा तव मे दोदर्याः परपरिग्रहे हेतुः दुःखं तथान्येषामपि स्वदारापरपरिग्रहे दुःखमिति सिताया अन्येषां दारा रक्ष्याः परिहार्याः अ
स्मिन्नर्थे आत्मानमेव दृष्टान्तीकृत्य स्वेष्वेव दारेषु रम्यताम् ७ विपक्षे दंडमाह अतुष्टमिति अतुष्टम तएव निकृतिप्रज्ञं निकृतौ शाठ्ये
प्रज्ञा यस्य तं परदाराः पराभवमापुरैश्वर्यादिक्षयरूपं नयंति प्रापयंति ८ इहेति विशाले पि दुर्जनसंकुले लंकानगरे संतः सत्वामनर्था

यथा तव तथान्येषां रक्ष्या दारा निशाचर आत्मानमुपमां कृत्वा स्वेषु दारेषु रम्यताम् ७ अतु
ष्टं स्वेषु दारेषु चपलं चलितेंद्रियम् नयंति निकृतिप्रज्ञं परदाराः पराभवम् ८ इह संतो न
वा संति सतो वा नानुवर्तसे तथा हि विपरीता ते बुद्धिराचारवर्जिता ९ वचो मिथ्याप्रणीता
त्मा पथ्यमुक्तं विचक्षणैः राक्षसानामभावाय त्वं वा न प्रतिपद्यसे १० अकृतात्मा
नमासाद्य राजानं नयेरतम् समृद्धानि विनश्यंति राष्ट्राणि नगराणि च ११ सीता रामारा
मन

न्निवारयंतो न वा संति नैव संति सतः साधवो वा ते त्वं नानुवर्तसे धर्मजिज्ञासया तत्समीपं न गच्छसि हि यतस्तथा ते विपरीता बुद्धिः
आचारवर्जिता विमुखी अविहितकर्मसंमुखी वदपुष्पते ९ मिथ्याप्रणीतात्मा मिथ्याविनीतात्मा त्वं विचक्षणैर्विद्वद्भिरु
क्तं पथ्यं वचः राक्षसानामभावाय वा न प्रतिपद्यसे नांगीकरोषि १० उक्तं चैतत्को क्षयिष्यतीति माह अकृतेति अकृतात्मानं सदुपदेशा
स्राहि बुद्धि ११

ए० वी० हु० ८६

तथैव मितिराज्ञा परार्धतोऽप्रोक्षयज्जाना प्रास्यलोकपुत्रिपुत्रादि इति भावः १२ किं च स्वहस्तैरपराधैर्हन्यमानस्य च प्रास्तनाप्रा
ण्या दीर्घदर्शिनो मूर्खस्य विना प्राग्उपस्थितेर्भूतानि सर्वप्राणिनो नंदयितारः इति संबुद्धिः १३ एवं निष्कृता स्वयात्रे प्रिणाः
सर्वे जनाः रौद्रः एव घातनं स्वबुद्धि प्राप्तनाशं दिक्ष्वा प्राप्य प्रस्रत्य च स्पंते इति संबंधः १४ रावणेन क्रुद्ध प्रलोभनवाक्यान्ता
मुत्तरमाह प्रार्थये इति तत्र हेतुमाह अनन्येति राघवेण अनन्या अविभक्ता निस्पान याचिनी चिह्नकिरित्यर्थः तृतीय

तथैव त्वां समासाद्य लंकारत्नौघसंकुला । अपराधात्तवैकस्य न चिराद्विनशिष्यति १२ स्वहस्तै
र्हन्यमानस्य रावणादीर्घदर्शिनः । अभिनंदंति भूतानि विनाशे पापकर्मणः १३ एवं त्वां पापक
र्माणं वक्ष्यंति निष्कृता जनाः । दिष्ट्यैतद्व्यसनं प्राप्तो रौद्र इत्येव हर्षिताः १४ शक्या लोभयितुं ना
हमैश्वर्येण धनेन वा । अनन्या राघवेणाहं भास्करेण प्रभा यथा १५ उपधाय भुजं तस्य लोकना
थस्य सत्कृतम् । कथं नामोपधास्यामि भुजमन्यस्य कस्यचित् १६

पात्र देकपारते व्यंघोष्यते न केवलं तत्स्मरते
त्याक्ष्यपि तु न एव इति प्रायाव हेति दृष्टांतेन [illegible] द्योतयति भास्करेणेति १५ प्रलोभनाप्राकाद्यत्वे हेतुमुपपादयति उपधायेति लो
कनाथस्य तवैर्बुद्ध्यादिदेवगणैः स्वस्वपरश्रेयेनाप्यमानस्य याच्यमानस्य तस्य रामस्य सत्कृतं तेन भुजं दक्षिणं भु
जमित्यर्थः उपधाय शिरोपधानं कृत्वा अन्यस्य कस्यचित् दुष्टस्य भुजं सत्कृतं कथं नामोपधास्यामि न कथंचिदपीत्यर्थः

एम० ८६

॥ अहं तुल्यशीलवयोवृत्तस्य तस्यैव वसुधापतेरौपयिकी उचिता भार्या कथमिव व्रतस्नातस्य ब्रह्मचर्यव्रतपूर्वकं स्नातस्य समाव
र्तनस्य विदितात्मनः ज्ञातस्वतत्त्वस्य विप्रस्येव ब्राह्मणस्य विद्या यथा ब्राह्मणस्य विद्यावासाधारणं स्वं न्याय्यप्राप्तं तद्वत् १७ प
थिकानां चरयानां यथाचनवद्भूरनामसंपद्यते साध्विति हेरण्यामेनां मेताम् समानय तद्दत्तेसाधु वने वासितया
युवत्या वासिता युवतिः प्रोक्तेति व्याख्यानात् करेण्वा सार्धं गजाधिपमिव करेणुं गजाधिपेति वक्ष्ये वै यस्योक्ति

॥ अहमौपयिकी भार्या तस्यैव वसुधापतेः व्रतस्नातस्य विप्रस्य विद्येव विदितात्मनः १७ साधु
णवेनामेनां समानय दुःखिताम् वने वासितया सार्द्धं करिण्येव गजाधिपम् १८ मित्रमौपयि
कं कर्त्तुं रामः स्थानं परीप्सता वधं चानिच्छता घोरं त्वयासौ पुरुषर्षभः १९ विदितस्तु ध
र्मात्मा शरणागतवत्सलः तेन मैत्री भवतु ते यदि जीवितुमिच्छसि २० २० २० २०

विग्रहवैचित्र्यात् १८ बुद्ध्यन्तरं चोपदिशति मित्रमिति स्थानं परीप्सता लंकावासमिच्छता शान्तानो वधं च घोरं बहुवि
धपीडाकरमनिच्छता त्वया पुरुषर्षभोऽसौ रामो मित्रं कर्तुमौपयिके योग्यमित्यर्थः १९ कथमेवमपराद्धेनो मे तेन मै
त्रीत्यत्राह विदित इति शत्रुरपि शरणागताद्रक्षणीय इति धर्मज्ञत्वेन शरणागतवत्सलत्वेन च विदितः प्रसिद्धः अत
स्तेन मैत्री भवतु मैत्रीप्राप्तकालेस्यर्थः २०

रा० सुं० ८७

अत एवं शरणागतवत्सलेत्वं प्रसादयस्व मां चात्मेनिर्यातयितुं अस्वर्पयितुमर्हसि २१ संप्रदायेति मामिति शेषः २२ मत्स्वरूपस्य त्वं विना सर्वेषां तव जीवने नास्तीत्याह वर्जयेदिति ३ तत्सृष्टमिंद्रस्य त्वं वज्रं च अंतक अस्त्रत्वद्विधं वर्जयेत् त्वं त्वत्स्वाशरणान्न नाशयेत् संक्रुद्धो राघवो न तु वर्जयेन्नाशयेदेव २३ महास्वनेन महानादं नादो हि कश्चिच्छ्रुद्धर्मः प्रतिश्रुद्रूपः श्रोष्यसि यदि मां न ददा

प्रसादयस्व त्वं चैनं शरणागतवत्सलम् मां चास्मै प्रयतो भूत्वा निर्यातयितुमर्हसि २१ एवं हि ते भवेत्स्वस्ति संप्रदाय रघूत्तमे अन्यथा त्वं हि कुर्वाणो वधं प्राप्स्यसि रावण २२ वर्जयेद्वज्रमुत्सृष्टं वर्जयेदन्तकश्चिरम् त्वद्विधं न तु संक्रुद्धो लोकनाथः स राघवः २३ रामस्य धनुषः शब्दं श्रोष्यसि त्वं महास्वनम् शतक्रतुविसृष्टस्य निर्घोषमशनेरिव २४ इह शीघ्रं सुपर्वाणो ज्वलितास्या इवोरगाः इषवो निपतिष्यन्ति रामलक्ष्मणलक्षिताः २५ रक्षांसि परिनिघ्नंतः पुर्यामस्यां समन्ततः असंपातं करिष्यन्ति पतन्तः कंकवाससः २६ राक्षसेंद्रमहासर्पान्स रामगरुडो महान् उद्धरिष्यति वेगेन वैनतेय इवोरगान् २७

सीतिभावः २४ रामलक्ष्मणाभ्यां लक्षिताः रामलक्ष्मणनामांकाः २५ कंकवाससो बाणाः असंपातमनवकाशं २६ राक्षसेंद्ररूपमहासर्पान् उद्धरणप्रौढ उपमा वैनतेय इवेति २७

राम० ८७

नचापिममहस्तात्वां प्राप्तुमर्हतिराघवइत्यस्योत्तरमाह अपनेष्यतीति २८ हतस्थानेहतास्पदेरातत्र युद्धंविनाचौर्येणापह
रणं २९ हेअधमगोचरंवनप्रदेशंगतयोर्नरसिंहयोः शून्यमाश्रमंप्रविश्यत्वयाहमपनीतास्मि इति यत्तदसाधु स्वन्वयः ३०
यस्माद्रामलक्ष्मणयोर्गंधमुपाघ्रायशार्दूलयोः दर्शनेश्वनेवसमक्षंत्वयास्थातुमशक्यं ३१ तस्यतेयुद्धसमर्थितयाचा

अपनेष्यतिमांभर्तात्वत्तःशीघ्रमरिंदमः अमरेभ्यःश्रियंदीप्तांविष्णुस्त्रिभिरिवक्रमैः २८ जन
स्थानेहतस्थानेनिहतेरक्षसांबले अशंकेनत्वयारक्षःकृतमेतदसाधुवै २९ आश्रमंतुतयोः
शून्येप्रविश्यनरसिंहयोः गोचरंगतयोर्भीरोरपनीतात्वयाधम ३० नहिगंधमुपाघ्रायराम
लक्ष्मणयोस्त्वया शक्यंसंदर्शनेस्थातुंशुनाशार्दूलयोरिव ३१ तस्यतेविग्रहेताभ्यांयुगग्र
हणमस्थिरम् वृत्रस्येवेंद्रवाहुभ्यांवाहोरेकस्यविग्रहे ३२ क्लिश्नंतवसनाद्योमेलक्ष्मणःसौमित्रि
णासह तोयमत्स्यमिवादित्यःप्राणानादास्यतेशरैः ३३

रवृत्तौस्तवताभ्यांरामलक्ष्मणाभ्यांसहविग्रहेयुद्धेस
तियुगग्रहणंसंयुगग्रहणंयुद्धजयःअस्थिरंअध्रुवंकिंतुताभ्यांयुद्धेतवानिग्रहएववृत्रस्येवंद्विनएकस्यवाहोर्द्वाभ्या
मिंद्रवाहुभ्यांयुद्धेवृत्रवाहुपराजयवत्वज्रच्छिन्नैकवाहुर्वृत्रोवहुकालमिंद्रेणसहैकवाहुनायुद्धंकृतवान्पराजितश्चेव

[illegible] ३३

कुवेरस्यालयं गिरिं कैलासं गतोऽप्यतो वरुणस्य सभां वा गतः कालहतस्त्वमग्निनेः संबंधान्महाद्रुम इव दावाग्नेः संबंधान्न विमोक्ष्यसे नंक्ष्यसीत्यसंशय इति श्लोकार्थः ३४ इत्येकविंशः सर्गः रावणस्येश्वरः सीताया पुरुषं श्रुत्वा वचनं विप्रियं वचनं श्रुत्वा प्रत्युवाचेति संबंधः १ लोके स्त्रीणां सांत्वयिता पुमान् यथा यथा सांत्वयति तथा तथा तस्या वशानुसारेण स स्त्रीणां वश्य इवेश्यो भवति त्वयि

गिरिं कुवेरस्य गतोऽप्यथवालयं सभां गतो वा वरुणस्य राज्ञः असंशयं दाशरथेर्न मोक्ष्यसे महाद्रुमः कालहतोऽशनेरिव ॥ ३४ ॥ हरिः ॐ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये सुन्दरकाण्डे एकविंशः सर्गः ॥ २१ ॥ सीताया वचनं श्रुत्वा परुषं राक्षसेश्वरः प्रत्युवाच ततः सीतां विप्रियं प्रियदर्शनाम् १ यथा यथा सांत्वयिता वश्यः स्त्रीणां तथा तथा यथा यथा प्रियं वक्ता परिभूतस्तथा तथा २ संनियच्छति मे क्रोधं त्वयि कामः समुत्थितः द्रवतो मार्गमासाद्य हयानिव सुसारथिः ३

तु यथा यथाहं प्रियं वक्ताऽभवं तथा तथा त्वया परिभूत एवास्मीति शेषः २ एवं च त्वद्विषये न्यायप्राप्तमपि मन्युं क्रोधं समुत्थितः कामः संनियच्छति निरुणद्धि तत्र दृष्टांतः द्रवत इति अमार्गमासाद्य द्रवतो धावतो हयान्सुसारथिरिव ३ ३ २

ननु क्रोध एव किं न कामं हराद्धि तत्राह वाम इति क्रूर इत्यर्थः तदेवाह यस्मिन्निति परमक्रोधविषयेपि च जने कामो निबध्यते तत्र जने स्नेहानुक्रोशो दयास्नेहश्च जायते तस्मात्कामः क्रोधादुत्कट इत्यर्थः ४ ए तस्मादुत्कट कामविषयत्वात् मिथ्याप्रव्रजिते कपटव्रते रामे रतामनुरक्तां त्वां न घातयामि ५ ६ क्रोधसंरम्भसंयुक्तः क्रोधप्रतापाभ्यां युक्तः ७ १२ अवधिः मासा

वामः कामो मनुष्याणां यस्मिन्किल निबध्यते जने तस्मिंस्त्वनुक्रोशः स्नेहश्च किल जायते ४ ए तस्मात्कारणान्न त्वां घातयामि वरानने वधार्हामवमानार्हां मिथ्याप्रव्रजिते ५ रतां परुषाणि हि वाक्यानि यानि यानि ब्रवीषि माम् तेषु तेषु वधो युक्तस्तव मैथिलि दारुणः ६ एवमुक्त्वा तु वैदेहीं रावणो राक्षसाधिपः क्रोधसंरम्भसंयुक्तः सीतामुत्तरमब्रवीत् ७ द्वौ मासौ रक्षितव्यौ मे योवधिस्ते मया कृतः ततः शयनमारोह मम त्वं वरवर्णिनि ८ द्वाभ्यामूर्ध्वं तु मासाभ्यां भर्तारं मामनिच्छतीम् मम त्वां प्रातराशार्थमालभन्ते महानसे ९

न्यूर्ध्वं द्वाभ्यामिनीत्यारभ्य कांडो क्रमस्तन्मध्ये द्वौ मासौ अवधिभूतौ मया रक्षणीयौ प्रतीक्षणीयौ ८ प्रातराशार्थं प्रातःकालिक भोजनार्थं महानसे पाकशालायां त्वामालभन्ते हिंसिष्यन्ति सूदा इति शेषः ३ ९ ९

देवगंधर्वकन्याः सीतावदेववत्सादाहृतास्तस्यर्पः ११ ओष्ठप्रकारैः वराकोयं किं करिष्यतीति नमेतव्यमित्येवमोष्ठाभ्यो
रा० वा० सुं० ८९ ष्ठप्रदर्शनैः नेत्रैर्दृष्टिमीलनोन्मीलनविभ्रमैः वक्त्रैर्मुखचलनैः सीतामाश्वासयामासुः १२ आत्महितं रावणाय दाम
नोहितं वृत्ते पातिव्रत्ये तस्य शौंडीर्यं बलं तेन गर्वितमिति क्रियाविशेषणं १३ यस्मिन्नगरे त्वं वसति श्रेयसि अभ्युद

तां तर्ज्यमानां संप्रेक्ष्य तदा क्षतैर्दुरात्मना न कीम् देवगंधर्वकन्यास्ता विषेदुर्विपुलेक्षणाः १०
ओष्ठप्रकारैरपरा नेत्रैर्वक्त्रैस्तथापराः सीतामाश्वासयामासुस्तर्जितां तेन रक्षसा ११ ताभि
राश्वासिता सीता रावणं राक्षसाधिपम् उवाचात्महितं वाक्यं वृत्तशौंडीर्यगर्वितम् १२ नूनं तेन
जनः कश्चिदस्ति निःश्रेयसि स्थितः निवारयति यो न त्वां कर्मणोस्माद्विगर्हितात् १३ मां हि धर्मा
त्मनः पत्नीं शचीमिव शचीपतेः त्वदन्यस्त्रिषु लोकेषु प्रार्थयेन्मनसापि कः १४ राक्षसाध
म रामस्य भार्याममिततेजसः उक्तवानसि यत्पापं क्व गतस्तस्य मोक्ष्यसे १५ १५ १५ १५ १

बहिष्ठोऽधिकश्लोकः ४५

यस्ते पादने स्थितो जनो नूनं तेन कश्चिदस्ति यस्मात्त्वामस्माद्विगर्हितात्कर्मणो न कोपि निवारयति १४ मनसापि कः प्रार्थयेल्लिं
पुनर्वचसेति भावः रामस्य भार्यां यत्पापं पापमयं वचनमुक्तवानसि ततः क्व गतस्तस्मान्मोक्ष्यसे ततः साध्वसमूलतापा स्यात्त्वया राम० ८९

दृष्टोमातंगः शशाङ्कश्च यदा वने दैवात्सहितौ युयुत्सू भवतस्तयोश्च शशोपयाति प्रेद्रुतस्तथा रामेणासंयुगे त्वं शशवच्छूद्रो रामोहि
द्विरदवन्महाबलस्तस्यार्थः १७ स त्वं मामद्य निष्टुद्रः क्षिपन्निदंतं ह्यहं तदसन्ति चौयाबन्तोपगच्छेस्तितावदिह निंदत्वं तेजसे इ
त्यन्वयः १८ १९ ननु नपतिते न शीर्यतीम्बुक्तिर्यदि पातिव्रत्यमङ्गत्वात्तर्हि तथापि त्वामहं कस्मान्न करोमीत्याशंक्याह त्वसंदेशा

यथा दृष्टस्त्वमातंगः शशाङ्कसहितौ वने तथा द्विरदवद्रामस्त्वं नीचशशावत्स्मृतः १७
सत्वमिक्ष्वाकुनाथं वै क्षिपन्निह न लज्जसे चक्षुषोर्विषयं तस्य न तावदुपगच्छसि १८
इमं तेन सने क्रूरविरूपे वृषापिङ्गले क्षितौ न पतितं कस्मान्मामनार्यनिरीक्षितः १९ त
स्य धर्मात्मनः पत्नीं स्नुषां दशरथस्य च कथं व्याहरतो मां ते जिह्वा पाप न शीर्यति २०
असंदेशात्तु रामस्य तपसश्चानुपालनात् न त्वां कुर्मि दशग्रीव भस्म भस्मार्हतेजसा २१
नापहर्तुमहं शक्या तस्य रामस्य धीमतः विधिस्तव वधार्थाय विहितो नात्र संशयः २२

दिति रामस्यासंदेशाद्रामाज्ञाभावात्तपसोनुपालनाच्चेतोरपि भस्मार्ह भस्मीकरणार्ह तेजसा पातिव्रत्यप्रभावेन त्वां भस्म
न कुर्मि करोमीत्यर्थः ३त्वविकरणाभावो पावार्षो २१ अहं तस्मा रामस्य भार्या त्वया ऽपहर्तुं न शक्या ऽपापिष्ठं विधिर्मदपह
रणरूपत्तव वधार्थायदैवेन विहितो नात्र संशयः २२

रा० वा० सुं० त्वन्निमित्तमित्यादिश्लोकद्वयमेकं वाक्यं एष कपिः योजनानां शतं समाप्लुतः समाश्वसितुमुपक्रान्तस्तव सानुषु विश्रान्तः शे
१० षं मार्गशेषं प्रक्रमतामिति त्वन्निमित्तमनेन सागरेण हे बहुमानात्प्रचोदितोऽतः कपिशार्दूल त्वं तिष्ठ मयि विश्रम्य गम्यता

त्वन्निमित्तमनेनाहं बहुमानात्प्रचोदितः तिष्ठ त्वं हरिशार्दूल मयि विश्रम्य गम्यताम् ११५ योजनानां शतं चापि कपिरेष समाप्लुतः तव सानुषु विश्रान्तः शेषं विक्रमतामिति ११६ तदिदं गन्धवत्स्वादु कन्दमूलफलं बहु तदास्वाद्य हरिश्रेष्ठ विश्रान्तो ऽथ गमिष्यसि ११७ अस्माकमपि संबन्धः कपिमुख्य त्वयास्ति वै प्रख्यातस्त्रिषु लोकेषु महागुणपरिग्रहः ११८ वेगवन्तः प्लवन्तो ये प्लवगा मारुतात्मज तेषां मुख्यतमं मन्ये त्वामहं कपिकुञ्जर ११९ अतिथिः किल पूजार्हः प्राकृतोऽपि विजानता धर्मं जिज्ञासमानेन किं पुनस्त्वादृशो महान् १२० सीतारामाभ्यां नमः

मित्यन्वयः ११५ ११६ तत्तस्माद्धेतोरिदं कंदादिमपि बहु द्रष्टव्यं तेन तदास्वाद्येत्यन्वयः ११७ महागुणपरिग्रहः महागुणो लब्धा
पुनापरिगृह्यन्त इति तथा ११८ ११९ धर्मं जिज्ञासमानेन विजानता प्राकृतोऽप्यतिथिः पूजार्हस्त्वादृशो महान् पूजार्ह इति किं
पुनरिति योजना १२०

शूरेणोत्याद्युपहासोक्तिः रूपो ह्ययामायाम् गच्छ सता नाग्रन्यत्रनीत्वा कस्माद्दूरचौर्यं त्वयाकृतं तत्स्मादत्यंतम शूरस्त्वमित्युपहासः चि
दितिपादपूरणे २३ २४ दीप्तजिह्वश्वासावुग्रलोचनश्च २५ चलमग्रं यस्य तादृशमुकुटवान् शोभ्रशुरुच्चः २६ श्रोणीसूत्रेण

शूरेणाधनदभ्रात्रा बलैः समुदितेन च । रूपो ह्ययामे कस्माच्चिद्दूरचौर्यं त्वयाकृतम् २३ सीता
पापवचनेभ्य त्वा रावणो राक्षसाधिपः । विवृत्तनयने क्रूरे जानकीमन्ववैक्षत २४ नीलजीमू
तसंकाशो महाभुजशिरोधरः । सिंहसंहननः श्रीमान् दीप्तजिह्वाग्रलोचनः २५ चलाग्रमु
कुटः शोभ्रछित्रमाल्यानुलेपनः । रक्तमाल्याम्बरधरस्तप्ताङ्गदविभूषणः २६ श्रोणीसूत्रेण
महता मेचकेन विभूषितः । अमृतोत्पादनेनद्धो भुजङ्गेनेव मन्दरः २७ ताभ्यां स परिपूर्णाभ्यां
भुजाभ्यां राक्षसेश्वरः । शुशुभेऽचलसंकाशः शृङ्गाभ्यामिव मन्दरः २८ तरुणादित्यवर्णा
भ्यां कुण्डलाभ्यां विभूषितः । रक्तपल्लवपुष्पाभ्यामशोकाभ्यामिवाचलः २९ स कल्पवृ
क्षप्रतिमो वसन्त इव मूर्तिमान् । श्मशानचैत्यप्रतिमो भूषितोऽपि भयङ्करः ३० ३० ३०

ॐ [illegible]

दृष्ट्वा नागरोतनमेचकेन इंद्रनीलनक्षत्रखचितेन नीलेन भुजङ्गो वासुकिः स हि नीलवर्ण इत्याहुः २७ ताभ्यामिति भुजद्वयमेव स
र्वदपुष्टी दोरेवच्छैया दशभुजत्वमिति भावः २९ वसंत इव भूषितोऽपि श्मशानचैत्यप्रतिमः तदभयवत्सरि हार्यदर्शनः चैत्यपवु

३१ अनेन अनीतापकृष्टं अर्थहीनं प्रयोजनहीनं वृत्तं रामस्य वृत्ते इति संबोधनं ईदृशीं त्वां नाद्य प्राशामि सूर्य उदितः से ध्यांतं कालि
लिकमेघकारमिव ३१ ३२ एकाक्षीमित्यादि रूपादानं व्यक्तिभेदात् ३३ ३४ ३५ ३६ भोगक्षमः पथापादिशं सीतामदं प्राशाभव

अथ वैश्रमणात्मजो वैदेहीं कोपसंरक्तलोचनः उवाच परुषं सीतां भुजंग इव निश्वसन् ३१
अनयेनाभिसंपन्नमर्थहीनमनुव्रते नाद्य प्राशाम्यहं मध्ये लोके सूर्यः संध्यामिवौजसा ३२
इत्युक्त्वा मैथिलीं राजा रावणः शत्रुरावणः संदिदेश ततः सर्वा राक्षसीर्घोरदर्शनाः ३३
एकाक्षीमेककर्णां च कर्णप्रावरणां तथा गोकर्णीं हस्तिकर्णीं च लंबकर्णीमकर्णिका
म् ३४ हस्तिपाद्यश्वपाद्यौ च गोपादीं पादचूलिकाम् एकाक्षीमेकपादीं च पृथुपादी
मपादिकाम् ३५ अतिमात्रशिरोग्रीवामतिमात्रकुचोदराम् अतिमात्रास्यनेत्रां च दी
र्घजिह्वानखामपि ३६ अनासिकां सिंहमुखीं गोमुखीं सूकरीमुखीम् ३७ यथा मद्
वशगा सीता क्षिप्रं भवति जानकी तथा कुरुत राक्षस्यः सर्वाः क्षिप्रं समेत्य च ३८ प्रतिलोमा
नुलोमैश्च सामदानादिभेदनैः आवर्तयत वैदेहीं दंडस्योद्यमनेन च ३९ रामसीता

ति तथा पूर्वं प्रत्येकं सर्वाभिर्मिलित्वा वा कुरुत ३७ प्रतिलोमानुलोमैः प्रतिकूलानुकूलैः सामदानादिभेदनैः सामदानपूर्वकभेदनैर्वैदेहीं

प्रावर्जयत। प्रत्युक्तोसंयगं वर्ण ३९

प्रतिगर्जितवत्यगर्जत् ३९ ततः प्रतिसंतर्जनं दृष्ट्वा धान्यमालिनी रावणस्य कनिष्ठपत्नीं मन्दोदर्या अप्युपलक्षणं उत्तरत्र
रा० वा० सुं० वानरान्प्रति हनुमद्वचनेन तथा वक्ष्यमाणत्वात् क्षिप्रमुपगम्य सीतायां दयये तिरोषः ४० ४१ अमरश्रेष्ठाः इन्द्रादयो भोग
९१

इति प्रति समादिश्य राक्षसेंद्रः पुनः पुनः काममन्युपरीतात्मा जानकीं प्रतिगर्जत ३९ उपगम्य ततः
क्षिप्रं राक्षसी धान्यमालिनी परिष्वज्य दशग्रीवमिदं वचनमब्रवीत् ४० मया क्रीड महारा
ज सीतया किं तवानया विवर्णया कृपणया मानुष्या राक्षसेश्वर ४१ नूनमस्या महाराज न देवा
भोगसत्तमान् विदधत्यमरश्रेष्ठास्तव बाहुबलार्जितान् ४२ अकामां कामयानस्य शरीरमु
पतप्यते इच्छंतीं कामयानस्य प्रीतिर्भवति शोभना ४३ एवमुक्तस्तु राक्षस्या समुत्क्षि
प्तस्ततो बली प्रहसन्मेघसंकाशो राक्षसः संन्यवर्तत ४४ प्रस्थितः स दशग्रीवः कंपयन्निव
मेदिनीम् ज्वलद्भास्करवर्णाभं प्रविवेश निवेशनम् ४५ ४५

सत्तमान् उत्तमभोगान्न विदधति नानुम
न्यंते दैवहतत्वादिति भावः ४२ ४३ समुत्क्षिप्तः अन्यतो पसारितः प्रहसन् धान्यमालिन्या उचित व्यवहारदर्शनेन प्रसन्न इत्यर्थः ४४ ४५
राम०
९१

४६ सर्गार्थसंग्रहे तादृशीयतिसङ्गति मदनेन मोहितः इति तस्य स्वरूपकथनम् ४७ इति द्वाविंशः सर्गः २२ शत्रुघ्नएव पति

देवगन्धर्वकन्याश्च नागकन्याश्च ताः स्त्रियः । परिवार्य दशग्रीवं विविशुस्तद्गृहोत्तमम् ४६
स मैथिलीं धर्मपरामवस्थितां प्रवेपमानां परिभर्त्स्य रावणः । विहाय सीतां मदनेन मोहितः स्वमेव वेश्म प्रविवेश वीर्यवान् ॥४७॥ हरिः ॐ इत्यार्षे रामायणे वाल्मीकीये सुन्दरकाण्डे द्वाविंशः सर्गः ॥२२॥ अष्टादशोऽह्नि वर्तमानकथा समाप्ता ॥ १८ ॥ इत्युक्त्वा मैथिलीं राजा रावणः शत्रुरावणः । सन्दिश्य च ततः सर्वा राक्षसीर्निर्जगाम ह १ निष्क्रान्ते राक्षसेन्द्रे तु पुनरन्तःपुरं गते । राक्षस्यो भीमरूपास्ताः सीतां समभिदुद्रुवुः २ ततः सीतामुपागम्य राक्षस्यः क्रोधमूर्छिताः । परं परुषया वाचा वैदेहीमिदमब्रुवन् ३ पौलस्त्यस्य वरिष्ठस्य रावणस्य महात्मनः । दशग्रीवस्य भार्यात्वं सीते न बहुमन्यसे ४

हाहाशब्दं कारयति शत्रुरावणः १ २ ततः परं रावणागमनानन्तरं ३ भार्यात्वं भार्याभावं न बहु मन्यसे मोहादिति शेषः ४

करतलोदरीमत्तुंदिलामित्यर्थः ५ मरीचिरंगिरसौ पुलस्त्यः पुलहः क्रतुरित्येते षट् प्रजापतीनां चतुर्थः पुलस्त्यः ६७

ततस्त्वेकजटा नाम राक्षसी वाक्यमब्रवीत् ऽआमंत्र्य क्रोधताम्राक्षी सीतां करतलोदरीम् ५ प्रजापतीनां षण्णां तु चतुर्थो यः प्रजापतिः मानसो ब्रह्मणः पुत्रः पुलस्त्य इति विश्रुतः ६ पुलस्त्यस्य तु तेजस्वी महर्षिर्मानसः सुतः नाम्ना स विश्रवा नाम प्रजापतिसमप्रभः ७ तस्य पुत्रो विशालाक्षि रावणः शत्रुरावणः तस्य त्वं राक्षसेंद्रस्य भार्या भवितुमर्हसि मयोक्तं चारुसर्वांगी वाक्यं किं नानुमन्यसे ८ ततो हरिजटा नाम राक्षसी क्रोधमूर्छिता भर्त्समाना तदा घोरमिदं वचनमब्रवीत् ९ विवृत्य नयने कोपान्मार्जारसदृशेक्षणा येन देवास्त्रयस्त्रिंशद्देवराजश्च निर्जितः १० वीर्योत्सिक्तस्य शूरस्य संग्रामेष्वनिवर्तिनः बलिनो वीर्ययुक्तस्य भार्यात्वं किं
स
न लप्स्यसे ११

तस्य पुत्र उत्पन्नेन कुलीन त्वेह स्थिते किं किमर्थं नानुमन्यसे नांगीकरोषि ८ ततः कुलनिरूपणानंतरं ९ येनेत्यनेन पराक्रमातिशय सूचनं १० किं न लप्स्यसे किं न गच्छसि ११

सर्वासां मध्ये बहुमतां श्रियं महाभागाम् अतिभाग्यवतीं भार्यां मंदोदरीमपि त्यक्त्वा त्वामुपैष्यति १२ १३ १४ १५ १६ यस्यभी

श्रियं बहुमतां भार्यां त्यक्त्वा राजा महाबलः सर्वासां च महाभागां त्वामुपैष्यति रावणः १२ अन्या
तु विकटा नाम राक्षसी वाक्यमब्रवीत् १३ असकृद्देवता युद्धे नागगंधर्वदानवाः निर्जिताः
समरे येन स ते पार्श्वमुपागतः १४ समृद्धं स्त्रीसहस्रेण नानारत्नोपशोभितम् अंतःपुरं समु
त्सृज्य त्वामुपैष्यति रावणः १५ तस्य सर्वसमृद्धस्य रावणस्य महात्मनः किमत्र राक्षसेंद्रस्य
भार्यात्वं नेच्छसेऽधमे १६ ततस्तु दुर्मुखी नाम राक्षसी वाक्यमब्रवीत् यस्य सूर्यो न तपति भी
तो यस्य च मारुतः न वाति चायितापांगे किं त्वं तस्य न तिष्ठसि १७ पुष्पवृष्टिं च तरवो मुमु
चुर्यस्य वै भयात् शैलाश्च सुभ्रु पानीयं जलदाश्च यदेच्छति १८ तस्य नैरृतराजस्य
राजराजस्य भामिनि किं त्वं न कुरुषे बुद्धिं भार्यार्थे रावणस्य हि १९

तः सूर्यो न तपती स्पर्धः न तिष्ठसे वशो इति शेषः १७ यदेच्छति तदा स्रवुरिति शेषः १८ भार्यार्थे भार्यात्वनिमित्तम् १९ १९ १९

रा० सुं० ९३

साधु कथितं साधु गृहाणेति साधुशब्दद्वयस्य निर्वाहः न भविष्यसि मारयाम इत्यर्थः २० इति त्रयोविंशः सर्गः २३ प्रत्या हरेति वर्तय ३ ४ ५ नेत्राभ्यामुपलक्षितेति शेषः ६ इदं वचनं तु ष्म द्वचो नंगीकारे मारणं चेच्छ्रीं घ्नंत इदं वक्त्रिवतां

साधु ते तत्त्वतो देवि निश्चितं साधु भामिनि गृहाण सुस्मिते वाक्यमन्यथा न भविष्यसि २०॥ हरिः ॐ इत्यार्षे रामायणे वाल्मीकीये सुंदरकाण्डे त्रयोविंशः सर्गः ॥२३॥ ततः सीतां समस्तास्ता राक्षस्यो विकृताननाः परुषं परुषानार्य ऊचुस्ता वाक्यमप्रियम् १ किं त्वमंतःपुरे सीते सर्वभूतमनोहरे महार्हशयनोपेते न वासमनुमन्यसे २ मानुषी मानुषस्यैव भार्यात्वं बहुमन्यसे प्रत्याहर मनो रामान्न त्वं जातु भविष्यसि ३ त्रैलोक्यवसुभोक्तारं रावणं राक्षसेश्वरं भर्तारमुपसंगम्य विहरस्व यथासुखम् ४ मानुषी मानुषं तं तु राममिच्छसि शोभने राज्याद्भ्रष्टमसिद्धार्थं विक्लवं त्वमनिंदिते ५ राक्षसीनां वचः श्रुत्वा सीता पद्मदलेक्षणा नेत्राभ्यामश्रुपूर्णाभ्यामिदं वचनमब्रवीत् ६ यदिदं लोकविद्विष्टमुदाहरथ संगताः नैतन्मनसि वाक्यं मे किल्बिषं प्रतितिष्ठति ७

लोकविद्विष्टमित्यर्थकं वक्ष्यमाणम् ६ लोकविद्विष्टपरपुरुषसंगताः समेताः किल्बिषं पापावहं ७

रा० ९३

८ गुरुरूपास्यदेवता सुवर्चलासूर्यपत्नीसूर्याभिमुखपुष्पवती काचिदोषधिरित्यन्वयः ९ प्रज्ञातिदुर्दशास्वपि
६८ व्रतत्वद्योतनायानेकसाध्वीनामुपन्यासो दृष्टांतविधये सन्तु संधेयं १० ११ भैमीदमयंतीनैषधंपतिंयथानु

नमानुषीराक्षसस्यभार्याभवितुमर्हति कामंखादतमांसर्वानकरिष्यामिवोवचः ८ दी
नोवाराज्यहीनोवायोमेभर्त्तासमेगुरुः तंनित्यमनुरक्तास्मियथासूर्यंसुवर्चला ९ यथाश
चीमहाभागाशक्रंसमनुतिष्ठति अरुंधतीवसिष्ठंचरोहिणीशशिनेयथा १० लोपामु
द्रायथागस्त्यंसुकन्याच्यवनेयथा सावित्रीसत्यवंतंचकपिलंश्रीमतीयथा ११ सौ
दासंमदयंतीचकेशिनीसगरंयथा नैषधंदमयंतीचभैमीपतिमनुव्रता १२ तथाह
मिक्ष्वाकुवरंरामंपतिमनुव्रता सीतायावचनंश्रुत्वाराक्षस्यःक्रोधमूर्छिता भर्त्सयं
तिस्मपरुषैर्वाक्यैरावणचोदिताः १३ अवलीनःसनिर्वाक्योहनूमांशिंशपाद्रुमे सो
तांसंतर्जयंतीस्ताराक्षसीरशृणोत्कपिः १४

व्रता १२ १३ अवलीनसच्छन्नः निर्वाक्योमौनीशिंशपा
द्रुमेस्थितइतिशेषः सीतांतर्जयंतीः राक्षसीरशृणोत् राक्षसीनांतर्जनवाक्यान्यशृणोदित्यर्थः १४ ८० ८१

वेपमानांतामभिक्रम्यतत्समीपमागत्यसंरब्धाःक्रुद्धास्ताराक्षस्यःदीप्तान्प्रालंबदशनच्छदान्लिलिहुःलेहनंकुर्वन्तिस्म।
१५ परश्वधान्गृहीत्वोचुश्चनेयंरावणंभर्तारमर्हतीति अर्थात्वस्माकंभक्ष्यतामेवार्हतीतिभावः १६ सावरांगनाभर्त्स्यमा

तामभिक्रम्यसंरब्धावेपमानांसमेततः भृशंसंलिलिहुर्दीप्तान्प्रालंबदशनच्छदान् १५ ताम
ऊचुःपरमसंक्रुद्धाःप्रगृह्याशुपरश्वधान् नेयमर्हतिभर्तारंरावणंराक्षसाधिपम् १६ साभ
र्त्स्यमानाभीमाभीराक्षसीभिर्वरांगना सावाष्पमपमार्जन्तीशिंशपांतामुपागमत् १७
ततस्तांशिंशपांसीताराक्षसीभिःसमावृता अभिगम्यविशालाक्षीतस्थौशोकपरिप्लुता
१८ तांकृशांदीनवदनांमलिनांबरवासिनीम् भर्त्सयांचक्रिरेभीमाराक्षस्यस्ताःसमेततः
१९ ततस्तांविनतानामराक्षसीभीमदर्शना अब्रवीत्कुपिताकाराकरालानिर्णतोदरी २०
सीतेपर्याप्तमेतावद्भर्तुःस्नेहःप्रदर्शितः सर्वत्रातिकृतंभद्रेव्यसनायोपकल्पते २१॥२१

ना एवंशकारेणापीड्यमानाऽभूदितिशेषः सावाष्पमपमार्जन्तीसतीतोऽहनुमदधिष्ठितांशिंशपांतन्मूलंतत्समीपमुपागमदितियोजना
१७ ततःतन्मूलसमीपगमनानन्तरं १८ १९ निर्णतोदरी अप्रतिनिम्नोदरी २० अतिकृतंअतिमात्रंचरणंव्यसनंदुःखमे २१ राम

मानुषो मनुष्या जात्सुचिनोविधिरनुष्ठो नंते त्वया कृ तं एतावदेवालमित्यर्थः २२ सुरेशं वासवमिव २३ कृपणां दीनं २४ २५

परितुष्टास्मि भद्रं ते मानुषस्ते कृतो विधिः ममापि तु वचः पथ्यं ब्रुवन्त्याः कुरु मैथिलि २२
रावणं भज भर्त्तारं भर्त्तारं सर्वरक्षसाम् विक्रान्तं रूपवन्तं च सुरेशमिव वासवम् २३ दक्षि
णं त्यागशीलं च सर्वस्य प्रियवादिनम् मानुषं कृपणं रामं त्यक्त्वा रावणमाश्रय २४ दिव्या
ङ्गरागा वैदेहि दिव्याभरणभूषिता अद्यप्रभृति लोकानां सर्वेषामीश्वरी भव २५ अग्नेः
स्वाहा यथा देवी शचीवेन्द्रस्य शोभने किं ते रामेण वैदेहि कृपणेन गतायुषा २६ एतदु
क्तं च मे वाक्यं यदि त्वं न करिष्यसि अस्मिन्मुहूर्त्ते सर्वास्त्वां भक्षयिष्यामहे वयम् २७
अन्या तु विकटा नाम लम्बमानपयोधरा अब्रवीत्कुपिता सीतां मुष्टिमुद्यम्य तर्जती २८
अ बहून्यप्रियरूपाणि वचनानि सुदुर्मते अनुक्रोशान्मृदुत्वाच्च सोढानि तव मैथिलि २९

२६ २७ तर्जतीतर्जयंती २८ अनुक्रोशो दयामृदुत्वमल्पप्रमाणत्वम् २९ सीताराम श्रीजानकीवल्लभसुंदर जी

रा० वा० सुं० त्वन्निमित्तमित्यादिश्लोकद्वयमेकं वाक्यं एष कपिः योजनानां शतं समाप्लुतः समाश्रवितुमुपक्रान्तस्तव सानुषु विश्रान्तः शे
१० षं मार्गशेषं प्रक्रमतामिति त्वन्निमित्तमनेन सागरेणाहं बहुमानात्प्रचोदितो ऽतः कपिशार्दूल त्वं तिष्ठ मयि विश्रम्य गम्यताम्

त्वन्निमित्तमनेनाहं बहुमानात्प्रचोदितः तिष्ठ त्वं हरिशार्दूल मयि विश्रम्य गम्यताम् ११५ योजनानां शतं चापि कपिरेष समाप्लुतः तव सानुषु विश्रान्तः शेषं प्रक्रमतामिति ११६ तदिदं गन्धवत्स्वादु कन्दमूलफलं बहु तदास्वाद्य हरिश्रेष्ठ विश्रान्तो ऽनुगमिष्यसि ११७ अस्माकमपि संबन्धः कपिमुख्य त्वयास्ति वै प्रख्यातस्त्रिषु लोकेषु महागुणपरिग्रहः ११८ वेगवन्तः प्लवन्तो ये प्लवगा मारुतात्मज तेषां मुख्यतमं मन्ये त्वामहं कपिकुंजर ११९ अतिथिः किल पूजार्हः प्राकृतोऽपि विजानता धर्मं जिज्ञासमानेन किं पुनस्त्वादृशो महान् १२० सीतारामाभ्यां नमः

मित्यन्वयः ११५ ११६ तत्तस्माद्धेतोरिदं कंदादि मयि बहु द्रष्टव्यं तेन तदास्वाद्येत्यन्वयः ११७ महागुणपरिग्रहः महागुणोत्तमवा
पुनापरिग्रह्यतत इति तथा ११८ ११९ धर्मं जिज्ञासमानेन विजानता प्राकृतोऽप्यतिथिः पूजार्हस्त्वादृशो महान्पूजार्ह इति किं
पुनरितियोजना १२०

कालपुरस्कृतं कालोचितं नेवाक्यं न च कुरुषे नैतत्तेहितमिति शेषः ३० नदेवोपपादयति आनीतासीति ३१ गृहे रुद्धा चा।
स्माभिरक्षिता [illegible] रक्षितनिरोधा ३२ ३३ प्रीतिं स्नेहं रावणं प्रति प्रहर्षं कालकृतमनो विकासं नित्यदैन्यतां

न च नः कुरुषे वाक्यं हितं कालपुरस्कृतम् ३० आनीतासि समुद्रस्य पारमन्यैर्दुरासदम्
रावणान्तःपुरे घोरे प्रविष्टा चासि मैथिलि ३१ रावणस्य गृहे रुद्धा अस्माभिस्तु सुरक्षिता
न त्वां शक्रः परित्रातुमपि शक्षः पुरंदरः ३२ कुरुष्व हितवादिन्या वचनं मम मैथिलि अ
लमश्रुनिपातेन त्यज शोकमनर्थकम् ३३ भज प्रीतिं प्रहर्षं च त्यजन्तीं नित्यदैन्यताम् सी
ते राक्षसराजेन सह क्रीड यथासुखम् ३४ जानासि हि यथा भीरु स्त्रीणां यौवनमध्रुवम् या
वन्न ते व्यतिक्रामेत्तावत्सुखमवाप्नुहि ३५ उद्यानानि च रम्याणि पर्वतोपवनानि च स
ह राक्षसराजेन रम त्वं मदिरेक्षणे ३६ स्त्रीसहस्राणि ते देवि वशे स्थास्यन्ति सुंदरी रावणं भ
ज भर्त्तारं भर्त्तारं सर्वरक्षसाम् ३७

निरंतरदैन्यत्वं त्याज्यं त्यजन् ३४ व्यतिक्रामेत् यौवनमिति शेषः ३५ उद्यानानि
चरेत्युत्तरस्येनान्वयः तेषु क्रीडेत्यर्थः रमत्वमिति पाठांतरं ३६ ३७

उत्पाटनस्थानादपकर्षणाद् उत्पाद्य वा उत्पाट्यैव स्वपर्यः ३८ ३९ दोहदो गर्भिणीनामभिलाषः इच्छाविशेषः ४० यकृत् हृदय
स्य दक्षिणभागस्थः कालखण्डाख्यो मांसपिण्डः प्लीहा गुल्माख्यो वामभागस्थो मांसपिण्डः हृस्वत्वमार्षं महत्क्रोडं भुजो

उत्पाट्य वा ते हृदयं भक्षयिष्यामि मैथिलि। यदि मे व्याहृतं वाक्यं न यथावत् करिष्यसि ३८
ततः चण्डोदरी नाम राक्षसी क्रूरदर्शना। भ्रामयन्ती महच्छूलमिदं वचनमब्रवीत् ३९ इमां ह
रिणलोलाक्षीं त्रासोत्कम्पपयोधराम्। रावणेन हृतां दृष्ट्वा दौर्हृदो मे महानभूत् ४० यकृ
त्प्लीहमहत्क्रोडं हृदयं च सबन्धनम्। गात्राण्यपि तथा शीर्षं खादेयमिति मे मतिः ४१ तत
स्तु प्रघसा नाम राक्षसी वाक्यमब्रवीत्। कण्ठमस्या नृशंसायाः पीडयामः किमास्यते ४२ निवे
द्यतां ततो राज्ञे मानुषी सा मृतेति ह। नात्र कश्चन संदेहः खादतेति स वक्ष्यति ४३ ततस्त्वजामु
खी नाम राक्षसी वाक्यमब्रवीत्। विशस्येमां ततः सर्वान् समान् कुरुत पिण्डकान् ४४ विभजाम
ततः सर्वा विवादो मे न रोचते। पेयमानीयतां क्षिप्रं माल्यं च विविधं बहु ४५ सीताराम॥

तरे सबन्धनं हृदयं नाडीबन्धनसहितं मुकुलाकारं हृत्पुण्डरीकं ४१ ४२ ४३ पिण्डकान् मांसखण्डान् ४४ विवादो नयामहेति प्रोषः ४५

शूर्पणखीयमाख्या ४६ निकुंभिलानाम लंकायाः पश्चिमभागवर्तिनी भद्रकाली तां नन्दस्व । ततः तत्समीपे गत्वा नन्दस्व ४७ सुरसुतोपमा देवकन्योपमा रोदिति अपरदृता ४८ इति चतुर्विंशः सर्गः परुषं वदन्तीनां वचः श्रुत्वेति शेषः १ एवमुक्त्वा पूर्वसर्गो

ततः शूर्पणखी नाम राक्षसी वाक्यमब्रवीत् ध्वजामुख्या यदुक्तं वै तदेव मम रोचते ४६ सु
राचानीयतां क्षिप्रं सर्वशोकविनाशिनी मानुषं मांसमासाद्य नृत्यामोथ निकुंभिलाम् ४७
एवं निर्भर्त्स्यमाना सा सीता सुरसुतोपमा राक्षसीभिः सुघोराभिर्धैर्यमुत्सृज्य रोदिति ४८
इत्यार्षे रामायणे वाल्मीकीये सुंदरकाण्डे चतुर्विंशः सर्गः ॥ २४ तथा तासां वदन्तीनां प
रुषं दारुणं बहु राक्षसीनामसौम्यानां रुरोद जनकात्मजा १ एवमुक्ता तु वैदेही राक्षसी
भिर्मनस्विनी उवाच परमत्रस्ता बाष्पगद्गदया गिरा २ न मानुषी राक्षसस्य भार्या भवि
तुमर्हति कामं खादत मां सर्वा न करिष्यामि वो वचः ३ सा राक्षसीमध्यगता सीता सुरसुतोप
मा न शर्म लेभे शोकार्ता रावणेन च तर्जिता ४

कः रात्रियोक्ता मनस्विनी पातिव्रत्ये दृढमनाः २ कामं यथेच्छं खादत ३ शर्म सुखं न लेभे यतः शोकेन रामविरहजेन पीडिता रावणेन तर्जिता ४

१ आत्मनोंगं विशंती वाधिकं वेपते स्म यूथपरिभ्रष्टा कोकैर्दंर्दिता मृगी वाभूत् ५ सा नुजनकात्मजा प्रांशुयासं मिलित स्यासोकस्य विपुलां शाखामालंब्य शोकेन मग्नमानसा भर्तारं चिंतयामास ६ तदा शोकस्यांतं चिंतयंत्य स्पिनाधिगच्छति ७ ८

वेपते स्माधिकं सीता विशंती वांगमात्मनः वने यूथपरिभ्रष्टा मृगी कोकैरिवार्दिता ५ सा
त्वशोकस्य विपुलां शाखामालंब्य पुष्पिताम् चिंतयामास शोकेन भर्तारं भग्नमानसा ६ सा
स्नापयंती विपुलौ स्तनौ नेत्रजलस्रवैः चिंतयंती न शोकस्य तदांतमधिगच्छति ७ सा
निश्वसंती दुःखार्त्ता शोकोपहतचेतना आर्ता व्यसृजदश्रूणि मैथिली विललाप ह ८
हा रामेति च दुःखार्त्ता हि पुनर्लक्ष्मणेति च हा श्वश्रूर्मम कौशल्ये हा सुमित्रेति भामिनी ९
लोकप्रवादः सत्योयं पंडितैः समुदाहृतः अकाले दुर्लभो मृत्युः स्त्रिया वा पुरुषस्य वा १०
यत्राहमाभिः क्रूराभी राक्षसीभिरिहार्दिता जीवामि हीना रामेण मुहूर्तमपि दुःखिता ११
सा वेपमाना पतिता प्रवाते कदली यथा राक्षसीनां भयत्रस्ता विषस्स्रवदना भवत् १२

हा सुमित्रेती स्यत्रेकारलोपः आर्षः ९ अकाले दैवाविहितस्वेच्छाकाले १० यत्राहमिति यस्मादहमित्यर्थः ११ राक्षसीनां राक्षसीभ्यः १२

रा० वा० सुं० ९७

वेपंत्या सीतयेत्यत्र च स्वर्पत्तीया परिसर्पती परितः प्रसर्पती १३ पूर्णा पदार्थैरिति शोकः तोयहतेन दीपूरभग्ने १५ पद्मदल
पत्राक्षं दलनीति दलं विकसितं पद्मं तस्य पत्रमिवाक्षियस्य तं विकसितप [illegible] द्मपत्राक्षमित्यर्थः सिंहस्य विक्रान्ते विक्रमः गा

तस्याः सा दीर्घविपुला वेपंत्या सीतया तदा । ददृशे कंपिनी वेणी व्यालीव परिसर्पती १३
एषाल्पपुण्या कृपणा विनशिष्याम्यनाथवत् । समुद्रमध्ये नौः पूर्णा वायुवेगैरिवाहता
१४ भर्तारं तमपश्यंती राक्षसीवशमागता । सीदामि ननु शोकेन कूलं तोयहतं यथा १५
तं पद्मदलपत्राक्षं सिंहविक्रान्तगामिनम् । धन्याः पश्यंति नो नाथं कृतज्ञं प्रियवादिनम्
१६ सर्वथा तेन हीनाया रामेण विदितात्मना । तीक्ष्णं विषमिवास्वाद्य दुर्लभं मम जीवनम्
१७ कीदृशं तु महापापं मया देहान्तरे कृतम् । येनेदं प्राप्यते घोरं मया दुःखं सुदारुणम्
१८ जीवितं त्यक्तुमिच्छामि शोकेन महता वृता । राक्षसीभिश्च रक्षंत्या रामो नासाद्यते मया
१९

मनं तद्वद् गच्छन्तीति तथा १६ तीक्ष्णं विषमास्वाद्यस्थितस्येव मे जीवनं दुर्लभं १७ १८ जीवितं त्यक्तुमिच्छामि त
दपि न शक्यमिति शोकः रक्षंत्या रक्ष्यमाणया रामोऽपि नासाद्यते च १९

राम० ९७

एवं परवशत्वप्रयुक्तं दुःखमुक्त्वा परवशत्वमात्रं प्राप्तोऽपि सोढव्यत्वा

...धिगस्तु नेति मनुष्यत्वविरोधं धनादिनादेहत्यागे परमानर्थप्राप्तेः परमदुःखस्यापि सोढव्यत्वा
दत्र योजकोऽमनुष्यदेहस्य धिः एतत्स्यादि परतंत्रता चमनुष्यत्वमनुक्त्वाधिरु यत्र यत्र मनुष्यादेहं प्राप्त च्छंदेनात्मेच्छ
याजीविते परित्यक्तुं न शक्यं २० इति पंचविंशः सर्गः प्रसक्ताविति प्रवृत्तात्यश्रूणि मुखे यस्याः सा एवं ब्रुवतीव क्ष्यमा

धिगस्तु खलु मानुष्यं धिगस्तु परवश्यताम् ॥ न शक्यं यत्परित्यक्तुमात्मच्छंदेन जीवि
तम् ॥ २० ॥ हरिः ॐ इत्यार्षे रामायणे वाल्मीकीये सुंदरकांडे पंचविंशः सर्गः ॥ २५ ॥

प्रसक्ताश्रुमुखी त्वेवं ब्रुवती जनकात्मजा ॥ अधोगतमुखी बाला विलप्तुमुपचक्रमे १
उन्मत्तेव प्रमत्तेव भ्रांतचित्तेव शोचती ॥ उपावृत्ता किशोरीव विचेष्टंती महीतले २ रा
घवस्य प्रमत्तस्य रक्षसा कामरूपिणा ॥ रावणेन प्रमथ्याहमानीता क्रोशती बलात् ३

णाहीत्याह ब्रुवती विलप्तुमुपचक्रमे १ उन्मत्ते व भूताविष्टेव प्रमत्तेव मादकद्रव्येण प्रकर्षेण मत्तेव भ्रांतचित्ते व दिग्मोहा
दिना व्यामूढचित्तेव शोचशोचंती उपावृत्ता किशोरीव प्रमापनोदार्थं परिवर्तनं प्राप्ता किशोरीव वडवेव महीतले चे
ष्टती २ कामरूपिणा रक्षसा मारीचेन प्रमत्तस्य प्रमत्तलिधानं प्राप्तस्य राघवस्याश्रियाऽहं रावणेन प्रमथ्य पीडयित्वा क्रोशंती

रा० वा० सुं० ९८

किंच राक्षसीवशमापन्नां ताभिः सदारुणं भर्त्स्यमानां चिंतयंती रामं ४ अर्थैः धनैः ५ ६ अश्रुसती अशसती वत्पर ७ हन्त्यां पापजीविता पापमयंजी
वितं यस्याः सा ७ सव्येन वामेन ८ प्रत्याख्यानं मयाक्रियमाणं निराकरणं न जानाति काममोहादिति शेषः नृशंसस्वभावेन क्रू

राक्षसीवशमापन्नां भर्त्स्यमानां च दारुणम् चिंतयंती सुदुःखार्ता नाहं जीवितुमुत्सहे ४
न हि मे जीवितेनार्थो नैवार्थैर्न च भूषणैः वसंत्या राक्षसीमध्ये विना रामं महारथम् ५ अश्म
सारमिदं नूनमथवाप्यजरामरम् हृदयं मम येनेदं न दुःखेन विशीर्यते ६ धिङ्मामनार्या
मसतीं याहं तेन विना कृता मुहूर्तमपि रक्षामि जीवितं पापजीविता ७ चरणेनापि सव्ये
न न स्पृशामि निशाचरम् रावणं किं पुनरहं कामयेयं विगर्हितम् ८ प्रत्याख्यानं न जा
नाति नात्मानं नात्मनः कुलम् यो नृशंसस्वभावेन मां प्रार्थयितुमिच्छति ९ छिन्ना भि
न्ना विभक्ता वा दीप्ते वाग्नौ प्रदीपिता रावणं नोपतिष्ठेयं किं प्रलापेन वश्चिरम् १० १०

रस्वभावेन मां प्रार्थयितुं स्वानुकूलां कर्तुमिच्छति ९ छिन्ना द्विधा खंडिता भिन्ना विदलिता विभक्ता अप्रवयवशः कृता दीप्तेऽग्नौ प्र
दीपिता वा रावणं नोपतिष्ठेयं मि सेवनिष्यय: वश्चिरं प्रलापेन किम् १०

एवं पातिव्रत्यसदाचारसुहृत्तासंप्रतिरामस्यानागमने कारणानि बहुधा शंकते स्यात इत्यादिना प्राज्ञः दोषवत्सपिशुनदर्शी
कः कृतज्ञः स्वाश्रितकृतस्वल्पमप्युपकारं सर्वदा मनसि कुर्वन् सानुक्रोशोतिदयालुः सद्वृत्तः परस्मै दुःखसप्रयोजनः
ख्यातो राघवो मन्दभाग्यसंक्षयादेवमयि निरनुक्रोशो दयाहीनः संपन्न इति शंके ११ न चैतस्यमद्धिंसो छलाशाक्ति

ख्यातः प्राज्ञः कृतज्ञश्च सानुक्रोशश्च राघवः सद्वृत्तो निरनुक्रोशः शंके मद्भाग्यसंक्षयात्
११ राक्षसानां जनस्थाने सहस्राणि चतुर्दश येनैकेन निरस्तानि स मां किं नाभिपद्य
ते १२ निरुद्धा रावणेनाहमल्पवीर्येण रक्षसा समर्थः खलु मे भर्ता रावणं हन्तुमाहवे
१३ विराधो दंडकारण्ये येन राक्षसपुंगवः रणे रामेण निहतः स मां किं नाभिपद्यते १४
कामं मध्ये समुद्रस्य लंकेयं दुष्प्रधर्षणा न तु राघवबाणानां गतिरोधोत्र विद्यते १५
किं नु तत्कारणं येन रामो दृढपराक्रमः रक्षसापहृतां भार्यामिष्टां नाभ्युपपद्यते १६
इहस्थां मां न जानीते शंके लक्ष्मणपूर्वजः जानन्नपि स तेजस्वी धर्षणं मर्षयिष्यति १७

रिसाहस्राणि क्षसानामिति नाभिपद्यते न प्राप्नोति १२ १३ १४ काममत्यर्थे दुष्प्रधर्षणा भवतु राघवबाणानां तु गतिरोधोत्र नास्ति यथा बहुलो केषाम
वाणानां प्रतिरोधस्य भार्गवादिविषयेषु सिद्धत्वादिति भावः १५ १६ तस्मादत्र मस्थितिं स्यात्तानमेवमद्धिंसा प्लाप्रवृत्त्यभावे कारणमित्याह इह
स्थामिति मर्षयिष्यतीत्यत्र काकुः न संधेया जानन्नेव चेदेवं तदा मर्षयिष्यति प्रपितु न सहिष्यते एव स्पर्शः १७

ए० वा० सं०
९९

रहस्थितस्य ज्ञाने हेतुमाह हृत्तेति हृत्ते स्वधिगत्वायोमां राघवाय निवेदयेत्सोपी त्यन्वयः १८ प्रसंगादाह कृतमिति मां तदास्य वपद्यतामन्यो चेनार्थे मात्रा तेन रावणाहं हृत्वा रावणोनसह हं हृहं हृत्वेति ष्ठतावत्तदा वहून्नापि जटायुषा महात्वकर्म कृतम् १९ मामहरहस्यां मां २० विधमेत भस्म कुर्यात् पावकास्त्रेणेत्ति शेषः २१ यथाहमि दानिमे वं रुदती वर्तेत्त थाभूयो मत्तोधिकं मत्त भर्ते काल्वा दुःखस्योरु दं स्वोभ

हृत्तेति यो मिगत्वा मां राघवाय निवेदयेत् ग्रधुराजोहि मरणोरावणेननिपातितः १८ कृतं कर्म महत्तेन मां तदाभ्यवपद्यता तिष्ठतारावणाद्देहेनापि जटायुषा १९ पुदि मामि हज्ञानीया हृत्तमानो सराघवः ध्रुवं वाणौरमि क्रुद्धः कुर्यात्रौ कमराक्षसम् २० विधमे च पुरीं लंकां शोषयेच्च महोदधिं एवमाम्यचनीचस्य कीर्तिं नाम च नाशयेत् २१ ततो निहतनाथानां राक्षसीनां गृहे गृहे यथाहमेवं रुदती तथा भूयो न संशयः २२ अन्विष्य रक्षसां लंकां कुर्याद्रामः सलक्ष्मणः नहितां शत्रुरिपुर्दृष्ट्वा मुहूर्तमपि जीवति २३ चिताधूमाकुलपथा गृध्रमण्डलमण्डिता अचिरेणैव लंके यं श्मशानसदृशी भवेत् २४

विष्यतीसत्र नसेशायइत्यर्थः २२ ननु ज्ञाने रवल्विदं संभाव्यते स्नानमे वतु दुर्लभं तत्राह अन्विष्याति अवित्सतामपर्याहं कामप्यन्विष्य मां ज्ञात्वा रक्षसां कुर्यात् विनाशमिति शेषः विनिमाशस्यैषत्कर त्वामाह नहीति २३ निश्चितए वायमर्थइत्याह

रा० म०
९९

वृद्धे २

अचिरेणोति कुतः अयंदुष्प्राप्यानः दुर्मार्गवर्तनं सर्वेषां अप्राकंविपर्ययं नाशमाख्याति २५ तदेवाह यादृशानीतियादृशा
नि दृश्यंते तैरेवहतप्रभाभविष्यन्तीतिसंग्रहत दृश्यर्थः २६ शोषमेष्यती दरितिशोषः दुर्धर्षैर्तिलोकाविशोषणम् २७

अचिरेणैव कालेन प्राप्स्यामो नेम मनोरथम् दुष्प्राप्यानो पमाख्याति सर्वेषां वैवि
पर्ययम् २५ यादृशानिनु दृश्यंते लोकायामरूपाणि तु अचिरेणैव कालेन भविष्य
न्ति हतप्रभा २६ नूनं लोका हते पापेनावतारा हसताधिपे शोषमेष्यति दुर्धर्षा शमदवि
धनायथा २७ पुत्रपौत्रसवसमहाचनयमन्त्रीसहा हसता भविष्यति पुरी लोकान नष्टम
त्रैयपांगना २८ नूनं नागहसकन्यानां हदतीनां गृहेगृहे श्रोष्यामि नचिरादेवदुःखा
र्त्तानामिह ध्वनिम् २९ सांधकारा हता घोरा हतराहसकुंजरा भविष्यति पुरी लोका
निर्दग्धा रामसायकैः ३० यदि रामः सरारोषमामिह रक्षांतलोचनः जानीयाद्वर्तमानांमा
रावणस्य निवेशने ३१ पुत्रपौत्रसवसमहाचप्रद्येतिशेषः २८ ध्वनिरोदनशब्दं २९ सांधकारा अलक्ष्मीसहिता
३१ सरामःसारावणस्यनिवेशनेवर्तमानांजानीयाद्यदितर्हिलोकारामसायकैर्निर्दग्धाभविष्यतीति पूर्वेसाम्बंधः ३१२

रामवृद्ध्यर्थं रामस्य वृद्ध्यर्थं १० स वीरो निष्प्रमाणशरीरः परिच्छेदातिक्रांतदेहः सन्नर्णवं लिलंघयिषुः सन्नाहवशेन पर्वतं पीडयामास ११ स च पर्वतः कपिपीडितो मुहूर्तमाशु च चाल तेन चलनेन तरूणां सर्वं पुष्पमशातयत्पातयत्

प्लवंगप्रवरो दृष्टः प्लवने कृतनिश्चयः ववृधे रामवृद्ध्यर्थं समुद्र इव पर्वसु १० निष्प्रमाणशरीरः संल्लिलंघयिषुरर्णवम् बाहुभ्यां पीडयामास चरणाभ्यां च पर्वतम् ११ स चचालाचलश्चाशु मुहूर्तं कपिपीडितः तरूणां पुष्पिताग्राणां सर्वं पुष्पमशातयत् १२ तेन पादपमुक्तेन पुष्पौघेण सुगंधिना सर्वतः संवृतः शैलो बभौ पुष्पमयो यथा १३ तेन चोत्तमवीर्येण पीड्यमानः स पर्वतः सलिलं संप्रसुस्राव मदमत्त इव द्विपः १४ पीड्यमानस्तु बलिना महेंद्रस्तेन पर्वतः रीतीर्निर्वर्तयामास कांचनांजनराजतीः १५ सीता

मासेत्यर्थः १२ तेन सुगंधिपुष्पौघेन संवृतः शैलः पुष्पमयो यथा पुष्पप्रचुरः स्वयमिव बभौ १३ उत्तमवीर्येण पीड्यमानः स पर्वतः सलिलं प्रसुस्राव १४ उक्तार्थस्य विवरणं पीड्यमान इति तेन बलिना पीड्यमानो महेंद्रः कांचनांजनराजतीः कांचनांजनरजतमयीः रीतीः धाराः निर्वर्तयामास प्रादुर्भावयामासेत्यर्थः १५

विवक्षितप्राप्तस्यमेवाहत्वंहीति १२१ १२२ १२३ १२४ १२५ १२६ १२७ ततःउक्तकारणात् एषसंबंधःपूजाप्रयोजकःस्वर

त्वंहिदेववरिष्ठस्यमारुतस्यमहात्मनः पुत्रस्तस्यैववेगेनसदृशःकपिकुंजर १२१ पूजितेत्वयिधर्मज्ञेपूजांप्राप्नोतिमारुतः तस्मात्त्वंपूजनीयोमेशृणुचाप्यत्रकारणम् १२२ पूर्वंकृतयुगेतात पर्वताःपक्षिणोभवन् तेपिजग्मुर्दिशःसर्वागरुडानिववेगिनः १२३ ततस्तेषुप्रयातेषुदेवसंघाःसहर्षयः भूतानिचभयंजग्मुस्तेषांपतनशंकया १२४ ततःक्रुद्धःसहस्राक्षःपर्वतानांशतक्रतुः पक्षांश्चिच्छेदवज्रेणततःशतसहस्रशः १२५ समामुपगतःक्रुद्धोवज्रमुद्यम्यदेवराट् ततोहंसहसाक्षिप्तःश्वसनेनमहात्मना १२६ अस्मिंल्लवणतोयेचप्रक्षिप्तःप्लवगोत्तम गुप्तपक्षसमग्रश्चतवपित्राभिरक्षितः १२७ ततोहंमानयामित्वांमान्योहिममारुतः त्वयाममैषसंबंधःकपिमुख्यमहागुणः १२८

क्षकपुत्रत्वरूपः १२८ श्रीजानकीवल्लभायनमः

रा० बा० सुं०
१००

तर्हि जितेत्वयेत्याशंक्य सत्यं किं ततः प्रागेवमामयं मारयिष्यतीत्याह अनेनेत्यादिस्त्रोकत्रयेण समयः मासान्द्वादश भामिनीमुक्त
समयः ३२ ननु विभीषिकामात्रमेतत् कथमकार्यं करिष्यतीत्यत आह अकार्यमिति ये पापकारिणो नैर्ऋताः अधर्माद्
तोरकार्यं न जानंति तैर्महोत्पातः महद्धरूपमहानर्थः सांप्रतं भविष्यतिहि ३३ एतदेव विवृणोति नैते इति ३४ कथं करि

अनेन तु नृशंसेन रावणेनाधमेन मे । समयो यस्तु निर्दिष्टस्तस्य कालोयमागतः ३२ अकार्यं ये
न जानंति नैर्ऋताः पापकारिणः । अधर्मात्तु महोत्पातो भविष्यति हि सांप्रतम् ३३ नैते धर्मं वि
जानंति राक्षसाः पिशिताशनाः । ध्रुवं मांसाशनार्थं राक्षसः कल्पयिष्यति ३४ साहं कथं
करिष्यामि तं विना प्रियदर्शनम् । रामं रक्तांतनयनमपश्यंती सुदुःखिता ३५ यदि कश्चित्प्र
दाता मे विषस्याद्य भवेदिह । क्षिप्रं वैवस्वतं देवं पश्येयं पतिना विना ३६ नाजानाज्जीवतीं
रामः स मां लक्ष्मणपूर्वजः । जानंतौ तौ न कुर्यातां नोर्व्यां हि परिमार्गणम् ३७ सीतारामारा

ष्यामि तत्काले इतिशेषः ३५ ३६ तदेवं महावीरस्य मम पुनररक्षस्य मानन्वेषणे कारणं मज्जीवनापरिज्ञानं वा स्वविपत्ति
वीतात्विकवैराग्यं वा भवान्यो दोषा [illegible] मयि स्नेहनाशो वा मामकगुणहीनता वा मन्दभाग्यविपर्ययो
वेति षट्कारणान्युत्तेनाजानादित्यादि श्लोकषट्केन तत्र मो लक्ष्मणश्वप्राये मां जीवंतीं नाजानात् यदि जानीयात्
तदा जानंतौ तौ उर्व्यां भूमौ परिमार्गणं न कुर्यामिति नो किंतु कुर्यातामेवातः मत्ते तिमत्वा भूछंतीति फलत इति भावः ३७

राम०
१००

अथ वामाद्धियोगेन रामो देहं त्यक्तवानित्याह नूनमिति ३८ एवं च देवलोकस्याधन्यात्वमाह धन्या इति मम वीरमित्यन्वयः ३९
ननु त्वज्जीवनाभावनिश्चयं विना कथं रामेण देहत्यागः स्यात्तत्राह पक्षांतरमाह अथ वेति धर्मकामस्य न तु कामपरस्य धी
मतो विवेकशालिनो राजर्षेस्तस्य रामस्य वस्तुतः परमात्मनो निजानंदपरिपूर्णस्य मया भार्यया अर्थः प्रयोजनं न हि नै

नूनं ममैव यशो केन सर्वीरो लक्ष्मणाग्रजः देवलोकमितो यातस्त्यक्त्वा देहं महीतले ३८
धन्या देवाः सगंधर्वाः सिद्धाश्च परमर्षयः मम पश्यंति ये वीरं रामं राजीवलोचनम् ३९
अथवा न हि तस्यार्थो धर्मकामस्य धीमतः [illegible] मया रामस्य राजर्षेर्भार्यया
परमात्मनः ४० दृश्यमाने भवेत्प्रीतिः सौहृदं नास्त्यदृश्यतः नाशयंति कृतघ्नास्तु न रा
मो नाशयिष्यति ४१

वेत्यर्थः ४० अथ रामगुणाभिज्ञतया प्रेमनाशाप्रकाशत्वात्तस्मै भावित इति स्वयमेवाह दृश्य
मान इति वस्तुनीति शेषः प्रीतिर्भवेत् संभाव्यते अदृश्यत्वान्मयि सौहृदं नास्ति न च संभवः इत्यर्थः अयमपि पक्षो न संगतः ई
दृग्गुणावता कृतप्रीतेर्नाशायोगादित्याह नाशयंतीति कृतघ्नाः एव प्रपन्नजनस्नेहमसत्त्रिकर्षान्नाशयंति न रामो ना
शयिष्यति कृतज्ञत्वादित्यर्थः ४१

अतः पक्षांतरं किं वेति मत्पिता दुर्भगा हे तव केचनागुणा दोषाः सुः अयमपि पक्षो न युक्तः स्वपरिज्ञातस्वापराधाभावात् तस्मा

त्प्राग्भवीयदुष्कर्मजो ऽभाग्य एव हेतुरित्याह किं वेति अतो ऽक्लिष्टचारि त्वाच्छत्रुनिर्हरणाद्धामायाहं त्वारणाहीं सीतारव्यामामि

नी एता वत्पर्यं तं संक्षिप्त इदानीं वाराहरणा नमवत्तु योग्येनरमेण हीनास्मि अतस्तस्याममतेन महात्मना हीनायामर्तु

किं वा मम व्यगुणाः केचित्किं वा भाग्यक्षयो हि मे याहं सीता वरार्हेण हीना रामेण भामिनी ४२ श्रेयो मे जीवितान्मर्तुं विहीनाया महात्मनः रामादक्लिष्टचारित्राच्छूराच्छत्रुनिबर्हणात् ४३ अथ वा न्यस्तशस्त्रौ तौ वने मूलफलाशिनौ भ्रातरौ हि नरश्रेष्ठौ चरंतौ वनगोचरौ ४४ अथ वा राक्षसेंद्रेण रावणेन दुरात्मना छद्मना घातितौ शूरौ भ्रातरौ रामलक्ष्मणौ ४५ साहमेवंविधे काले मर्तुमिच्छामि सर्वथा न हि मे विहितो मृत्युरस्मिन्दुःखे ऽपि वर्तति ४६

अथ यः भावेत्तु मुनमरणं जाय इत्यपेक्षितपूरणेनान्वयः ४२ ४३ भाग्यक्षयनिश्चयस्य कर्तुमशक्य त्वात्पक्षांतरमथ वेति सर्वथा नर्थस्य स्वस्वहरणमूलत्वाद्धिंसारहितौ तपस्विव्यावृत्तौ वं रतितव्यमिति धिग्न्यस्तशस्त्रौ जातौ ४४ इदमप्यसंभावितं रक्षोभिः कृतवैरेण क्षत्रियेण तत्त्यागादतः पक्षांतरं वंचनया ४५ वर्तति वर्तमाने ४६

नुपपत्तस्मात् दुःखनाशहेतुर्भगवद्ध्यानमेवेत्याह धन्या इति सत्यंपरं ब्रह्म तत्संमतमा तत्त्वेन येषां ते अत एव जितात्मानः करणा

येषां ते अत एव महात्मानः धैर्यं येषां ते अत एव महाभागाः पूर्वजन्मार्जितनिष्कामभगवदाराधनरूपमहाभाग्यवंतो मुनयो

भगवद्ध्यानशीलास्ते धन्याः तत्र हेतुः येषां कर्मजन्ये प्रियाप्रिये न स्तः ४७ प्रियाप्रियभावं विवृणोति प्रियादिति यस्मा

त्प्रियाद्वियुज्यमानात् दुःखं न संभवेत् न अप्रियात् संयुज्यमानादधिकं प्रियवियोगाद्व्याधिकं दुःखं न भवेत् ताभ्या

धन्याः खल्वमहात्मानो मुनयः सत्यसंमताः जितात्मानो महाभागा येषां न स्तः प्रियाप्रिये ॥ ४७ ॥

प्रियान्न संभवेद्दुःखमप्रियादधिकं भवेत् ताभ्यां हि ये वियुज्यंते नमस्तेषां महात्मनाम् ॥ ४८ ॥

साहं त्यक्ता प्रियेणेह रामेण विदितात्मना प्राणांस्त्यक्ष्यामि पापस्य रावणस्य गता वशम् ॥

४९ ॥ हरिः ॐ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये सुंदरकाण्डे षड्विंशः सर्गः ॥ २६ ॥

प्रियवियोगाद्व्याधिकं दुःखं न भवेत् ताभ्यां प्रियविप्रयोगजदुःखाप्रियसंयोगजदुःखाभ्यां ये वियुज्यंते तेषां महात्मनां

मम नमस्कारोऽस्तु यतस्ते सर्वोत्तमा इत्यर्थः ४८ साहं केवलाप्रियपरा प्रियेण त्यक्ताप्रियमप्राप्ता पापस्य रावणस्य वशं

गता प्राणांस्त्यक्ष्यामि रामेण त्यक्तायाः प्राणत्यागस्यैव युक्तत्वात् ४९ इति षड्विंशः सर्गः २६ । सीता रामा रा

इत्युक्ताः प्राप्तोऽस्य क्ष्ये इत्युक्ताः न दारख्यातुं मरणानिश्चयं कथयितुं १ एकार्थं एकमभिधेयं वाक्यं अयमनर्थार्थं स्वानामनर्थप्र-

रा०वा०सु० १०२ प्रयोजनकं परुषवाक्यं पुनरब्रुवन्नित्यर्थः २ नदेव वाक्यमाह अद्येदानीमिति अद्य अस्मिन्दिने इदानीमस्मिन्क्षणे पाप

इत्युक्ताः सीतया घोरा राक्षस्यः क्रोधमूर्छिताः काश्चिज्जग्मुस्तदाख्यातुं रावणस्य दुरात्मनः १ ततः सीतामुपागम्य राक्षस्यो भीमदर्शनाः पुनः परुषमेकार्थमनर्थार्थमथाब्रुवन् २ अद्येदानीं तवानार्ये सीते पापविनिश्चये राक्षस्यो भक्षयिष्यामो मांसमेतद्यथासुखम् ३ सीतां ताभिरनार्याभिर्दृष्ट्वा संतर्जितां तदा राक्षसी त्रिजटा वृद्धा शयाना वाक्यमब्रवीत् ४ आत्मानं खादतानार्या न सीतां भक्षयिष्यथ जनकस्य सुतामिष्टां स्नुषां दशरथस्य च ५ स्वप्नो ह्यद्य मया दृष्टो दारुणो रोमहर्षणः राक्षसानामभावाय भर्तुरस्या भवाय च ६

विनिश्चये कृतमरणनिश्चये ३ अनार्याभिः क्रूराभिः दृष्ट्वा धर्षिता नयोगवयोभिर्वृद्धा ४ आत्मानं स्वशरीरं न सीतां भक्षयिष्यथेति अवधिकान्नान्यत्परमपीतिप्रोषः ५ कुतोऽवगतमेतत्तत्राह स्वप्न इति दारुणः क्रूरो राक्षसानामभावाय हृष्टः तथा रोमहर्षणः अस्मदुक्तोन्यो अस्या भर्तुर्भवाय हृष्टः इत्यर्थः ६

रा०म०
१०२

पूर्वं क्रोधमूर्छिताः पश्चात्त्रिजटावचनाद्भीता इत्यर्थः ७ काले प्रातः काले स्वप्नसंश्रितं प्रातःकालदृष्टस्वप्नं दृष्टार्थविषय
कं ८ तत्र सीतायाः पीडानिवृत्तये तद्भङ्गदयसूचकं स्वप्नं प्रथममाह गजदंतेति वाजिसहस्रयुक्तत्वाद्विशेषणाच्छिविकां

एवमुक्तास्त्रिजटया राक्षस्यः क्रोधमूर्छिताः सर्वा एवाब्रुवन् भीतास्त्रिजटां तामिदं वचः
कथयस्व त्वया दृष्टः स्वप्नोयं कीदृशो निशि ७ तासां श्रुत्वा तु वचनं राक्षसीनां मुखो
द्गतम् उवाच वचनं काले त्रिजटा स्वप्नसंश्रितम् ८ गजदंतमयीं दिव्यां शिविकामंतरि
क्षगाम् युक्तां वाजिसहस्रेण स्वयमास्थाय राघवः शुक्लमाल्यांबरधरो लक्ष्मणेन स
मागतः ९ स्वप्ने चाद्य मया दृष्टा सीता शुक्लांबरावृता सागरेण परिक्षिप्तं श्वेतपर्वतमा
स्थिता १० रामेण संगता सीता भास्करेण प्रभा यथा ११ राघवश्च पुनर्दृष्टश्चतुर्दंतं महा
गजम् आरूढः शैलसंकाशं चकासे सहलक्ष्मणः १२

विमानमित्यर्थः तामास्थाय गच्छन्मया दृष्टः समागतः सहितः ९ सागरेण क्षीरसागरेण परिक्षिप्तमावृते १० संगता
तत्रैव पर्वते इति शेषः ११ स्वप्नांतरमाह राघवश्चेति पुनः स्वप्नांतरे इत्यर्थः चकास शुशुभे १२

जानकीं पर्युपस्थितौ जानकीसमीपं प्राप्तौ १३ तस्य नगस्य पूर्वोक्तस्य स्वेतपर्वतस्याग्रे उपरि भर्त्रा परिगृहीतस्य रामेणाधि-
ष्ठितस्य शृङ्गाकाशस्थस्य दंतिनः स्कंधमाश्रिता १४ पर्वताग्रे गगने स्कंधे भर्तुरंके स्थित्वा तस्मात्समुत्पत्य कायमूर्ध्वमापद्य
पाणिभ्यां चंद्रसूर्यौ परिमार्जती मया दृष्टा तदङ्कं प्रादित्यमंडलं वापि चंद्रमंडलमेव वा स्वप्ने गृह्णातीति हस्ताभ्यामह

ततस्तु नरशार्दूलौ दीप्यमानौ स्वतेजसा शुक्लमाल्याम्बरधरौ जानकीं पर्युपस्थितौ १३ त
तस्तस्य नगस्याग्रे ह्याकाशस्थस्य दंतिनः भर्त्रा परिगृहीतस्य जानकी स्कंधमाश्रिता १४ भ
र्तुरंकात्समुत्पतिता ततः कमललोचना चंद्रसूर्यौ मया दृष्टा पाणिभ्यां परिमार्जती १५ तत
स्ताभ्यां कुमाराभ्यामास्थितः स गजोत्तमः सीतया च विशालाक्ष्या लंकाया उपरि स्थितः १६
पांडुरर्षभयुक्तेन रथेनाष्टयुजा स्वयम् शुक्लमाल्याम्बरधरो लक्ष्मणेन सहागतः १७ उहोप
यातः काकुत्स्थः सीतया सह वीर्यवान् लक्ष्मणेन सह भ्रात्रा विमाने पुष्पके स्थितः १८ ततो
ह्यद्य मया दृष्टो रामः सत्यपराक्रमः लक्ष्मणेन सह भ्रात्रा सीतया सह वीर्यवान् १९ १९

द्रष्टव्ये समाप्नुयादिति १५ १६ पांडुरर्षभेत्यादि श्लोकचतुष्टयमेकं वाक्यं तस्मिन् गजे लंकोपरि स्थिते रामः सीता लक्ष्मणा-
भ्यां सह पांडुरवृषभाष्टयुक्तेन रथेनेहागत्य पुष्पकारूढस्ताभ्यां सह उत्तरां दिशं प्रोषस्थितो दृष्ट इति संबंधः १७ १८ १९

२० स्वप्नांतरएयाह एवमित्यादि श्लोकानां हणूमदादीनां प्रभावेदकत्वमारोहणं गोवृषकुंजराणामित्यादि श्लोकानां द्वयोगेन

आरुह्य पुष्पकं दिव्यं विमानं सूर्यसंनिभम् उत्तरां दिशमालोक्य जगाम पुरुषोत्तमः २० ॥
वेत्स्वप्ने मया दृष्टो रामो विष्णुपराक्रमः लक्ष्मणेन सह भ्रात्रा सीतया सह वीर्यवान् २१
क्षीरोदधिजलेमध्ये श्वेतः शैलः समुच्छ्रितः तस्य मूर्ध्नि ततः श्वेतः श्चतुर्दंतो महागजः २२
तस्य पृष्ठे स्थितः श्रीमान् रामो राजीवलोचनः २२ ततः सीता समुत्पत्य भर्तुरंकाश्रिता तदा
बाहुभ्यां संपरिष्वज्य संपूर्णं चंद्रमंडलम् २३ ततोन्यत्र मया दृष्टो रामो राजीवलोचनः
आसीनः प्राङ्मुखः श्रीमान् आसने परमाद्भुते २४ अभिषिक्तस्तु काकुत्स्थः सर्वदेवैर्नमस्कृ-
तः सब्रह्मर्षिगणैः सर्वैः सर्वतीर्थजलेन च २५ शुक्लमाल्यांबरधरः शुक्लमाल्यानुले-
पना साधुसा तत्रसुश्रोणी रराजैनकात्मजा २६ ततो देवाः सगंधर्वाः सिद्धाश्च परम-
र्षयः ब्रह्माणमग्रतः कृत्वा रामं तत्र ववंदिरे २७

ज श्लम् २१ २२ २३ २४ २५ २६ २७

२९ ३० ३१ ३२ ३३ ३४ ३५ ४३६ ३७ ३७ ७७ ३७ ३७ ७७ ३७

पुनरेवमयादृष्टोरामोरमयतांवरः विष्णुरेवस्वयंभूत्वातस्मिन्नास्तेवरासने २९ परंब्रह्म
परंतत्वंपरंज्ञानंपरंतपः परंबीजंपरंक्षेत्रंपरंकारणकारणम् ३० शंखचक्रगदाश्री
मान्पुंडरीकायतेक्षणः श्रीवत्सवक्षानित्यश्रीरजेयःशाश्वतोध्रुवः ३१ एवंभूत्वाम
हातेजारामःकमललोचनः सांडंसर्वंत्रिभुवनंसर्वतःसचराचरं सर्वमस्तमयादृष्टं रा
मेणाक्लिष्टकर्मणा ३३ सर्वलोकेश्वरःश्रीमान्सरामोरघुनंदनः ३४ ततोनरेंद्राःपि
तरोमुनींद्राःगंधर्वविद्याधरपन्नगेंद्राः कृताभिषेकेपरिवार्यरामंप्रतुष्टुवुःप्रांजलयः
प्रहृष्टाः ३५ ततस्तुसर्वाप्सरसःप्रहृष्टान्नृत्यंतिगायंतिसमेत्यतत्र वादित्र कुर्वंति
समेत्यशंखं वीणांशाम्ब्ववीणामुरजम्प्रभेर्यः ३६ ततुरामोमहातेजाः शक्यांजेतुंसुरा
सुरैः रक्षसावापिलोकेनस्वर्गःपापजनैरिव ३७ ३७ ३७ ३७ ३७

ग्रथ्याणवागान र्थस्त्वकंसच्चिमाहण वगाछेविमुंडः मुंडितमुंडः पिबन्निति तैलमिति शेषः ३८ करवीरस्रुतस्रजः इति विमाना

एवमहं मया दृष्टो मुंडस्तैलसमुक्षितः रक्तवासाः पिबन्मत्तः करवीरकृतस्रजः ३८
विमानात्पुष्पकाद्दृष्टएवमाः पतितो भुवि कृष्यमाणः स्त्रिया दृष्टो मुंडः कृष्णांबरा
वृताः ३९ रथेन खरयुक्तेन रक्तमाल्यानुलेपनः पिबंस्तैलं हसन्नृत्यन् भ्रांतचित्ताकु
लेंद्रियः गर्दभेन ययौ शीघ्रं दक्षिणां दिशमास्थितः ४० पुनरेवं मया दृष्टो रावणो
क्षिप्तेश्वरः पतितो वा कुशिरा भूमौ गर्दभाद्भयमोहितः ४१ सहसोत्थाय संभ्रांतो भयार्तो मद
विह्वलः उन्मत्त इव दिग्वासा दुर्वाक्यं प्रवदन्बहु ४२ दुर्गंधं दुःसहं घोरं तिमिरं नरको
पमम् मलपंकं प्रविश्याशु मग्नस्तत्र दशाननः ४३ कंठे बध्वा दशग्रीवं प्रमदा कृष्ण
वासिनी कालीकर्दमलिप्तांगी दिशं याम्यां प्रकर्षति ४४ एवं तत्र मया दृष्टः कुंभकर्णो नि
शाचरः प्रयातो दक्षिणामाशां प्रविष्टः कर्दमे ह्रदे ४५

दिव्यस्याविप्रोषरां करवीरैस्त्यारम्भ्यत्वप्नांतरं

३९ रथेनेत्यादिस्वप्नांतरं ४० ४१ ४२ मला नि पंकानि च यस्मिन् तत्तिमिरं ४३ ४४ ४५ ५ ५ ५ ५ ५

ए० वा० सुं० ऽस्मिन् कार्ये प्रत्युपकाररूपेण एवंगते प्राप्ते सति प्रीतिं कर्तुमर्हसि पूजा स्वीकारेणेति भावः १२९ १३० कृतमातिथ्यं तव सं
११
दर्शनादिनेति भावः मन्युः कोपः पूजानंगीकारनिर्बंधनोऽपनीयतां निरस्यतामित्यर्थः १३१ कार्यकालो त्वेकार्यप्रवे

ऽस्मिन्नेवंगते कार्ये सागरस्य ममैव च । प्रीतिं प्रीतिमनाः कर्तुं त्वमर्हसि महामते १२९ अ
मे मोऽक्षयपूजां च गृहाण हरिसत्तम । प्रीतिं च बहुमन्यस्व प्रीतोऽस्मि तव दर्शनात् १३० एव
मुक्तः कपिश्रेष्ठस्तं नगोत्तममब्रवीत् । प्रीतोऽस्मि कृतमातिथ्यं मन्युरेषोऽपनीयताम् १३१ त्व
कार्य रते कार्यकालो मे ऽहश्चाप्यतिवर्तते । प्रतिज्ञा च मया दत्ता न स्थातव्यमिहान्तरा १३२ इत्युक्त्वा
पाणिना शैलमालभ्य हरिपुंगवः । जगामाकाशमाविश्य वीर्यवान्प्रहसन्निव १३३ स पर्व
तसमुद्राभ्यां बहुमानादवेक्षितः । पूजितश्चोपपन्नाभिराशीर्भिरभिनंदितः १३४ अथो
र्ध्वं दूरमुत्पत्य हित्वा शैलमहार्णवौ । पितुः पन्थानमास्थाय जगाम विमलेऽम्बरे १३५ सो नाग

श कालः त्वरते विलंबेन महते १३२ आलभ्य स्पृष्ट्वा प्रहसन्निव प्रसन्नमुखः सन् १३३ उपपन्नाभिः तत्कालयुक्ताभिः १३४ पितुः पं० रा० म० ११

रा०व्या०सु० ४६ ४७ वैहायसं खेचरत्वं ४८ ४९ गीतवादित्राणां निस्वनो यस्मिन् सः अयमपि विभीषणविषयो भाव्य
१०५

एवमात्मप्रयुक्तास्ताः सर्वेमुंडास्तेन समुत्थिताः ४६ वराहेणादशग्रीवः शिंशुमारेणचेंद्रजित्
उष्ट्रेणाकुंभकर्णश्च प्रयातादक्षिणांदिशम् ४७ एकस्तत्र मया दृष्टः श्वेतच्छत्रो विभीष
णः चतुर्भिः सचिवैः सार्धं वैहायसमुपस्थितः ४८ शुक्लमाल्यांबरधरः शुक्लगंधा
नुलेपनः शंखदुंदुभिनिर्घोषैर्नृत्यगीतैरलंकृतः ४९ आरुह्य मेघसंकाशं मेघस्त
नितनिस्वनम् चतुर्दंतं गजं दिव्यमास्ते तत्र विभीषणः समाजश्च महान्वृत्तो गीतवा
दित्रनिस्वनः ५० पिबतां रक्तमाल्यानां रक्षसां रक्तवाससाम् ५१ ५१ ५१ ५

र्थः स्पष्टः मनुष्यतः गीतवादित्रनिस्वन इति बहुव्रीहि ५० पिबतामित्यादि पिबतां रक्षसां वासभूमिर्लंका सागरे पति
तेत्यन्वयः ५१ रामः
१०५

५२ भस्मरुक्मायांभस्मनारुक्मायो ५३ निवसनेन्यऽभूतेवस्त्रेमि त्वर्थः ५५ एतदेवमतोऽपगच्छेतत्त

त्वंकाचेयंपुरीरम्यासवाजिरथसंकुला सागरेपतिताद्दृष्टाभग्नगोपुरतोरणा ५२
पीत्वातैत्वंप्रमत्ताश्चप्रहसंत्सोमहात्मनाः त्वंकायांभस्मरुक्मायांसर्वाणवसनयोषितः
५४ कुंभकर्णादयश्चेमेसर्वेराक्षसपुंगवाः रक्तंनिवसनंगृह्यप्रविष्टागोमयेह्रदे ५४
त्वपगच्छतपस्यध्वंसीतामाप्नोतिराघवः तदत्वंकूरवाकोर्वंसोत्वमेवाभिधीयताम
ऽभिप्रयाचामवैदेहीमेतद्धिममरोचते ५५

क्रीग्रादीनस्यह्वाऽन्यतोऽपसरते राघवश्चसीतामां प्राप्स्येव प ध्वं ऽभिप्रयाचामऽप्रनयमितिश्लोकः ५५

५६ हे राक्षस्यः किं विवक्षया कुत्सितभर्त्सनादिविषयेच्छया श्वमिति शेषः तत्र हेतुः राघवादिति ५७ नन्वेवं क्लेशिता कथमस्माकं प्रसन्ना स्यात्तत्राह प्रणिपातेति ५८ अर्थसिद्धिं दृष्टसिद्धिमुपस्थितां पश्यामि राघवस्य राक्षसेन्द्रविनाशे विजये च पश्यामि ५९ इदानीं रामवार्ताश्रवणसूचकमप्याह निमित्तभूतमिति अस्या महत्प्रियं श्रोतुं निमित्तभूतं स्फुरच्चक्षुश्च

व

यस्माद्ध्येवंविधः स्वप्नो दुःखितायाः प्रदृश्यते । सा दुःखैर्बहुभिर्मुक्ता प्रियं प्राप्नोत्यनुत्तमम् ५६
भर्त्सितामपि याचध्वं राक्षस्यः किं विवक्षया । राघवाद्धि भयं घोरं राक्षसानामुपस्थितम्
५७ प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा । अलमेषा परित्रातुं राक्षस्यो महतो भयात्
५८ अर्थसिद्धिं तु वैदेह्याः पश्याम्यहमुपस्थिताम् । राक्षसेन्द्रविनाशं च विजयं राघवस्य च ५९ निमित्तभूतमेतत्तु श्रोतुमस्या महत्प्रियम् । दृश्यते च स्फुरच्चक्षुः पद्मपत्रमिवायतम् ६० अपि चास्या विशालाक्ष्या न किंचिदुपलक्षये । विरूपमपि चाङ्गेषु सुसूक्ष्ममपि लक्षणम् ६१ छायावैगुण्यमात्रं तु शङ्के दुःखमुपस्थितम् । अदुःखार्हामिमां देवीं वैहायसमुपस्थिताम् ६२

दृश्यते वाममिति शेषः ६० सीताया अशुभसूचकं च केशलक्षणं नास्तीति मत्वा दर्शयति अपि चेति द्वितीयमपि चेति पादपूरणे विरूपं लक्षणं दुर्लक्षणं सूक्ष्ममपि किंचिन्नोपलक्षये इत्यर्थः ६१ किंतु स्नानानुलेपनाद्यभावमूलकशोभावैगुण्यमात्रमेव दुःखमुपस्थितमित्युत्प्रेक्षे न तु मुख्यं वैवर्ण्यं दक्षिणनाडिसंपादि

हृषितः पुलकितः वेति वा कालेऽकारे अदक्षिणो वामः ६३ वेपमानः स्फुरन् एणघ्नवमस्याः पुरस्थितमिव स्तूयपति ६४
पक्षी कश्चित् शाखानिलयं शाखावास्यं नीडं प्रविष्टो वारंवारमुत्तमः सांत्ववादी उत्तमः शांत
स्वरवादी सुखागतां सुष्ठु शोभनमागतामित्येवं रूपां वाचमुदीरयानः उच्चरन् पुनः पुनश्चोदयतीवक्षोभनमा
गतं स्वागतं पृच्छतीति सीतां पुनः पुनः प्रेरयतीवेत्यर्थः केचिदिमं श्लोकमाचार्यलक्षणपरत्वेन योजयंति तथा हि इ

ईषच्च हृषितो वा स्यादक्षिणाया ह्यदक्षिणः अकस्मादेव वैदेह्या बाहुरेकः प्रकंपते ६३ करे
ण हस्तः पतितः स व्यथो हरन्तमः वेपमानः स्तुवयति एणघ्नं पुरतः स्थितम् ६४ पक्षी च शाखा
निलयं प्रविष्टः पुनः पुनश्चोत्तमः सांत्ववादी सुखागतां वाचमुदीरयानः पुनः पुनश्चोदयतीव हृष्टः

६५
हंसमायणामुत्तमं काव्यं यत्र वाच्यातिशायि व्यंग्यं तदुत्तममिति लक्षणात् व्यंग्यपदगते वाक्यगते प्रबंधगते च भव
ति एतत्कोडरूपमवंधेन श्रुनादिभावत्वं वेधिचेतनस्योज्जीवने प्रवर्तमानस्याचार्यलक्षणविरभिव्यज्यते तत्र
त्रैकापदेन प्रतिरं द्योतितं एकाक्ष्यादिगानास्यस्तत्त्वेंद्रियाणि एवमाकुंभकर्णाविहंकारममकारौ इंद्रजित्प्रभृ

तथः कामक्रोधलोभमोहमदमात्सर्यदंभाः पूर्वोक्तस्याधिकारिणो भवत्यवद्धा नोपदेष्टा आचार्यस्तु लोभमात्रतिः तादृशाचार्यलक्षण
मनेन श्लोकेन व्यज्यते यश्चीचिनोति यश्चैत्यं स्थानकर्माणि विद्योतयत्या सौ यच्छी आचिनोति हि शास्त्रार्थानाचारे स्थापयत्यपि स्वय
माचरते यस्मात्तस्मादाचार्य उच्यत इति लक्षणलक्षित आचार्यः शाखानिलयं प्रविष्टः शाखाः वेदशास्त्रतात्पर्याति पाद्यानि
कर्मोपासनज्ञानान्येव निलयं तत्र प्रविष्टस्तदेकनिरतः तदाहुः आचार्यो वेदसंपन्नो विष्णुभक्तो विमत्सरः मंत्रज्ञो मंत्रभक्तश्च
सदामंत्राश्रयः शुचिः गुरुभक्तिसमायुक्तः पुराणज्ञो विशेषतः एवंलक्षणसंपन्नो गुरुरित्यभिधीयते इति हृष्टः सदासंतुष्टः हृष्टः
तेषाक्तेः आल्हादप्रीत्वनेत्रांवुपुलकीकृतगात्रवान् सदापरगुणे हृष्टो दृष्टव्यः सर्वदेहिभिरिति पुनः पुनश्चोत्तमं सांत्ववादी उत्तमः
उत्तमपुरुषः परमात्मा तद्विषयकं सांत्वं समाधानवाक्यं शिष्येभ्यो वदतीत्युत्तमसांत्ववादी पुनः पुनरित्यनेन यावदनुभवमुपदेशान्न
निवर्तत इत्युक्तं किंच सुखागतो वा चमुदीरयानः सुखप्रश्नादि संप्रदायाविच्छेदे यथा तथाचार्यपरंपराया स्वस्मै आगतो वा चेषउ
पदेशादिमंत्रराजरूपां निर्हेतुदयैवसमुदीरयन् पुनश्चोदयतीव उक्तार्थस्यानुष्ठानाय प्रेरयतीव हृष्टः सन् एतेन शिष्य
शिक्षणांस्व प्रयोजनमाचार्यस्योक्तं भवति ६५

ततः त्रिजटावाक्यश्रवणानन्तरं भर्तुर्विजयसत्वासंजातहर्षा बाला अवोचत् यदितत्तथ्यं स्वप्नदर्शनादिवाक्यम् ६६ इति
सप्तविंशः सर्गः॥ पुनर्दुःखपारमदृष्ट्वैव सीता प्रलापः सेति १ महादुर्भिक्षक्षोभवशाद्वने त्यक्ता बाला कन्येव सीता विलला

ततः सा हृष्टमतिर्बाला भर्तुर्विजयहर्षिता अवोचद्यदि तत्तथ्यं भवेयं शरणं हि वः॥६६॥ हरिः ॐ इत्या
र्षे श्रीमद्रामायणे वाल्मीकीये सुन्दरकाण्डे सप्तविंशः सर्गः॥२७॥ सा राक्षसेन्द्रस्य वचो
निशम्य तद्रावणस्याप्रियमप्रियार्ता सीता वितत्रास यथा वनान्ते सिंहाभिपन्ना गजराजकन्या १ सा
राक्षसीमध्यगता च भीरुर्वाग्भिर्भृशं रावणतर्जिता च कान्तारमध्ये विजने विसृष्टा बालेव कन्या
विललाप सीता २ सत्यं बतेदं प्रवदन्ति लोके नाकालमृत्युर्भवतीति सन्तः यत्राहमेवं परिभर्त्सि
माना जीवामि किंचित्क्षणमप्यपुण्या ३ सुखाद्विहीनं बहुदुःखपूर्णमिदं तु नूनं हृदयं स्थिरं मे
विदीर्यते यन्न सहस्रधाद्य वज्राहतं शृङ्गमिवाचलस्य ४ ४ ४ ४० ४ ४

प २ यत्र यतः किंचिज्जीवामि कुत्सितं जीवामि अतः अपुण्या पुण्यपरहिता ३ ४ ४ ४

रा० वा० मुं० नन्वेवं शालाप्यायेऽप्यात्मह ननदोषः स्यादत आह नैवेति ॥ अत्र गुणात्मह ननेन मम दोषमिति शङ्कीवत्वमार्थ्यपतो हमस्य ब ध्याएवंच
१०८ चगुणात्मह ननाभावेपि मम रावणाकर्तृकदुर्मरणास्पदुवारत्वादेष भावाकिरिति भावः ननु दुर्मरणा भावा परावरणानु कूल्ये
प्राप्यताममत आह भावमिति ॥ अघद्विजाय शूद्रासद्विजोमंत्रमि वाहे स्वीयेभावे चिंतयदातृ नात्वेन समर्पयोस्त्रीणां दुष्ट्रपानो

नैवास्मि नूनं मम दोषमत्र वध्याहमस्याप्रियदर्शनस्य भावेन चास्याहमनुप्रदातुमलं ते द्विजोमंत्रमि
वाद्विजाय ५ नूनं ममांगान्यचिरादनार्यः शस्त्रैः शितैश्छेत्स्यति राक्षसेंद्रः तस्मिन्ननागच्छ
ति लोकनाथे गर्भस्य जंतोरिव शल्यकृन्तः ६

मरणास्यैव श्रेष्ठत्वादिति भावः ५ तथाप्यात्मघातस्यातिदोषत्वात् आह समपुत्र मित्याशंक्य सर्वं विचित्र बधाद्विभेमीत्याशयेना
ह नूनमिति तस्मिन् लोकनाथे रामे मे अनागच्छति पतिमास्वत्यादर्वामिति शेषः निरुद्धनिर्गमस्य गर्भस्य जंतोरंगानि
शल्यकृन्तः नापित इव राक्षसेंद्रो मम जीवंत्या एवांगानि छेत्स्यतीति संबंधः ६ ६ ६ ६ ६ ६६ ६ ६ ६

रा०म०
१०८

च्चिता प्रभर्तृवियोगदुःखिता या मे रदेवि प्रशमनं दुःखमपि वेतामगमिष्यतीति यतो दौमासौ विश्रामनावधिभूतावभिगमिष्यतः प्रीष्टं
गमिष्यतः किल राजा पराधाद्रुढस्यनिष्ठान्ते वध्यस्य तस्करस्य दुःखमिव ७ मूढो वात्यारूपो वातो यस्याः सा वात्याहतो यर्थः
मूढो ऽपंडितवात्ययोरिति विश्वः ८ मृगस्य मायामृगस्य रूपं धारयतः सत्वेनात्तरूपजीवेन मम कारणात् मन्ये मित्रं म

दुःखं वर्तते मम दुःखिता या मा सौ विरोदयाभिगमिष्यतो दैव वर्तस्व ... याति प्रांते राजापराधा
द्विवत्तस्करस्य ७ हा राम हा लक्ष्मण हा सुमित्रे हा राम मातः सहमे जनन्या एषा विपद्यामहमस्य
भाग्यामहार्णवे नौरिव मूढवाता ८ तरस्विनौ धारयतां मृगस्य सत्वेन रूपं मनुजेंद्रपुत्रौ नूनं
विशालौ मम कारणांतौ हिंसर्षभौ द्वाविव वेधितेन ९ नूनं स कालो मृगरूपधारी मामल्पभाग्यां
लुलुभे तदानीम् यत्रार्यपुत्रौ विससर्ज मूढा रामानुजं लक्ष्मणपूर्वजं च १० हा राम सत्यव्रत दीर्घ
बाहो हा पूर्णचंद्रप्रतिमानवक्त्र हा जीवलोकस्य हितः प्रियश्च वध्यां न मां वेत्सि हि राक्षसानाम्
११

नुजेंद्रपुत्रौ विशालौ हिंसौ नूनं द्वौ सिंहौ द्वौ ऋषभौ वेधितेनाशनिनेव ९ मृगरूपधारी कालः कर्ता लुलुभे लोभयामास यत्र यस्मिन्का
ले विससर्ज व्यसर्जं १० हा रामे ... हे राम हा ... प्रोच्यैसर्थः हा जीव लोकस्य प्राणरूपलोकस्य हितः हितकरः प्रियश्च स त्वमिति प्रोषः ११

अनन्यदेवत्वं पत्नीकदेवत्वमित्यर्थः इयं क्षमा शापेन संहारशक्तावप्येवं पीडासहनरूपा पतिव्रतात्वं पत्यतिरिक्ते कामासक्तिराहित्यं कृतमप्यकृतं १२ उक्तमेवार्थं दुःखातिशयादावर्तयति मोघं हीति त्वयाहीनान्ते वसंगमनेन चानिराश्रा १३ पितुर्निदेशामाज्ञां नियमेनाविच्छेदेन कृत्वा चरितव्रतो वनान्निवृत्तः सन् विपुलेक्षणाभिः स्त्रीभिस्त्वं रंस्यसे रतिमन्वेवीतभयः गतवनवासभयः कृ

अनन्यदेवत्वमियं क्षमा च भूमौ च शय्या नियमश्च धर्मे पतिव्रतात्वं विफलं ममेदं कृतं कृतघ्नेष्विव मानुषाणाम् १२ मोघं हि धर्मश्चरितो मयायं तथैकपत्नीत्वमिदं निरर्थम् यात्वां न पश्यामि कृशा विवर्णा हीना त्वया संगमने निराशा १३ पितुर्निदेशं नियमेन कृत्वा वनान्निवृत्तश्चरितव्रतश्च स्त्रीभिस्तु मन्ये विपुलेक्षणाभिः संरंस्यसे वीतभयः कृतार्थः १४ अहं तु राम त्वयि जातकामा चिरं विनाशाय निबद्धभावा मोघं चरित्वाथ तपो व्रतं च त्यक्ष्यामि धिग्जीवितमल्पभाग्याम् १५

तार्थः निष्पन्नसर्वपुरुषार्थः मद्विनाशेन पुनर्वहुभी रंस्यस इति भावः १४ अहं तु त्वयि जातकामा अत एव त्वयि निबद्धभावा निबद्धहृदया चिरं विनाशाय येति दुःखातिशयोक्तिः तपो नशाने व्रतो नियमः इदानीमनुष्ठितानां तयो व्रतादीनां जन्मान्तरफलत्वदृष्ट्वेन मोघं चरित्वा जीवितं त्यक्ष्यामि अत एवाल्पभाग्या धिक् १५ १५

१९ १७ शोकाभितप्तेत्यादिसार्द्धश्लोकमेकं वाक्यं शोकाभि- तप्ता सीता बहुधा विचिंत्य वेण्युद्ग्रथनं गृहीत्वा वेण्युद्ग्र-
थनेन उद्बध्य उद्बध्य शीघ्रं यमस्य मूलं गमिष्यामीति नगस्य शाखां गृहीत्वा उपस्थिते ति संबंधः २८ तस्या इति सार्द्ध

सा जीवितं क्षिप्रमहं त्यजेयं विषेण शस्त्रेण शितेन वापि विषस्य दाता न तु मेस्ति कश्चिच्छस्त्रस्य वा वेश्म
नि राक्षसस्य १६ इतीव देवी बहुधा विलप्य सर्वात्मना राममनुस्मरंती प्रवेपमाना परिशुष्कवक्त्रा नगो
त्तमं पुष्पितमाससाद १७ शोकाभितप्ता बहुधा विचिंत्य सीताथ वेण्युद्ग्रथनं गृहीत्वा उद्बध्य वेण्यु
द्ग्रथनेन शीघ्रमहं गमिष्यामि यमस्य मूलम् १८ उपस्थिता सा मृदुसर्वगात्री शाखां गृहीत्वाथ न
गस्य तस्य तस्यास्तु राममपरिचिंतयंत्या रामानुजं स्वं च कुलं शुभांग्याः १९ शोका नि मित्तानि
तदा बहूनि धैर्यार्जितानि प्रवराणि काले प्रादुर्निमित्तानि तदा बभूवुः पुरापि सिद्धान्युपलक्षितानि
२०॥ इत्यार्षे सुंदरकांडे ष्टाविंशः सर्गः २८ ॥।

मेकं वाक्यं शोकानिमित्तानि शुभसूचकानि सर्वैः धैर्यार्जितानि धैर्यसंपादकानि लोके प्रवराणि श्रेष्ठानि पुरापि सि
द्धान्युपलक्षितानि पूर्वमपि लब्धसंवादत्वेन दृष्टानि निमित्तानि तदा प्रादुर्बभूवुः १९ २०

भूय ऊर्ध्वं गतोऽपि बहुहुर्दृष्टं गिरिमधःप्रदेशवर्तिनमवलोकयन् १३६ सुदुष्करत्वे घनं प्रथमं कर्म द्वितीयं मैनाकगिरावविश्रम्यागमनं १३७ तत्रस्थाः मैनाकस्थाः तस्य काञ्चनस्य काञ्चनमयस्य सुनाभस्य शोभननाभ्यस्य मैनाकस्य कर्मणा जलादुत्थानरू-

भूयश्चोर्ध्वगतिं प्राप्य गिरिं तमवलोकयन् वायुसूनुर्निरालम्बे जगाम विमलेऽम्बरे १३६ तद्द्वितीयं हनुमतो दृष्ट्वा कर्म सुदुष्करम् प्रशशंसुः सुराः सर्वे सिद्धाश्च परमर्षयः १३७ देवताश्चाभवन् हृष्टास्तत्रस्थास्तस्य कर्मणा काञ्चनस्य सुनाभस्य सहस्राक्षश्च वासवः १३८ उवाच वचनं धीमान्परितोषात्सगद्गदम् सुनाभं पर्वतश्रेष्ठं स्वयमेव शचीपतिः १३९ हिरण्यनाभ शैलेन्द्र परितुष्टोऽस्मि ते भृशम् अभयं ते प्रयच्छामि गच्छ सौम्य यथासुखम् १४० साह्यं कृतं ते सुमहद्विक्रान्तस्य हनूमतः क्रमतो योजनशतं निर्भयस्य भये सति १४१ रामस्यैष हितायैव याति दाशरथेः कपिः सत्क्रियां कुर्वता तस्य तोषितोऽस्मि दृढं त्वया १४२ ६६६६६६

पेण देवताः दृष्टास्तुष्टाः १३८ १३९ अभयं स्वकृतपक्षच्छेदशङ्काजनितभयाभावं १४० ते तव मन्निमित्तभये सत्यपि निर्भयस्य हनूमतः साहाय्यं सहकारित्वं कृतं तस्मात् अभयं प्रयच्छामीति शेषः १४१ १४२

रा० वा० सु०
११०

तथागतामपरिच्छेद्यदुःखार्त्तां शुभां स्वाभाविकदिव्यरूपां तामधिगम्य निमित्तानि तद्विषये शुभानि सूचयिष्यन्त्यस्वमतो नेमिरे प्रियानुरूपं नरमुपसेविनः सेवका इव १ तस्याः सुकेश्याः अरालानां वक्राणां पक्ष्मणां राज्यायेत्मावृतं वामं वामं वक्रं रूक्षणाविशालं रक्तांतं मध्येरक्तं सर्वतोविशालं नेत्रं शुक्लं च अभितस्ताम्रं पोतरक्तं मिलपर्णं एकं वामं नयनं प्रास्पं

तथागतां तां व्यथितामनिंदितां व्यपेतहर्षां परिदीनमानसाम् । शुभानि मित्तानि शुभानि भेजिरे नरं श्रियानुपमिवोपजीविनः १ तस्याः शुभं वाममरालपक्ष्मराजीवृतं रूक्षणाविशालं रक्तांतम् प्रास्पंदतैकं नयनं सुकेश्या मीनाहतं पद्ममिवाभिताम्रम् २ भुजश्च चार्वं चितवृत्तपीनः परार्ध्यकालागरुचंदनार्हः अनुत्तमेनाध्युषितः प्रियेण चिरेण वामः समवेपताशु ३ गजेंद्रहस्तप्रतिमश्च पीनस्तयोर्द्वयोः संगतयोः सुजातः प्रस्पंदमानः पुनरूरुरस्या रामं पुरस्तात्स्थितमाचचक्षे ४

दत्तकिंचिदवनतमीनेनेव हतमभितात्रं पद्ममिवतमस्तेन नमर्वोत्तमेन प्रियेण रामभद्रेण चिरेण चिरम् अध्युषितः कृतसेपर्कस्तस्या वामो भुजश्च आशु समवेपत श्लकंपत ३ संहतयोः स्निग्धयोस्तयो रूर्वोर्मध्ये प्रस्पंदमानो ऽस्या वामऊरुः पुरस्तात्स्थितं रामं आचचक्षे अकथयदित्यर्थः ४ ६ १११

एम०
११०

शिखरं दाडिमबीजं तदग्रतुल्य दंता अतुल्या यस्याः स्मितायास्तस्या हेमरूपिनत्वाद्धेमसमानवर्णो चिरमपरिवर्त्तनादीषद्गो ध्व
स्तमिव ईषन्मलिनमिव शुभवाक्र किंचित्परिसंसत्त पर्यंसत्तेति संबंधः शिखरं प्रौलवा स्थाने कस्थानकोटि पक्व दाडिम
बीजे चेति विश्व ५ एतैर्निमित्तैः प्रागपि साधुतिदैः सम्यक् सेवादिभिरपरैश्चनिमित्तैः संचोदिता संबोधिता सुभ्रूर्भगवतीश्रतिसंज

ऋ संपुनर्हेमसमानवर्णामीषद्गो ध्वस्तमिवातुल्याः ध्याः यामस्मितायाः शिखराग्रदंता किंचि
त्परिसंसत्तेचारुगात्र्याः ५ एतैर्निमित्तैरपरैश्चसुभ्रूः संचोदिता प्रागपिसाधुतिद्रैः वा तातपक्को
त्तमिवप्रन्नष्टवर्षेण बीजे प्रतिसंजहर्ष ६ तस्याः पुनर्विंवफलोपमोष्ठं स्वच्छिन्दुके प्रांतमण त्व
पक्ष्मं वक्त्रं वभासेसिततशुक्ल दंष्ट्रा होमुखाच्चंद्र इव प्रमुक्तः ७

हर्षं अधिकं हर्षमवापतात्तपाम्यांक्षा
तेमलिनं प्रनष्टप्रायं बीजं वर्षेत्तेवेत्यर्थः ६ विंवफलोपमो अोष्ठो यस्मिन् शोभने अक्षिणी च वौके प्रांता अलकाश्च यस्मि
न् सिताः पंक्तिवद्धाः शुक्लाः धवलाः दंष्ट्राः दंता यस्मिन्नेतादृशं तस्या वदनं ताहोमसि रवीप्रमुक्त श्चंद्र इव वभासे पुनः शब्दो वाक्या
लंकारे ७

व्यपनीततंद्रा निरस्तजाड्या हर्षेण विबुद्धं विकसितं चित्तं यस्याः सा आर्या सीता वदनेन हेतुना अशोभत शुक्ले शुक्लपक्षोदितेन शीतांशुना रात्रिरिव ५ इत्येकोनत्रिंशः सर्गः ॥ विक्रांतः शूरः सीतायाः विलापं त्रिजटायाः स्वप्नकथनमिति शेषः १ चिं-

सा वीतशोका व्यपनीततंद्रा शांतज्वरा हर्षविबुद्धसत्वा अशोभतार्या वदनेन शुक्ले शीतांशुना रात्रिरिवोदितेन ॥ ५ ॥ हरिः ॐ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये सुंदरकांडे एकोनत्रिंशः सर्गः ॥ २९ ॥ हनूमानपि विक्रांतः सर्वं शुश्राव तत्वतः सीतायास्त्रिजटायाश्च राक्षसीनां च तर्जितम् १ अवेक्षमाणस्तां देवीं देवतामिव नंदने ततो बहुविधां चिंतां चिंतयामास वानरः २ यां कपीनां सहस्राणि सुबहून्ययुतानि च दिक्षु सर्वासु मार्गंति सेयमासादिता मया ३ चारेण तु सुयुक्तेन शत्रोः शक्तिमवेक्षता गूढेन चरता तावदवेक्षितमिदं मया ४ राक्षसानां विशेषश्च पुरी चेयमवेक्षिता राक्षसाधिपतेरस्य प्रभावो रावणस्य च ५

तां चिंतयामास चिंतां चकारेत्यर्थः २ यामिति सर्ववानरान्वेषिता येयं मया लब्धा इति विस्मितवान् ३ चारेण चारकर्मणा प्रवर्तमानेन इदं वक्ष्यमाणं ४ राक्षसानां विशेषबलादिरत्नमयी मेरुपर्यदिकृते अस्य रावणस्य प्रभावश्चावेक्षितः ५ ५ ५ ५ सीतारामाय ५

अप्रमेयस्य अपरिच्छेद्यस्वरूपस्वपरिच्छेद्यगुणस्य च सर्वसत्वे शुद्धसत्वावतो रामस्य भार्यां समाश्वासयितुं पुत्रमित्य
र्थः ६ आश्वासयामि आश्वासयिष्यामि ७ दोषवत्कार्यहानिर्दोषवत् ८ तदेवाह गतेहीति तत्र रामसमीपे ९ समाश्वा

पुत्रं तस्याप्रमेयस्य सर्वसत्वदयावतः समाश्वासयितुं भार्यां पतिदर्शनकांक्षिणीम् ६ अहमा
श्वासयाम्येनां पूर्णचंद्रनिभाननाम् अदृष्टदुःखां दुःखस्यन ह्यंतमधिगच्छतीम् ७ यदि
ह्यहमिमामेवं शोकोपहतचेतनाम् अनाश्वास्य गमिष्यामि दोषवद्गमनं भवेत् ८ गतेहि म
यि तत्रेयं राजपुत्री यशस्विनी परित्राणमपश्यंती जानकी जीवितं त्यजेत् ९ मया च स महा
बाहुः पूर्णचंद्रनिभाननः समाश्वासयितुं न्याय्यः सीतादर्शनलालसः १० निशाचरीणां प्र
त्यक्षमक्षमं चाभिभाषणम् कथं नु खलु कर्तव्यमिदं कृच्छ्रगतो ह्यहम् ११ अनेन रात्रिशेषे
ण यदि नाश्वास्यते मया सर्वथा नास्ति संदेहः परित्यक्षति जीवितम् १२ सीता राम राम

सयितुं न्यायः सीतासंदेशकथनेनेति शेषः १० सीतीसमाश्वासने च कष्टमित्याह निशाचरीणामिति तासां प्रत्यक्षं सीता
याभिभाषणमक्षमम् अयोग्यं अत इदं कार्यं कथं कर्तव्यमित्येवं कृच्छ्रगतोहमस्मि ११ कालविलंबे आश्वासनस्यापुत्रं ३

संभाषणं चावश्यकमित्याह रामश्चेति मामुद्दिश्य सीता किमब्रवीदिति चेद्रामो मां पृच्छेदित्यन्वयः १३ १४ पद्येनाम
संभाष्यैव भर्तारं सुग्रीवं रामकारणाद्यदि वो द्योजयिष्यामि उद्योगं कारयिष्यामि तर्हि तदागमनं व्यर्थं स्यात् तदा

रामश्च यदि पृच्छेन्मां किं वा सीताब्रवीद्वचः किमहं तं प्रति ब्रूयामसंभाष्य सुमध्यमाम् १३
सीतासंदेशरहितं मामितस्त्वरयागतम् निर्दहेदपि काकुत्स्थः कुपितस्तीक्ष्णचक्षुषा १४
यदि वोद्योजयिष्यामि भर्तारं रामकारणात् व्यर्थमागमनं तस्य ससैन्यस्य भविष्यति १५
अंतरं त्वहमासाद्य राक्षसीनामिहास्थितः शनैराश्वासयिष्यामि संतापबहुलामिमाम् १६
अहं ह्यतितनुश्चैव वानरश्च विशेषतः वाचं चोदाहरिष्यामि मानुषीमिव संस्कृताम्
१७ यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् रावणं मन्यमाना मां सीता भीता भविष्यति

गमनपर्यंतं देव्याः प्राणानवस्थानादिति भावः १५ अंतरमेवकाशं तासामनवधानसमयमित्यर्थः १६ तत्राश्वासनोपा
यं निश्चिनोति अहं हीति अतिसूक्ष्मवानरस्तनुरेव सन्मानुषीं मध्यशरीरसाध्यं संस्कृतां व्याकरणसंस्कारवतीं
वाचं चोदाहरिष्यामि १७ संस्कृतकथने दोषमाशंक्य तन्नुन्ने यदीत्यादि ...

संस्कृतकथने दोषमाह कामनुष्यभाषयैव व्यवहर्तव्यमिति तन्निश्चिनोति यदि वाचमित्यादिश्लोकद्वयेन १८ १९ मानुषभा
षं भाषतोपि दोषोस्तीति विचारयति सेयमिति मे रूपं वानररूपं वानररूपं मा त्वां कथं भाषितं च मानुषं श्रुत्वा विरुद्ध्या

यदि वाचं प्रवक्ष्यामि द्विजातिरिव संस्कृताम् रावणं मन्यमाना मां सीता भीता भविष्यति १८ अ
वश्यमेव वक्तव्यं मानुषं वाक्यमर्थवत् मया सांत्वयितुं शक्या नान्यथेयमनिंदिता १९ सेयमा
लोक्य मे रूपं जानकी भाषितं तथा रक्षोभिस्त्रासिता पूर्वं भूयस्त्रासं गमिष्यति २० ततो जात
परित्रासा शब्दं कुर्यान्मनस्विनी जानाना मां विशालाक्षी रावणं कामरूपिणम् २१ सीतया
च कृते शब्दे सहसा राक्षसीगणाः नानाप्रहरणो घोरः समेयादंतकोपमः २२ ततो मां संपरिक्षि
प्य सर्वतो विकृताननाः वधे च ग्रहणे चैव कुर्युर्यत्नं यथाबलम् २३ तं मां शाखाः प्रशाखाश्च
स्कंधाश्चोत्तमशाखिनः दृष्ट्वा च परिधावंतं भवेयुर्भयशंकिताः २४ सीतास्सामा स

पारदर्शिना द्रावणोयमिति मत्वा त्रासं गमिष्यति २० किं तत्रत्यत्राह तत इति शब्दमार्तशब्दं जानाना मन्वाना २१ समेयात्
मत्संमुखमागच्छेत् २२ संपरिक्षिप्य सर्वतः परिवेष्ट्य यथाबलं ज्ञात्वा २३ शाखाः परिधावंतं मां दृष्ट्वा त्पन्वयः २४

रा० वा० सुं० ११३

तामिरत्र धर्षणायै परिग्रहीतं मम महद्रूपं संप्रेक्ष्य भयवित्रस्ता विहतस्वरा भवेयुः २५ ततो राक्षसेन्द्रनिवेशने रक्षणाय राक्षसेन्द्रनियुक्ता ये राक्षसास्तेषामपि राक्षसाः समाह्वानं कुर्युः २६ उद्वेगकारणात् आपातसामर्थ्यात् उद्वेगरूपान्निमित्तादस्मि

मम रूपं च संप्रेक्ष्य वने विचरतो महत्। राक्षसो भयवित्रस्ता भवेयुर्विहतस्वराः २५ ततः कुर्युः समाह्वानं राक्षसा रक्षसामपि। राक्षसेन्द्रनियुक्ता ये राक्षसेन्द्रनिवेशने २६ ते शूलशरनिस्त्रिंशविविधायुधपाणयः। आपतेयुर्विमर्देऽस्मिन्वेगेनोद्विग्नकारणात् २७ संरुद्धस्तैस्तु परितो विधमन् राक्षसं बलम्। शक्नुयां न तु संप्राप्तुं परं पारं महोदधेः २८ मां वा गृह्णीयुराप्लुत्य बहवः शीघ्रकारिणः। स्यादियं चागृहीतार्था मम च ग्रहणं भवेत् २९ हिंसाभिरुचयो हिंस्युरिमां वा जनकात्मजाम्। विपन्नं स्यात्ततः कार्यं रामसुग्रीवयोरिदम् ३०

न्द्रे शीघ्रवेगेन विमर्दे विमर्दाय आपतेयुरित्यर्थः २७ न शक्नुयां पुनः प्राप्नुयामिति भावः २८ मां वा गृह्णीयुः मम ग्रहणं भवेद्यदि तदा इयं च सीता अगृहीतार्था स्यात् अप्रविदितरामवृत्तान्ता स्यादित्यर्थः २९ इमां वा हिंस्युः एतद्कार्यं विनाशमागतं स्यात् प्रायेणेति

टी० सुं० रा० ११३

कार्यविपदमेवोपपादयति उद्देश इति समुद्रलंघनशाप्यदेशान्नष्टमार्गे प्रकाशान्तरेण तत्प्राप्तिसंपादकमार्गरहिते ३१ विप्रस्ते
हते कार्यसाधने सीतादर्शननिवेदनरूपकार्यकरणे ३२ यो लंघयेत्तं न पश्यामीत्यन्वयः ३३ न तु शक्ष्यामि ष्ठुश्रो

उद्देशो नष्टमार्गेस्मिन्राक्षसैः परिवारिते सागरेणापरिक्षिप्ते गुप्ते वसति जानकी ३१ विप्र-
स्ते वा प्रहीते वा रक्षोभिरपि संयुगे नान्यं पश्यामि रामस्य साहाय्यं कार्यसाधने ३२ विन-
ष्टेष्वपि न पश्यामि यो हते मयि वानरः शतयोजनविस्तीर्णं लंघयेत्तं महोदधिम् ३३ कामं
हन्तुं समर्थोस्मि सहस्रमपि रक्षसाम् न तु शक्ष्याम्यहं शक्तुं परं पारं महोदधेः ३४ असत्यानि
च युद्धानि संशयो मे न रोचते कश्च निःसंशयं कार्यं कुर्यात्प्राज्ञः ससंशयम् ३५ ३५५

त्येति भावः ३४ किंच युद्धे जयोपि संदिग्ध इत्याह असत्यानीति असनिश्चितजयानि संशयः ससंशयितजयफलकयुद्ध
व्यापारो मे न रोचते अपरञ्च हेतुः मा सत्वमेव दर्शयति कश्चेति निःसंशयं निर्णीतफलकं कार्यं कर्म विहायेति शेषः
प्राज्ञो मादृशः ससंशयं ससंशयितफलकं कुर्यात् न कोपीत्यर्थः ३५

रा० वा० सुं०
११४

एषदोषः उभयोः अन्ययोः संशयरूपः सीताभिभाषणे उपरतः स्यादित्येति शेषः अनभिभाषणे तु रामसंदेशानिवेदने ३६ भूताश्चा
र्थाः निष्पन्नाश्च अप्यर्थाः विक्लवम् अविवेकिनं दूतमासाद्य देशकालविरोधिताः संतोपि विपद्यंते नश्यंतीति अयुक्तदेशका
लप्रयुक्तत्वादिति भावः ३७ अर्थानर्थांतरे कोपि कार्यविषये निश्चितापि स्वामिनाप्रतिचिवैः सह निश्चितापि बुद्धिः अत्रवि

एषदोषोमहान्हिस्यान्ममसीताभिभाषणे प्राणत्यागश्चवैदेह्याभवेदनभिभाषणे ३६ भूताश्चा
र्थाविपद्यंतेदेशकालविरोधिताः विक्लवंदूतमासाद्यतमःसूर्योदयेयथा ३७ अर्थानर्थांत
रेबुद्धिर्निश्चितापिनशोभते घातयंतिहिकार्याणिदूताःपंडितमानिनः ३८ नविनश्येदिदं
कार्यंवैक्लव्यंनकथंमम लंघनंचसमुद्रस्यकथंनुनवृथाभवेत् ३९ कथंनुखलुवाक्यं
मेशृणुयान्नोद्विजेतच इतिसंचिंत्यहनुमांश्चकारमतिमान्मतिम् ४० ४० ४० ४०

क्लवं दूतमासाद्यैतत्पदानुषज्यते न शोभते अपि किंचित्कारणभवतीत्यर्थः एतदेवोपपादयति घातयंतिहीति ३८ प्रागुक्तदूतदोषाः
स्वस्मिन्प्रयानसुलत्या कर्तव्यमित्याह नेति कार्यं स्वामिकार्यं वैक्लव्यं बुद्धिहीनता मम कथं न भवेत् समुद्रलंघने कथं
नु वृथा न भवेत् तथा कर्तव्यमिति शेषः ३९ शृणुयात् सीतेति शेषः मतिं चकार सीतासंभाषणोपाये निश्चितवानित्यर्थः ४०

टी०
११४

तदेवाह एवमिति स्वबंधुं स्वस्याः देव्याः बंधुं अनुकीर्तयन् हेतौ शतृप्रत्ययः अनुकीर्तनाद्धेतोर्नैनामुद्वेजयिष्यामि मद्रूपदर्श-
नमेतरेणाममसंकीर्तनेनैवानुद्विग्नां करिष्यामीत्यर्थः तद्बंधुगतमानसां चासौ बंधुश्च तद्बंधुः रामस्तेन गतमानसं यस्याः
सा ताम् ४१ वचनानि समर्पयन् एतत्संदेशवचनान्युच्चारयन् ४२ यथेयं श्रद्धास्यति तथा सर्वं समादधे सम्यगभिधा-

एवमक्लिष्टकर्माणं स्वबंधुमनुकीर्तयन् नैनामुद्वेजयिष्यामि तद्बंधुगतमानसां ४१ इक्ष्वाकूणां
वरिष्ठस्य रामस्य विदितात्मनः शुभानि धर्मयुक्तानि वचनानि समर्पयन् ४२ श्रावयिष्यामि
सर्वाणि मधुरां प्रब्रुवन् गिरम् श्रद्धास्यति यथा सीता तथा सर्वं समादधे ४३ स बहुविधं महानुभा- इति
वो जगतिपतेः प्रमदामवेक्षमाणः मधुरमवितथं जगाद वाक्यं द्रुमविटपान्तरमास्थितो हनूमान्
४४ ॥ हरिः ॐ इत्यार्षे रामायणे वाल्मीकीये सुंदरकाण्डे त्रिंशः सर्गः ॥ ३० ॥ एवं बहु-
विधां चिंतां चिंतयित्वा महाकपिः संश्रवे मधुरं वाक्यं वैदेह्या व्याजहार ह १ राजा दशरथो नाम
रथकुंजरवाजिमान् पुण्यशीलो महाकीर्तिरिक्ष्वाकूणां महायशाः २

स्ये ४३ जगतिपतेरिति ह्रस्वाभावः आर्षः इति त्रिंशः सर्गः ३० चिंतां चिंतयित्वा निश्चित्य कृत्वा कर्तव्यमर्थं निश्चित्येत्यर्थः संश्रवे श्रूय-
तेऽस्मिन्निति संश्रवः तस्मिन् समीपदेशे यत्रोक्तं सीता तेन वक्ष्यमाणान्यर्थः व्याजहार ब्रूतो तमिति शेषः १ १ २ २

रा०वा०सुं०
१२

१४३ प्रवसिष्यतः जलांतरमन्तरस्पर्धिः सागरं मैनाकाधिष्ठितसागरप्रदेशं १४४ १४५ १४६ १४७ बले ज्ञानबले उपायबले

ततः प्रहर्षमतुलमद्विपुलं पर्वतोत्तमः प्राप्य देवतानां पतिं दृष्ट्वा परितुष्टं शतक्रतुम् १४३ स वै
दत्तवरः शैलो बभूवावस्थितस्तदा हनूमांश्च मुहूर्तेन व्यतिचक्राम सागरम् १४४ ततो
देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः अब्रुवन्सूर्यसंकाशां सुरसां नागमातरम् १४५ अ
यं वातात्मजः श्रीमान्प्लवते सागरोपरि हनूमान्नाम तस्य त्वं मुहूर्तं विघ्नमाचर १४६ राक्ष
सं रूपमास्थाय सुघोरं पर्वतोपमम् दंष्ट्राकरालं पिङ्गाक्षं वक्त्रं कृत्वा दिवस्पृशम् १४७
बलमिच्छामहे ज्ञातुं भूयश्चास्य पराक्रमम् त्वां विजेष्यत्युपायेन विषादं वा गमिष्यति १४८
एवमुक्ता तु सा देवी दैवतैरभिसत्कृता समुद्रमध्ये सुरसा बिभ्रती राक्षसं वपुः १४९ विकृ
तं च विरूपं च सर्वस्य च भयावहम् प्लवमानं हनूमन्तमावृत्येदमुवाच ह १५० मम भक्ष्यः प्रदि
ष्टस्त्वमीश्वरैर्वानरर्षभ अहं त्वां भक्षयिष्यामि प्रविशेदं ममाननम् १५१

च पराक्रमं च ज्ञातुमिच्छा
महे तद्देवविज्ञातो ति त्वामिति १४८ १४९ १५० ईश्वरैर्देवैः १५१ १५१ १५१ १५१ मः १२

मुख्यस्य राजवंशे प्रोक्तस्य लक्ष्मीवर्द्धन इति हस्वस्थायी ३ पार्थिवव्यंजनैः कुत्र चामरादिभिर्वीर्यैः सामुद्रिकोक्तैः शरीरव्यंज

रा० बा० सुं०
११५

चिन्हैर्युक्तः सुखदः मित्राणां ४ ५ ६ ७ तस्याभिसंधस्य सस्य संकल्पस्य ८ मृगयामदि प्रपधावता ९ जनस्थाने वधं जनस्था

अहिंसारतिरक्षुद्रो घृणी सत्यपराक्रमः मुख्यस्येक्ष्वाकुवंशस्य लक्ष्मीवांल्लक्ष्मिवर्धनः ३ पार्थि
वव्यंजनैर्युक्तः पृथुश्रीः पार्थिवर्षभः पृथिव्यां चतुरंतायां विश्रुतः सुखदः सुखी ४ तस्य पुत्रः प्रि
यो ज्येष्ठस्तातस्याधिपतिमानना रामो नाम विशेषतः श्रेष्ठः सर्वधनुष्मताम् ५ रक्षिता स्वस्य वृत्त
स्य स्वजनस्यापि रक्षिता रक्षिता जीवलोकस्य धर्मस्य च परंतपः ६ तस्य सत्याभिसंधस्य वृद्धस्य व
चनात्पितुः सभार्यः सह च भ्रात्रा वीरः प्रव्रजितो वनम् ७ तेन तत्र महारण्ये मृगयां परिधावता रा
क्षसा निहताः शूरा बहवः कामरूपिणः ८ जनस्थानवधं श्रुत्वा हतौ च खरदूषणौ ततस्त्वमर्षा
पहृता जानकी रावणेन तु वंचयित्वा वने रामं मृगरूपेण मायया ९ स मार्गमाणस्तां देवीं रामः
सीतामनिंदिताम् आससाद वने मित्रं सुग्रीवं नाम वानरम् १० ततः स वालिनं हत्वा रामः परपुरं
जयः प्रयच्छत्कपिराज्यं तत् सुग्रीवाय महात्मने ११ नरक्षो वधं खरदूषणौ निहितौ च श्रुत्वा रावणो नामर्षी

पहृता वैरेणापहृता तु मायया मृगरूपेण मारीचेन करणेन रामं वंचयित्वेत्यर्थः १०।११

रा० म०
११५

१२ तस्माद्धेतोस्तदन्वेषणहेतोः १३ यथारूपां यादृग्रूपां यादृग्वर्णां यादृक्कांतिं सीतां राघवस्य मुखाद्दहम श्रौषं तेयमासादिता दृष्ट्वा इहेति शेषः १४ १५ केशांतेव्वतं (?) संस्कारतः प्रकीर्णत्वात् १६ १७ १८ इत्येकत्रिंशः सर्गः ३१। तत इत्यादि श्लोकद्वयमे

सुग्रीवेणाभिनिर्दिष्टा हरयः कामरूपिणः दिक्षु सर्वासु तां देवीं विचिन्वंति सहस्रशः १२ संपा
तिवचनाच्छतयोजनमायतम् तस्माद्धेतोर्विशालाक्ष्याः समुद्रं वेगवान्प्लुतः १३ यथारूपां
यथावर्णां यथालक्ष्मीं विनिश्चिताम् अश्रौषं राघवस्याहं सेयमासादिता मया १४ विररामैव
मुक्त्वा तु वाचं वानरपुंगवः जानकी चापि तच्छ्रुत्वा विस्मयं परमं गता १५ ततः सा वक्रकेशां
ता सुकेशी केशसंवृतम् उन्नम्य वदनं भीरुः शिंशपामन्ववैक्षत १६ निशम्य सीता वचनं कपे
श्च दिशश्च सर्वाः प्रदिशश्च वीक्ष्य स्वयं प्रहर्षं परमं जगाम सर्वात्मना राममनुस्मरंती १७ सा
तिर्यगूर्ध्वं च तथाप्यधस्तान्निरीक्षमाणा तमचिंत्यबुद्धिम् ददर्श पिंगाधिपतेरमात्यं वातात्म
जं सूर्यमिवोदयस्थम् ॥ १८ ॥ इत्यार्षे रा॰ सुंदरकांडे एकत्रिंशः सर्गः ॥ ३१ ॥ ततः शाखांतरे ली
नं दृष्ट्वा चलितमानसा वेष्टितार्जुनवस्त्रं तं विद्युत्संघातपिंगलम् १ कान्वयं लीनं स्पष्टमस्फुरं तं दृष्ट्वा

चलितमानसा प्रहृष्टरूपोपमपि मायामृगो वेति च ललतचिंता पुनः संप्रदुरीदृश्यो च्यमानविशेषणं कपिं ददर्श वेष्टिते परिहिते अर्जुने

वा॰ सुं॰ टी॰ स॰ ८

२३ वानरस्यानि धीरशोषष्ठीजाता वेकवचनं वानराणांम ध्येऽदंसत्वंजीवः भीमप्रा- कृतप्राणिभ्याव हं मतए वचेहुरासदंदुर्निरीक्ष्यं
चेतिमत्वा पुनरपिमायेवेतिभया न्मुमोह ४ ग्य थभयमोहितासतीभ्ल शोकरुगांविलव्नापविल्नापप्रकारोएमेत्यादि ५ मेंदंस्व
स्वाासतीरुरोद ग्यस दैवागत्यावाक्ते व लेगाध्यक्षोमाजानातिमतिमेदस्वरत्वं ६ विनीतवत्वि[illegible] विनीतत्तया उपस्थितंस्व

सादर्दर्शकपिंतत्र प्रश्रितंप्रियवादिनम् फुल्लाशोकोत्कराभासंतप्तचामीकरेक्षणम् २ सातंदृष्ट्वा
हरिश्रेष्ठं विनीतवदुपस्थितम् मैथिलीचिंतयामासविस्मयंपरमंगता ३ अहोभीममिदंसत्त्वंवा
नरस्यदुरासदम् दुर्निरीक्ष्यमिदंज्ञात्वा पुनरेवमुमोहसा ४ विलप्यापार्त्रशोसीताकरुणं भयमोहिता
हारामेतिदुःखार्ता लक्ष्मणेतिच भामिनी ५ रुरोदसहसासीता मंदंमंदस्वरासती ६ सापश्यद्दृष्ट्वाह
रिश्रेष्ठं विनीतवदुपागतम् मैथिलीचिंतयामासस्वप्नोयमितिभामिनी ७ सावीक्षमाणापृथुभु
ग्नवक्त्रंशाखामृगेंद्रस्यएथोक्तकारम् ददर्शपिंगप्रवरं महार्हं वातात्मजंबुद्धिमतांवरिष्ठम् ८

शः नागवाक्त्यस्वत्रस्तपर्यः ७ स्वप्नत्वचिंतापूर्वकमेवपुनर्दर्शनमुपन्यस्यतिसेति किमिदंवाकरणाद्भसस्यः श्रुतवस्यस्तिपरितो
वीक्ष्यमाणासा पृथुभुग्नंवक्त्रंशहमानत् [illegible] वक्त्रं यस्य तं शाखामृगेंद्रस्य यथोक्तकारमाज्ञाकारं पिंगप्रवरं कपि

सा तं कपिरूपमवलोकितेत्येवसमीक्ष्य भृशं विसंज्ञा चित्तक्षोभाद् तामस्य क्लेत्येव बभूव ९ एवं विचिंतयामासेत्यत्रैवं शशाद्वार्थमाह
स्वप्नो मयेति दृष्टः पुमानौयं स्वप्नो मया विकृतरूपवद् दृष्टः कुतस्तत्रागत्य प्राणावामस गरत्यादि एवं दुःस्वप्नमत्वा स्वस्ति शार्थयते स्व
स्त्स्विति १० स्व यस्वप्ने हे त्वभावान्नायं स्वप्नस्त्याह स्वप्नो हीति स्वप्नस्य निद्रामूलत्वान्निद्राया श्व सरवमूलत्वाद्

सा तं समीक्ष्यैव भृशं विसंज्ञा गता तदा क्लेव बभूव सीता । चिरात्ससंज्ञा प्रतिलभ्य चैव विचिंतयामास
विशालनेत्रा ९ स्वप्नो मयायं विकृतोऽद्य दृष्टः शाखामृगः शास्त्रगणैर्निषिद्धः । स्वस्त्यस्तु रामाय
सलक्ष्मणाय तथा पितुर्मे जनकस्य राज्ञः १० स्वप्नोपि नायं नहि मेस्ति निद्रा शोकेन दुःखेन च पीडि
तायाः । सुखं हि मे नास्ति यतो विहीना तेनेंदुपूर्णप्रतिमाननेन ११ एमेति एमेति सदेव बुद्ध्या वि
चिंत्य वाचा ब्रुवती तमेव । तस्यानुरूपां च कथां तमर्थमेवं प्रपश्यामि तथा शृणोमि १२ अहं हि तस्या
द्य मनोभवेन संपीडिता तद्गतसर्वभावा । विचिंतयंती सततं तमेव तथैव पश्यामि तथा शृणोमि १३

म वियोगेन च मे सुखाभावादिति भावः ११ एमेतिस देवबुद्ध्या विचिंत्य तमेव वाचा ब्रुवती तस्यानुरूपां चिंतनस्य अभिवेदन
स्य च अनुरूपां चिंतनस्य अभिवेदनस्य च अनुरूपां कथां शृणोमि तमर्थं एवं प्रपश्यामि एतद् द्विप्रकारे तौ व जाना
मीत्यर्थः १२ उक्तमेवार्थं विवृणोति अहं हीति १३

त्र्य पमनोरथमात्रमेतदिति संभाव्यतद्पि नेति निश्चिनोति मनोरथ इति मनोरथमित्यर्थः स्यादिति चिंतयामि संजानामि सत्ते
त्याह तथापीति तथैवेत्यर्थः बुद्ध्या निश्चयामि कयापि मनोरथो न भवतीति विचारयामि किं कारणमिति चेत् तस्य म
नोरथस्य रूपं प्रत्यक्षं भवति हि स्वरूपं नास्तीति हि प्रसिद्धं एवं वानरः सुव्यक्तरूपश्च मां वदति तस्मान्मनोरथश्च न संभवती
त्यर्थः १४ अनेनोक्तं सत्यमस्त्विति देवताः प्रार्थयते नमोस्त्विति वाचस्पतये वाचः सत्यत्वसंपादनयोग्याय तच्छिष्याय त्वाष्ट्रजि

मनोरथः स्यादिति चिंतयामि तथापि बुद्ध्यापि वितर्कयामि किं कारणं तस्य हि नास्ति रूपं सु
व्यक्तरूपश्च वदत्ययं माम् १४ नमोस्तु वाचस्पतये सवज्रिणे स्वयंभुवे चैव हुताशनाय
अनेन चोक्तं यदिदं ममाग्रतो वनौकसा तच्च तथास्तु नान्यथा ॥१५॥ इत्यार्षे रामायणे सुंदर
कांडे द्वात्रिंशः सर्गः ॥ ३२ ॥ सोवतीर्य द्रुमात्तस्माद्विद्रुमप्रतिमाननः विनीतवेषः कृपणः प्रणि
पत्योपसृत्य च १ तामब्रवीन्महातेजा हनूमान्मारुतात्मजः शिरस्यंजलिमाधाय सीतां मधुरया
गिरा २ का नु पद्मपलाशाक्षि क्लिष्टकौशेयवासिनि द्रुमस्य शाखामालंब्य तिष्ठसि त्वमनिंदिते ३

तोस्त्वयंभुवे स्वात्मादिरूपब्रह्मणो वागधिष्ठात्रे देवताभ्यश्चाप्येनमः १५ इति द्वात्रिंशः सर्गः ॥ ३२ सोवतीर्येति राक्षसीषु सु
प्तासु अध्यवसरः इत्यर्थः कृपणः सीतादौस्थ्यदर्शनेन दीनः दूरात्प्रणिपत्य ततः उपसृत्य समीपमागत्य १ २ अश्रुक्लिन्नेः सीतेतिनि

कान्वित्यादिश्लोकद्वयार्थस्यैवशंपंचः सुराणामिति सुरादिजातिमध्ये त्वं का किंजातीया ५ देवताप्रतिभासि दिव्यरूपलक्षणा
चत्वादितिभावः कोसौरोहिणीत्याश्रुका सर्वैर्गुणैरधिका अतः श्रेष्ठा ७ हे कल्याणि त्वं का भवसि अनिंदितलोचने त्वं का भ

किमर्थं तव नेत्राभ्यां परिस्रवति वै जलम् पुंडरीकपलाशाभ्यां विप्रकीर्णमिवोदकम् ४ सुराणा
मसुराणां च नागगंधर्वरक्षसाम् यक्षाणां किंनराणां च का त्वं भवसि शोभने ५ का त्वं भवसि रु
द्राणां मरुतां वा वरानने वसूनां वा वरारोहे देवता प्रतिभासि मे ६ किंनु चंद्रमसा हीना पतिता वि
बुधालयात् रोहिणी ज्योतिषां श्रेष्ठा श्रेष्ठा सर्वगुणान्विता ७ का त्वं भवसि कल्याणि त्वम
निंदितलोचने ८ कोपाद्वा यदि वा मोहाद्भर्तारमसितेक्षणे वशिष्ठं कोपयित्वा त्वं वासि कल्या म
णयरुंधती ९ कोनु पुत्रः पिता भ्राता भर्ता वा ते सुमध्यमे अस्माल्लोकादमुं लोकं गतं त्वमनुशोच
सि १०

वसीति वाक्यभेदेन पुनः पृच्छाद्वयोः प्रयोगस्तज्ज्ञानातिशयद्योतनार्थः ८ कोपादित्यादिना वशिष्ठं कोपयित्वा इहागता क
ल्याणयरुंधती किंनु वासि पाती व्रत्याद् अरुंधती त्वशंका ९ अथ शोककारणं पुत्रादिवियोगोन्यदेति पृच्छति कोनु पुत्र
इति यमनुशोचसि सः पुत्रादिः कोन्विति योजना १०

इदानींदेवयोनित्वशंकांत्यमेवनिवर्तयति रोदनादिति स्वश्रुमंवेदोभूस्पर्शश्चदेवानांनास्तीतिश्रुतेःतत् दृष्ट्वात्वांदेवींनमन्ये
किंचराज्ञोरामस्यसंज्ञावधारणान्नामग्रहणादपिदेवींनमन्ये ११ भूमिपालस्यरामस्यमहिषीतिमेमतायतोव्यंजनानि
राममहिषीत्वसूचकानिसामुद्रिकलक्षणानिचलक्षयेरावणेनजनस्थानाद्बलात्प्रमथ्यहृतेतिय

रोदनादतिनिश्वासाद्भूमिसंस्पर्शनादपि नत्वांदेवीमहंमन्येराज्ञःसंज्ञावधारणात् ११ व्यं
जनानिहितेयानिलक्षणानिचलक्षये महिषीभूमिपालस्यराजकन्यासिमेमता १२
रावणेनजनस्थानाद्बलात्प्रमथितायदि सीतात्वमसिभद्रंतेतन्ममाचक्ष्वपृच्छतः १३
यथाहितववैदैन्यंरूपंचाप्रतिमानुषं तपसाचान्वितोवेषस्त्वंराममहिषीध्रुवम् १४ सात
स्यवचनंश्रुत्वारामकीर्तनहर्षिता उवाचवाक्यंवैदेहीहनूमंतंद्रुमाश्रितम् पृथिव्यांराजसिंहा
नांमुख्यस्यविदितात्मनः स्नुषादशरथस्याहंशत्रुसैन्यप्रतापिनः १६ दुहिताजनकस्या
हंवैदेहस्यमहात्मनः सीताचनामनाम्नाहंभार्यारामस्यधीमतः १७

दिसीतात्वंतदात्वंपृच्छतोममा
चक्ष्वतत्त्वंब्रूहितेभद्रमस्तु १२ १३ अनुज्ञेयित्वात्स्वरूपनिश्चयोममास्तीतिप्रोद्याहयथाहीति अपरोक्षानुभवविषय
मित्यर्थः १४ १५ १६ अहंनाम्नासीताइतिनामप्रसिद्धमित्यर्थः १७

१८ समाद्वादशेत्यत्रन्यवसमिति शेषः १९ २० प्रत्यहं यन्मम भोजनं भोज्यं वस्तु तन्नापिवेयं न खादेयमित्यन्वयः २१ वाहुरयु

समा द्वादश तत्राहं राघवस्याभिषेचने भुंजाना मानुषान् भोगान् सर्वकामसमृद्धिनी १८ तत
स्त्रयोदशे वर्षे राज्येनेक्ष्वाकुनंदनं अभिषेचयितुं राजा सोपाध्यायः प्रचक्रमे १९ तस्मिन्
संम्रियमाणेनु राघवस्याभिषेचने कैकेयीनाम भर्तारं देवी वचनमब्रवीत् २० नापिवेयं न खा
देयं प्रत्यहं मम भोजनम् एष मे जीवितस्यांतो रामो यद्यभिषिच्यते २१ यत्तदुक्तं त्वया वा
क्यं प्रीत्या नृपतिसत्तम तच्चेन्न वितथं कार्यं वनं गच्छतु राघवः २२ स राजा सत्यवाक् देव्या
वरदानमनुस्मरन् मुमोह वचनं श्रुत्वा कैकेय्याः क्रूरमप्रियम् २३ ततस्तु स्थविरो राजा सत्यध
र्मे व्यवस्थितः ज्येष्ठं यशस्विनं पुत्रं रुदन् राज्यमयाचत २४ स पितुर्वचनं श्रीमानभिषेका
त्परं प्रियम् मनसा पूर्वमासाद्य वाचा प्रतिगृहीतवान् २५

द्धे वरदानरूपं २२ २३ राज्यमयाचत भरताय दातुमिति शेषः २४ अभिषेकादपि परमधिकं प्रियं यथा भवति तथा मनसापू
र्वमंगीकृत्य वाचा प्रतिगृहीतवान् २५

सीतारामंस्तौतिदद्यादिति २६ समादिशत् बहुप्रकारंरक्षणायनिवेदितवान् २७ तस्याग्रतःप्रस्थितावनचारिणीप्र

दद्यान्नप्रतिगृह्णीयात्सत्यंब्रूयान्नचानृतम् अपिजीवितहेतोर्हिरामःसत्यपराक्रमः २६
सविहायोत्तरीयाणिमहार्हाणिमहायशाः विसृज्यमनसाराज्यंजनन्यैमांसमादिशत् २७
साहंतस्याग्रतःशीघ्रंप्रस्थितावनचारिणी नहिमेतेनहीनायावासःस्वर्गेपिरोचते २८
प्रागेवतुमहाभागःसौमित्रिर्मित्रनंदनः पूर्वजस्यानुयात्रार्थेकुशचीरैरलंकृतः २९ तेव
यंभर्तुरादेशंबहुमान्यदृढव्रताः प्रविष्टाःस्मपुरादृष्टंवनंगंभीरदर्शनम् ३० वसतोदण्डका
रण्येतस्याहममितौजसः रक्षसापहृताभार्यारावणेनदुरात्मना ३१ द्वौमासौतेनमेकालो
जीवितानुग्रहःकृतः ऊर्ध्वंद्वाभ्यांतुमासाभ्यांततस्त्यक्ष्यामिजीवितम् ॥३२॥ हरिः ॐ इत्या
र्षेरामायणेवाल्मीकीयेसुंदरकाण्डेत्रयस्त्रिंशःसर्गः ॥३३॥

भूवमितिशेषः २८ २९ भर्तुरादेशरूपस्यपुरात्प्र
स्थानमितिच्छेदः ३० ३१ जीवितानुग्रहःजीवितधारणानुकूलःकालःकृतःत्यक्ष्यामिस्वयमेवेतिभावः ३२ इतित्रयस्त्रिंशःसर्गः ३३

दुःखात् दुःखाभिभूतायास्तस्यानुगार्थं दुःखपरंपराविच्छिन्नाया इत्यर्थः १ तव समीपमिति शेषः २ ब्राह्ममस्त्रं यो वेद अनेन सर्वास्त्रपारंगतत्वं वेदविदां वर इत्यनेन ज्ञानमार्गपारंगतत्वमुक्तम् ३ ४ प्रीतिसंहृष्टसर्वांगी प्रेमोद्रेकेण पुलकितसर्वगात्री ५ ए

तस्यास्तद्वचनं श्रुत्वा हनूमान्हरियूथपः दुःखाद्दुःखाभिभूतायाः सान्त्वमुत्तरमब्रवीत् १
अहं रामस्य संदेशाद्देवि दूतस्तवागतः वैदेहि कुशली रामस्त्वां च कौशलमब्रवीत् २ यो
ब्राह्ममस्त्रं वेदांश्च वेद वेदविदां वरः स त्वां दाशरथी रामो देवि कौशलमब्रवीत् ३ ल
क्ष्मणश्च महातेजा भर्तुस्तेनुचरः प्रियः कृतवाञ्छोकसंतप्तः शिरसा तेभिवादनम् ४
सा तयोः कुशलं देवी निशाम्य नरसिंहयोः प्रीतिसंहृष्टसर्वांगी हनूमंतमथाब्रवीत् ५ क
ल्याणी बत गाथेयं लौकिकी प्रतिभाति माम् एति जीवंतमानंदो नरं वर्षशतादपि ६ ।

संभावितमपि आमप्रसंगं जीवितधारणेन प्राप्तत्वात्तत्संवादिनी गाथा प्रतिभातीति कल्याणीति जीवितं नरं वर्षशतादपि वर्षशत
मध्ये वा आनंद एतीति ६ इयं लौकिकी गाथा जनवार्तामां प्रति कल्याणी सत्यार्था प्रतिभातीव तेति हर्षे ६ ६ ६ ६ ६

एष वरः ब्रह्मतः स्ववदनप्रवेशरूपः इति उक्तेति शेषः सत्वरा त्वरासहिता सा सुरसा १५२ अहृष्टवदनः दत्तभक्षणवरयापि सकाशान्निस्तारोपायदर्शनान्न हर्षः १५३ १५४ कार्यविषक्तस्य मायामृगवधे प्रसक्तस्य बद्धवैरस्य शूर्पणखाविरूपकर

वर एष पुरा दत्तो मम धात्रेति सत्वरा व्यादाय विपुलं वक्त्रं स्थिता सा मारुतेः पुरः १५२ एवमुक्तः सुरसया प्राञ्जलिः पवनात्मजः अहृष्टवदनः श्रीमानिदं वचनमब्रवीत् १५३ रामो दाशरथिर्नाम प्रविष्टो दण्डकावनम् लक्ष्मणेन सह भ्रात्रा वैदेह्या चापि भार्यया १५४ अन्यकार्यविषक्तस्य बद्धवैरस्य राक्षसैः तस्य सीता हृता भार्या रावणेन यशस्विनी १५५ तस्याः सकाशं दूतोऽहं गमिष्ये रामशासनात् कर्तुमर्हसि रामस्य साह्यं विषयवासिनि १५६ अथवा मैथिलीं दृष्ट्वा रामं चाक्लिष्टकारिणम् आगमिष्यामि ते वक्त्रं सत्यं प्रतिशृणोमि ते १५७ एवमुक्ता हनुमता सुरसा कामरूपिणी अब्रवीन्नातिवर्तेन्मां कश्चिदेष वरो मम १५८

णादिकर्मणेति शेषः १५५ रामस्य साह्यकरणे हेतुः रामस्य विषयवासिनीति त्रैलोक्यनाथत्वाद्रघुनाथस्येति भावः १५६ रामं चेति दृष्ट्वा वक्त्रं ते च किंतव्येति शेषः १५७ कश्चिदपि मां नातिवर्तेत भक्षितो न गच्छेदिति शेषः परंतप

२५८ कि

रा० बा० सु० समागतेतस्मिन्हनूमतिवाक्यात्प्रीत्यादिवंदंता अद्भुता अचिंत्यस्वरूपा प्रीतिरुत्पादिता अत एव तौ विश्वस्तौ भूत्वा परस्परेणालापं
१२० चक्रतुः समीपमुपचक्रमे गंतुमिति शेषः ८ परिशंकितेपरिशंकितेसति ९ एनं कुशलकथनेन संजातविश्वासापि एवमाया

तयोः समागतेतस्मिन्प्रीतिरुत्पादिताद्भुता परस्परेणचालापं विश्वस्तौ तौ प्रचक्रतुः ७
तस्यास्तद्वचनंश्रुत्वा हनूमान्मारुतात्मजः सीतायाः शोकदीनायाः समीपमुपचक्रमे ८
यथायथा समीपं स हनूमानुपसर्पति तथातथा रावणं सा तं सीता परिशंकते ९ अ
होधिक्कृतमिदं कथितं हि यदस्य मे रूपांतरमुपागम्य स एवायं हि रावणः १० ता
मशोकस्य शाखां सा विमुक्ता शोककर्शिता तस्यामेवानवद्यांगी धरण्यां समुपाविशत्
११

वाहुः न्यंसम् त्वा पुनरविश्वसंत्याह अहो इति मे श्रम्यपुरतः यत्कथितं कथनं कृतं दुष्कृतं अनुचितं कृतं इदमनालोच्य कथनं धि
क् अहो इति खेदहेतुमाह रूपांतरमिति यः पूर्वं मायया मामपाहरत् स एवायं रावणः रूपांतरमुपागतः वर्तते इति शेषः १०

रा० म०
१२०

तां धरण्यामुपविष्टोऽश्वं वंदनं नमस्कृतवान् १२ एनं दृष्ट्वा भयत्रस्ता भूयः पुनरेनेनतापं प्राप्तं १३ भूतः संतापप्रदुःखाद् यासि तन्न शोभनं १४ त वैवं रूपकरणामपि सुकरमेवेत्याह स्वयं परित्यज्येति १५ १६ एवं वाणदैत्यम्याह नूमंतेण वणमाशंक्यत दृशनजनितमात्मनो मनः

हनूमानपि दुःखार्तां दृष्ट्वा भयविमोहिताम् अवंदत महाबाहुस्ततस्तां जनकात्मजाम् १२ सा चैवं भयसंत्रस्ता भूयो नैनमुदैक्षत तं दृष्ट्वा वंदमानं च सीता शशिनिभानना अब्रवीद्दीर्घमुच्छ्वस्य वानरं मधुरस्वरा २३ मायां प्रविष्टो मायावी यदि त्वं रावणः स्वयम् उत्पादयसि मे भूयः संतापं तन्न शोभनम् १४ स्वं परित्यज्य रूपं यः परिव्राजकरूपवान् जनस्थाने मया दृष्टस्त्वं स एवासि रावणः १५ उपवासकृशां दीनां कामरूप निशाचर संतापयसि मां भूयः संतापं नन्तु शोभनम् १६ अथवा नैतदेवं हि यन्मया परिशंकितम् मनसो हि मम प्रीतिरुत्पन्ना तव दर्शनात् १७

प्रसादमात्मनोच्यतां शंकां निराचष्टे अथवेति यन्मया परिशंकितं रावणत्वमेतदेवं न यतस्तव दर्शनान्मम मनसः प्रीतिरुत्पन्ना रावणाद्धि सा नोत्पद्यतेति भावः १७

तत्वमपि राम दूतत्वनिश्चयः कथं स्यादिति चेत्तत्राह यदीति पृच्छामीति रामकथामिति शेषः तु देवाह रामकथा हीति १८ चित्तं हरसि चित्तं शिथिलयसि विश्वासहेतुसंपादनादिति भावः रयो नदीवेगः १९ राम दूतदर्शनेन दत्तदारुणमनस्तापत्रासंभावितत्वात् प्राये णायं स्वप्नोऽप्यापि मे अहो स्वप्नस्य सुखता याहमेवं चिराहृता प्रेषितं नाम पश्यामि राघवेण वनौकसम् २० स्व

यदि रामस्य दूतस्त्वमागतो भद्रमस्तु ते पृच्छामि त्वां हरिश्रेष्ठ प्रिया रामकथा हि मे १८ गुणान् रामस्य कथय प्रियस्य मम वानर चित्तं हरसि मे सौम्य नदीकूलं यथा रयः १९ अहो स्वप्नस्य सुखता याहमेवं चिराहृता प्रेषितं नाम पश्यामि राघवेण वनौकसम् २० स्वप्नेऽपि यद्यहं वीरं राघवं सहलक्ष्मणम् पश्येयं नावसीदेयं स्वप्नोऽपि मम मत्सरी २१ नाहं स्वप्नमिमं मन्ये स्वप्ने दृष्ट्वा हि वानरम् न शक्योऽभ्युदयः प्राप्तुं प्राप्तश्चाभ्युदयो मम २२ सीतारामाभ्यां नमः सीता

प्नेऽपि तन्यामामपि दर्शनं स्यादित्याशयः २० नावसीदेयं नैवं दुःखिता स्यां मत्सरी मत्सरेण मत्समीपसोपि नायातीति भावः २१ स्वप्नत्वमस्वप्ने त्याह नाहं स्वप्नमिति प्राप्तश्चाभ्युदय इति तथा मनः संतोषाद याद्याप्न प्राप्तम इत्यर्थः तस्मान्न स्वप्नः २२

एवं यथार्थत्वप्रपञ्चौ निरस्य पुनस्तत्तुरो विभ्रमपक्षान्तुत्प्रेक्षते किंस्विदित्यादि चित्तमोहो निरन्तररामध्यानजनित तत्प्रेषित
दूतदर्शनसंभावनात्मिकाविषयो भ्रमः वातगतिस्तु उपवासादिप्रयुक्तधातुक्षोभजातविकाररूपो भ्रमः उन्मादो ना
म विरहितानां कश्चिदवस्थाविशेषः मृगतृष्णिका सर्गे विप्रतिपत्तिरितराधारतो देशकालविप्रकर्षजन्यभ्रमः इति बो
भ्रमसूत्सर्गः २३ वाधव्यहित्यनभ्रमचतुष्टयमपि निरस्यति अथवेति अर्थवानरतत्संदर्शनादिप्रतिभासः उ

किंनु स्याच्चित्तमोहोऽयं भवेद्वातगतिस्त्वियम् उन्मादजो विकारो वा स्यादियं मृगतृष्णिका २
२३ अथवा नायमुन्मादो मोहोऽप्युन्मादलक्षणः संबुध्ये चाहमात्मानमिमं चापि वनौक
सम् २४

न्मादो न भवति मोहोऽप्युन्मादलक्षणः उन्मादस्य लक्षणानि वलक्षणानि यस्य सः एवं चोन्मादनिराकरणेनैव मो
होऽपि निराकृतः उन्मादमोहयोर्निराकरणे चित्तमोहमृगतृष्णिकयोर्निराकरणं कृतमिति द्रष्टव्यं सर्वपक्षा
उन्मादप्राप्ता एवम्मत्वा विशेषादिति भावः कुतः अतः आह संबुध्ये इति यतोऽहमात्मानमिमं वनौकसं चापि संबु
ध्ये सम्यग्जानामि निर्बाधं जानामीत्यर्थः २४

बलाबलं बलाबलं रक्षसां कामरूपधारणबलम् अबलं एम दूतस्यापि वानरस्यात्रागमनात् सामर्थ्यं संप्रधार्येत्यर्थः २५ २६ निश्चितं एवमात्मनिश्चयं श्रोत्रानुकूलैर्वचनैः गुणकथनरूपैः संप्रहर्षयन् वक्ष्यमाणं वचः कथयामासेति शेषः

इत्येवं बहुधा सीतां संप्रधार्य बलाबलम् रक्षसां कामरूपत्वान्मेने तं राक्षसाधिपम् २५
एतां बुद्धिं तदा कृत्वा सीता सा तनुमध्यमा न प्रतिव्याजहाराथ वानरं जनकात्मजा २६
सीतायां निश्चितं बुध्वा हनूमान्मारुतात्मजः श्रोत्रानुकूलैर्वचनैस्तदा तां संप्रहर्षयन्
२७ आदित्य इव तेजस्वी लोककांतः शशी यथा राजा सर्वस्य लोकस्य देवो वैश्रवणो य
था २८ विक्रमेणोदितः श्रीमान्यथा विष्णुर्महायशाः सत्यवादी मधुरवाक् देवो वाच
स्पतिर्यथा २९ रूपवान्सुभगः श्रीमान्कंदर्प इव मूर्तिमान् स्थानक्रोधे प्रहर्ता च श्रेष्ठो लो

[illegible]

२७ राजा धनधान्यादिप्रदानेन सर्वलोकस्य रंजकः २८ सत्यमधुरवाक् त्वं बृहस्पतेर्वाचस्पतित्वादेव २९ रूपवान् सौंदर्यवान् सुभगो रमणीयः श्रीमान् कांतिमान् स्थानक्रोधे उचितक्रोधविषये क्रोधौचित्यप्रहर्तेति यावत् ३० ३० ३०

यस्यवाहुच्छायामवष्टभ्य आश्रितोलोकस्तेनराघवेणमृगरूपेणाश्रमपदादपकृष्यमृन्येयेनरावणेनापनीतासितस्यराव

वाहुच्छायामवष्टब्धोयस्यलोकोमहात्मनः ऋश्यमूकाश्रमपदान्मृगरूपेणराघवम् मृ
न्येयेनापनीतासितस्यद्रक्ष्यसियत्फलम् ३१ अचिराद्रावणंतंत्वंयोवधिष्यतिवीर्यवान्
एषप्रमुक्तैरिषुभिर्ज्वलद्भिरिवपावकैः ३२ तेनाहंप्रेषितोदूतस्त्वत्सकाशमिहागतः त्वद्वियोग
नदुःखार्तःसत्वांकोशलमब्रवीत् ३३ लक्ष्मणश्चमहातेजाःसुमित्रानंदवर्द्धनः अभि
वाद्यमहावाहुःसत्वांकोशलमब्रवीत् ३४ रामस्यचसखादेविसुग्रीवोनामवानरः राजावा
नरमुख्यानांसत्वांकौशलमब्रवीत् ३५ नित्यंस्मरतितेरामःससुग्रीवःसलक्ष्मणः दिष्ट्याजी
वसिवैदेहिराक्षसीवशमागता ३६ नचिराद्द्रक्ष्यसेरामंलक्ष्मणंचमहारथम् मध्येवानरको
टीनांसुग्रीवममितौजसम् ३७ अहंसुग्रीवसचिवोहनूमान्नामवानरः प्रविष्टोनगरींलंकां

णस्ययत्फलंमरणरूपंतद्द्रक्ष्यसीत्यन्वयः ३१ तदेवाह अचिरादिति योवधिष्यतितेनेत्यर्थः ३२ ३३ ३४ ३५ ३६

रा० वा० सुं० ३९ यथामामवगच्छसिमायावीरावणाइतिन तथाहमस्मि ॥ ४० ॥ इतिचतुस्त्रिंशः सर्गः ॥ ३४ ॥ नोल्लिंगिरावादित्यपरवन्नेजस्वीत्यादि
१२३ १ २ यानिलिंगानितानिचिन्हानितानिभूषोधिकं विशिष्यसमाच ध्वयेनमाप्रोकोनसमाविशेत् ॥ ३ ॥ संस्थानमवः पवसा

कृत्वामूर्ध्निपदन्यासंरावणास्यदुरात्मनः ॥ त्वांद्रष्टुमुपयातोहंसमाश्रित्यपराक्रमम् ॥ ३९ ॥ नाहमस्मि
तथादेवि यथामामवगच्छसि ॥ विशंकात्यज्यतामेषा श्रद्धत्स्ववदतो मम ॥ ४० ॥ इत्यार्षे श्री
रामायणे वाल्मीकीयेसुंदरकांडे चतुस्त्रिंशःसर्गः ॥ ३४ ॥ तांतुरामकथांश्रुत्वा वैदेहीवानर
र्षभात् उवाचवचनंसांत्वमिदंमधुरयागिरा १ क्वतेरामेणसंसर्गः कथंजानासिलक्ष्मणम् वानराणांनराणांच कथमासीत्समागमः २ यानिरामस्यलिंगानिलक्ष्मणस्य
चवानर तानिभूयस्समाचक्ष्वनमांशोकःसमाविशेत् ३ कीदृशंतस्यसंस्थानंरूपंतस्यच
कीदृशम् कथमूरूकथंबाहूलक्ष्मणस्यचशंसमे ४ एवमुक्तस्तुवैदेह्याहनूमान्मारुतात्म
जः ततोरामंयथातत्वमारख्यातुमुपचक्रमे ५ जानंतीवतादिष्ट्यामांवैदेहिपरिपृच्छसि भर्तुः

कमलपत्राक्षि संस्थानं लक्ष्मणस्य च ६

वर्णसंस्थानं पृच्छसि तिलकं पदः ६

लिंगानि रूपमाकारो चरीषि ४ ५ वतेत्यामंत्रणोमांराम दूतइतिजानतीदिष्ट्यामममभाग्यवशेनभर्तुर्भगवतोरामस्यलक्ष्मणस्य रा० म०
१२३

लक्षितानिलव्ययादृष्टानित्तानिवदतोममतः शृणु ७ रामोरमणीयसर्वांगः कमलपत्राक्षः कांतिप्रवाहे प्रावर्तर्वा संतमसः कर्षकनयनशो
भः रूपदाक्षिण्यसंपन्नः प्रसूतरतिजन्मनासहैवोत्कावध्यमाणा जातारत्यपिः ८ सैन्येहे गोत्क्रान्तगुरगान्लिव गोतितेजसेसादितो ९ १०।११

यानिरामस्यचिन्हानिलक्ष्मणस्यचयानिवै लक्षितानिविशालाक्षिवदतःशृणुतानिमे ७ रा
मःकमलपत्राक्षःपूर्णचंद्रनिभाननः रूपदाक्षिण्यसंपन्नःप्रसूतोजनकात्मजे ८ तेजसा
दित्यसंकाशःक्षमयापृथिवीसमः बृहस्पतिसमोबुद्ध्यायशसावासवोपमः ९ रक्षिताजी
वलोकस्यस्वजनस्यचरक्षिता रक्षितास्वस्यवृत्तस्यधर्मस्यचपरंतपः १० रामोभामिनिलो
कस्यचातुर्वर्ण्यस्यरक्षिता मर्यादानांचलोकस्यकर्ताकारयिताचसः ११ अर्चिष्मानर्चि
तोत्यर्थंब्रह्मचर्यव्रतेस्थितः साधूनामुपकारज्ञःप्रचारज्ञश्चकर्मणाम् १२ राजनीत्यांविनी
तश्चब्राह्मणानामुपासिता ज्ञानवाञ्छीलसंपन्नोविनीतश्चपरंतपः १३ सीतारामः ः

अर्चितः सत्सद्भिरितिशेषः ब्रह्मचर्यव्रतेस्थितः गृहस्थस्यास्य ब्रह्मचर्यंनाम ऋतोरन्यत्र स्त्रीसंगमत्यागः तदाहमनुः षोडशर्तुनिशाः स्त्रीणां
तासुयुग्मासुसंविशेत् ब्रह्मचर्यंचपर्वाण्याद्याश्चतस्रश्चवर्जयेदिति वस्तुतस्तुगार्हस्थ्येप्यस्खलितरेताः मनःसंकल्पेनैवदेव्या
रतिप्रीतिःसंतानस्यचसंपादनमितिभावः साधूनामुपकारज्ञः उपकर्तव्यकालज्ञः कर्मणामैहिकामुष्मिकाणांप्रचारज्ञः प्रयोगज्ञः १२ ब्रह्म

रामायण बालकांडे १३

यजुर्वेदविनीतश्चेत्यादेत्येषामपि संग्रहः विनीतो निरतः १४ एवमात्मगुणानभिधायेदानीं विग्रहगुणानाह विपुलांस इत्यादिना गूढज
त्रुरंसवक्षसंधिः १५ समः अन्यूनानतिरिक्तदेहप्रमाणः १६ त्रिस्थिरः त्रिषु स्थानेषु स्थितः उरश्च मणिबंधश्च मुष्टिश्चेत्यन्ये प
तेः स्थिरा इत्युक्तेः त्रिप्रलंबः त्रिषु प्रलंबो वा सम्यग् घनी त्रयो भ्रू मुष्क बाहव इति सामुद्रिकोक्तेः मुष्कं च पाणिः त्रिसमः त्रिषु समः

यजुर्वेदविनीतश्च वेदविद्भिः सुपूजितः धनुर्वेदे च वेदे च वेदांगेषु च निष्ठितः १४ विपुलांसो महाबाहुः कंबुग्रीवः शुभाननः गूढजत्रुः सुताम्राक्षो रामो नाम जनैः श्रुतः १५ दुंदुभिस्वननिर्घोषः स्निग्धवर्णः प्रतापवान् समः समविभक्तांगो वर्णं श्यामं समाश्रितः १६ त्रिस्थिरस्त्रिप्रलंबश्च त्रिसमस्त्रिषु चोन्नतः त्रिताम्रस्त्रिषु च स्निग्धो गंभीरस्त्रिषु नित्यशः १७ १७ १७

समश्च अवयवस्पर्धः तदुक्तं केशाग्रं च वर्णाजानु समं यस्य भूपतिरिति त्रिषु चोन्नतः तदुक्तं नाभ्यंतः कुक्षिवक्षोभिरुन्नतैः
क्षितियो भवेदिति त्रिताम्रः त्रिषु ताम्रः नेत्रांतनखपाण्यंघ्रितलैस्ताम्रैस्त्रिभिः सुखी त्रिषु स्निग्धः स्निग्धा भवंति वै येषां पादरे
खाः शिरोरुहाः तथा लिंगमणिस्तेषां महाभाग्यं विनिर्दिशेत् त्रिषु गंभीरः स्वरे गतौ च नाभौ च गंभीरः स च प्रशस्यते १७

त्रिवलीवान् उदरे कंठे अथवा त्रिवलित्रयवान् शुभ्राङ्गाः स्निग्धत्रिरेखा सम्भोगोपपन्ना स्निग्धा सुमांसोपचिता सुवृत्ता नातिदीर्घा चतुरंगुला
चग्नीवा च दीर्घा भवतीह धन्य इति त्रिषु श्यवनतः त्रीण्यवनतानि निम्नानि यस्य सः तच्च निमग्नपादतलमध्यत्वं निमग्नपादरेखात्वं निम
ग्नस्तनचूचुकत्वं च चतुर्व्यंगा निह्रस्वानि यस्य सः ग्रीवाप्रजननं पृष्ठ ह्रस्वं जंघे [illegible] च पूजिते त्रिशीर्षवान् शुभावर्तत्रययुक्तशीर्षः अथवा

त्रिवली वो ऽत्र्यवनत श्चतुर्व्यंगस्त्रिशीर्षवान् चतुष्कल
श्चतुर्लेख श्चतुष्किष्कु श्चतुः समः १८ १८ १८ १८ १८

वर्त्तत्रययुक्तः यस्य शिरः क्षितिभृत्तामयेनाप्यः चतुष्कलः चत्वारः कलाः चतुर्वेदप्राप्तिसूचकाः गुच्छमूलरेखायुक्तः ललाटे यस्य तत्तां चत
स्रो तिस्र एव वा एका द्वे वा य[illegible]थायोगं वेदरेखा द्विजन्मनो चतुर्लेखः ललाटे चतुरेखायुक्तः ललाटे यस्य दृश्यन्ते चतुष्किष्कुः कररेख
काः प्रान्तद्वये प्रान्तं षष्टिः तस्यायुर्विंशतिः क्रमात् चतुष्किष्कुः चत्वारः किष्कवो यस्य सः किष्कुश्चतुर्विंशत्यंगुलात्मको हस्तः चतुर्हस्ता
प्रमाणाः बसत्वत्यंगुलोत्सेधो यः पुमान् स दिवौकसः इति चतुः समः बाहुजानूरुगण्डानि चत्वार्यर्थ समानि चेति १८ १८ सीताराम सीता

तं प्रयान्तं पुनरागच्छामीत्युक्त्वा वरदानेन श्रुत्वापि प्रयाणोन्मुखं समुद्वीक्ष्य तस्य हनूमतो बलं जिज्ञासमाना सुरसा वाक्यमब्रवी

तं प्रयान्तं समुद्वीक्ष्य सुरसा वाक्यमब्रवीत् बलं जिज्ञासमाना सा नागमाता हनूमतः १५९
प्रविश्य वदनं मेऽद्य गन्तव्यं वानरोत्तम वर एष पुरा दत्तो मम धात्रेति सत्वरा व्यादाय विपुलं
वक्त्रं स्थिता सा मारुतेः पुरः १६० एवमुक्तः सुरसया क्रुद्धो वानरपुंगवः अब्रवीत् कुरु वै वक्त्रं
येन मां विषहिष्यसि १६१ इत्युक्त्वा सुरसां क्रुद्धो दशयोजनमायताम् दशयोजनविस्ता
रो हनूमानभवत्तदा १६२ तं दृष्ट्वा मेघसंकाशं दशयोजनमायतम् चकार सुरसा चास्यं
विंशद्योजनमायतम् १६३ हनूमांस्तु ततः क्रुद्धस्त्रिंशद्योजनमायतः चकार सुरसा वक्त्रं
चत्वारिंशत्तथोच्छ्रितम् १६४ बभूव हनुमान्वीरः पंचाशद्योजनोच्छ्रितः चकार सुरसा वक्त्रं
षष्टियोजनमुच्छ्रितम् १६५ तदैव हनुमान्वीरः सप्ततियोजनोच्छ्रितः चकार सुरसा वक्त्रमशी
तियोजनोच्छ्रितम् १६६

तं १५९ मे वदनं प्रविश्यैव गन्तव्यं यदि शक्तिरस्तीत्यब्रवीदित्यन्वयः १६० १६१ दशयोजन
मायतां व्याप्यायत वक्त्रामित्यर्थः १६२ १६३ १६४ १६५ १६६

रा० वा० सुं०
१२५।

चतुर्दशसमद्वन्द्वः समपरिमाणचतुर्दशाङ्गद्वन्द्वयुक्तः भ्रुवौ नासापुटे नेत्रे कर्णावोष्ठौ च चूचुकौ कूर्परौ मणिबन्धौ च जानुनी वृषणौ कटी करौ पादौ स्फिजौ यस्य समौ ज्ञेयः स भूपतिरिति चतुर्दंष्ट्रः दन्तपङ्क्तिद्वये प्रति पार्श्वं च तस्य चत्वारो दंष्ट्रा दन्तविशेषा यस्य सः शिखरिणः स्निग्धा घनाश्च दशनाः सुतीक्ष्णदंष्ट्राः समाश्च तस्य च इति चतुर्गतिः चतुर्णां गजसिंहशार्दूलवृषाणां गतिरिव गतिर्यस्य सः महोष्ठहनुनासश्च महत्त्वशालिओष्ठहनुनासं यस्य सः तत्रोष्ठस्य प्राशस्त्यं बंधुजीवकुसु

चतुर्दशसमद्वन्द्वश्चतुर्दंष्ट्रश्चतुर्गतिः महोष्ठहनुनासश्च पंचस्निग्धोऽष्टवंशवान् १९

का

मबिंबफलादिवद्रक्तत्वेन निर्मांसत्वं हनोस्तु पूर्णमांसत्वोन्नतत्वं नासिकायास्तु दीर्घोन्नतरुचिरपुटत्वेन दृढत्वं बंधुजीवकुसुमोपमावोष्ठौ मांसलौ रुचिरबिंबवत् हनुः पक्वपूर्णमांसला हनुस्तु भूमिपस्तुंगतुंडरुचिराकृतिस्तथेति तुंडमिति नासिकोच्यते पंचस्निग्धः पंचवाग्वक्त्रनखलोमत्वेच स्निग्धं यस्य सः अष्टवंशवान् प्रशस्ताष्टवंशाख्यावयववान् वंशशब्देन दैर्घ्यं विवक्षितं बाहू चरणौ नलकावूरू जंघे चेत्यष्टवंशकाः नलकौ वंगुल्यौ १९

रा०म०
१२५

दशपद्मः मुखनेत्रास्यजिह्वोष्ठतालुस्तननखकरौ पादौ च दशपद्माकाराणि यस्य चेति व्याससमोष्ठमध्ये दशबृहत् तानि
त उरःशिरोललाटं च ग्रीवा बाहू हृदयं तथा नाभयः पादौ पृष्ठं श्रुती चैव विशालतास्तस्य दश इति त्रिभिः श्रीयशस्तेजोभिर्व्याप्तो व्याप्तः
द्विशुक्लवान् द्वौ शुक्लौ मातृपितृवंशौ यस्य सः द्वौ शुक्लौ तु शुभौ शुद्धौ वंशौ मातुः पितुस्तथेति षडुन्नतः तानि च कक्षः
कुक्षिस्थवक्षस्थघ्राणस्कंधललाटिकाः सर्वभूतेषु निर्दिष्टा उन्नतास्तु सुखेषु दश इति पूर्वं श्रुवृत्तात्रिस्निग्धत्वमुक्तं स्वल्पं च

दशपद्यो दशबृहत्त्रिभिर्व्याप्तो द्विशुक्लवान् षडुन्नतो नवतनुस्त्रिभिर्व्याप्नोति राघवः २० स
सधर्मरतः श्रीमान्संग्रहानुग्रहे रतः देशकालविभागज्ञः सर्वलोकप्रियंवदः २१ २१२

त्रिस्निग्धत्वषडुन्नतत्वं चोभयमपि मतभेदादविरुद्धं मतभेदाश्रयणं च रामस्य सकलशास्त्रोक्तमहापुरुषलक्षणपरिपूर्तित्वद्यो
तनायेत्यवगन्तुं नवतनुः नवसु स्थलेषु सूक्ष्मः सूक्ष्माण्यंगुलिपर्वाणि केशरोमनखत्वचः शेफः श्वयेषाम् सूक्ष्माणि तेन नरा दीर्घजी
विन इति षट्सु दर्शनसूक्ष्मत्वं सूक्ष्मदृष्टित्वं सूक्ष्मबुद्धित्वं चेति तेन वा त्रिभिर्व्याप्नोति त्रिभिः पूर्वाह्णापराह्णमध्याह्नकालैः ध
र्मार्थकामान्व्याप्नोत्यनुतिष्ठतीति त्रिभिर्व्याप्नोति तदुक्तं शास्त्रे धर्मार्थकामाः काले तु त्रिषु यस्य स्वनुष्ठिता इति २० संग्र
हानुग्रहे रतः संग्रहो धनवत्तानां अनुग्रहस्ताभ्यां प्रजारक्षणं तदुभयनिष्ठः २१

रा० वा० सुं० वैदेही मात्रः सममात्रपेक्षया द्वितीयमातादिमातात्तस्याश्च पुत्र इत्यर्थः २२ अस्माभिः सुग्रीवमन्त्रिभिरित्यर्थः २३ उत्क्रमेण विवरणमाह त्वामेवे
१२६ ति मृगपतिं शाखामृगपतिं सुग्रीवं ०पूर्वजेन वालिना अवरोपितं राज्याद्भ्रंशिते २४ २५ परिचर्यामहे तं दुःखपनावार्थं परिचराम इ

का

भ्राता चास्य च वैदेही मात्रः सौमित्रिरपराजितः अनुरागेण गुणैश्चैव तथाविधः २२ तावुभौ नरशार्दूलौ त्वद्दर्शनसमुत्सुकौ विचिन्वन्तौ महीं कृत्स्नामस्माभिः सह संगतौ २३ त्वामेव मार्गमाणौ तौ विचरन्तौ वसुंधराम् ददर्शतुर्मृगपतिं पूर्वजेनावरोपितम् २४ ऋष्यमूकस्य पृष्ठे तु बहुपादपसंकुले भ्रातुर्भयार्तमासीनं सुग्रीवं प्रियदर्शनम् २५ वयं तु हरिराजानं सुग्रीवं सत्यसंगरम् परिचर्यामहे राज्यात्पूर्वजेनावरोपितम् २६ ततस्तौ चीरवसनौ धनुःप्रवरपाणिनौ ऋष्यमूकस्य शैलस्य रम्यं देशमुपागतौ २७ स तौ दृष्ट्वा नरव्याघ्रौ धनुःप्रवरपाणिनौ अभिप्लुतो गिरेस्तस्य शिखरं भयमोहितः २८ ततः स शिखरे तस्मिन् वानरेन्द्रो व्यवस्थितः तयोः समीपं मामेव प्रेषयामास सत्वरम् २९ तावहं पुरुषव्याघ्रौ सुग्रीववचनात्प्रभू रूपलक्षणसंपन्नौ कृताञ्जलिरुपस्थितः ३०

त्यर्थः राज्यादवरोपितं राज्येन हीनं कृतं २६ पाणिनौ पाणी इत्यर्थः उत्तमार्थं २७ अभिप्लुतः उत्प्लुत्यारूढः २८ २९ ३० रा०म०
१२६

मयापरिज्ञाततत्वार्थौ मयाविज्ञाताशेषवृत्तांतौ ३१ ३२ पूर्ववृत्तया स्वीयवृत्तांतगोचरया ३३ स्त्रीहेतोः सुग्रीवस्त्रीपरिग्रहार्थं

तौपरिज्ञाततत्वार्थौमयाप्रीतिसमन्वितौ पृष्ठमारोप्यतंदेशंप्रापितौपुरुषर्षभौ ३१ निवेदितौ
चतत्वेनसुग्रीवायमहात्मने तयोरन्योन्यसंभाषाद्भृशंप्रीतिरजायत ३२ ततस्तौकीर्तिसं
पन्नौहरीश्वरनरेश्वरौ परस्परकृताश्वासौकथयापूर्ववृत्तया ३३ तंततःसांत्वयामास
सुग्रीवंलक्ष्मणाग्रजः स्त्रीहेतोर्वालिनाभ्रात्रानिरस्तमुरुतेजसा ३४ ततस्त्वन्नाशजंशोकं
रामस्याक्लिष्टकर्मणः लक्ष्मणोवानरेंद्रायसुग्रीवायन्यवेदयत् ३५ तच्छ्रुत्वावानरेंद्रस्तुल
क्ष्मणेनेरितंवचः तदासीन्निष्प्रभोत्यर्थंग्रहग्रस्तइवांशुमान् ३६ ततस्त्वद्गात्रशोभीनिरक्ष
साह्रियमाणया यान्याभरणजालानिपातितानिमहीतले ३७ तानिसर्वाणिरामायआनीयह
रियूथपाः संहृष्टादर्शयामासुर्गतिंतुनविदुस्तव ३८ उरुमहत्तेजोयस्यतेन ३५ त्वन्नाशजं त्वदपहारजं ३५ नि

ष्प्रभः खिन्नचित्तः ३६ त्वद्गात्रे शोभायतुं शीलं येषां तानि ३७ दर्शयामासुः सुग्रीवायेति शेषः ३८

मयैवोपहृतानि च पूर्वं यतनकाले इति शेषः । स्रवकीर्णानि भूमौ पातनात् किंचिद्विशीर्णानि ३९ तदा दर्शनीयानि तानि बहुविधमंके कृत्वा देवप्रकाशेन देवाधिदेवेन देवेन त्वया क्रीडानिमित्तं परिदेवितं बहुविलपितं ४० तान्याभरणानि शोकहुता

तानि राम प्रदत्तानि मयैवोपहृतानि च स्वनवंत्यवकीर्णानि तस्मिन्विहतचेतसि ३९ तान्यंके दर्शनीयानि कृत्वा बहुविधं तदा तेन देवप्रकाशेन देवेन परिदेवितम् ४० पश्यतस्तानि रुदतस्ताम्यतश्च पुनः पुनः प्रादीपयन्दाशरथेस्तानि शोकहुताशनम् ४१ शायितं च चिरं तेन दुःखार्तेन महात्मना मयापि विविधैर्वाक्यैः कृच्छ्रादुत्थापितः पुनः ४२ तानि दृष्ट्वा महार्हाणि दर्शयित्वा मुहुर्मुहुः राघवः सहसौमित्रिः सुग्रीवे संन्यवेशयत् ४३ स तवादर्शनादार्ये राघवः परितप्यते महता ज्वलता नित्यमग्निनेव पर्वतः ४४ त्वत्कृते तमनिद्रा च शोकश्चिंता च राघवम् तापयंति महात्मानमग्न्यगारमिवाग्नयः ४५

शनं प्रादीपयन्निति संबंधः ४१ शायितं शोका द्भूमौ पतितं ४२ सुग्रीवे संन्यवेशयत सुग्रीवहस्ते न्यस्तवानित्यर्थः ४३ अग्निपर्वतः अग्न्यावास पर्वतः ४४ ४५

तवादर्शनशोकेन राघवश्च विचाल्यते महता भूमिकंपेन महानिव शिलोच्चयः ४६ काननानि सुर
म्याणि नदीः प्रस्रवणानि च चरन्न रतिमाप्नोति त्वामपश्यन्नृपात्मजे ४७ स त्वां मनुजशार्दूलः क्षि
प्रं प्राप्स्यति राघवः समित्रबांधवं हत्वा रावणं जनकात्मजे ४८ सहितौ रामसुग्रीवावुभावकुरु
तां तदा समयं वालिनं हंतुं तव चान्वेषणं तथा ४९ ततस्ताभ्यां कुमाराभ्यां वीराभ्यां स हरीश्वरः
किष्किंधां समुपागम्य वाली युधि निपातितः ५० ततो निहत्य तरसा रामो वालिनमाहवे सर्वेषां
हरिसंघानां सुग्रीवमकरोत्पतिम् ५१ रामसुग्रीवयोरैक्यं देव्येवं समजायत हनूमंतं च मां विद्धि
तयोर्दूतमुपागतम् ५२ स्वराज्यं प्राप्य सुग्रीवः समानीय महाकपीन् त्वदर्थं प्रेषयामास दिशो
दश महाबलान् ५३ आदिष्टा वानरेंद्रेण हरयश्च महौजसः अद्रिराजप्रतीकाशाः सर्वतः प्र
स्थिता महीम् ५४ ततस्ते मार्गमाणा वै सुग्रीववचनातुराः चरंति वसुधां कृत्स्नां वयमन्ये च वानराः ५५

४६ ४७ ४८ सहितौ सख्यं शाश्वतमयं प्रतिश्रुतौ ४९ ५० ५१ ५२ ५३ ५४ सुग्रीववचनातुराः सुग्रीवात्सभीताः ५५ ५ ५५

त्रिभागबलसंवृतः सेनायास्त्रिभागेन परिवृत इत्यर्थः ५६ विंध्ये विप्रनष्टानां विलमध्येऽदर्शनेन नष्टानां गता इति सम्प्राप्ता इति शेषः ५७ कालस्य सुग्रीवकल्पितमासरूपकालस्य कपिराजस्य कपिराजात् ५८ ५९ अत्रस्थितियोग्यतानां दृष्ट्वा

अंगदो नाम लक्ष्मीवान्वालिसूनुर्महाबलः प्रस्थितः कपिशार्दूलस्त्रिभागबलसंवृतः ५६ तेषां नो विप्रनष्टानां विंध्ये पर्वतसत्तमे भृशं शोकपरीतानामहोरात्रगणा गताः ५७ ते वयं कार्यनैराश्यात्कालस्यातिक्रमेण च भयाच्च कपिराजस्य प्राणांस्त्यक्तुं व्यवस्थिताः ५८ विचित्य गिरिदुर्गाणि नदीप्रस्रवणानि च अनासाद्य पदं देव्याः प्राणांस्त्यक्तुं व्यवस्थिताः ५९ दृष्ट्वा प्रायोपविष्टांश्च सर्वान्वानरपुंगवान् भृशं शोकार्णवे मग्नः पर्यदेवयदंगदः ६० तव नाशं च वैदेहि वालिनश्च तथा वधम् प्रायोपवेशमस्माकं मरणं च जटायुषः ६१ तेषां नः स्वामिसंदेशान्निराशानां मुमूर्षताम् कार्यहेतोरिहायातः शकुनिर्वीर्यवान्महान् ६२ गृध्रराजस्य सोदर्यः सम्पातिर्नाम नामतः श्रुत्वा भ्रातृवधं कोपादिदं वचनमब्रवीत् ६३

पर्यदेवयदिति संबंधः ६० ६१ निराशानां त्वत्प्राप्त्याशारहितानां स्वामिसंदेशात् तत्संदिष्टकालात्ययाद्धेतोर्मुमूर्षतां कार्यहेतोः कार्यसिध्यर्थमिवायातः दैवादिति शेषः ६२ ६३

क्वदेशोरतिशेषः आरब्धातुमित्यसमानकर्तृकेपितुमुर्थः ६४ ६५ ६६ ६७ अंतेततं ६८ ६९ प्लुतः प्लुतवान् ७० ७१ ७२ पवना

प्रवीयान्केनमेभ्राताहतः क्व च विनाशितः । एतदाख्यातुमिच्छामि भवद्भिर्वानरोत्तमाः ६४ अं
गदोऽकथयत्तत्र जनस्थाने महद्वधम् रक्षसा भीमरूपेण त्वामुद्दिश्य यथातथम् ६५ जटायो
स्तु वधं श्रुत्वा दुःखितः सोऽरुणात्मजः त्वामाह स वराणेहे वसंतीं रावणोऽत्वया ६६ तस्य तद्वचनं श्रु
त्वा तं पातेः प्रीतिवर्धनम् अंगदप्रमुखाः सर्वे ततः संप्रस्थिता वयम् ६७ विंध्यादुत्थाय संप्राप्ताः
सागरस्यांतमुत्तमम् त्वद्दर्शनकृतोत्साहा हृष्टास्तुष्टाः प्लवंगमाः ६८ अंगदप्रमुखाः
सर्वे वेलोपांतमुपागताः चिंतां जग्मुः पुनर्दीनास्त्वद्दर्शनसमुत्सुकाः ६९ अथाहं हरिसैन्यानां
सागरं दृश्य सीदताम् व्यवधूय भयं तीव्रं योजनानां शतं प्लुतः ७० लंकां चापि मया रात्रौ प्रवि
ष्टा राक्षसाकुला रावणश्चापि मे दृष्टस्त्वं च शोकनिपीडिता ७१ एतत्ते सर्वमाख्यातं यथाव
त्तमनिदिते अभिभाषस्व मां देवि दूतो दाशरथेरहम् ७२ तन्मां रामकृतोद्योगं त्वन्निमित्तमिहा
गतम् सुग्रीवसचिवं देवि बुध्यस्व पवनात्मजम् ७३

सङ्ग्रलवनलंघनेसामथ्यमृष्टिनाम ७३

७४९ कः संप्राप्तोर्थी च्छेषाः समुद्रतीर एवासते ७५ कामरूपिणा रघुनेनराः वराः ततः पूर्ण च्छन्वे परांसाम पर्याप्तं चितं ७६ त्वन्ना
शंत्वद्दर्शनं अभिगमशंसनात् दर्शनकथनात् ७७ ७८ अभियास्यति प्राप्स्यति ७९ वानरस्य तव पवनात्मजत्वं

कुशलीतव काकुत्स्थः सर्वशास्त्रभृतांवरः गुरोराराधने युक्तो लक्ष्मणश्च सुलक्षणः ७४ त
स्य वीर्यवतो देवि भर्तुस्तव हिते रतः अहमेकस्तु संप्राप्तः सुग्रीववचनादिह ७५ मयेयमसहायेन चर
ता कामरूपिणा दक्षिणा दिगनुक्रांता त्वन्मार्गविचयैषिणा ७६ दिष्ट्याहं हरिसैन्यानां त्वन्नाशम
नुशोचताम् अपनेष्यामि संतापं तवाभिगमशंसनात् ७७ दिष्ट्याहि च मम व्यर्थं सागरस्येह
लंघनम् प्राप्स्याम्यहमिदं दिष्ट्या त्वद्दर्शनकृतं यशः ७८ राघवश्च महावीर्यः क्षिप्रं त्वामभिप
त्स्यते समित्रबांधवं हत्वा रावणं राक्षसाधिपम् ७९ माल्यवान्नाम वैदेहि गिरीणामुत्तमो गिरिः
ततो गच्छति गोकर्णं पर्वतं केसरी हरिः ८०

कथमस्याः कांक्षायामाह माल्यवानित्यादिना ततो गोकर्णाख्यं पर्वतं केसरी हरिर्गच्छति अगच्छत् ८० ८० ८० ८०

स चैकेसरी मम पिता प्रोवास द्रनागाख्यासु खधायदे वर्षिभिर्दिष्टः आज्ञातो नदीपतेस्तीर्थे सं वसादन मुद्धरत् अवधीदित्यर्थः ८१ हरिणाः
हरेः न कारणं तत्वमार्ये स्विनैव उत्पत्तिकाल एव तेन कर्मणा पराक्रमेण हनूमानिति लोके विख्यातः ८२ भर्तुस्त्वन्मद्वर्णितामस्य तापितानि

स्चैद्वर्षिभिर्दिष्टः पिता मम महाकपिः तीर्थे नदीपतेः पुण्ये शंवसादनमुद्धरत् ८१ तस्याहं
हरिणः क्षेत्रे जातो वातेन मैथिलि हनूमानिति विख्यातो लोके स्वेनैव कर्मणा ८२ विश्वासा
र्थं तु वैदेहि भर्तुरुक्ता मया गुणाः अचिराद्राघवो देवि त्वामितो नयितानघे ८३ एवं विश्वासि
ता सीता हेतुभिः शोककर्शिता उपपन्नैरभिज्ञानैर्दूतं तमधिगच्छति ८४ अतुलं च गता
हर्षं प्रहर्षेण तु जानकी नेत्राभ्यां वक्रपक्ष्माभ्यां मुमोचानंदजं जलम् ८५ सा तस्य वचनं
श्रुत्वा ताम्रपाण्डुरायतेक्षणा अशोभत विशालाक्षी राहुमुक्त इवोडुराट् ८६ हनूमंतं क
पिं व्यक्तं मन्यते नान्यथेति सा अथोवाच हनूमांस्तामुत्तरं प्रियदर्शनाम् ८७ ८७ ८७

ता ८३ उपपन्नैर्वीतत्वैरभिज्ञानैरामलक्ष्मणाचिन्हैः अस्मि दूतमधिगच्छति अधिगच्छतः ८४ ८५ ८६ मन्यते अमन्यत अन्य
थानमाया कपिर्नेत्यर्थः ८९

१६७ १६८ १६९ इदं वचनमितीदं प्राप्तार्थः प्रविष्टइति दाक्षायणि दक्षप्रजापतिसंतानेप्रतएवनीतिः समगस्रासीत्सत्योजातः

हनूमाननन्तरश्रश्रो नवतियोजनोच्छ्रितः चकारसुरसावक्त्रं शतयोजनमायतम् १६७ स संक्षिप्यात्मनः कायंजीमूतइवमारुतिः तस्मिन्मुहूर्त्तेहनुमान्बभूवांगुष्ठमात्रकः १६८ सोभिपद्याथतद्वक्त्रंनिष्पत्यचमहाबलः अंतरिक्षेस्थितः श्रीमानिदंवचनमब्रवीत् १६९ प्रविष्टोस्मिहितेवक्त्रंदाक्षायणिनमोस्तुते गमिष्येयत्रवैदेहीसत्यश्चासीद्वरस्तव १७० तंदृष्ट्वावदनान्मुक्तंचंद्रंराहुमुखादिव अब्रवीत्सुरसादेवीस्वेनरूपेणवानरम् १७१ अर्थसिद्ध्यैहरिश्रेष्ठगच्छसौम्ययथासुखम् समानयचवैदेहींराघवेणमहात्मना १७२ तत्तृतीयंहनुमतोदृष्ट्वाकर्मसुदुष्करम् साधुसाध्वितिभूतानिप्रशशंसुस्तदाहरिम् १७३

वदनप्रवेशरूपत्वात्तस्य १७० १७१ अर्थसाद्दृष्टानुग्रहात्तिअर्थसिद्धैरति समानयसंयोजय १७२ तत्तृतीयंसुरसावक्त्रनिष्क्र

सर्वमुक्तरेण पुनस्त्वं व्याख्यातं पृष्ट्वा सीतायै चिकीर्षितं पृच्छति किं करोमीति वर्तमानसामीप्ये लट् प्रतियामि प्रहं रामसमीपं प्रतियामि किं करोमि किं करिष्ये कथं वा ते रोचते चिकीर्षितं तदेति शेषः ८८ देवि नियुङ्क्ष्व कार्थं करणे स्वस्य शक्तिरस्तीति ज्ञापयितुं स्वमाहात्म्यमाह हते सुरे इति त
त

एतत्ते सर्वमाख्यातं समाश्वसिहि मैथिलि ॥ किं करोमि कथं वा ते रोचते प्रतियाम्यहम् ॥ ८८ ॥ हतेः सुरे संयति प्रोवसादने कपिप्रवीरेण महर्षिचोदनात् ॥ ततोऽस्मि वायुप्रभवो हि मैथिलि प्रभावतस्तत्प्रतिमश्च वानरः ॥ ८९ ॥ हरिः ॐ इत्यार्षे रामायणे सुंदरकांडे पंचत्रिंशः सर्गः ॥ ३५ ॥ भूय एव महातेजा हनूमान्पवनात्मजः अब्रवीत्प्रश्रितं [illegible] वाक्यं सीताप्रत्ययकारणात् १ वानरोऽहं महाभागे दूतो रामस्य धीमतः रामनामांकितं चेदं पश्य देव्यंगुलीयकम् २ प्रत्ययार्थं तवानीतं तेन दत्तं महात्मना समाश्वसिहि भद्रं ते क्षीणदुःखफला ह्यसि ३ ३ ३ ३ ३

ततः शंबसादनात् असुरवधप्रीतमहर्षिप्रसादात् इति शेषः प्रभावतस्तत्प्रतिमो वायुसदृशः इत्यर्थः ८९ इति पंचत्रिंशः सर्गः ३५
इत्थं संदेशकथनादिना देव्या विश्वासे दृढतरविश्वासाय रामांगुलीयकं दातुमाह भूय इति प्रत्ययो विश्वासः १ वानरो
हे नान्यः रामस्य नाम नामाक्षराणि तैरंकितं चिन्हितम् २ क्षीणं दुःखरूपं पापफलं यस्याः सा अप्रसि शीघ्रमेव भविष्यति ३

भर्तारं प्राप्तेत्यन्वयः ४ ५ ह्रीमती श्रेष्ठ्यीयसन्निध्ये भर्तृसान्निध्यादि किंचिल्लज्जावती प्रियं कृत्वा आदरं कृत्वा महाकपिं प्रश
शंस ६ विक्रांतः शूरः समर्थो देशकालोचितकृत्यचतुरः प्राज्ञः धर्मार्थविषयक सर्वशास्त्रार्थतत्त्वज्ञः पदं स्थाने ७ क्रमता क्रा

गृहीत्वा प्रेक्षमाणा सा भर्तुः करविभूषणम् भर्तारमिव संप्राप्ता जानकी मुदिताभवत् ४ चारु तद्वद
नं तस्यास्ताम्रशुक्लायतेक्षणम् बभूव हर्षोदग्रं च राहुमुक्त इवोडुराट् ५ ततः सा ह्रीमती बाला भर्तुः
संदेशहर्षिता परितुष्टा प्रियं कृत्वा प्रशशंस महाकपिम् ६ विक्रांतस्त्वं समर्थस्त्वं प्राज्ञस्त्वं वान
रोत्तम येनेदं राक्षसपदं त्वयैकेन प्रधर्षितम् ७ शतयोजनविस्तीर्णः सागरो मकरालयः विक्रम
श्लाघनीयेन क्रमता गोष्पदीकृतः ८ नहि त्वां प्राकृतं मन्ये वानरं वानरर्षभ यस्य ते नास्ति संत्रा
सो रावणादपि संभ्रमः ९ अर्हसे च कपिश्रेष्ठ मया समभिभाषितुम् यद्यसि प्रेषितस्तेन रामेण विदि
तात्मना १० प्रेषयिष्यति दुर्धर्षो रामो न ह्यपरीक्षितम् पराक्रममविज्ञाय मत्सकाशं विशेषतः ११

मता ८ संत्रासः सत्त्वद्रावादिति त्रासः संभ्रमश्चित्तक्षोभः ९ यत् यस्माद्विदितात्मना तेन रामेण प्रेषितोऽसि तस्मान्मया समभिभाषितुं सं
भाषणं कर्तुमर्हसे अर्हसि ११·११

१२ कुशलीयदीसंसंदिग्धेसंदिग्ध वचनं यदि वेदाः प्रमाणं सुरिजिवत् किन्न दहति मन्हृते इति १३ पक्षांतरेण समाधत्ते अथ वेति १४
अथ वा मद्वतां तज्जिज्ञासया पच्छति कच्चिदिति उत्तराणि कार्याणि मद्विमोचनफलानि १५ न दीनः कच्चित् संभ्रांतः सन्का

दिष्ट्यासि कुशली रामो धर्मात्मा सत्यवत्सलः लक्ष्मणश्च महातेजाः सुमित्रानन्दवर्धनः १२ कुशली
यदि काकुत्स्थः किं न सागरमेखलाम् महीं दहति कोपेन युगान्ताग्निरिवोत्थितः १३ अथवा श
क्तिमन्तौ तौ सुराणामपि निग्रहे ममैव तु न दुःखानामस्ति मन्ये विपर्ययः १४ कच्चिन्न व्यथते रामः
कच्चिन्न परितप्यते उत्तराणि च कार्याणि कुरुते पुरुषोत्तमः १५ कच्चिन्न दीनः संभ्रान्तः कार्येषु
च न मुह्यति कच्चित्पुरुषकार्याणि कुरुते नृपतेः सुतः १६ द्विविधं त्रिविधोपायमुपाय
मपि सेवते विजिगीषुः सुहृत्कच्चिन्मित्रेषु च परन्तपः १७

र्येषु न मुह्यति कच्चिदिसन्वयः पुरुषकार्या
णि पुरुषेण कर्तव्यानि १६ तान्येवाह द्विविधमिति परंतपो रामः मित्रेषु विषये सुहृत्सन् द्विविधं सामदानरूपमुपायमु
पसेवते कच्चित् च कारेणामित्राणि समुच्चीयंते अमित्रेषु च विजिगीषुः सन् त्रिविधोपायं दानभेददंडान् सेवते न साम०
प्रयुंक्ते कच्चित् सुहृत्सु न कदाचिद्भेददंडौ कार्यौ शत्रुषु न सामेति भावः १७

मित्राणि लभते स्वबलेनेति शेषः अभिमित्रैश्चाप्यभिगम्यते लभ्यते इत्यर्थः कल्याणमित्रः सौम्यमित्रः मित्रैः पुरस्कृतो बहुमतः कच्चित् १८ आशास्ति प्रार्थयते इत्यर्थः पुरुषकारं स्वबलं दैवं देवानुग्रहं प्रतिपद्यते लभते कच्चित् १९ वि

कच्चिन्मित्राणि लभते मित्रैश्चाप्यभिगम्यते कच्चित्कल्याणमित्रश्च मित्रैश्चापि पुरस्कृतः १८ कच्चिदाशास्ति देवानां प्रसादं पार्थिवात्मजः कच्चित्पुरुषकारं च दैवं च प्रतिपद्यते १९ कच्चिन्न विगतस्नेहो विवासान्मयि राघवः कच्चिन्मां व्यसनादस्मान्मोक्षयिष्यति राघवः २० सुखानामुचितो नित्यमसुखानामनूचितः दुःखमुत्तरमासाद्य कच्चिद्रामो न सीदति २१ कौशल्यायास्तथा कच्चित्सुमित्रायास्तथैव च अभीक्ष्णं श्रूयते कच्चित्कुशलं भरतस्य च २२ मन्निमित्तेन मानार्हः कच्चिच्छोकेन राघवः कच्चिन्नान्यमना रामः कच्चि[illegible] तारयिष्यति २३ कच्चिदक्षौहिणीं भीमां भरतो भ्रातृवत्सलः ध्वजिनीं मन्त्रिभिर्गुप्तां प्रेषयिष्यति मत्कृते २४ वानराधिपतिः श्रीमान्सुग्रीवः कच्चिदेष्यति मत्कृते हरिभिर्वीरैर्वृतो दन्तनखायुधैः २५

विवासात् विदूरवासात् २० अनूचित इति च्छान्दसो दीर्घः उत्तरं दुःखं दुःखाद् दुःखमित्यर्थः २१ २२ मन्निमित्तेन मद्वियोगनिमित्तेन शोकेन कच्चित्परितप्यत इति शेषः २३ २४ २५

रा० वा० सु० २६ रौद्रेण क्षमोघ क्रूरेण २७ हेमसमानवर्णा हिमवर्णा वत्सार हुत्तीय प्रो भे २८ धर्मापदेशात् धर्ममुद्दिश्य राज्यं त्यजतो यस्य प्रोक्तो नासीत्
१३२ · पदातीमामरण्यमपि नयतो भीः मद्रुमाश्लानि मित्रे भयं नासीत् यस्य व्यथा वा न वा सखेद स्त्वं नासीत् समर्द्धिमत्त्वे षपित दये धैर्यं करो

कच्चिच्च लक्ष्मणः शूरः सुमित्रानन्दवर्धनः । अस्त्रविच्छरजालेन राक्षसान्विधमिष्यति २६ रौद्रेण क
च्चिदस्त्रेण ज्वलता निहतं रणे । द्रक्ष्याम्यल्पेन कालेन रावणं ससुहृज्जनम् २७ कच्चिन्न तद्धेमसमा
नवर्णं तस्याननं पद्मसमानगन्धि । मया विना शुष्यति शोकदीनं जलक्षये पद्ममिवातपेन २८ ध
र्मापदेशात्त्यजतश्च राज्यं मां चाप्यरण्यं नयतः पदातिम् । नासीद्व्यथा यस्य न भीर्न शोकः कच्चित्स धै
र्यं हृदये करोति २९ न चास्य माता न पिता न चान्यः स्नेहाद्विशिष्टोऽस्ति मया समो वा । तावत्त्वहं दूत जि
जीविषेयं यावत्प्रवृत्तिं शृणुयां प्रियस्य ३०

ति कच्चित् २९ धैर्यस्य योगो न द्वियोग एव हेतुरित्याह न चास्येति मात्रा पित्रा दीना स्य मत्समो यित्स्नेहः अधिकस्तु कुतः हे दूत जग्र
हमपि तावज्जिजीविषेयं यावत्प्रियस्य प्रवृत्तिं वार्तां शृणुयां प्रिय वार्तामृतपानमेव मम जीवितुरिति भावः ३० २०

देवीणमवद्व्यभाइतीवमहार्थमधुरार्थं वचनं वानरेंद्रमुत्काय न तस्य रामार्थयुक्तं रामप्रयोजनयुक्तमपि रामं वचनः श्रोतुं विरराम स्वयं चिरभाषणादिति शेषः ३१ ३२ नानयति नानीतवान् ज्ञात्वा गृआनेष्यतीत्यर्थः प्राचीं पुरंदर इव अग्रतुं न्हाद दैत्यनी

इतीव देवी वचनं महार्थं तं वानरेंद्रं मधुरार्थमुक्त्वा श्रोतुं पुनस्तस्य वचोभिरामं रामार्थयुक्तं विरराम रामा ३१ सीताया वचनं श्रुत्वा मारुतिर्भीमविक्रमः शिरस्यंजलिमाधाय वाक्यमुत्तरमब्रवीत् ३२ न त्वामिहस्थां जानीते रामः कमललोचनः तेन त्वां नानयत्याशु शचीमिव पुरंदरः ३३ श्रुत्वैव तु वचो मह्यं क्षिप्रमेष्यति राघवः चमूं प्रकर्षन्महतीं हर्यृक्षगणसंकुलाम् ३४ विष्टंभयित्वा बाणौघै रक्षोभ्यं वरुणालयम् करिष्यति पुरीं लंकां काकुत्स्थः शांतराक्षसाम् ३५ तत्र यद्यंतरा मृत्युर्यदि देवाः सहासुराः स्थास्यंति पथि रामस्य स तानपि वधिष्यति ३६

तां शचीं पुरंदरः कंचित्कालमविज्ञाय ततो ज्ञात्वा यथा प्रानीतवान् तद्वदित्यर्थः ३३ मह्यं मत्तः ३४ विष्टंभयित्वा बद्ध्वेत्यर्थः ३५ तत्र त्वदानयनरूपकाले मृत्युर्यदि प्रतिपथि रामस्य स्थास्यति देवा यदि स्थास्यंति विघ्नकारित्वेनेति शेषः तानपि वधिष्यतीति योजना ३६

रा०वा०सुं० ३७ त्वोक्तार्थे भगवत्साविम्वाहार्ये त्वोपजीव्यनिवासफलमूलादिनाशपथं करोति मंदरेणाचेति दर्दुरः पर्वतविशेषः
१३३ ३८ यथा रामस्य मुखं द्रक्ष्यसि तथा मिन्नर्थे मंत्रादिभिः प्राप्ते इत्यन्वयः ३९ प्रस्रवणो गिरौ विद्यमानमशिहः द्रक्ष्यसी

तवादर्शनजेनार्यः शोकेनाभिपरिप्लुतः नशर्मलभतेरामः सिंहार्दितइवद्विपः ३७ मंदरेणाचेते
देविशापेमूलेनच मलयेनचविंध्येनमेरुणादर्दुरेणाच ३८ यथासुनयनंवल्गुबिंबोष्ठंचारुकुं
डलम् मुखंद्रक्ष्यसिरामस्यपूर्णचंद्रमिवोदितम् ३९ क्षिप्रंद्रक्ष्यसिवैदेहिरामंप्रस्रवणेगिरौ शत
क्रतुमिवासीनंनागपृष्ठस्यमूर्धनि ४० नमांसंराघवोभुंक्तेनचापिमधुसेवते वन्येसुविहितंनि
त्येभक्तमश्नातिपंचमम् ४१

लफ

सर्पः नागपृष्ठस्यमूर्धनि ऐरावतोपरि स्थितमिंद्रमिवमत्पृष्ठोगतंद्रक्ष्यसीत्यर्थः ४० वन्यंवने
भवंकंदमूलादिकंसुविहितंवानप्रस्थभोग्यभूतंभक्तंपंचधाविभज्यदेवपित्रतिथिभूतेभ्यःत्ततद्रागान्दत्त्वाविभक्तंपंचमंभागं
नित्यंस्वयमश्नाति अनेनविरहिणांमरणावस्थाउक्ताभवति ४१

राम०
१३३

मनःसंगावस्थामाह नैवेति गात्रान्नैवापनयेत् तत्र हेतुस्त्वद्गतेनेति अंतरात्मनः स्थितस्य तद्गता नाभावादिति भावः ४२ ४३ प्रायोऽनिद्र एव कथंचित्सुप्तोपि सीते इति वदन्नेव प्रतिबुध्यते ४४ स्त्रीमनोहरं स्त्रीसन्निधाने मनोहरं स्त्रीणां मनोहरं वा दृष्ट्वा बहुशः श्वसन् हा प्रिये इत्येवं त्वामभिभाषते इति संबंधः ४५ ४६ रामसंकीर्त्तनवीतशोका अनिद्रः सततं राम इत्यादि रामसंकीर्तनेन वीतशो

नैवदंशान्न मशकान्न कीटान्न सरीसृपान् ॥ राघवोपनयेद्गात्रात्त्वद्गतेनांतरात्मना ॥४२॥ नित्यं ध्यानपरो रामो नित्यं शोकपरायणः ॥ नान्यच्चिंतयते किंचित्स तु कामवशंगतः ॥४३॥ अनिद्रः सततं रामः सुप्तोपि च नरेश्वरः ॥ सीतेति मधुरां वाणीं व्याहरन्प्रतिबुध्यते ॥४४॥ दृष्ट्वा फलं वा पुष्पं वा यद्वान्यत्स्त्रीमनोहरम् ॥ बहुशो हा प्रियेत्येवं श्वसंस्त्वामभिभाषते ॥४५॥ स देवि नित्यं परितप्यमानस्त्वामेव सीतेत्यभिभाषमाणः ॥ दृढव्रतो राजसुतो महात्मा तवैव लाभाय कृतप्रयत्नः ॥४६॥ सा रामसंकीर्त्तनवीतशोका रामस्य शोकेन समानशोका ॥ शरन्मुखे सांबुदचंद्रशेषा निशेव वैदेहसुता बभूव ॥४७

हरिः ॐ इत्यार्षे रामा० सुंदरकांडे षट्त्रिंशः सर्गः ॥३६॥

का नसांसे राघवो भुक्ते इत्युक्तेन रामशोकेन समानशोका वैदेहसुता शरदारंभे सांबुदचंद्रशेषा अप्रकाशाप्रकाशयुक्तानिशेव हर्षशोकवती बभूव भावसंधिः ४७ इति षट्त्रिंशः सर्गः ३६

रा० वा० सुं० वचनं हनूमत इत्यादि १ यच्च नान्यमना इत्यस्य तत्त्वे हेतुः यच्च शोकपरायण इति विषसंपृक्तत्वे २ ऐश्वर्ये व्यसने इति च विषयसप्तमी
 कृतान्तः दैवं ३ विधिर्दैवं असंहार्यः अशक्यप्रतिक्रियः अत्र दृष्टान्ता वयमित्याह सौमित्रिं ४ हतनौः पुरुषः परिक्रान्तः कृतप

सा सीता वचनं श्रुत्वा पूर्णचंद्रनिभानना हनूमंतमुवाचेदं धर्मार्थसहितं वचः १ अमृतं विषसंपृक्तं त्वया वानर भाषितम् यच्च नान्यमना रामो यच्च शोकपरायणः २ ऐश्वर्ये वा सुविस्तीर्णे व्यसने वा सुदारुणे रज्ज्वेव पुरुषं बध्वा कृतान्तः परिकर्षति ३ विधिर्नूनमसंहार्यः प्राणिनां प्लवगोत्तमः सौमित्रिं मां च रामं च व्यसनैः पश्य मोहितान् ४ शोकस्यास्य कदा पारं राघवोऽधिगमिष्यति प्लवमानः परिक्रान्तो हतनौः सागरे यथा ५ राक्षसानां वधं कृत्वा सूदयित्वा च रावणम् लंकामुन्मूलितां कृत्वा कदा द्रक्ष्यति मां पतिः ६ स वाच्यः संत्वरस्वेति यावदेव न पूर्यते अयं संवत्सरः कालस्तावद्धि मम जीवितम् ७ वर्त्तते दशमो मासो द्वौ तु शेषौ प्लवंगम रावणेन नृशंसेन समयो यः कृतो मम ८ विभीषणेन च भ्रात्रा मम निर्यातनं प्रति अनुनीतः प्रयत्नेन न च तत्कुरुते मतिम् ९

एकमो बाहुभ्यां प्लवमानोऽपि यासागरे पारमतिक्रैशेनाधिगच्छति तथा राघवोऽपि शोकस्य पारं कदाधिगमिष्यति ५ ६ सः रामः निर्यातनं प्रत्यर्पणं तत्र तस्मिन्निसर्थः ९

टी० वा० सुं० आरजात्वेत्यादि परंपरितरूपकमिदं १८ १९ मह्यं मम मत्तो वा २० तव रामसंगमे राम स्नेहान्नयनं त्वया यथैव प्रकारान्तरेणैव तस्मात्स्व
१३५ भवादिसाहाय्येन यथेति सोऽहं राक्षसात्तारितान्वेति ताद् अस्माद्दुःखान्मोचयिष्यामीत्यन्वयः २१ २२ २३ दैत्यवधे व्यवसा

आरज्जानां शुमोक्षुः कयेणमदिवाकरः आतुरक्षोभयं तोयमुपशोषं न पिष्यति १८ इति संजल्प
मानां तां रामार्थं शोककर्शिताम् अश्रुसंपूर्णवदनाम् उवाच हनुमान्कपिः १९ श्रुत्वैव तु वचो
मह्यं क्षिप्रमेष्यति राघवः चमूं प्रकर्षन्महतीं हर्यृक्षगणसंकुलाम् २० अथवा मोचयिष्यामि
त्वामद्यैव वराक्षसात् शक्तिरस्ति हि मे वोढुं लंकामपि सरावणाम् अस्माद्दुःखादुपारोह
मम पृष्ठमनिंदिते २१ त्वां तु पृष्ठगतां कृत्वा संतरिष्यामि सागरम् शक्तिरस्ति हि मे वोढुं लंका
मपि सरावणाम् २२ अहं प्रस्रवणस्थाय राघवायाद्य मैथिलि प्रापयिष्यामि शक्राय हव्यं हुत
मिवानलः २३ द्रक्ष्यस्यद्यैव वैदेहि राघवं सहलक्ष्मणम् व्यवसायसमायुक्तं विष्णुं दैत्यवधे यथा
२४ त्वद्दर्शनकृतोत्साहमाश्रमस्थं महाबलम् पुरंदरमिवासीनं नगराजस्य मूर्धनि २५ पृष्ठमा
रोह मे देवि मा विकांक्षस्व शोभने योगमन्विच्छ रामेण शशांकेनेव रोहिणी २६ व्यवसायसमायुक्तं विष्णुमिव स्थितं रा०सं० १३५

२४ नगराजस्य पर्वतः श्रेष्ठस्य प्रस्रवणगिरेरित्यर्थः २५ मा विकांक्षस्व मा पेक्षां कुर्वित्यर्थः २६

१७४ वारिधाराभिःसेवितत्वादिविशेषणानि केचं दूरसूर्यपथेऽजगामेत्यन्वयः पतंगैः पक्षिभिः कैश्चित् गानं न त्वादि तदाचार्यैः स्तुंबुरु
प्रभृतिभिः स्वरितेः सेविते ऐरावतो गजविशेषः १७५ १७६ वज्राशान्योः समतुल्यः स्वा घातः स्वभिघातो येषां तैः पावकैः १७७

स सागरमनाधृष्यमभ्येत्य वरुणालयम् जगामाकाशमाविश्य वेगेन गरुडोपमः १७४ सेवि
ते वारिधाराभिः पतगैश्च निषेविते चरिते कैशिकाचार्यैरैरावतनिषेविते १७५ सिंहकुं
जरशार्दूलपतगोरगवाहनैः विमानैः संपतद्भिश्च विमलैः समलंकृते १७६ वज्राशनिस
माघातैः पावकैरुपशोभिते कृतपुण्यैर्महाभागैः स्वर्गजिद्भिरधिष्ठिते १७७ वहता हव्यमत्यंतं
सेविते चित्रभानुना १७८ ग्रहनक्षत्रचंद्रार्कतारागणविभूषिते महर्षिगणगंधर्वना
गयक्षसमाकुले १७९ विविक्ते विमले विश्वे विश्वावसुनिषेविते देवराजगजाक्रांते चंद्र
सूर्यपथे शिवे १८० विताने जीवलोकस्य विमले ब्रह्मनिर्मिते बहुशः सेविते वीरैर्विद्याधरग
णैः वृते १८१

स्वाकाशस्य एकोनपंचाशद्दतिसंबंधमुक्त्वा तत्प्रधानभूतचित्रभानुसंबंधमाह वहतेति १७८ १७९ वि
श्वे विश्वाश्रये विश्वावसुर्गंधर्वराजः देवराजगजाः पुंडरीकादयः १८० विताने प्रवकाशावरणावस्त्रे १८१

२७ २८ त्वामुद्यम्यपृष्ठे कृत्वाविहायसंयास्यामिपश्यप २९ हर्षविस्मितसर्वांगी हृष्टरोमपुलकितसर्वांगी ३० तदेवदर्शमान

पोतोमीवमहेद्रुमाम्सूर्यतोवसवर्चसो त्वा मम्पृष्ठमधिरोह त्वंतरणकाशमहार्णवौ २७ नहिमेसंशयात
स्त्वामितोनयतोगने अनुगंतुंगतिं प्राकृताःसर्वेलंकानिवासिनः २८ प्रयेवाहमिहप्राप्तस्तथै
वाहमसंशयम् यास्यामिपश्यवैदेहि त्वामुद्यम्यविहायसम् २९ मैथिलीतुहरिश्रेष्ठाच्छ्रुत्वा
वचनमद्भुतम् हर्षविस्मितसर्वांगी हनूमंतमथाब्रवीत् ३० हनूमन्दूरमध्वानं कथंमांवो
ढुमिच्छसि तदेवखलुतेमन्ये कपित्वं हरियूथप ३१ कथंवाल्पशरीरस्त्वमितोमांनेतुमिच्छ
सि सकाशंमानवेंद्रस्य भर्तुर्मेप्लवगर्षभ ३२ सीतायावचनंश्रुत्वाहनुमान्मारुतात्मजः चिं
तयामासलक्ष्मीवान्नवंपरिभवंकृतम् ३३ नमेजानातिसत्वंवाप्रभावंवासितेक्षणा तस्मात्प
श्यतुवैदेहीयद्रूपंममकामतः ३४ इतिसंचित्यहनुमांस्तदाप्लवगसत्तमः दर्शयामासवैदेह्याः स्व
रूपमरिमर्दनः ३५

मव ३१ ३२ नवंपरिभवंग्वल्पशरीरोऽयमाक्रूरस्येवंरूपं ३३ सत्वंबलंप्रभावंप्रशक्तिं कामतः इच्छाकृतं ३४
३५

रा०वा०सुं०
१३६

पादपात् पादपमूलात् शरीरवर्द्धनशाखाभंगध्वनिना रक्षसां त्रास्यंतीतिमत्वा अश्वत्थशाखायामे तवा निसर्गः ३६ अग्रतोव्य
वतस्थेयोग्यप्रदेशे स्थितः ३७ ३८ सनाथां रावणसनाथां नयितुं नेतुं ३९ तत्तस्मात् अवस्थाप्यतां समर्थोयमिति निश्चियतां वि

सतस्मात्पादपाद्धीमानाप्लुत्यप्लवगर्षभः ततोवर्धितुमारेभेसीताप्रत्ययकारणात् ३६ मेरुमंदरसं
काशोबभौदीप्तानलप्रभः अग्रतोव्यवतस्थेचसीतायावानरर्षभः ३७ हरिःपर्वतसंकाशस्ता
म्रवक्त्रोमहाबलः वज्रदंष्ट्रनखोभीमोवैदेहीमिदमब्रवीत् ३८ सपर्वतवनोद्देशांसाट्टप्रा
कारतोरणाम् लंकामिमांसनाथांवानयितुंशक्तिरस्तिमे ३९ तदवस्थाप्यतांबुद्धिरलंदेवि
विकांक्षया विशोकंकुरुवैदेहिराघवंसहलक्ष्मणम् ४० तंदृष्ट्वाचलसंकाशमुवाच
जनकात्मजा पद्मपत्रविशालाक्षीमारुतस्यौरसंसुतम् ४१ तवसत्वंबलंचैववि॰जाना
पितेजश्चा मिमहाकपे वायोरिवगतिश्चाग्नेरिवाद्भुतम् ४२ प्राकृतोन्यःकथंचेमांभूमिमागंतुमर्ह
ति उदधेरप्रमेयस्यपारंवानरयूथप ४३

कांक्षया संदेहेन विशोकं कुरु मत्पृष्ठेन तत्र गत्वेति शेषः ४० ४१ विज्ञा
नासि एवंविधत्वद्रूपदर्शनात् मागमनानुमानादिति भावः ४२ तदेवानुमानं दर्शयति प्राकृत इति ४३

एम०
१३६

नवेवममाप्यात्मनः कार्यसिद्धिरवप्रपंसश्चाधार्या विचारणीया त्वयातुल्यं वत्सैवभवेनविचारितेवेत्यर्थः ४४ भवत्या तर्हि को विचारस्तत्रा
ह । अपृष्टेकालिति ४५ सागरे सागरोद्देशे घनमुद्दिश्येत्यर्थः उपर्युपरि वेगेन गच्छतत्ते पश्चाद् आकाशमापन्नाहं भयात्त्वपतेयं हि ४६

ज्ञानामिमामनेप्राक्ष्किं न पनेवापितेमम । एवं प्रपंसंश्चाधार्या भूकार्यसिद्धिरिहात्मनः ४४ अपृष्टे
तु कपिश्रेष्ठ मया गन्तुं त्वया सह । वायुवेगसवेगस्य वेगो मां मोहयेत्तव ४५ अहमाकाशमासन्
ना ह्युपर्युपरि सागरम् । प्रपतेयं हि ते पृष्ठाद्भयाद्वेगेन गच्छतः ४६ पतिता सागरे चाहं तिमिनक्र
झषाकुले । भवेयमाशु विवशा यादसामन्नमुत्तमम् ४७ न च शक्ष्ये त्वया सार्धं गन्तुं शत्रु
विमर्दन । कलत्रवति सन्देहस्त्वय्यपि स्यादसंशयम् ४८ ह्रियमाणां तु मां दृष्ट्वा राक्षसा भीमवि
क्रमाः । अनुगच्छेयुरादिष्टा रावणेन दुरात्मना ४९ तैस्त्वं परिवृतः शूरैः शूलमुद्गरपाणिभिः
भवेस्त्वं संशयं प्राप्तो मया वीर कलत्रवान् ५०

यादसां जलजन्तूनां ४७ इतो पि गमनमयुक्तं त्वया सह त्वाहन वेति कलत्रवति रक्ष्यद्रव्यवति त्वय्यपि संदेहः प्राणसंदेहः ४८
४९ तैः परिवृतो भवेः संशयं प्राप्तो भवेरिति वाक्यभेदेन पुनः पुच्छेदयो निर्वाहः कलत्रवान् रक्ष्याभारवानित्यर्थः ५०

 संयातुंसम्यग्यातुं ५१ ५२ कथंचिन्महताप्रयत्नेनसांपरायेयुद्धेजयेयुः तस्माद्व्यवस्थितत्वादितिभावः ५३ अथवात्वंजेष्यसिएवमपि
 प्रतनेमहाननर्थइत्याह अथवेति पतेयंतवपृष्ठादिति शेषः तत्रहेतुः विमुखस्येति युद्धायावश्यमन्महद्व्रस्तातविमुखस्येत्यर्थः ५४

सापुधावहवोव्योम्निराक्षसास्त्वंनिरायुधः कथंपारूप्यसिसंयातुंमांचैवपरिरक्षितुम् ५१ युध्य
मानस्यरक्षोभिस्तैस्तैःक्रूरकर्मभिः प्रपतेयंहितेपृष्ठादहंभीताकपिसत्तम ५२ अथरक्षां
सिभीमानिमहान्तिबलवन्तिच कथंचित्सांपरायेत्वांजयेयुःकपिसत्तम ५३ अथवायुध्य
मानस्यपतेयंविमुखस्यते पतितांचगृहीत्वामांनयेयुःपापराक्षसाः ५४ मांवाहरेयुस्ते
रध्वाविशसेयुरथापिवा अव्यवस्थौहिदृश्येतेयुद्धेजयपराजयौ ॥ ॥ ५५ अथहेवापि
विपद्येयंरक्षोभिरभितर्जिता त्वत्प्रयत्नोहरिश्रेष्ठभवेन्निष्फलएववतु ५६ कामंत्वमसि
पर्याप्तोनिहंतुंसर्वराक्षसान् राघवस्ययशोहीयेत्त्वयाशस्तैस्तुराक्षसैः ५७ अथवादाय
रक्षांसिन्यसेयुःसंवृतेहिमाम् यत्रतेनाभिजानीयुर्हरयोनापिराघवः ५८ सीतारामाभ्यां

विश्रासेयुःरामविषयकद्वेषवशात् त्वत्तोपनाशयेयुरित्यर्थः ५५ ५६ यशोहीयेतस्वयंशस्याहर्तुमसामर्थ्यात् इत्यपयशोव्यक्तिःस्याद्राम००
दितिभावः शस्तैर्हिंसितैः ५७ राक्षसैःस्वगृहंप्रापय्ये दोषांतरमाह अथवेति संवृते गुप्ते ५८

सुग्रीवकुलस्य

ष्यारंभः समुद्रतरणादिरूपः एवं स्वागमनपक्षे दोषमुक्त्वा राघवानयनपक्षे गुणमाह त्वयाहीति ५९ ममनाशात् प्रीतयोर्नैकेव
लं स्वदारं भवैकल्यं दुःखं तो महानर्थः स्यादपि तु प्राणैर्नाहं मयीत्यादिना राघवस्य जीवितं मयि प्राप्तं मज्जीविताधीनमित्यर्थः भ्रातॄणां लक्ष्म
णा। दीनां राजकुलस्य तु वचेत्यर्थः ६० प्राणसंग्रहं प्राणसंबंधं ६१ हनूमता सहगमनाभावे कारणांतरमाह भर्तुरिति ६२ रावणगात्रस्प

ष्यारंभस्तु मदर्थोयं ततस्तव निरर्थकः त्वयाहि सहिता मस्य महानागमने गुणः ५९ मयि जीवितमायत्तं
राघवस्यामितौजसः भ्रातॄणां च महाबाहो तव राजकुलस्य च ६० तौ निराशौ मदर्थे च शोकसंतं
तापकर्शितौ सह सर्वैर्हरिभिस्त्यक्ष्यतः प्राणसंग्रहम ६१ भर्तुर्भक्तिं पुरस्कृत्य रामादन्यस्य वानर मया
पुनः पुमानन्यो न स्प्रष्टुमात्मना ६२ यदहं गात्रसंस्पर्शं रावणस्य गता बलात् अनीशा किं क
रिष्यामि विनाथा विवशा सती ६३

र्शस्तु न स्वतंत्रस्याहं यदयमिति अनीशा स्त्रीत्वात्स्वयमसमर्था विवशा विचेष्टा विनाथा अप्रसंन्निहितरामलक्ष्मणाहासीतेत्लंस्मरो
ति मारिच वाक्यं श्रुत्वा रामानर्थे प्रेकपा लक्ष्मणास्यापि प्रस्थापनादिति भावः ६३

अथ यसिद्धान्तमाविष्करोति यदीति रावणवधपूर्वकं मत्प्रापणं रामस्य सदृशं अन्यथा स्तेनवन्मत्प्रापणमनुचितमिति भावः ६४ न चाशक्तिचिन्ता रामे कार्येत्याह श्रुतेति वालिवधादयः श्रुताः अन्ये च दृष्टा इत्यर्थः ६५ ६६ ६७ अथ निश्चितं कर्तव्यमाह स मे इति हे हरि

यदि रामो दशग्रीवमिह हत्वा सबान्धवम् ॥ मामितो गृह्य गच्छेत तत्तस्य सदृशं भवेत् ॥६४॥ श्रुता ह्यदृष्टा हि मया पराक्रमा महात्मनस्तस्य रणावमर्दिनः ॥ न देवगन्धर्वभुजंगराक्षसा भवन्ति रामेण समा हि संयुगे ॥६५॥ समीक्ष्य तं संयति चित्रकार्मुकं महाबलं वासवतुल्यविक्रमम् ॥ सलक्ष्मणं को विषहेत राघवं हुताशनं दीप्तमिवानिलेरितम् ॥६६॥ सलक्ष्मणं राघवमाजिमर्दनं दिशागजं मत्तमिव व्यवस्थितम् सहेत को वानरमुख्य संयुगे युगान्तसूर्यप्रतिमं शरार्चिषम् ॥६७॥ स मे हरिश्रेष्ठ सलक्ष्मणं पतिं सयूथपं क्षिप्रमिहोपपादय ॥ चिराय रामं प्रति शोककर्शितां कुरुष्व मां वानरवीर हर्षिताम् ॥६८॥ हरिः ॐ इति श्रीरामायणे वाल्मीकीये सुंदरकाण्डे सप्तत्रिंशः सर्गः ॥३७॥ सीताराम सीताराम सीताराम सीता

श्रेष्ठ सत्वं मे पतिं क्षिप्रमिहोपपादय इहानयेत्यर्थः चिराय चिरकालं शोककर्शितां रामस्यात्रागमनेन हर्षितां कुरुष्व समूलसकुलनाशेनेति भावः ६८ इति सप्तत्रिंशः सर्गः ३७॥

तेन वाक्येन सीतयोक्तेन १ युक्तरूपं युक्तमेव प्रसंगोयं रूपप्रत्ययः स्त्रीस्वभावस्य भीरुत्वादेः साध्वीनां पतिव्रतानां विनयस्य वृत्तस्य सदृशं
२ संक्षेपेणोक्तमर्थं श्लोकद्वयेन विवृणोति स्त्रीत्वमित्यादिना विस्तीर्णमपि मामधिष्ठाय शतयोजनमायतं सागरं व्यतिवर्तितुं स्त्रीत्वं न
समर्थं हि स्त्री न समर्थेत्यर्थः यद्वा स्त्रीत्वमिस्वरूपं स्त्री इति छेदः न समर्थमिति लिंगव्यत्यय आर्षः स्त्रीभूता त्वं सागरं व्यतिवर्तितुं न समर्था

ततः स कपिशार्दूलस्तेन वाक्येन तोषितः सीतामुवाच तच्छ्रुत्वा वाक्यं वाक्यविशारदः १ युक्त
रूपं त्वया देवि भाषितं शुभदर्शने सदृशं स्त्रीस्वभावस्य साध्वीनां विनयस्य च २ स्त्रीत्वं न तु सम
र्थं हि सागरं व्यतिवर्तितुम् मामधिष्ठाय विस्तीर्णं शतयोजनमायतम् ३ द्वितीयं कारणं य
च्च ब्रवीषि विनयान्विते रामादन्यस्य नार्हामि संसर्गमिति जानकि ४ एतत्ते देवि सदृशं पत्न्यास्त
स्य महात्मनः का ह्यन्या त्वामृते देवि ब्रूयाद्वचनमीदृशम् ५ श्रोष्यते चैव काकुत्स्थः सर्वं निर
वशेषतः चेष्टितं यत्त्वया देवि भाषितं च ममाग्रतः ६ सीतारामाभ्यां नमः सीतारामाभ्यां

हीत्यर्थः स्त्रीणां भीरुस्वभावत्वात्तत्तु भूषणमेवेति भावः ३ ४ ईदृशं वचनं त्वया सह न यास्यामीत्येतद्वचनं त्वद्भिन्ना ईदृशमपि
दीदृशं वचः का ब्रूयात् ५ चेष्टितं उद्बन्धनादिकं ममाग्रतः भाषितं एवं तत्सर्वं कथितं च तत्काकुत्स्थो निरवशेषतः श्रोष्यते ६

मयातु स्नेहप्रस्कन्नमनसा स्नेहशिथिलमनसा बुध्या राम प्रियचिकीर्षया बहुभिः कारणैर्हेतुभिरुपपन्नमेतद्वचः समुदीरितम् ७ रामसमीपन
यनोक्तौ हेतुमाह लंकाया इति रामेण पदातिना लंकायाः दुष्प्रवेशत्वात् महोदधेर्दुस्तरत्वाच्च आत्मनः सामर्थ्यसत्वाच्च ८ रघुबंधुना र
घुसगोत्रेण रामेण त्वां समानेतुं रामयितुमिच्छामि सदाहृतमेतत्तदपि गुरौ रामस्नेहे हेतत्व यि भक्त्या चोक्तं न तु निजबलगर्वादित्यर्थः

कारणैर्बहुभिर्देवि रामप्रियचिकीर्षया स्नेहप्रस्कन्नमनसा मयैतत्समुदीरितम् ७ लंका
याः दुष्प्रवेशत्वाद्दुस्तरत्वान्महोदधेः सामर्थ्यादात्मनश्चैव मयैतत्समुदीरितम् ८ इ
च्छामि त्वां समानेतुमद्यैव रघुबंधुना गुरुस्नेहेन भक्त्या च नान्यथा समुदाहृतम् ९ य
दि नोत्सहसे यातुं मया सार्धमनिंदिते अभिज्ञानं प्रयच्छ त्वं जानीयाद्राघवो हि यत् १० ए
वमुक्ता हनुमता सीता सुरसुतोपमा उवाच वचनं मंदं बाष्पप्रग्रथिताक्षरम् ११ इदं श्रेष्ठ
मभिज्ञानं ब्रूयास्त्वं तु मम प्रियम् शैलस्य चित्रकूटस्य पादे पूर्वोत्तरे पदे १२ सीताया मा

९ यदीति उत्सहसे प्रकल्प यी लोकोच्चैत्यर्थः १० एवमुक्ताम अभिज्ञानं देहीत्युक्तामेदं सु या सुवाष्पेण ग्रंथित वर्णा तस्मात्खलेन ग्रन्थि
ताक्षरावाणी पमिनेन तद्वचनमुवाच ११ इदं रहस्यवृत्तांत कथा तद्रूपं रहस्य वृत्तांतत्वादेवान्यासाक्षेन सश्रेष्ठं तदेवाह शैलस्येति पूर्वोत्तरे
ईशानदिक्स्थ पादे प्रत्यन्तपर्वतरूपे पदे स्थाने १२

मंदाकिन्याविदूरतःमंदाकिनीसमीपे सिद्धैराश्रितेबहुमूलफलोदकेतस्मिन्देशेतापसाश्रमवासिन्यातापसाश्रमेवसन्त्याममइदं
वक्ष्यमाणमभिज्ञानंममप्रियंप्रतित्वंब्रूयाइतिशेषः १३ समुपाविशंसमुपविष्टाभूवंअनन्तरंहनूमंतमुद्दिश्याभिज्ञानेवक्तुमुपक्रां
तादेवीरामंसंबोध्यकिमर्थंकथयतीतिचेत् स्वयंरामभिज्ञानंवक्तुमुपक्रांतात्वामेवाभिमुखीकृत्यएवमुक्तरंशादा

तापसाश्रमवासे च शाकमूलफलोदके तस्मिन्सिद्धाश्रमे देशे मंदाकिन्या ह्यदूरतः १३ त
स्योपवनखंडेषु नानापुष्पसुगंधिषु विहृत्य सलिलक्लिन्ना तवांके समुपाविशम् १४
ल ततो मांससमायुक्तो वायसः पर्यतुंडयत् तमहं लोष्टमुद्यम्य वारयामि स्म वायसम् १५ दा
रयन्स च मां काकस्तत्रैव परिलीयते न चाप्युपारमन्मांसाद्भक्षार्थी बलिभोजनः १६

दित्तिहनूमतारामायवाच्यमितिनदोषः १४ मांससमायुक्तःमांसेछायुक्तःसन्पर्यतुंडयत्पर्यखंडयत् तुडितोडन
इतिधातुःस्वार्थेणिजादिकःलनांतरेइतिशेषःलोष्ठंमत्पिंडं १५ तत्रैवपरिलीयतेअंतर्हितोभवतिनदेशांतरंगच्छतिमन
चमांसात्मांसविदारणात्भक्ष्यार्थीउपाममत् बलिभोजनःकाकः १६

अथ पक्षितो क्रुद्धायां मयि रक्षाणां वासो दाघीयोत्कर्षिसांत दानीं वसनेत्वं समानेसति त्वयाहं स्वस्त वसनादृष्टा ततस्त्वया विहसिता तदा तत्परिहासकाले क्रुद्धा सम्यग्लज्जिता च भक्षणात् गृध्रेणा भक्ष्यलुब्धेन काकेन दारितास ती त्वामुपागता १७ १८ ततस्तदनंतरं वायसात् समारसोन श्रांताहमासीनस्पते उत्संगमाविश्रांत तः परिहासमात्रं कृत्वा तूष्णीमिति

उ० कथं त्वं चारुशृंगो क्रुद्धायां मयि पक्षिणा स्रस्यमाने तु वसने ततो दृष्टा त्वया ह्यहम् १७ त्वया विहसिता चाहं क्रुद्धा संलज्जिता तदा भक्षगृध्नेन काकेन दारिता त्वामुपागता १८ आसीनस्य च ते श्रांता पुनरुत्संगमाविशम् क्रुध्यंती च प्रहृष्टेन त्वयाहं परिसांत्विता १९ बाष्पपूर्णमुखी मंदं चक्षुषी परिमार्जती लक्षिताहं त्वया नाथ वायसेन प्रकोपिता २० परिश्रमात्प्रसुप्ता च राघवांके स्म्यहं चिरम् पर्यायेण प्रसुप्तश्च मामांके भरताग्रजः २१ ११

छ तिभवति क्रुध्यंती प्रहृष्टेन त्वया परिसांत्विता १९ प्रात एव बाष्पपूर्णमुखी चक्षुषी च मंदं परिमार्जती हे नाथ वायसेन प्रकोपिता त्वया लक्षितास्मि २० अथ हे राघव अहं त्वंके परिश्रमात्प्रसुप्तास्मि हे भरताग्रज त्वं च पर्यायेण मम अंके प्रसुप्तः २१

१८२ १८३ १८४ १८५ १८६ आशिताभुक्तवती समाक्षिपन्जग्राह १८७ पंगूकृतलब्धगतिः पराक्रमो यस्य १८८ सागरे

जगाम वायुमार्गे च गरुत्मानिव मारुतिः हनूमान्मेघजालानि प्रकर्षन्मारुतो यथा १८२ कालागुरुसवर्णानि रक्तपीतासितानि च कपिनाकृष्यमाणानि महाभ्राणि चकाशिरे १८३ प्रविशन्नभ्रजालानि निष्पतंश्च पुनः पुनः प्रावृषीन्दुरिवाभाति निष्पतन्प्रविशंस्तथा १८४ प्रदृश्यमानः सर्वत्र हनूमान्मारुतात्मजः भेजेऽम्बरं निरालम्बं लम्बपक्ष इवाद्रिराट् १८५ प्लवमानं तु तं दृष्ट्वा सिंहिका नाम राक्षसी मनसा चिन्तयामास प्रवृद्धा कामरूपिणी १८६ अद्य दीर्घस्य कालस्य भविष्याम्यहमाशिता इदं मम महासत्त्वं चिरस्य वशमागतम् इति संचिन्त्य मनसा छायामस्य समाक्षिपत् १८७ छायायां गृह्यमाणायां चिन्तयामास वानरः समाक्षिप्तोऽस्मि सहसा पंगूकृतपराक्रमः १८८ प्रतिलोमेन वातेन महानौरिव सागरे तिर्यगूर्ध्वमधश्चैव वीक्षमाणस्तदा कपिः १८९ ददर्श स महासत्त्वमुत्थितं लवणाम्भसि तं दृष्ट्वा चिन्तयामास मारुतिर्विकृताननम् १९०

न

महानौर्यथा प्रतिलोमेन वातेन नष्टगतिः क्रियते तथाहं केनचिन्नष्टगतिः कृतः १८९ महासत्त्वं स्त्रीरूपं प्राणिनाम् १९० आम

चिंतया ६

स तत्रेति त्वयि स्वपतीमयि जागर्त्या समित्यर्थः सुप्तप्रबुद्धां राघवाङ्के सप्तात ततः शुद्धा मत एव तत्राघवाङ्कात् दूरस्थितो वायसः पुनरागम्य स्तनान्तरे विददार व्यलिखत् २२ एतदेव तमसि ज्ञानवचनानुवादः ग्रथ यदहं मन्ते शोभव्य तान्तकः पुनेत ते इति ततः पुनः पुनर्विलेख नाहं ततो मुक्तैः शोणितविन्दुभिः रामः समुत्थितो भूत् सुखसुप्तो पीतिश्रेष्ठः २२ स महाबाहु स्तदा स्तनयोर्वितुन्नां मां दृ

स तत्र पुनरेवाथ वायसः समुपागमत् ततः सुप्तप्रबुद्धां मां राघवाङ्कात्समुत्थिताम् वायसः समुपागम्य विददार स्तनान्तरे २२ पुनः पुनरथोत्पत्य विददार स मां भृशम् ततः समुत्थितो रामो मुक्तैः शोणितबिन्दुभिः २३ स मां दृष्ट्वा महाबाहुर्वितुन्नां स्तनयोस्तदा आशीविष इव क्रुद्धः श्वसन्वाक्यमभाषत २४ केन ते नागनासोरु विक्षतं वै स्तनान्तरम् कः क्रीडति सरोषेण पञ्चवक्त्रेण भोगिना २५ वीक्षमाणस्ततस्तं वै वायसं समवैक्षत नखैः सरुधिरैस्तीक्ष्णैर्मामेवाभिमुखं स्थितम् २६ पुत्रः किल स शक्रस्य वायसः पततां वरः धरान्तरगतः शीघ्रं पवनस्य गतौ समः २७

ष्वा क्रुद्धः २४ २५ वीक्षमाणस्तत स्तं तं स्थानं दृष्टवान् इत्यर्थः २६ देविको सावेषं विधः काक इति हनूमतः शंकायामाह पुत्र इति शक्रपुत्रो जयन्तः स तु वायसो वायसरूपधारीत्यर्थः धरान्तरगतः भूमिं प्राप्तः शीघ्रगतौ

रा० वा० सुं० कोपेनसंवर्तितेईक्षणेयेनसः २८ दर्भसंस्तरणात् संस्तरणात् गृहीत्वा दर्भमुष्टिरेकमितिशेषः योजयत् ब्राह्मेणास्त्रेदेवतामंत्रेणायोज
१४१ यत् अभिमंत्रितवानित्यर्थः द्विजं काकम् २९ ३० अनुसृतः विविधांगतिं विविधंस्थानं जगाम एतद्विवृणोति त्रीनिति इमंल्लो

ततस्तस्मिन्महाबाहुः कोपसंवर्तितेक्षणः वायसे कृतवान् क्रूरां बुद्धिं मतिमतां वरः २८ सदर्भसंस्त
राद्गृह्य ब्राह्मेणास्त्रेणायोजयत् स दीप्त इव कालाग्निर्जज्वालाभिमुखो द्विजम् २९ स तं प्रदी
प्तं चिक्षेप दर्भं तं वायसं प्रति ततस्तु वायसं दर्भः सोऽम्बरेऽनुजगाम तम् ३० अनुसृष्टस्तदा काको
जगाम विविधां गतिम् त्राणकाम इमं लोकं सर्वं वै विचचार ह ३१ स पित्रा च परित्यक्तः सुरैश्च सम
हर्षिभिः त्रील्लोकान्संपरिक्रम्य तमेव शरणं गतः ३२ स तं निपतितं भूमौ शरण्यः शरणागतम् व
धार्हमपि काकुत्स्थः कृपया पर्यपालयत् ३३ परिद्यूनं विषण्णं च स तमायान्तमब्रवीत् मोघमस्त्रं
न शक्यं तु ब्राह्मं कर्तुं तदुच्यताम् ३४

कं भूर्लोकादि सत्यलोकांतं ३१ पित्रा परित्यक्तः स्वर्गेपीति शेषः पित्रेसुप
लक्षणं ब्रह्मादीनां ३२ पर्यपालयत् प्राणरक्षणेनेति शेषः ३३ परिद्यूनं क्षीणप्राणं ब्राह्ममस्त्रं मोघं कर्तुं न शक्यम् अतस्त
दुच्यताम् तत्संहार्यं वस्तु उच्यतामित्यर्थः ३४

रा०
१४१

सः हि नस्तु दक्षिणाक्षि वञ्चकः स तु काकः परिरक्षितः परिरक्षितवानात्मानमिति शेषः ३५ सः जयंतः ३६ एवं हनूमता मे कस्तं वेघमभिज्ञानमभिधाय दुःखावेशात्सममेव बुद्धिस्पंदो वाक्यसौपानं भं प्रार्थयते मत्कृते ससादि स्थाक चतुष्पेन यः त्व

ततस्तस्याक्षिकाकस्य हिनस्ति स्म स दक्षिणम् दत्वा तु दक्षिणं नेत्रं प्राणेभ्यः परिरक्षितः ३५
स रामाय नमस्कृत्वा राज्ञो दशरथस्य च विसृष्टस्तेन रामेण प्रतिपेदे स्वमालयम् ३६ म
त्कृते काकमात्रे तु ब्रह्मास्त्रं समुदीरितम् कस्माद्यो माहरत्वत्तः क्षमसे तं महीपते ३७ स कु
रुष्व महोत्साहां कृपां मयि नरर्षभ त्वया नाथवती नाथ ह्यनाथा इव दृश्यते ३८ आनृशंस्यं
परो धर्मस्त्वत्त एव मया श्रुतः जानामि त्वां महावीर्यं महोत्साहं महाबलम् अपारपारमक्षो
भ्यं गांभीर्यात्सागरोपमम् भर्तारं ससमुद्राया धरण्या वासवोपमम् ४० ४० ४०

तो यामाम हरत् तं एवं मां कस्मात् क्षमसे उपेक्षसे इत्यर्थः ३७ स त्वं मम महोत्साह रूपां मयि कृपां कुरु त्वया नाथवत्यपि
मह्यं क्षमानाथा अनाथेव दृश्यते ३८ आनृशंस्यं दया तं च प्राक्श्रुतमर्थं इति चेत्तत्राह जानामीति ३९ अपारपारं
मर्यादारहितं देशकालादिपरिच्छेदहीनमित्यर्थः जानामीत्यन्वयः ४०

४१ अपहन्तुमेतं राममेवंभवमाह ननागारतिश इतिसमाधितुं प्रतिभट तयास्थित्वानिरोद्धुमित्यर्थः ४२ संभ्रमः आदरः ४३ ४४ ४५ ५

एवमस्त्रविदांश्रेष्ठःसत्ववान्बलवानपि किमर्थमस्त्रैरक्षस्सुनयोजयतिराघवः ४१ ननागा नापिगंधर्वानासुरानमरुद्गणाः रामस्यसमरेवेगंशक्ताःप्रतिसमाधितुम् ४२ तस्यवीर्यवतः कश्चिद्यद्यस्तिमयिसंभ्रमः किमर्थंनशरैस्तीक्ष्णैःक्षयंनयतिराक्षसान् ४३ भ्रातुरादेश मादायलक्ष्मणोवापरंतपः कस्यहेतोर्नमांवीरःपरित्रातिमहाबलः ४४ यदितौपुरुषव्या घ्रौवाय्वग्निसमतेजसौ सुराणामपिदुर्धर्षौकिमर्थंमामुपेक्षितः ४५ ममैवदुष्कृतंकिंचित् महदस्तिनसंशयः समर्थावपितौयन्मांनावेक्षेतेपरंतपौ ४६ वैदेह्यावचनंश्रुत्वाकरुणं साश्रुभाषितम् अथाब्रवीन्महातेजाहनूमान्हरियूथपः ४७ त्वच्छोकाविमुखोरामोदेवि सत्येनतेशपे रामेदुःखाभिपन्नेचलक्ष्मणःपरितप्यते ४८

४६ ४७ कस्माद्राक्षसान्नभयंनकरोतीत्य स्योत्तरं त्वच्छोकेतित्वद्वियोगजशोकेनसर्वकार्यविमुख इत्यर्थः ४८ ४८

कथंचिन्द्रवतीं दृष्ट्वा हतः परेते परिशोचितुं कालो न पतत् इदं मुहूर्तं अस्मिन्मुहूर्ते दुःखानामंते द्रक्ष्यसि ४९ ५० ५१ नियोग
सारे वक्ष्यति ब्रूहीति ५२ ५३ ममार्थे मत्प्रतिनिधिलेन सपर्ये ५४ लक्ष्मणः पूर्वं मारीचवधापगते रामे तत्र्य च गमनाय सम्य

कथंचिन्द्रवतीं दृष्ट्वा न कालः परिशोचितुम् इदं मुहूर्तं दुःखानां द्रक्ष्यस्यंतमनिंदिते ४९ ता
वुभौ पुरुषव्याघ्रौ राजपुत्रौ महाबलौ त्वद्दर्शनकृतोत्साहौ लंकां भस्मीकरिष्यतः ५० हत्वा च
समरे क्रूरं रावणं सहबांधवम् राघवस्त्वां विशालाक्षि स्वां पुरीं प्रति नेष्यति ५१ ब्रूहि यद्राघ
वो वाच्यो लक्ष्मणश्च महाबलः सुग्रीवो वापि तेजस्वी हरयो वा समागताः ५२ इत्युक्तवति
तस्मिंश्च सीता पुनरथाब्रवीत् ५३ कौशल्या लोककर्तारं सुषुवे यं मनस्विनी तं ममार्थे सुखं
पृच्छ शिरसा चाभिवादय ५४ स्रजश्च सर्वरत्नानि प्रिया याश्च वरांगनाः ऐश्वर्यं च विशालायां
पृथिव्यामपि दुर्लभम् ५५

कृतया रूप्य इति त्यात्वा तस्य महिमोचनप्रवृत्तस्य उपेक्षा माभूदिति विशिष्य कुशलप्रश्नं ब्रूहि साहस्रजश्चेति दुर्लभमित्यत्र संबंधो सन्दर्षः ५५

अनुप्रव्राजितो रामं सुमित्रस्त्र सहतिशेषः ५६ ५७ समाचरन् परिचरन् ५८ ५९ रामस्य मत्तोप्यतिप्रिय ६० यस्यां धुरि यत्र कार्ये राघवः पं द्दष्ट्वा व

पितरं मातरं चापि संमान्याभिप्रसाद्य च अनुप्रव्राजितो रामं सुमित्रा येन सुप्रजा ५६ आनुकूल्ये न धर्मात्मा त्यक्त्वा सुखमनुत्तमम् अनुगच्छति काकुत्स्थं भ्रातरं पालयन्वने ५७ सिंहस्कंधो महाबाहुर्मनस्वी प्रियदर्शनः पितृवद्वर्त्तते रामे मातृवन्मां समाचरन् ५८ ह्रियमाणां तदा वीरो न तु मां वेद लक्ष्मणः वृद्धोपसेवी लक्ष्मीवान् शक्तो न बहुभाषितुम् ५९ राजपुत्रः प्रियः श्रेष्ठः सदृशः श्वशुरस्य मे मत्तः प्रियतरो नित्यं भ्राता रामस्य लक्ष्मणः ६० नियुक्तो धुरि यस्यां तु तामुद्वहति वीर्यवान् यं दृष्ट्वा राघवो नैव वृत्तमार्यमनुस्मरेत् ६१ स ममार्थाय कुशलं वक्तव्यो वचनान्मम मृदुर्नित्यं शुचिर्दक्षः प्रियो रामस्य लक्ष्मणः ६२

त्तमतीति मार्यं दशरथं नानुस्मरेत् पितृवत्सम्मानकत्वात् पितरं न स्मरतीति भावः ६१ स मम स प्रियो लक्ष्मणः ममार्थाय मत्प्रयोजनोन्मुख्याय मम वचनाद्वक्तव्यः सीतात्वां कुशलं पृच्छतीति वक्तव्य इत्यर्थः ६२

हि निश्चयेन यथा दुःखक्षयकरो भवेत्तद्दुःखवं क्षयहेतु प्रवृत्तिं यथा भवेत्तथा वक्तव्यमिति पूर्वेणान्वयः हे हरिपुङ्गव अस्मिन्कार्यनि
र्वाहे त्वं प्रमाणं यथा कार्यनिर्वाहो भवति तथा कुर्विति भावः ६३ त्वत्समारंभात्त्वदुत्साहात् ६४ ऊर्ध्वं मासात् रावणाकृतमासतः पाव

यथा हि वानरश्रेष्ठ दुःखक्षयकरो भवेत् त्वमस्मिन्कार्यनिर्योगे प्रमाणं हरिपुङ्गव ६३ राघवस्त्व
त्समारंभान्मयि यत्नपरो भवेत् इदं ब्रूयाश्च मे नाथं शूरं रामं पुनः पुनः ६४ जीवितं धारयिष्या
मि मासं दशरथात्मज ऊर्ध्वं मासान्न जीवेयं सत्येनाहं ब्रवीमि ते ६५ रावणेनोपरुद्धां मां निकृ
त्या पापकर्मणा त्रातुमर्हसि वीर त्वं पातालादिव कौशिकीम् ६६ ततो वस्त्रगतं मुक्त्वा दिव्यं
चूडामणिं शुभम् प्रदेयो राघवायेति सीता हनुमते ददौ ६७ प्रतिगृह्य ततो वीरो मणिरत्नमनुत्त
मम् अङ्गुल्या योजयामास न ह्यस्य प्राभवद्भुजः ६८ मणिरत्नं कपिवरः प्रतिगृह्याभिवाद्य च
सीतां प्रदक्षिणं कृत्वा प्रणतः पार्श्वतः स्थितः ६९ हर्षेण महता युक्तः सीतादर्शनजेन सः हृदयेन ग
तो रामं शरीरेण तु विष्ठितः ७०

धिं न सहिष्य इति भावः ६५ निकृत्या राक्षसीकृतनिग्रहेणोपरुद्धां मां पातालमग्नां कुशिकगो
त्रां भुवं भगवानिव त्रातुमर्हसि ६६ ६७ चूडामणिं शिरोरत्नं अङ्गुल्या योजयामास यद्यस्य चूडामणेः परिधिस्थाने हेमपुष्पस्य केशमवेशार्थं प
दं यत्र तत्राङ्गुलिप्रवेशयामास तस्य भुजोन प्राभवत् ६८ पार्श्वतः स्थितः सीतासमीपे स्थितः ६९ ७०

रा० आ० सुं० महार्हे विद्रुमे तस्य प्रभावात्तस्मिन् विशेषाद्दाक्षती निर्याताः तत्पाने तत्पाजनकेन पापाम जयात्मज यानायः तं मणिवरमुपगृह्य गिरिवर
१४४ पवनाद् धृतमुक्तः पर्वतश्रेष्ठो ध्वेमागोय पवन कंपितः पश्चात्तेन कंपेन मुक्तः सह तस्मुदितमनाः प्रथममपि पूर्वं सीतायाः प्रदर्शनेन दुःखं वक्ष्यात् कंपितात्सीतादर्शनेन ततः कंपान्मुक्तस्ततः सुखितमनाः सन् प्रतिसंक्रमेणमति प्रयाणं प्रचक्रमे इत्यर्थः ७१ इत्यार्षे त्रिंशः सर्गः ॥ ३८ ॥ एतादभिज्ञानं रामस्याभिज्ञातं रामेणाभिज्ञानमित्यर्थः १ त्रयाणां संस्मरिष्यति कस्मिंश्चित्प्रोषितवस्थौ श्री ब्राह्मजन

मणिवरमुपगृह्य तं महार्हं जनकनृपात्मजया धृतं प्रभावात् ॥ गिरिवरपवनावधूतमुक्तः सुखितमनाः प्रतिसंक्रमं प्रपेदे ॥ ७१ ॥ **इति श्रीमद्रामायणे वाल्मीकीये सुंदरकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥** मणिं दत्वा ततः सीता हनूमन्तमथाब्रवीत् अभिज्ञानमभिज्ञातमेतद्रामस्य धीमतः १ मणिं दृष्ट्वा तु रामो वै त्रयाणां संस्मरिष्यति वीरो जनन्या मम च राज्ञो दशरथस्य च २ स भूयस्त्वं समुत्साहे चोदितो हरिसत्तम अस्मिन्कार्यसमारम्भे प्रचिन्तय यदुत्तरम् ३ ३

न्या इति पाठितं ब्रह्मणा काले मम जननीं रमं मणिं दशरथसन्निधौ जनकहस्ताद्दापयत् मे शिरोभूषणा तत्पाम हृदत्तवती अतो मम जनन्यां दशरथं मां च स्मरिष्यतीत्यर्थः २ स त्वमस्मिन्समुत्साहे भूयश्चोदितो भविष्यसितेद त्रकार्यसमुत्साहं प्रचोदितः सन् यदुत्तरं उत्तरकर्तव्यं तच्चिन्तय ३

रा० सुं०
१४४

स

ममकार्यचिंतने प्राप्तिरिति चेत्तत्राह त्वमिति कार्यनिर्योगे कार्यसंघट्टने प्रमाणं व्यवस्थापकः यत्नस्य आस्थाय यत्नो दुःखक्ष
यकरो भवेत् चिंतय ४ यत्नमास्थायेति यत्नं उद्यमं प्रवृत्यैर्यमित्यर्थः ५ ६ दुःखांबुसंरोधात् ग्रंबुनिःसरणे ध्वंसे यस्मिन्निति संबसंरोधः समुद्रः दुःख

त्वमस्मिन्कार्यनिर्योगे प्रमाणं हरिसत्तम तस्य चिंतय यत्नो यत्नो दुःखक्षयकरो भवेत् ४ हनूमन्यत्नमास्था
य दुःखक्षयकरो भव ५ स तथेति प्रतिज्ञाय मारुतिर्भीमविक्रमः शिरसा वंद्य वैदेहीं गमनायोपचक्रमे
ज्ञात्वा संप्रस्थितं देवी वानरं मारुतात्मजम् बाष्पगद्गदया वाचा मैथिली वाक्यमब्रवीत् ७ कुशलं हनु
मन् ब्रूयाः सहितौ रामलक्ष्मणौ सुग्रीवं च सहामात्यं वृद्धान्सर्वांश्च वानरान् ८ ब्रूयास्त्वं वानरश्रेष्ठ कुश
लं धर्मसंहितं यथा च स महाबाहुर्मां तारयति राघवः अस्माद्दुःखांबुसंरोधात्त्वं समाधातुमर्हसि ९ जीवं
तीं मां यथा रामः संभावयति कीर्तिमान् तत्त्वया हनुमन्वाच्यो वाचा धर्ममवाप्नुहि १० १० सीताराम

रूपात्समुद्रादित्यर्थः यथा तारयति तथा समाधातुं यत्न कर्तुमर्हसि ९ वाचा वाक् कृत महायेन १० १०

तुमीह

रा०वा०सुं० ११ उक्तमेवादाय पुनराह मत्संदेशयुता इति १२ १३ १४ १५ पर्जन्यमिदं १६ महीं शासितेजेतुमुद्युक्ते इत्यर्थः किमर्थं तत्राह त्वन्नि
१४५

निसमुत्साहयुक्तञ्च श्रुत्वा वाचः स्त्वामयेरिताः वर्धिष्यते दाशरथेः पौरुषं मदवाप्तये ११ मत्संदेशयुता वाचस्त्वत्तः श्रुत्वैव राघवः पराक्रमं मतिं वीरो विधिवत्संविधास्यति १२ सीतायास्तु वचनं श्रुत्वा हनूमान्मारुतात्मजः शिरस्यञ्जलिमाधाय वाक्यमुत्तरमब्रवीत् १३ क्षिप्रमेष्यति काकुत्स्थो हर्यृक्षप्रवरैर्वृतः यस्ते युधि विजित्यारीन् शोकं व्यपनयिष्यति १४ नहि पश्यामि मर्त्येषु नासुरेषु सुरेषु वा यस्तस्य क्षिपतो बाणान् स्थातुमुत्सहते ततः १५ अप्यर्कमपि पर्जन्यमपि वैवस्वतं यमम् स हि सोढुं रणे शक्तस्तव हेतोर्विशेषतः १६ स हि सागरपर्यन्तां महीं शासितुमीहते त्वन्निमित्तो हि रामस्य जयो जनकनन्दिनि १७ तस्य तद्वचनं श्रुत्वा सम्यक् सत्यं सुभाषितम् जानकी बहु मेने ऽथ वचनं चेदमब्रवीत् १८ ततस्तं प्रस्थितं सीता वीक्ष माणा पुनः पुनः भर्तृस्नेहान्वितं वाक्यं सौहार्दादनुमानयत् १९ यदि वा मन्यसे वीर वसैकाहमरिंदम कस्मिंश्चित्संवृते देशे विश्रान्तः श्वो गमि

सुंद

मित्तमिति त्वत्प्राप्तिप्रयोजन इत्यर्थः १७ १८ भर्तृस्नेहान्वितामस्नेहान्वितं हनुमद्वाक्यं सौहार्दाद्रामप्रेम्णा अनुमानयत् अपूजयत् १९ २०

रामा०
१४५

रा० वा० सुं०
९५

१९१ यथार्थतत्त्वेन छायाग्राहकतारूपार्थेन सिंहिकेयं १९२ पातालं नाम्बरसन्निभं पाताल्लोकाकाशसदृशं १९३ १९४ स कपिः तस्याः विकृतं मुखं कायमात्रं स्वशरीरं केवलपर्याप्तं शरीरप्रमाणं मर्माणि च भेदनार्थं ददर्शेत्यन्वयः १९५ तस्या वक्त्रे आत्मानं मुहुः संक्षिप्य वधिके

कपिराजस्य यथाख्यातं सत्त्वमद्भुतदर्शनम् छायाग्राहि महावीर्यं तदिदं नात्र संशयः १९१ स तां बुद्ध्वार्थतत्त्वेन सिंहिकां मतिमान्कपिः व्यवर्धत महाकायः प्रावृषीव बलाहकः १९२ तस्य सा कायमुद्वीक्ष्य वर्धमानं महाकपेः वक्त्रं प्रसारयामास पातालाम्बरसन्निभम् १९३ घनराजीव गर्जन्ती वानरं समभिद्रवत् १९४ स ददर्श ततस्तस्या विकृतं सुमहन्मुखम् कायमात्रं च मेधावी मर्माणि च महाकपिः १९५ स तस्या विवृते वक्त्रे वज्रसंहननः कपिः संक्षिप्य मुहुरात्मानं निपपात महाकपिः आस्ये तस्या निमज्जन्तं ददृशुः सिद्धचारणाः ग्रस्यमानं यथा चन्द्रं पूर्णं पर्वणि राहुणा १९७ ततस्तस्या नखैस्तीक्ष्णैर्मर्माण्युत्कृत्य वानरः उत्पपाताथ वेगेन मनःसंपातविक्रमः १९८ तां तु दृष्ट्या च धृत्या च दाक्षिण्येन निपात्य च कपिप्रवीरो वेगेन ववृधे पुनरात्म

संकुच्य निपपातेत्यन्वयः १९६ १९७ मनःसंपातविक्रमः मनोगमनसमानगतिः १९८ दृष्ट्या सूक्ष्मदर्शितेन धृत्या धैर्येण दाक्षिण्येन कालोचितकृत्यचातुर्येण च तां निपात्य निहत्य वेगेनोत्पपात १९९

मोक्षितो भवेत् अयं द्वयमपि त्वागमनेनेति शेषः २१ २२ तवादर्शनेति तवादर्शनजः शोकः दुःखाद्दुःखपरामृष्टां प्रति दुःखं प्राप्तां मां दीपयन्निव भूयः परितापयेदित्यन्वयः २३ अयं संदेहः महान् संदेहो ममाग्रतः पुरस्तादिव तिष्ठति कोयंतत्राह त्वत्सहायेष्विति सार्द्धात्साधकस्य

मम चाप्यल्पभाग्यायाः सान्निध्यात्तव वानर। अस्य शोकस्य महतो मुहूर्त्तं मोक्षितो भवेत् २१ गते हि हरिशार्दूले पुनरागमनाय तु। प्राणानामपि संदेहो मम स्यान्नात्र संशयः २२ तवादर्शनजः शोको भूयो मां परितापयेत्। दुःखाद्दुःखपरामृष्टां दीपयन्निव वानर २३ अयं च वीर संदेहस्तिष्ठतीव ममाग्रतः। सुमहांस्त्वत्सहायेषु हर्यृक्षेषु हरीश्वर २४ कथं नु खलु दुष्पारं तरिष्यंति महोदधिम्। तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ २५ त्रयाणामेव भूतानां सागरस्येह लंघने। शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा २६ तदस्मिन् कार्यनिर्योगे वीरैवं दुरतिक्रमे। किं पश्यसि समाधानं त्वं हि का

१२२ सुंदर

तव सहायभूतेषु मिलितेषु हर्यृक्षेषु हरीश्वरः सुग्रीवः २४ कथं नु दधिं तरिष्यंति सैन्यानि कथं तरिष्यति सुग्रीवः तौ वा कथं तरिष्यतः सर्पिः २५ एवं संदेहबीजमाह त्रयाणामेवेति २६ किं समाधानं पश्यसि किं कार्यसिद्ध्युपायं पश्यसि २७

ननुकिंतैरागतैरहमेवपर्याप्तोस्यकार्यस्येत्यत्राह काममिति त्वयाकार्यसाधनेतवयशस्योपशस्करः फलोदयोजयरूपफलस्यप्राप्तिर्भवतिन तुममस्येत्यर्थः २८ किंतर्हियुचितंतत्राह बलैरिति समग्रैर्बलैः सहागत्यएवरणंसंयुगेतिजित्यजित्वाविजयीसन्मांगृहीत्वास्वपुरंयायात्

कामममस्यत्वमेवैकः कार्यस्यपरिसाधने पर्याप्तः परवीरघ्नयशस्यस्तेबलोदयः २८ बलैःसमग्रै र्यदिमांएवरणंजित्वसंयुगे विजयीस्वपुरंयायात्तत्तुमेस्याद्यशस्करम् २९ शरैस्तुसंकुलांकृत्वा लंकांपरबलार्दनः मांनयेद्यदिकाकुत्स्थस्तत्तस्यसदृशंभवेत् ३० तद्यथातस्यविक्रांतमनु रूपंमहात्मनः भवेदाहवशूरस्यतथात्वमुपपादय ३१ तदर्थोपहितंवाक्यंप्रश्रितंहेतुसंहितम् निशम्यहनुमान्शेषंवाक्यमुत्तरमब्रवीत् ३२ देविहर्यृक्षसैन्यानामीश्वरःप्लवतांवरः सुग्रीवःसत्वसंप न्नस्तवार्थेकृतनिश्चयः ३३ सवानरसहस्राणांकोटिभिरभिसंवृतः क्षिप्रमेष्यतिवैदेहिराक्षसानां

तत्तुमेयशस्करंस्यात् २९ शरैरित्यत्रपुराहशरैरिति ३० तस्याहवशूरस्याहवशूरस्यानुरूपंविक्रांतंपराक्रमोयथाभवेत्तथात्वमुपपाद येत्यर्थः ३१ अर्थोपहितंअर्थयुक्तंप्रश्रितंस्निग्धंहेतुसंहितंयुक्तंतत्सीतावाक्यंनिशम्यशेषेपूर्वमनुक्तमुत्तरेवाक्यमब्रवीत् ३२ तदेव वाक्यमाहदेवीति ३३।३४

कपयेष्यतीत्यत आह तस्यविक्रमेति मनःसंकल्पवदति दूरपतनशीलाः ३५ तदेवस्पष्टमाह येषामिति नसज्जते न प्रतिबद्धा भवति महत्स्वपि
कर्मसु न सीदंति न शिथिला भवंति ३६ सागरैर्धराधरैश्च सहिता भूमिः ३७ प्रत्यवरो हीनवलपराक्रमः ३८ अहं तदपेक्षयान्यूनवलोपी

तस्यविक्रमसंपन्नाः सत्ववंतोमहावलाः मनःसंकल्पसंपातानिदेशेहरयःस्थिताः ३५ येषांनो
परिनाधस्तान्नतिर्यक्सज्जतेगतिः नचकर्मसुसीदंतिमहत्स्वमिततेजसः ३६ असकृत्तैर्महोत्सा
हैःससागरधराधरैः प्रदक्षिणीकृताभूमिर्वायुमार्गानुसारिभिः ३७ मद्विशिष्टाश्चतुल्याश्चसंतित
त्रवनौकसः मत्तःप्रत्यवरःकश्चिन्नास्तिसुग्रीवसन्निधौ ३८ अहंतावदिहप्राप्तःकिंपुनस्तेमहा
वलाः नहिप्रकृष्टाःप्रेष्यंतेप्रेष्यंतेहीतरेजनाः ३९ तदलंपरितापेनदेविशोकोव्यपैतुते एको
त्पातेनवैलंकामेष्यंतिहरियूथपाः ४० ममपृष्ठगतौतौचचंद्रसूर्याविवोदितौ त्वत्सकाशंमहा
सत्वौनृसिंहावागमिष्यतः ४१

सर्वेः तेषां त्वाधिकवलत्वं लोकन्यायेन दृष्टांतेन धयति नहीति ३९ एकोत्पातेन एको
त्प्लवनेन ४० ननु भवत्वेवं हरीणामागमनं राघवयोस्तु कथं तत्राह ममेति ४१

रा० वा० सुं० विधमिष्यत व्यथ्यतः ४२ रघूणामानंद जनकमपत्यं ४३ कालकांक्षिणि दिवसगणानतत्परा ४४ ४५ ४६ ४७ ४८ ४९ ५० ५
१४७

तौहिवीरौनरवरौसहितौरामलक्ष्मणौ ॥ आगम्यनगरींलंकांसायकैर्विधमिष्यतः ४२ सगणंरावणं
हत्वाराघवोरघुनंदनः त्वामादायवरारोहेस्वपुरंप्रतियास्यति ४३ तदाश्वसिहिभद्रंतेभवत्वंका
लकांक्षिणी नचिराद्द्रक्ष्यसेरामंप्रज्वलंतमिवानलम् ४४ निहतेराक्षसेंद्रेचसपुत्रामात्यबांध
वे त्वंसमेष्यसिरामेणशशांकेनेवरोहिणी ४५ क्षिप्रमेष्यसिशोकस्यपरंपारंचमैथिलि रावणं
चैवरामेणनिहतंद्रक्ष्यसेचिरात् ४६ एवमाश्वास्यवैदेहींहनूमान्मारुतात्मजः गमनायमतिंकृ
त्वावैदेहींपुनरब्रवीत् ४७ तमरिघ्नंकृतात्मानंक्षिप्रंद्रक्ष्यसिराघवम् लक्ष्मणंचधनुष्पाणिं
लंकाद्वारमुपस्थितम् ४८ नखदंष्ट्रायुधान्वीरान्सिंहशार्दूलविक्रमान् वानरान्वानरेंद्राभा
क्षिप्रंद्रक्ष्यसिसंगतान् ४९ शैलांबुदनिकाशानांलंकामलयसानुषु नर्दतांकपिमुख्यानाम
चिरंश्रोष्यसिध्वनिम् ५० सतुमर्मणिघोरेणताडितोमन्मथेषुणा नशर्मलभतेरामःसिंहार्दि
तइवद्विपः ५१

रामस्य सर्वं पालत्वात्प्रिविचितै वात्तेद्रू स्वाहसत्विति ५१ ५१ ५१ ५१ ५११
राम० १४७

५२ सौमित्रिणा समः कश्चित्कोपि नास्तीति शेषः ५३ मत्संगमकालमात्रं मया रामस्य यः संगमस्तत्कालमात्रं प्रतीक्षस्वेत्यर्थः इत्येकोनचत्वारिंशः सर्गः ३९। आत्महितं आमदुःखनिरसनप्रयोजनं १ अर्धसंजातानि निष्पन्नवयः प्राप्तानि ततः परं जन्माभावाद्

श्च त्वं ते देवि शोकेन मा भूत्ते मनसोऽप्रियम्॥ शचीव भर्त्रा प्राक्तणपत्यौना भवती ह्यसि॥५२॥ रामाद्विशिष्टः कोन्योस्ति कश्चित्सौमित्रिणा समः॥ अग्निमारुतकल्पौ तौ भ्रातरौ रामसंश्रयो॥५३॥ नास्मिंश्चिरं वत्स्यसि देवि देशे रक्षोगणैरध्युषितेहि रौद्रे॥ न ते चिरादागमनं प्रियस्य क्षमस्व मत्संगमकालमात्रम्॥५४॥ हरिः ॐ इत्यार्षे रामायणे वाल्मीकीये सुंदरकाण्डे॥ एकोनचत्वारिंशः सर्गः॥३९॥ श्रुत्वा तु वचनं तस्य वायुसूनोर्महात्मनः उवाचात्महितं वाक्यं सीता सुरसुतोपमा १ त्वां दृष्ट्वा प्रियवक्तारं संप्रहृष्यामि वानर अर्धसंजातसस्येव वर्षं प्राप्य वसुंधरा २ यथा तं पुरुषव्याघ्रं गात्रैः शोकाभिकर्शितैः संस्पृशेयं सकामाहं तथा कुरु दयां मयि ३

शोभिताससस्यानि यस्याः सा यथा वर्षात्संपन्ना भवति तथाहमपि प्राप्तजीवितनाशाऽसतोपमात्वद्दर्शनादाहृतजीवितेति भावः २ सकामा तत्स्पर्शेच्छावती ३

न्या

अभिज्ञानं चूडामणिप्रापात्मकं दद्याः देहि तथा कोपात्काकस्यैकाक्षिशातनीं मिषीकां क्षिप्तवान् का कोऽरक्षित रूपपरमभिज्ञानं दद्याः श्रावयेत्यर्थः ४ अथ पाभिज्ञानान्तरमाह संदेशरूपेणाह मनःशिलाया इति पूर्वतने तिलके प्रनष्टे सति मनःशिलायास्तिलकः त्वया गंडपार्श्वे निवेशितः किल तं स्मर्तुमर्हसि इति मया प्रोक्तमिति ब्रूहीति शेषः ५ अथ च केवलसंदेशान्तरमाह स वीर्यवानिति ।

अभिज्ञानं च रामस्य दद्या हरिगणोत्तमः क्षिप्तामिषीकां काकस्य कोपादेकाक्षिशातनीम् ४
मनःशिलायास्तिलको गंडपार्श्वे निवेशितः त्वया प्रनष्टे तिलके तं किल स्मर्तुमर्हसि ५
स वीर्यवान्कथं सीतां हृतां समनुमन्यसे वसन्तीं रक्षसां मध्ये महेंद्रवरुणोपम ६ एवं चूडामणिर्दिव्यो मया सुपरिरक्षितः त्वां दृष्ट्वेव प्रहृष्यामि व्यसने त्वमहोदये ७ एष निर्यातितः श्रीमान्मया ते वारिसंभवः अतः परं न शक्ष्यामि जीवितुं शोकलालसा ८ असह्यानि च दुःखानि वाचश्च हृदयच्छिदः राक्षसीनां सुघोराणां त्वत्कृते मर्षयाम्यहम् ९ सीताराम

समनुमन्यसे सहसे रक्षस्यर्थः ६ दिव्यचूडामणिरेतावत्कालं सुपरिरक्षितः एवं व्यसने त्वामिव दृष्ट्वा प्रहृष्यामि एतत्सन्निधाने रक्षो मिथ्यावादि इति भावः ७ एष निर्यातितो दत्तस्त्वत्संभिज्ञानार्थमिति शेषः अतः शीघ्रमागमने एव कुशलमन्यथा परमं दुःखमिति भावः ८ त्वत्कृते त्वत्प्राप्तिप्रत्याशया मर्षयामि सहामि ९

१०यतोयं घोरस्तस्मद्दृष्टिस्त्वा कुष्टिस्त्वनसत्वा स्ववधिकालाद्दूर्ध्वंकृतविनाश निश्चयः तत्त्पूर्वमेवमरणोचित्याद्ववधिका लस्याधिकत्वेयिमासाद्दूर्ध्वमेवनजीविष्यामिकिंचत्वांविषज्यंतंविलंवं कुर्वंति यदिम एयंतदातयाश्रुत्वाक्षणमपिन

धारयिष्यामिमासंतुजीवितंप्राप्तमस्त्दनमासाद्दूर्ध्वेनजीविष्येत्वयाहीनात्मपात्मज १० घो
रोराक्षसराजोयं दृष्टिस्त्वनसस्त्वामपि त्वांचश्रुत्वाविषज्यंतंनजीवेयमहंक्षणम् ११ वै
देह्यावचनंश्रुत्वाकरुणंसाश्रुभाषितम् अथाब्रवीन्महातेजाहनूमान्मारुतात्मजः १२
त्वच्छोकविमुखोरामोदेविसत्येनतेशपे रामेदुःखाभिभूतेचलक्ष्मणःपरितप्यते १३ दृष्टा
कथंचिद्भवतीनकालःपरिशोचितुम् इदंमुहूर्तंदुःखानामंतंद्रक्ष्यसिभामिनि १४ तावुभौ
पुरुषव्याघ्रौराजपुत्रावनिंदितौ त्वद्दर्शनकृतोत्साहौलंकांभस्मीकरिष्यतः १५ हत्वातुस
मरेघोरंरावणंसहबांधवैः राघवस्त्वांविशालाक्षिस्वांपुरींप्रतिनेष्यति १६ सीताराम

जीवेश्रुत्वाक्षणमपिनजीवेयमित्युक्तमितिब्रूहीतिशेषः ११ वचनमुक्तसंदेशरूपं १२ त्वच्छोकविमुखः त्वत्स्थितिपरिज्ञान
जशोकेनत्वदुद्धारप्रवृत्तिविमुखः नतुज्ञात्वेतिसत्येनशपे १३ कथंचिद्भवतीदृष्टा अतःशोचितुंनकालः इदंमुहूर्तंप्र

रा

यत्त्वभिज्ञाने रामः एव विशिष्य जानीयाद्यच्च तस्य प्रीतिसंजननं तद्भूयः पुनरधिकं च दातुमर्हसि १७ १८ श्रद्धेयं विश्वसनीयं १९ उत्पाते उत्प्लवने कृतोत्साहं २० २१ अनामयम् आरोग्यम् २२ त्वं समाधातुमित्यस्य तथेत्यादिः समाधानं संविधानं यद्यपि स्वतन्त्र

यत्तु रामो विजानीयादभिज्ञानमनिंदिते प्रीतिसंजननं तस्य भूयस्त्वं दातुमर्हसि १७ साब्रवीद्दत्तमेवेह मयाभिज्ञानमुत्तमम् एतदेव हि रामस्य दृष्ट्वा मत्केशभूषणम् १८ श्रद्धेयं हनुमन्वाक्यं तव वीर भविष्यति स तं मणिवरं गृह्य श्रीमान्प्लवगसत्तमः १९ प्रणम्य शिरसा देवीं गमनायोपचक्रमे तमुत्पातकृतोत्साहमवेक्ष्य हरिसत्तमम् २० वर्धमानं महावेगमुवाच जनकात्मजा अश्रुपूर्णमुखी दीना बाष्पसंदिग्धया गिरा २१ हनुमन्सिंहसंकाशौ भ्रातरौ रामलक्ष्मणौ सुग्रीवं च सहामात्यं सर्वान्ब्रूयाह्यनामयम् २२ यथा च स महाबाहुर्मां तारयति राघवः अस्माद्दुःखांबुसंरोधात्त्वं समाधातुमर्हसि २३ इमं च शोकं मम तीव्रवेगं रक्षोभिरेभिः परिभर्त्सनं च ब्रूयास्तु रामस्य गतः समीपं शिवश्च तेऽध्वास्तु हरिप्रवीर २४ सीतारामाय॥

तोऽतः स्वयमेव यतिष्यति तथापि त्वमपि यथा मां शीघ्रं तारयति तथा विधानं कुर्विति तात्पर्यं २३ २४ २४

तत्कार्यं लंकागमनप्रयोजनं अल्पशेषं देवीदर्शनरूपस्य महतः प्रधानकृत्यस्य निष्पन्नत्वात्परबलदर्शनरूपस्यानुषंगिकत्वा
दल्पशेषं समित्याशयः २५ इति चत्वारिंशः सर्गः ४० १ चिंताप्रकारमेवाह अल्पशेषमित्यादि कपेश्चिंतनप्रकारमाह अल्पशेषमित्यादि
यमिह कार्यं देवीदर्शनं परबलादिपरिज्ञानं च तत्रेयमसितेक्षणा जानकी दृष्टा अल्पशेषमानुषंगिकमिदं परबलद

स राजपुत्र्या प्रतिवेदितार्थः कपिः कृतार्थः परिहृष्टचेताः तदल्पशेषं प्रसमीक्ष्य कार्यं दिशं
ह्युदीचीं मनसा जगाम ॥२५॥ हरिः ॐ इ श्रीमद्रामायणे सुंदरकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥
स च वाग्भिः प्रशस्ताभिर्गमिष्यन्पूजितस्तया तस्माद्देशादपक्रम्य चिंतयामास वानरः १ अल्प
शेषमिदं कार्यं दृष्टेयमसितेक्षणा त्रीनुपायानतिक्रम्य चतुर्थ इह दृश्यते २ न साम रक्षःसु गु
णाय कल्पते न दानमर्थोपचितेषु वर्तते न भेदसाध्या बलदर्पिता जनाः पराक्रमस्त्वेव ममेह रोचते ३

र्शनरूपं कार्यमवशिष्यते इह कार्ये परबलज्ञाने लक्षणोत्रीनुपायान्सामदानादीनतिक्रम्य चतुर्थो दंडरूपस्तेसाधनत्वात्पादे इह दृश्यते तद्रूप इत्यर्थः २
उपपत्तिपूर्वकमेतदेव विवृणोति न सामेति रक्षःसु सामप्रयोगः फलाय न कल्पते न समर्थो भवति अर्थोपचितेषु दानेन प्रयो
जनं न बलदर्पिता जना भेदसाध्या न बलवत्तो हि कुतोप्यनिष्टं नागणयंतीत्यर्थः ३

रा०वा०टी० ॥ अस्य कार्यस्य परवत्नाशोपपरिज्ञानरूपस्य पराक्रमं विना विनिश्चयः निश्चितोपायः कश्चिदपि न उपपद्यते तेन संभाव्यते स्वपराक्र
१५० मप्रकाशने प्रयोजनान्तरमप्यस्तीत्याह हतेति अश्वघ्न हताः प्रवीराः श्रेष्ठा योधा येषां ते राक्षसाः यत्र यस्मादिह भाविनि रणे मार्दवं एवं
केनैवं पराक्रमः कृतस्ताहृदौरन्नेकैः कथमस्माकं जयाशेतिमनोभंगरूपमीयुः पाश्रुपुः अतः पराक्रमणमेवोचितं तदुत्सर्पः
४ ननु स्वामिसंदिष्टकार्यातिरिक्तं कार्यं करतोदोषः स्यात्स्वामिना हि गृभिः सम्यतु वैदेहीनिःनयेत्रावणाय चेत्सेतावदेवसे ५

न चास्य कार्यस्य पराक्रमादृते विनिश्चयः कश्चिदिहोपपद्यते हतप्रवीराश्वरथो हि राक्ष
सः कथं विदध्यात्पुरि दीह्यमार्दवम् ४ कार्ये कर्माणि निर्वृत्ते यो बहून्यपि साधयेत् पूर्व
कार्याविरोधेन स कार्यं कर्तुमर्हति ५ न ह्येकः साधको हेतुः स्वल्पस्यापीह कर्मणः यो ह्य
र्थं बहुधा वेद स समर्थोऽर्थसाधने ६

दिष्टमित्याशंक्य संदिष्टकार्याविरोधेन स्वामिहितकार्यान्तरसाधनं दूत
स्यालंकार इत्याह कार्य इति कार्ये कर्तव्ये कर्मणि निर्वृत्ते संपादिते सति यो बहून्यपि कार्याणि पूर्वकार्याविरोधेन साधयेत् स का
र्यं कर्तुमर्हति न तु संदिष्टमात्रस्य कथंचित्साधक इति भावः ५ उक्तमेवार्थं व्यतिरेकेण द्रढयति नहीति यत्तु स्वल्पस्यापि कर्मणो वृत्ति
प्रापितयत्नेनासिद्धि हेतुर्भवति एवं साधकोऽसाध्यः साधको हेतुर्न भवति यदपि तु यो ह्यर्थं प्रयोजनं अनेकोपायेन बहुधा रा०स०
१५०

किंच स शैलः समन्ततः शिलाः धातुविशेषसहिताः विशालाः शिलाः मुमोच निपीडनादिति शेषः अत एव मध्यमेन मध्यभागेनार्चिषा ज्वा
लया जुष्टो योऽनलस्तस्य धूमराजिरिव बभौ विसर्पि यत्तस्य स्य ध्याहारः १६ हरिणा हनूमता पीड्यमानेन पर्वतेन पीड्यमानानि

मुमोच च शिलाः शैलो विशालाः समनःशिलाः मध्यमेनार्चिषा जुष्टो धूमराजिरिवानलः
१६ हरिणा पीड्यमानेन पीड्यमानानि सर्वशः गुहाविष्टानि भूतानि विनेदुर्विकृतैः स्वरैः १७
स महासत्वसन्नादः शैलपीडानिमित्तजः पृथिवीं पूरयामास दिशश्चोपवनानि च १८
शिरोभिः पृथुभिः सर्पा व्यक्तस्वस्तिकलक्षणैः वमन्तः पावकं घोरं ददंशुर्दशनैः शिलाः १९
तास्तदा सविषैर्दष्टाः कुपितैस्तैर्महाशिलाः जज्वलुः पावकोद्दीप्ता बिभिदुश्च सहस्रधा
२० यानि त्वौषधिजालानि तस्मिन्जातानि पर्वते विषघ्नान्यपि नागानां न शेकुः शमि
तुं विषम् २१

भूतानि विह्वलैर्विकृतैर्भिन्नैर्दैन्यव्यंजकैः स्वरैर्विनेदुः १७ महासत्वानां महाजन्तूनां तेषां सन्नादः १८ स्व
स्तिकः फणास्थो नीलरेखाविशेषः तच्चिन्हैः शिरोभिरुपलक्षिता ददंशुः पीडाजनितक्रोधवशात् १९ सविषैस्तैः स
र्पैर्दष्टाः सत्यः पावकोद्दीप्ता इव जज्वलुः सहस्रधा विभिदुः भिन्ना बभूवुश्च २० शमितुं शामयितुम् २१

साहिंसिका हृतहृत् विदारित हृदयाश्रत एव विधुरा विह्वलाम्भसि पपात ॥ अत्र कविरुत्प्रेक्षते स्वयंभुवेति येन छायाग्रहणमात्रे
णाभक्ष्यणशक्तिर्दत्तानेनैव स्वयंभुवेत्यर्थः निपातनेनिपातननिमित्तम् २०० २०१ महत्सत्वं महाबलो राक्षसी ॥ अरिष्टं वाधार

हृतहृत्सा हनुमता पपात विधुराम्भसि स्वयंभुवैव हनुमान् सृष्टस्तस्या निपातने २०० तां
हतां वानरेणाशु पतितां वीक्ष्य सिंहिकाम् भूतान्याकाशचारीणि तमूचुः प्लवगोत्तमम् २०१
भीममद्य कृतं कर्म महत्सत्वं त्वया हतम् साधयार्थमभिप्रेतमरिष्टं प्लवतां वर २०२ यस्य त्वेता
नि चत्वारि वानरेंद्र यथा तव धृतिर्दृष्टिर्मतिर्दाक्ष्यं स कर्मसु न सीदति २०३ स तैः संभावितः पूज्यः
प्रतिपन्नप्रयोजनः जगामाकाशमाविश्य पन्नगाशनवत्कपिः २०४ प्राप्तभूयिष्ठपारस्तु
सर्वतः परिलोकयन् योजनानां शतस्यांते वनराजीं ददर्श सः २०५ ददर्श च पतन्नेव वि
विधद्रुमभूषितम् द्वीपं शाखामृगश्रेष्ठो मलयोपवनानि च २०६ सागरं सागरानूपम्

हितारिष्टहिंसायो २०२ २०३ संभावितः पूजितः प्रतिपन्नप्रयोजनः प्राप्त प्रकृत कार्यः २०४ प्राप्तभूयिष्ठः प्राप्तकल्पः पारो
येनसः २०५ पतन्नेव गच्छन्नेव मलयोपवनानि ॥ अनेनोत्तर इव दक्षिणतीरेपि मलयाख्यः पर्वतोस्तीति गम्यते २०६

तस्मादन्यदपि स्वाम्यभीष्टं कृत्वैवान्तः समित्याह इहैवेति पद्यप्पहे इहैव सीतान्वेषणाय वनान्तवर्त्मनि कृतनिश्चयस्तत्त्वापि यदि परात्मसंमर्दवि शेषतत्त्ववित् परस्यात्मनः स्वस्य च संमर्दे युद्धे यो विशेषः तत्तत्त्ववित् कृत्वा यदि व्रजेयं व्रजे यं तत्तत्तदा भर्तृशासने सम्यक्कृतं स्यात् एतेन पारं ज्ञात्वा बलं कीदृशमिति दृष्टो ऽस्मि कृततरः स्यामिति भावः ७ एवं निश्चित्य तां पीठकृत्य तत्प्रकारं चिन्तयति कथन्त्विति गृ द्यखलु ममेहागतमागतमागमनेन सुखागतं सुखप्रश्नकमागमनं कथं भवेत् तथा एषैः सह यस्य द्यत्स्ये च खल्वात्मनः प्रयुद्धे च कथं

इहैव तावत्कृतनिश्चयो ऽहं यदि व्रजेयं त्वरितो ऽथवा ऽलयं परात्मसंमर्दविशेषतत्त्ववित्ततः कृतं स्यान्मम भर्तृ शासनम् ७ कथन्नु खल्वेव यथा भवेत्सुखागतं नमस्य एवं मम तैः सह तथैव खल्वात्मबलं च सारव त्समानयेन्मो चरतो ऽद्य जानतः ८ ततः समासादयतो ऽद्य जानतः समं त्रिवर्गेण बलं सयापितम् हृदिस्थि तं तत्समवेत्य बलं च वै सुखेन मत्वाहमितः पुनर्व्रजे ९

मम भवेत् तथैव खलु युद्धकरणे खलु अद्य जानतः आत्मबलं मो च सारवत् समानयेत् तस्य कपरिच्छिन्द्यादित्यर्थः युद्धफलमुक्तं ८ ततो मह्यं वशा देवमारतो समासादय वर्तमाने स बले सयापि ते स सारथिना वर्णं ज्ञात्वा हृदि स्थितं तत्समवेत्य मभीष्टं बलं च हृत्विन प्रक्रमा तोमत्वा ज्ञात्वा पुनरितो व्रजे व्रजिष्ये सयापितमित्यत्र स्येतर्भावितः वर्धा घाते तिनो पापमितायापा सारथिस्तेन महितमित्यर्थः ९

 अथ पक्षस्याचरणप्रवर्तनोपायं चिंतयति इदमिति ७ प्रत्यये देवनेनेत्रमनःकांतं भवति अतः इदं विध्वंसयिष्यामि १० ११ समानेष्यतिमोप

सपदि

इदमस्य नृशंसस्य नंदनोपममुत्तमम् वनं नेत्रमनःकांतं नानाद्रुमलतायुतम् १० इदं विध्वंसयिष्या
मि शुष्कं वनमिवानलः अस्मिन्भग्ने ततः कोपं करिष्यति स रावणः ११ ततो महत्साश्वमहारथ
द्विपं बलं समानेष्यति राक्षसाधिपः त्रिशूलकालायसपट्टिशायुधं ततो महद्युद्धमिदं भविष्यति १२ अ
हं तु तैः संयति चंडविक्रमैः समेत्य रक्षोभिरसंगविक्रमः निहत्य तद्रावणचोदितं बलं सुखं गमिष्यामि
हरीश्वरालयम् १३ ततो मारुतवत्क्रुद्धो मारुतिर्भीमविक्रमः ऊरुवेगेन महता द्रुमान्क्षेप्तुमथारभ
त १४ ततस्तु हनुमान्वीरो बभंज प्रमदावनं मत्तद्विजसमाघुष्टं नानाद्रुमलतायुतम् १५ तद्वनं मथि
पैः तैर्वृक्षैर्भिन्नैश्च सलिलाशयैः चूर्णितैः पर्वताग्रैश्च बभूवाप्रियदर्शनम् १६ नानाशकुंतविरुतैः प्रभि
न्नैः सलिलाशयैः ताम्रैः किसलयैः क्लांतैः क्लांतद्रुमलतायुतम् १७

निश्चयप्राप्य पिष्यति महद्युद्धं मन्मनस्तोषकृत
१२ ततो हरीश्वरालयं गमिष्यामीति चिंतयामास इत्यन्वयः १३ ततः एवं निश्चयानंतरं १४ पर्वताग्रैः क्रीडापर्वताग्रैः उपलक्षितमिति प्रोषः १६ १७

व्याकुलं चलत्तमावरणं यासां ताः स्रवत एव विह्वलाः ह्रियस्रवतां लता रेजुः १८ सादितैर्विश्रीर्णैः व्यालैः ग्राहैः लैः १९ प्रमदावनस्य अशोकतः प्रचिता रोचित वनस्य दशास्यप्रमदानां स्त्रीणां कामसंवर्द्धनहेतोः अवनरक्षकस्यास्य वनस्य सा विह्वलाशोकलताप्रताना चेच्चलाशोकलतासम्

नवभीतहृन्तं तत्प्रदावानलहतं यथा व्याकुलावरणा रेजुर्विह्वला स्रवता लताः १८ लतागृहैश्चित्रगृहैश्चप्रसादितैर्व्यालैर्मृगैर्नागैश्चविभग्नपक्षिभिः शिलागृहैरुन्मथितैस्तथा गृहैः प्रनष्टरूपं तदभून्महद्वनम् १९ साविह्वलाशोकलताप्रतानावनस्थलीशोकलताप्रताना जातादशास्यप्रमदावनस्य कपेर्बलाद्धि प्रमदावनस्य २० स तस्य कृत्वार्थपतेर्महाकपिर्महद्व्यलीकं मनसो महात्मनः युयुत्सुरेको बहुभिर्महाबलैः श्रिया ज्वलंस्तोरणमाश्रितः कपिः ॥ २१ ॥ इति श्रीमद्रामायणे वाल्मीकीये सुंदरकांडे एकचत्वारिंशः सर्गः ॥ ४१ ॥

हवतीवनस्थलीति तागुल्मलताजन्यापापादि पुष्पभूमिः कपेर्बलात् हि निश्चितैः शोकलताप्रताना शोच्यलताप्रताना जाता दुष्परिहितदुःखजनिकाजाते सर्पः २० २१ पीततेरणोरा वलात्मनसोमहद्व्यलीकं महदप्रियं कृत्वा बहुभिर्महाबलैरेको योद्धुमिच्छुः श्रिया वीरश्रिया ज्वलन्दीप्यमानस्तोरणमाश्रित इत्यन्वयः २१ इत्येकचत्वारिंशः सर्गः ४१

रा०वा०सुं० १ प्रतिपेदिरे प्राप्तानि २ गतायां निद्रायां वनभंगध्वनिनेत्यर्थः ३ ४ जनकात्मजां पप्रच्छुः तस्यानिर्निद्रितया त्वया नेन सत्वेति भावः ५ उत शब्दो
१५२ वार्थे उताप्यर्थविकल्पयोरित्यमरः त्वयानेन संवादो वा कथं कृत इति ६ पप्रच्छुरिति पूर्वेणान्वयः यद्यपि ता निद्रिता वनभंगध्वनि

ततः पक्षिनिनादेन वृक्षभंगस्वनेन च बभूवुस्त्राससंभ्रांताः सर्वे लंकानिवासिनः १ विद्रुताश्च भय
त्रस्ता विनेदुर्मृगपक्षिणः राक्षसाश्च निमित्तानि घोराणि प्रतिपेदिरे २ ततो गतायां निद्रायां राक्ष
स्यो विकृताननाः तद्वनं ददृशुर्भग्नं तं च वीरं महाकपिम् ३ स ता दृष्ट्वा महाबाहुर्महासत्त्वो महाब
लः चकार सुमहद्रूपं राक्षसीनां भयावहम् ४ ततस्तं गिरिसंकाशमतिकायं महामतिम् राक्षस्यो
वानरं दृष्ट्वा पप्रच्छुर्जनकात्मजाम् ५ कोयं कस्य कुतो वायं किंनिमित्तमिहागतः कथं त्वयानेन पु
नः संवादः कृत इत्युत ६ आचक्ष्व नो विशालाक्षि मा भूत्ते सुभगे भयम् संवादमसितापांगे त्वया किं
कृतवानयम् ७ अथाब्रवीत्तदा साध्वी सीता सर्वांगशोभना रक्षसां कामरूपाणां विज्ञाने मम का गतिः
८

ना जागरिता इति संवादज्ञानस्येवाभावात्तत्कथं प्रश्नो निरवसरस्तथापि निद्रामध्ये किं विज्ञागरेणाईषत् संवादश्रवणोपि देवमायया
पुनर्निद्रितेति तत्प्रश्नोपपत्तिः ६ ७ प्रथ विनिश्चाय्य संवादं पप्रच्छुरिति संवादमिति ७ का गतिः क उपायः ८

योयंप्रश्नंकरिष्यतीति यूयमेवजानीतेत्यत्र न्यायमाह अहिरेवेति ९ अस्यप्रश्नस्याभिज्ञातास्मि १० वैदेह्यावचनेभ्यःज्ञानप्रतिपादकं अनेनात्म
त्राणादीनसभावादीनदोषायेति ध्वनितं काश्चिद्विद्रुताः काश्चित् दृष्ट्वा स्थिता एव काश्चिद्रावणाय निवेदितुंगताः ११ १२ सीतयाह

यूयमेवाभिजानीत योयंयद्वाकरिष्यति अहिरेव ह्यहेःपादान्विजानाति न संशयः ९ अहमप्यस्य
भीतास्मि नैनंजानामि कोन्वयम् वेद्मि राक्षसमेवैनं कामरूपिणमागतम् १० वैदेह्यावचनंश्रु
त्वा राक्षस्योविद्रुता द्रुतम् स्थिताः काश्चिद्गताः काश्चिद्रावणाय निवेदितुम् ११ रावणस्य
समीपे तु राक्षस्योविकृताननाः विरूपं वानरं भीमं आख्यातुमुपचक्रमुः १२ अशोकवनिकाम
ध्ये राजन् भीमवपुः कपिः सीतयाकृतसंवादस्तिष्ठत्यतुलविक्रमः १३ न च तं जानकी सीता ह
रिं हरिणलोचना अस्माभिर्बहुधा पृष्टा निवेदयितुमिच्छति १४ वासवस्य भवेद्दूतो दूतो वै
श्रवणस्य वा प्रेषितो वापि रामेण सीतान्वेषणकारणात् १५ तेन त्वद्भुतरूपेण यत्तत्तव मनो
हरम् नानामृगगणाकीर्णं प्रमृष्टं प्रमदावनम् १६ तसंवादत्वज्ञानंपरस्परंभवतीतिप्रोक्तं १३ ननिवेदयितुमि
च्छतिप्रायेणयेतेजानातीतिनातामाराधयः १४ १५ प्रमृष्टंनाशितम् १६

टी॰ वा॰ सुं॰ तद्देशाः प्रदेशाः १७ कः श्रममहतिमहावनंभानवतस्तस्य श्रमोः संभावितरस्य यः अतः सा जानकेत्य वतेनाभिरक्षिता तदाश्रयत्वच्छायांगोने
१५३

न तत्र कश्चिद्देशोयस्तेनन विनाशितः प्रत्रसा जानकी सीतासतेनन विनाशितः १७ जानकी रक्षणार्थं वाश्रमाहानोपलक्ष्यते श्रयवाकः श्रमतस्यैवतेनाभिरक्षिता १८ चारुपल्लवशोभाढ्ये प्रदेसीतास्वयमास्थिता पवृद्धः शिंशुपावृक्षः सचतेनाभिरक्षितः १९ तस्यामनरूपस्यामंत्वंदेडमाज्ञातु मर्हसि सीतासंभाषितायेनवनंतेन विनाशितम् २० मनःपरिग्रहीतांतांतव रक्षोगतोम्वरः कःसीतामभिभाषेतेयोनत्यक्तजीवितः २१ राक्षसीनांवचः श्रुत्वा रावणोराक्षसेश्वरः हुताग्निरिव जज्वालकोपसंवर्तितेक्षणः २२ तस्यक्रुद्धस्यनेत्राभ्यां प्रापतन्नश्रुविंदवः दीप्ताभ्यामिवदीपाभ्यां साचिषः स्नेहबिंदवः २३ श्रुत्वामनः सद्दृशान् प्रसान्किंकरान्नामराक्षसान् व्यादिदेश महातेजानि

तिशेषः १८ तस्यैवार्थस्यस्थिरी करणाय पुनः प्रतिपादनं चाविंतितेनाभिरक्षितः सीतारक्षणार्थमितिशेषः १९ श्राज्ञातुंश्राज्ञापयितुं २० तस्माद्रावणस्यापराधत्वेसाधयंतिमनरतित्यक्तजीवितः त्यक्तजीविताशः २१ कोपेनसंवर्तितेतिविवर्तितेईक्षणेनेत्रे येन सः २२२३२४

त्यादिष्वा किं कराः किंकरास्तत्स्याहतेषामिति प्रतीतिः साहस्रं स्वार्थे ऽण् कूटं अपस्कर कूटस्तदग्रागतभाग आयुधविशेषः २५।२६
अवस्थितं युद्धायसन्नद्धं २७ कांचनांगदैः कांचनपट्टबंधैः २८।२९ क्षिता वाविध्य लांगूलं नेमिति स्वभावोक्तिः लेफा रः ३०।३१

तेषामशीतिसाहस्रं किंकराणां तरस्विनाम निर्ययुर्भवनात्तस्मात्कूटमुद्गरपाणयः २५ महोद
रा महादंष्ट्रा घोररूपा महाबलाः युद्धाभिमनसः सर्वे हनूमद्ग्रहणोन्मुखाः २६ ते कपींद्रं समा
साद्य तोरणस्थमवस्थितम् अभिपेतुर्महावेगाः पतंगा इव पावकम् २७ ते गदाभिर्विचित्रा
भिः परिघैः कांचनांगदैः आजघ्नुर्वानरश्रेष्ठं शरैश्चादित्यसंनिभैः २८ मुद्गरैः पट्टिशैः शूलैः प्रा
सतोमरपाणयः परिवार्य हनूमंतं सहसा तस्थुरग्रतः २९ हनूमानपि तेजस्वी श्रीमान्पर्वतसं
निभः क्षितावाविध्य लांगूलं ननाद च महास्वनम् ३० स भूत्वा तु महाकायो हनूमान्मारुता
त्मजः धृष्टमास्फोटयामास लंकां शब्देन पूरयन् ३१ तस्यास्फोटितशब्देन महता सानुना
दिना पेतुर्विहंगा गगनादुच्चैश्चेदमघोषयत् ३२

आस्फोटितशब्देन स्वेन शब्देन सानुनादिना प्रतिध्वनि
मता ३२

आदिष्टाः किंकराः किंयंत्रुस्तत्त्याहतेषामिति ॰ प्रीतिः साहस्रंस्वार्थेऽण् कूट अयस्कूर कूटस्तद्वागग्रायुधविशेषः २५ २६
अवस्थितं पुस्त्रावसन्नं २७ कांचनांगदैः कांचनपट्टवेष्टैः २८ २९ क्षितावाविध्यलांगूलमिति स्वभावोक्तिरलंकारः ३० ३१

तेषामशीतिसाहस्रंकिंकराणांतरस्विनाम निर्ययुर्भवनात्तस्मात्कूटमुद्गरपाणयः २५ महोदरामहादंष्ट्राघोररूपामहाबलाः युद्धाभिमनसःसर्वेहनूमद्ग्रहणोन्मुखाः २६ तेकपिंतंसमासाद्यतोरणस्थमवस्थितम् अभिपेतुर्महावेगाःपतंगाइवपावकम् २७ तेगदाभिर्विचित्राभिःपरिघैःकांचनांगदैः आजघ्नुर्वानरश्रेष्ठंशरैश्चादित्यसंनिभैः २८ मुद्गरैःपट्टिशैःशूलैःप्रासतोमरपाणयः परिवार्यहनूमंतंसहसातस्थुरग्रतः २९ हनूमानपितेजस्वीश्रीमान्पर्वतसंनिभः क्षितावाविध्यलांगूलंननादचमहास्वनम् ३० सभूत्वातुमहाकायोहनूमान्मारुतात्मजः धृष्टमास्फोटयामासलंकांशब्देनपूरयन् ३१ तस्यास्फोटितशब्देनमहतासानुनादिना पेतुर्विहंगागगनादुच्चैर्घोषमघोषयत् ३२

आस्फोटितशब्देनध्वेनाशब्देनसानुनादिनाप्रतिध्वनिमता ३२

स्वस्य जयार्थं स्वामिनं स्तौति जयतीति सर्वो श्लोकैर्वा वर्त्तते स्पष्टः ३३ ३४ प्रतिबलं प्रतिस्पर्द्धि द्विबलवत् ३५ मिषतां पश्यतां अनादरे षष्ठी ३६ सन्नादशब्देन आस्फोटशब्दजनितप्रतिध्वनिना सिंहनादेन च संध्यामेघं रक्तवर्णत्वात् ३७ स्वामिसं

जयत्यतिबलो रामो लक्ष्मणश्च महाबलः राजा जयति सुग्रीवो राघवेणाभिपालितः ३३ दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः हनूमान् शत्रुसैन्यानां निहन्ता मारुतात्मजः ३४ न रावणसहस्रं मे युद्धे प्रतिबलं भवेत् शिलाभिस्तु प्रहरतः पादपैश्च सहस्रशः ३५ अर्दयित्वा पुरीं लंकामभिवाद्य च मैथिलीम् समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसाम् ३६ तस्य सन्नादशब्देन तेऽभवन्भयशंकिताः ददृशुश्च हनूमन्तं संध्यामेघमिवोन्नतम् ३७ स्वामिसंदेशनिःशंकास्ततस्ते राक्षसाः कपिम् चित्रैः प्रहरणैर्भीमैरभिपेतुस्ततस्ततः स तैः परिवृतः शूरैः सर्वतः स महाबलः आससादायसं भीमं परिघं तोरणाश्रितम् ३९ सीतारामाभ्यां नमः सीतारामाराम

देशेन रावणाज्ञया अपि घोरेणायत्नेन योद्धुमेवेति निःशङ्काः प्रत्यक्षान्तरं शंकारहिताः प्रहरणैरायुधैरभिपेतुः आहरन्निःसर्पन्ताम० ३८ तोरणाश्रितं तोरणसमीपे स्थापितं ३९

सप्तसिंहो विनतासुतः पन्नगमादाय इव स हनूमान् तं परिघमादाय इति योजना ४० परिग्रह्य परिघमिति शेषः ४१ कतिचित्
हत्वा वशेषाः द्वित्राः ४२ स हस्तपुत्रो जंबुमाली ४३ इति द्विचत्वारिंशः सर्गः ४२ ॥ प्रणवमासंदि ष्टसेनांतरगम नासुर्वं किं

स तं परिघमादाय जघान रजनीचरान् ॥ स पन्नगमिवादाय स्फुरंतं विनतासुतः ॥ ४० ॥ विचचार वरे वीरः परिगृह्य च मारुतिः ॥ सूदयामास वज्रेण दैत्यानिव सहस्रदृक् ॥ ४१ ॥ स हत्वा राक्षसान् वीरः किंकरान्मारुतात्मजः ॥ युद्धाकांक्षी पुनर्वीरस्तोरणं समुपस्थितः ॥ ४२ ॥ ततस्तस्माद्भयान्मुक्ताः कतिचित्तत्र राक्षसाः ॥ निहतान्किंकरान्सर्वान् रावणाय न्यवेदयन् ॥ ४३ ॥ स राक्षसानां निहतं महद्बलं निशाम्य राजा परिवृत्तलोचनः ॥ समादिदेशाप्रतिमं पराक्रमे प्रहस्तपुत्रं समरे सुदुर्जयम् ॥ ४४ ॥ इति श्रीरत्नाकरे श्रीमद्रामायणे वाल्मीकीये सुंदरकांडे द्विचत्वारिंशः ॥ सर्गः ॥ ४२ ॥ ततः स किंकरान् हत्वा हनूमान् ध्यानमास्थितः वनं भग्नं मया चैत्यप्रासादो न विना

एकोनविंशोत्र वर्तमानकथासमाप्ताः १९ श्रितः १

कर्तव्यमिति विचार्य प्रासादस्य नाशं चिकीर्षति ततः इति ध्यानं विचारः चैत्यप्रासादो रक्षःकुलदेवताप्रासादः १ ॥ ११

रा० वा० सं०
१६

सागरं दक्षिणतीरसमीपवर्तिसागरं भ्रमूयः कश्चिद्देशः सागरस्य पत्नीनोल्लेकाद्वीपादागत्य सागरं प्रविश्यती नो मुखानि विलोकयन् २०७ श्रीमानंस्व शरीरं महत्वादाकाशे निरुंधंतमिव समीक्ष्य मतिं कर्तुमनिश्चयं चकार २०८ नामेवाहु कार्यवृद्धिमिति कौतूहलमाश्चर्यं धियादिदृक्षाम् २०९ ततोमहच्छरीरं संक्षिप्य पुनः प्रकृतिं निजाकारमापेदे प्राप्तः वीतमो

सागरे सागरानूपान् सागरानूपजान् द्रुमान् सागरस्य च पत्नीनां मुखान्यपि विलोकयन् २०७ स महामेघसंकाशं समीक्ष्यात्मानमात्मवान् निरुंधंतमिवाकाशं चकार मतिमान्मतिम् २०८ कायवृद्धिं प्रवेगं च मम दृष्ट्वैव राक्षसाः मयि कौतूहलं कुर्युरिति मेने महाकपिः २०९ ततः शरीरं संक्षिप्य तन्महीधरसंनिभम् पुनः प्रकृतिमापेदे वीतमोह इवात्मवान् २१० तद्रूपमतिसंक्षिप्य हनूमान्प्रकृतौ स्थितः त्रीन्क्रमानिव विक्रम्य बलिवीर्यहरो हरिः २११

होनिवृत्ताविद्यः आत्मवान् जीवन्मुक्तो योगी प्रकृतिं भगवदात्मतालक्षणं स्वभावं प्राप्त इव २१० उक्तं शरीरसंक्षेपं दृष्टांतकथनार्थमनुवदति तद्रूपमिति अतिसंक्षिप्य अतिसंकोच्य त्रीन्क्रमान् यदा विक्रम्य प्रक्षिप्य बलेर्वीर्यस्य हरो हरिरिव प्रकृतौ स्थितः २११॥

राम।
१६

ए० वा० सुं० एवंप्रमदावनवत् २ प्रासादसुप्लुत्यारुरोह ३ ४ संप्रधृष्य भेत्वा पारियात्रः पर्वतविशेषः श्रीप्लसंसाधारणोधर्मः ५ ६
१५५

तस्मात्प्रासादमप्येवमिमंविध्वंसयाम्यहम् इतिसंचिंत्यमनसाहनूमान्दर्शयन्बलम् २ चैत्यप्रासादमाप्लुत्यमेरुशृंगमिवोन्नतम् आरुरोहहरिश्रेष्ठोहनूमान्मारुतात्मजः ३ आरुह्यगिरिसंकाशंप्रासादंहरियूथपः बभौसमहातेजाःप्रतिसूर्यइवोदितः ४ संप्रधृष्यचदुर्धर्षंचैत्यप्रासादमुत्तमम् हनूमान्प्रज्वलन्लक्ष्म्यापारियात्रोपमोभवत् ५ सभूत्वासुमहाकायःप्रभावान्मारुतात्मजः धृष्टमास्फोटयामासलंकांशब्देनपूरयन् ६ तस्यास्फोटितशब्देनमहताश्रोत्रघातिना पेतुर्विहंगमास्तत्रचैत्यपालाश्चमोहिताः ७ अस्त्रविज्जयतांरामोलक्ष्मणश्चमहाबलः राजाजयतिसुग्रीवोराघवेणाभिपालितः ८ दासोहंकोसलेंद्रस्यरामस्याक्लिष्टकर्मणः हनूमान्शत्रुसैन्यानांनिहंतामारुतात्मजः ९ नरावणसहस्रंमेयुद्धेप्रतिबलंभवेत् शिलाभिस्तुप्रहरतःपादपैश्चसहस्रशः १०

धृष्टंनिर्भयं ६ विहंगाश्चैत्यपालाश्चमोहिताःपेतुः ७ ८ ९
रा० सुं०
१५५

११ १२ शतं पपुः अनेके रक्षसः १३ १४ १५ परिक्षिप्य संप्रोत्तो पत्रावर्त इवेति दृष्टांतः १६ महात्मा रुतात्मज रक्षणान्वयः १७

मर्दयित्वा पुरीं लंकामभिवाद्य च मैथिलीम् । समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसाम् ११
एवमुक्त्वा महाकायश्चैत्यस्थो हरिपूगपः । ननाद भीमनिर्ह्रादो रक्षसां जनयन्भयम् १२
तेन शब्देन महता चैत्यपालाः शतं पपुः । गृहीत्वा विविधानस्त्रान्प्रासान्खड्गान्परस्वधान् १३ विसृजंतो महाकाया मारुतिं पर्यवारयन् । ते गदाभिर्विचित्राभिः परिघैः कांचनांगदैः १४ आजघ्नुर्वानरश्रेष्ठं बाणैश्चादित्यसंनिभैः । आवर्त इव गंगायास्तोयस्य विपुलो महान् १५ परिक्षिप्य हरिश्रेष्ठं स बभौ रक्षसां गणः । ततो वातात्मजः क्रुद्धो भीमरूपं समाश्रितः १६ प्रासादस्य महांतस्य स्तंभं हेमपरिष्कृतम् । उत्पाटयित्वा वेगेन हनूमान्मारुतात्मजः १७ ततस्तं भ्रामयामास शतधारं महाबलः । तत्र चाग्निः समभवत्प्रासादश्चाप्यदह्यत १८

उत्पाटयित्वा तं शतधारं स्तंभं भ्रामयामास तत्र च भ्राम्यमाणे स्तंभे तेषां घट्टनवशाद् अग्निः समभवत् तेन प्रासादश्चाप्यदह्यतः १८

१७ ततः एतं राक्षसशतं हत्वा दह्यमानं प्रासादं दृष्ट्वा अन्तरिक्षे स्थित इदं वचोऽब्रवीत् २० एतदुक्तिप्रयोजनं च एतस्मदुदय

दह्यमानं ततो दृष्ट्वा प्रासादं हरियूथपः स राक्षसशतं हत्वा वज्रेणेन्द्र इवासुरान् १९ अन्तरिक्षे स्थितः श्रीमानिदं वचनमब्रवीत् मादृशानां सहस्राणि विसृष्टानि महात्मनां २० बलिनां वानरेन्द्राणां सुग्रीववशवर्तिनाम् अटन्ति वसुधां कृत्स्नां वयमन्ये च वानराः २१ दशनागबलाः केचित्केचिद्दशगुणोत्तराः केचिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः २२ सन्ति चौघबलाः केचित्केचिद्वायुबलोपमाः अप्रमेयबलाः केचित्तत्रासन्हरियूथपाः २३ ईदृग्विधैस्तु हरिभिर्वृतो दन्तनखायुधैः शतैः शतसहस्रैश्च कोटिभिरयुतैरपि २४ आगमिष्यति सुग्रीवः सर्वेषां वो निसूदनः नेयमस्ति पुरी लंका न यूयं न च रावणः २५ यस्मादिक्ष्वाकुवीरेण बद्धं वैरं महात्मना ॥२६॥ हरिः ॐ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये सुन्दरकाण्डे त्रिचत्वारिंशः सर्गः ४३ ॥ ॥

पीडने २१ २२ ओघबलाः ओघसंख्यातागजबलाः २४ २५ २६ इति सर्गः ४३

१२ धनुर्विस्फारयाणः विस्फारयमाणः ज्याकर्षणं कुर्वन्नित्यर्थः वज्राशनिसमस्वनमिति विस्फारणक्रियाविशेषणं
३ समपूर्यत दिगादिसमुदायविषयमेकवचनं ४ जहर्ष स्ववलात् रूपशत्रुप्राप्त्या ५ तोरणविटङ्कः तोरणस्तंभयोः

संदिष्टो राक्षसेंद्रेण प्रहस्तस्य सुतो वली जंबुमाली महादंष्ट्रो निर्जगाम धनुर्धरः १ रक्तमाल्यां
वरधरः स्रग्वी रुचिरकुंडलः महान्विवृत्तनयनश्चंडः समरदुर्जयः २ धनुः शक्रधनुःप्रख्यं
महदुचिरसायकम् विस्फारयाणो वेगेन वज्राशनिसमस्वनम् ३ तस्य विस्फारघोषेण धनु
षो महता दिशः प्रदिशश्च नभश्चैव सहसा समपूर्यत ४ रथेन खरयुक्तेन तमागतमुदीक्ष्य सः
हनूमान्वेगसंपन्नो जहर्ष च ननाद च ५ तं तोरणविटंकस्थं हनूमंतं महाकपिम् जंबुमाली म
हाबाहुर्विव्याध निशितैः शरैः ६ अर्धचंद्रेण वदने शिरस्येकेन कर्णिना वाह्वोर्विव्याध नारा
चैर्दशभिस्तं कपीश्वरम् ७ तस्य तच्छुशुभे ताम्रं शरेणाभिहतं मुखम् शरदीवांवुजं फुल्लं
विद्धं भास्कररश्मिना ८

रुपरि तिर्यक्प्रतिष्ठापितकपोतपालिकादारु ६ कर्णि अर्धेकुशाकाराग्रः शरविशे
षः ७ अंवुजं रक्तांवुजं भास्कररश्मिना विद्धं स्पृष्टं अवफुल्लमित्यर्थः ८

 तत्तस्य रक्तं स्वतरतिशेषरक्तेन घृतजेन रंजितं मुखं यथाकाशे कांचनविंदुभिः रक्ताशोकपुष्परसविंदुभिः सिक्तं महापद्मं

तत्तस्य रक्तं रक्तेन रंजितं शुशुभे मुखम् यथाकाशे महापद्मं सिक्तं कांचनविंदुभिः ९ चुको
पवाणाभिहतो राक्षसस्स महाकपिः ततः पार्श्वेतिविपुलां ददर्श महतीं शिलाम् १० तरसा तां
समुत्पाट्य चिक्षेप बलवद्बली तां शरैर्दशभिः क्रुद्धस्ताडयामास राक्षसः ११ विपन्नं कर्म तद्दृ
ष्ट्वा हनूमांश्चंडविक्रमः सालं विपुलमुत्पाट्य भ्रामयामास वीर्यवान् १२ भ्रामयंतं कपिं दृ
ष्ट्वा सालवृक्षं महाबलम् चिक्षेप सुबहून्बाणान् जंबुमाली महाबलः १३ सालं चतुर्भिश्चि
च्छेद वानरं पंचभिर्भुजे उरस्येकेन बाणेन दशभिस्तु स्तनांतरे १४ स शरैः पूरिततनुः क्रोधेन म
हता वृतः तमेव परिघं गृह्य भ्रामयामास वेगितम् १५ अतिवेगोतिवेगेन भ्रामयित्वा महोत्क
टः परिघं पातयामास जंबुमालेर्महोरसि १६

महत्तरे रक्तपद्ममिव शुशुभे रक्तसम्भूतोपमेयं अशोककां
चनारूपः ९ १० ताडयामास विभेद ११ विपन्नं व्यर्थीकृतम् १२ १३ १४ १५ १६

नाश्वा इति ग्रथस्थले नात्र खण्ड्यंते रथेन खरयुक्तेनेति पूर्वमुक्तत्वात् १७ १८ १९ २० इति चतुश्चत्वारिंशः सर्गः ४४।
ततो जंबुमालिनि निहते नानेतरं राक्षसेंद्रेण चोदिताः सप्त सप्तार्चिर्वर्चसः अग्नितुल्यतेजसो मंत्रिणः सुतास्तस्माद्भवना

तस्य चैव शिरो नासीन्न बाहू न च जानुनी न धनुर्न रथो नाश्वास्तत्रादृश्यंत नेषवः १७ स ह
तस्तरसा तेन जंबुमाली महारथः पपात निहतो भूमौ चूर्णितांग इव द्रुमः १८ जंबुमालिं च निह
तं किंकरांश्च महाबलान् चुक्रोध रावणः श्रुत्वा क्रोधसंरक्तलोचनः १९ स रोषसंवर्तिततात्र
लोचनः प्रहस्तपुत्रे निहते महाबले अमात्यपुत्रानतिवीर्यविक्रमान्समादिदेशाशु निशाचरे
श्वरः॥ २०॥ हरिः ॐ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये सुंदरकांडे चतुश्चत्वारिंशः सर्गः॥ ४४
ततस्ते राक्षसेंद्रेण चोदिता मंत्रिणः सुताः निर्ययुर्भवनात्तस्मात्सप्त सप्तार्चिवर्चसः १ महाबलप
रीवारा धनुष्मंतो महाबलाः कृतास्त्रास्त्रविदां श्रेष्ठाः परस्परजयैषिणः २ सीता रामा सा ता

न्निर्ययुः अर्चिरिति रेफलोपश्छांदसः १ महद्बलं महती सेना परिवारो येषां ते कृतास्त्रा लब्धशिक्षिता अस्त्रा येषां ते अस्त्रविदां च
श्रेष्ठाः परस्परजयैषिणः अहमहमिकया परस्परोत्कर्षापेक्षिणा इत्यर्थः २

ध्वजयष्टिर्विशिष्टाः ध्वजदंडयुक्तैः पताकाभिः प्रशस्तपताकावद्भिर्महारथैर्निर्ययुरिति संबंधः ३ ४ शोकसंभ्रान्ताः नि
श्चितमरणा वृद्धा इति शेषः ५ परस्परसंघर्षाः अहमेवाग्रे इति परस्परमभिमानात् तोरणस्थमवस्थितं तमवस्थितं नि

हेमजालपरिक्षिप्तैर्ध्वजयष्टिः पताकिभिः तोयदस्वननिर्घोषैर्वाजियुक्तैर्महारथैः ३ तप्त
कांचनचित्राणि चापान्यमितविक्रमाः विस्फारयंतः संहृष्टास्तडित्वंत इवांबुदाः ४ जन
न्यस्तास्ततस्तेषां विदित्वा किंकरान् हतान् बभूवुः शोकसंभ्रांताः सबांधवसुहृज्जनाः ५
ते परस्परसंघर्षात्तप्तकांचनभूषणाः अभिपेतुर्हनूमंतं तोरणस्थमवस्थितम् ६ सृजं
तो बाणवृष्टिं ते रथगर्जितनिःस्वनाः वृष्टिमंत इवांभोदा विचेरुर्नैरृतांबुदाः ७ अवकी
र्णस्ततस्ताभिर्हनूमाञ्छरवृष्टिभिः अभवत्संवृताकारः शैलराडिव वृष्टिभिः ८ स शरान्
वंचयामास तेषामाशुचरः कपिः रथवेगांश्च वीराणां विचरन्विमलेंऽबरे ९ सीतारामा

ध्वजयष्टिभिः ६ सृजंतो विसृजंतः ७ संवृताकारः अदृश्य इति यावत् ८ वंचयामास स्वस्य शरीरहितान् स्वकारतश्चो
पाय आशुचर इति स्थिरतरत्वं पेहि सर्वे ध्वंभवति रथवेगांश्च वंचयामास ९

धनुष्मद्भिरैन्द्रधनुर्युक्तैः १० ११ १२ १३ भयार्दितं सत् दश दिशो दुद्रावेति शेषः १४ नीडं रथस्य रथ्यधिष्ठानस्थानं १५

स तैः क्रीडन् धनुष्मद्भिर्व्योम्नि वीरः प्रकाशते धनुष्मद्भिर्यथा मेघैर्मारुतः प्रभुरम्बरे १०
स कृत्वा निनदं घोरं त्रासयंस्तां महाचमूम् चकार हनुमान्वेगं तेषु रक्षस्सु वीर्यवान् ११ त
लेनाभ्यहनत्कांश्चित्पादैः कांश्चित्परंतपः मुष्टिनाभ्याहनत्कांश्चिन्नखैः कांश्चिद्व्यदारयत्
१२ प्रममाथोरसा कांश्चिदूरुभ्यामपरान्कपिः केचित्तस्यैव नादेन तत्रैव पतिता भुवि १३ त
तस्तेष्ववसन्नेषु भूमौ निपतितेषु च तत्सैन्यमगमत्सर्वं दिशो दश भयार्दितम् १४ विनेदुर्वि
स्वरं नागा निपेतुर्भुवि वाजिनः भग्ननीडध्वजच्छत्रैर्भूश्च कीर्णाभवद्रथैः १५ स्रवता रु
धिरेणाथ स्रवन्त्यो दर्शिताः पथि विविधैश्च स्वनैर्लंका ननाद विकृतं तदा १६ स तान्प्रवृ
द्धान्विनिहत्य राक्षसान्महाबलश्चण्डपराक्रमः कपिः युयुत्सुरन्यैः पुनरेव राक्षसैस्तमेव वीरोऽ
भिजगाम तोरणम् १७

१६ स्रवता रुधिरेणापथि स्रवन्त्यो नद्यः दर्शिताः हनुमतेति शेषः । तदा विविधैः स्वनैः
प्रतिध्वानस्वनैः रक्षोगणार्त्तीनां स्वनैश्च लंका विकृतं यथा स्यात्तथा ननादेत्यर्थः १६ १७

इतिपंचचत्वारिंशः सर्गः ४५ ॥ संवृत्ताकारः निगूहितांतर्गतभयः मतिं धैर्यविषयां १२ हनूमदग्रहतोसेदिदे शानग्र्यान सर्व
त्र त्वरायुक्तान् ३ पातगच्छेत इति वाक्यमारामकारेण ४ तदेवाह यत्नेरित्यादिना यत्नैः तमानैरभ्रमैरिति यावत्

हरिः ॐ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये सुंदरकांडे पंचचत्वारिंशः सर्गः ॥ ४५ ॥ हतान्मं

त्रिसुतान्बुद्ध्वा नैरेण महात्मना एवरणः संवृत्ताकारश्चकार मतिमात्मनाम् १ सविरूपा
क्षयूपाक्षौ दुर्धरं चैव राक्षसम् प्रघसं भासकर्णं च पंच सेनाग्रनायकान् २ संदिदेश दश
ग्रीवो वीरान्नयविशारदान् हनूमद्ग्रहणे व्यग्रान् वायुवेगसमान्युधि ३ यात सेना
ग्रगाः सर्वे महाबलपरिग्रहाः सवाजिरथमातंगाः स कपिः शास्यतामिति ४ यत्नै
श्च खलु भाव्यं स्यात्तमासाद्य वनालयम् कर्म चापि समाधेयं देशकालाविरोधितम् ५
न ह्यहं तं कपिं मन्ये कर्मणा प्रतितर्कयन् सर्वथा तन्महद्भूतं महाबलपरिग्रहम् ६ ६ ६

किंचात्र देशकालाविरोधि कर्म न कार्यमित्याह कर्मेति देशकालाविरोधितं तदविरुद्धं तदुचितं कर्म समाधेयं कार्यं
ग्राद्यौ लिंगविभक्ति व्यत्ययः ५ तत्र हेतुमाह नहीति तस्य कर्मणा तं प्रति कृतर्कयन्तं कपिं न मन्ये किं तर्हि मन्यसे तत्राह सर्वथेति ६

ह

महतो भूतस्येह कः प्रसंगस्तत्राह भवेदिति प्रस्मदर्थं प्रस्मन्निग्रहार्थं तत्र हेतुः सनागेत्यादि श्लोकद्वयमेकं वा कर्म नागादिसहितादे
वादयः सर्वे ७ सहितैः सर्वैर्युष्माभिः सह मया विनिर्जिताः प्रतस्ते रवश्यं नोऽस्माकं किंचिद्व्यलीकं प्रियं विधातव्यं ८ तस्मात्तदे
व तत्त्वं महद्भूतमेव प्रसह्य बध्वा परिगृह्यतां धीरपराक्रमः स्वाभाविकं कपिर्नावमान्यो नोपेक्षणीयः ९ सर्वथा तन्महद्भूतमि

भवेदिंद्रेण वा सृष्टमस्मदर्थं तपोबलात् सनागयक्षगंधर्वदेवासुरमहर्षयः ७ युष्माभिः सहि
तैः सर्वैर्मया सह विनिर्जिताः तैरवश्यं विधातव्यं व्यलीकं किंचिदेव नः ८ तदेव नात्र संदेहः प्रसह्य
परिगृह्यतां नावमान्यो भवद्भिश्च कपिर्धीरपराक्रमः ९ दृष्टा हि हरयः पूर्वं मया विपुलविक्रमाः
वाली च सह सुग्रीवो जांबवांश्च महाबलः १० नीलः सेनापतिश्चैव ये चान्ये द्विविदादयः १० नै
व तेषां गतिर्भीमा न तेजो न पराक्रमः न मतिर्न बलोत्साहौ न रूपपरिकल्पनम् ११ महत्सत्त्वमिदं
ज्ञेयं कपिरूपं व्यवस्थितम् प्रयत्नं महदास्थाय क्रियतामस्य निग्रहः १२ सीतापन सीता

त्यत्र निश्चायकं हेतुमाह दृष्टा हीति १० ननु त्वदृष्टान्यतमस्तु वायं नेत्याह नैवेति यथाऽस्य भीमा गतिः समुद्रप्लवनरूपा तथा तेषां
नैव यथा चास्य तेजः प्रादितथा तेषां न न रूपपरिकल्पनं यथेप्सितरूपपरिग्रहस्तेषां न ११ प्रयत्नं महदिति क्रियतामार्षं १२

चारुनानाविधरूपधारी परैः प्राकृतैः शत्रुभिरशक्यः अप्रधृष्यः समीक्षितात्मा सम्यगालोकितात्मशरीरः समवेक्षितार्थः सम्यगालोचितानन्तरकार्यः स हनूमान् परं समुद्रतीरमासाद्य प्रतिपन्नरूपः स्वीकृतस्वल्पदेहोऽभूदिति शेषः
२१२ ततः लम्बाख्यस्य गिरेः विचित्रकूटे विचित्राः कूटाः शृङ्गान्तराणि यस्मिन् तस्मिन् कूटे निपपातेति संबन्धः स्मिन्

स चारुनानाविधरूपधारी परं समासाद्य समुद्रतीरम्। परैरशक्यः प्रतिपन्नरूपः समीक्षितात्मा समवेक्षितार्थः॥२१२॥ ततः स लम्बस्य गिरेः समृद्धे विचित्रकूटे निपपात कूटे। सकेतकोद्दालकनालिकेरे महाद्रिकूटप्रतिमो महात्मा॥२१३॥ ततस्तु संप्राप्य समुद्रतीरं समीक्ष्य लङ्कां गिरिवर्यमूर्ध्नि। कपिस्तु तस्मिन्निपपात पर्वते विधूय रूपं व्यथयन्मृगद्विजान्॥२१४॥ स सागरं दानवपन्नगायुतं बलेन विक्रम्य महोर्मिमालिनम्। निपत्य तीरे च महोदधेस्तदा ददर्श लङ्काममरावतीमिव॥२१५॥ इत्यार्षे रामायणे वाल्मीकीये सुंदरकाण्डे प्रथमः सर्गः॥१॥

२१३ उक्तार्थं पुनः श्लोकद्वयेनाह ततस्त्विति यादि स कपिः रू व्यथमानविशेषणं सागरमति। तस्मिन् लङ्काख्यपर्वते मृगादीन् व्यथयन् पीडयन् निपपात निपत्य च ततः प्राचीनं रूपं विधूय महोदधिस्तीरे अमरावतीमिव स्थितां लङ्कां ददर्श २१४ २१५ इत्यार्षे रत्नविषमपदव्याख्याने प्रथमः सर्गः॥१॥

रा०वा०सु० कामं यद्यपीत्यर्थः १३ नयज्ञेन नीतिज्ञेन आत्मा स्वदेहः युद्धसिद्धिर्जयः १४ १५ १६ १७ सत्त्वं चित्तं १८ दिक्षु सर्वा
१६०

कामं लोकास्त्रयः सेंद्राः ससुरासुरमानवाः भवतामग्रतः स्थातुं न पर्याप्ता रणाजिरे १३ तथापि
तु नयज्ञेन जयमाकांक्षता रणे आत्मा रक्ष्यः प्रयत्नेन युद्धसिद्धिर्हि चंचला १४ ते स्वामिवच
नं सर्वे प्रतिगृह्य महौजसः समुत्पेतुर्महावेगा हुताशसमतेजसः १५ रथैर्मत्तैश्च नागैश्च वाजि
भिश्च महाजवैः शस्त्रैश्च विविधैस्तीक्ष्णैः सर्वैश्चोपचिता बलैः १६ ततस्तं ददृशुर्वीरा दी
प्यमानं महाकपिम् रश्मिमंतमिवोद्यंतं स्वतेजोरश्मिमालिनम् १७ तोरणस्थं महावेगं म
हासत्त्वं महाबलम् महामतिं महोत्साहं महाकायं महाभुजम् १८ तं समीक्ष्यैव ते सर्वे दिक्षु
सर्वास्ववस्थिताः तैस्तैः प्रहरणैर्भीमैरभिपेतुस्ततस्ततः १९ तस्य पंचायसास्तीक्ष्णाः सिताः पी
तमुखाः शराः शिरस्युत्पलपत्राभा दुर्धरेण निपातिताः २०

स्ववस्थिताः द्राक् तत्समीपमागंतुं चकिता इति राम०
भावः १९ तीक्ष्णा मर्मच्छिदः पीतमुखाः फलभागे स्वर्णरूषिताः उत्पलपत्राभास्तद्द्युतिः २०
१६०

स्वपेनदन् तेन नादेन दिशो नादयन्निति स्पर्षः उत्पपात नतो रणादिति शेषः २१ अभिपेदे प्राप्तः २२ स कपि व्योम्नि स्थित्वा तेस्व

सतैःपंचभिराविद्धःशरैःशिरसिवानरः उत्पपातनदन्व्योम्निदिशोदशविनादयन् २१ तत
स्तुदुर्धरोवीरःसरथःसज्जकार्मुकः किरंछरशतैस्तीक्ष्णैरभिपेदेमहावलः २२ सकपिर्वारया
मासतंव्योम्निशरवर्षिणम् वृष्टिमंतंपयोदान्तेपयोदमिवमारुतः २३ अर्घमानस्ततस्तेनदुर्धरेणा
निलात्मजः चकारनिनदंभूयोव्यवर्धतचवेगवान् २४ सदूरंसहसोत्पत्यदुर्धरस्यरथेहरिः नि
पपातमहावेगोविद्युद्राशिर्गिराविव २५ ततःसमथिताष्टाश्वंरथंभग्नाक्षकूवरम् वि
हायन्यपतद्भूमौदुर्धरस्त्यक्तजीवितः २६ तंविरूपाक्षयूपाक्षौदृष्ट्वानिपतितंभुवि तौ
जातरोषौदुर्धर्षावुत्पेततुररिंदमौ २७ सताभ्यांसहसोत्प्लुत्यविष्ठितोविमलेंवरे मुद्गरा
भ्यांमहावाहुर्वक्षस्यभिहतःकपिः २८

नादेनहुंकारादिरूपेण वारयामास पयोदान्ते जलदान्ते वर्षाकालान्ते
पयोदंमारुतस्व २३ २४ विद्युद्राशिरशनिसंघातो गिरिविवरयेनिपपातेत्यन्वयः २५२६२७ ताभ्यां कर्तृभ्यां करणा
भ्यामभिहतः २८

रा० वा० सुं० निहत्य वज्र्य वक्षस्त्वाघ्य धीकृत्य २९ ३० ३१ एकतोवस्थितौ परस्परसाहाय्यबुद्ध्यैकदेशेस्थिता विस्पष्टः ३२ ३३ विक्षतै
१६१

तयोर्वेगवतोर्वेगं निहत्य स महाबलः निपपात पुनर्भूमौ सुपर्णाविव वेगितः २९ स सालं वृक्ष
मासाद्य समुत्पाट्य च वानरः तावुभौ राक्षसौ वीरौ जघान पवनात्मजः ३० ततस्तांस्त्रीन्हतान्
ज्ञात्वा वानरेण तरस्विना अभिपेदे महावेगः प्रहस्य प्रघसो बली ३१ भासकर्णश्च संक्रुद्धः
शूलमादाय वीर्यवान् एकतः कपिशार्दूलं यशस्विनमवस्थितौ ३२ पट्टिशेन शिताग्रेण
प्रघसः प्रत्ययोधयत् भासकर्णश्च शूलेन राक्षसः कपिकुंजरम् ३३ स ताभ्यां विक्षतैर्गात्रै
रसृग्दिग्धतनूरुहः अभवद्वानरः क्रुद्धो बालसूर्यसमप्रभः ३४ समुत्पाट्य गिरेः शृंगं स
मृगव्यालपादपम् जघान हनुमान्वीरो राक्षसौ कपिकुंजरः गिरिशृंगसुनिष्पिष्टौ तिलशः
तौ बभूवतुः ३५ ततस्तेष्ववसन्नेषु सेनापतिषु पंचसु बलं तदवशेषं तु नाशयामास वानरः ३
३६ अश्वैरश्वान्गजैर्नागान् योधैर्योधान्रथै रथान् स कपिर्नाशयामास सहस्राक्ष इवासुरान् ३७

गात्रैरुपलक्षितः ३४३ ४३६ ३७

३८ ध्वजिनीपतीन् सेनापतीन् परिगृह्याश्रित्य स्थित इति शेषः कृतक्षणो लब्धावसरः ३९ इति षट्चत्वारिंशः सर्गः ४६॥
स तत्र राजा सेनापतीन् प्रमापितान्मारितान्निशम्य विज्ञाय समरोद्धतोन्मुखं समरोद्धतश्चासौ समरायोन्मुखश्चेति तं अग्रे समक्षम

हतैर्नागैश्च तुरगैर्भग्नाक्षैश्च महारथैः हतैश्च रक्षोभिर्भूमी रुद्धा मार्गान्समंततः ३८ ततः कपिस्तान्
ध्वजिनीपतीन् रणे निहत्य वीरान्सबलान्सवाहनान् तदेव वीरः परिगृह्य तोरणं कृतक्षणः
काल इव प्रजाक्षये॥३९॥ हरिः ॐ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये सुंदरकाण्डे षट्चत्वा
रिंशः सर्गः॥४६॥ सेनापतीन्पंच स तु प्रमापितान् हनूमता सानुचरान्सवाहनान् निशम्य राजा स
मरोद्धतोन्मुखं कुमारमक्षं प्रसमैक्षताग्रे १ स तस्य दृष्ट्यर्पणसंप्रचोदितः प्रतापवान्कांच
नचित्रकार्मुकः समुत्पपाताथ सदस्युदीरितो द्विजातिमुख्यैर्हविषेव पावकः २ सीता

वस्थितमक्षाख्यं कुमारं प्रसमैक्षत दृष्ट्वा पुरस्कार्यमाणतां प्रापयामासेत्यर्थः १ तद्वाहकरति सदसि यज्ञशालायां द्विजातिमुख्यै
र्हविषादीरितः प्रेरितः पावक इव समुत्पपात २

महान्सवीर्यवानित्यन्वयः जांबूनदजालेन तन्नसमूहेन सततं व्याप्तम् ३ उक्रमेवार्थविशिष्याह ततस्तरतितपःसंग्रहस्यतयोः स्वचान्स्य तेचयेनसमस्याजिते ४ शतेऽ व्योमचरं प्रसंगचारिणं पर्वताद्विव्यपीतिभावः समाहितं सज्जीकृतं तत्तूणोरिषुधिभिः सह

ततोमहान्वात्नदिवाकरप्रभंश्चत प्तजांबूनदजालसंततम् रथंतमास्थायग्रयौतवीर्यवानम
हाहरिंतेप्रतिनैऋतर्षभः ३ ततस्तपःसंग्रहसंचयार्जितंप्रतप्तजांबूनदजालचित्रितम् प
ताकिनंरत्नविभूषितध्वजंमनोजवाष्टाश्ववरैःसुयोजितम् ४ सुरासुराधृष्यमसंगचा
रिणंतडित्प्रभंव्योमचरंसमाहितम् सतूणमष्टासिनिबद्धवंधुरंयथाक्रमावेशितशक्तितो
मरम् ५ विराजमानंप्रतिपूर्णवस्तुनासहेमदाम्नाशशिसूर्यवर्चसा दिवाकराभंरथमास्थि
तस्ततःसनिर्जगामामरतुल्यविक्रमः ६ सपूरयन्खंचमहींचसाचलांतुरंगमातंगमहारथ
स्वनैः बलैःसमेतैःसहितोरणास्थितेसमग्रमासीनमुपागमत्कपिम् ७ सीतारामसीता

वर्तमाने अष्टाभिरसिभिर्निबद्धं अत एव वंधुरं सुंदरं यथाक्रमं यथास्थानमावेशिते शक्तितोमरे यस्मिन् तं ५ प्रतिपूर्णवस्तु नासमस्तमरोपकरणेन शशिसूर्यवर्चसा हेमदाम्ना विराजमानं रथमास्थितो निर्जगामेति संबंधः ६ तोरणास्थिते तोरणाश्रये

हरीक्षणः सिंहवत् क्रूरदृष्टिः युगांतकालाग्निवत् प्रजाक्षये ७ अवस्थितं हरिं समासाद्य तं नैवैक्षत विस्मितं च तं जातसंभ्रमं च बालो
यमौ योद्धुमिच्छतीति विस्मयः एवं पूर्वत्राच तत्र जातादरत्वं ८ प्रभिवर्धते तेजसा अभिवर्द्धते स्म धीः ९ स्थिरं स्थितः समर

च

स तं समासाद्य हरिं हरीक्षणो युगांतकालाग्निमिव प्रजाक्षये ७ अवस्थितं विस्मयजातसं
भ्रमं समैक्षताक्षो बहुमानचक्षुषा ८ स तस्य वेगं चकपे महात्मनः पराक्रमं चारिषु पार्थि
वात्मजः विचारयन् स्वं च बलं महाबलो युगक्षयेर्क इवाभिवर्द्धत ९ सजातमन्युः
प्रसमीक्ष्य विक्रमं स्थितः स्थिरं संयति दुर्निवारणम् समाहितात्मा हनुमंतमाहवे प्रचो
दयामास शितैः शरैस्त्रिभिः १० ततः कपिं तं प्रसमीक्ष्य गर्वितं जितश्रमं शत्रुपराजयो
न्वितम् अवैक्षताक्षः समुदीर्णमानसं स वाणपाणिः प्रगृहीतकार्मुकः ११ स हेमनि
ष्कांगदचारुकुंडलैः समाससादाशुपराक्रमः कपिम् तयोर्बभूवाप्रतिमः समागमः सुरा
सुराणामपि संभ्रमप्रदः २१

मीक्ष्य विक्रमं तं दर्शनीयपराक्रमं संयति रणे दुःखेन निवारणं यस्य तं हनूमंतं त्रिभिः शरैः प्रचो
दयामास प्रेरयामास १०.११ निष्कं मुरोभूषणं आशुपराक्रमः तीक्ष्णः पौरुषः समागमो युद्धं संभ्रमदः भयदः १२ ।११

टी० वा० सं० भूमिर्भूमिस्थशालिजातिरलनं प्राप्य चचार वीर्यसंयुगे वीर्यप्रवत्ते संयुगे वीर्यचेष्टिते प्राप: १३ समाधिसंधेय दृष्टान्तेसंयोगः शरसंधानं वि-
मोक्षः सहितस्तत्यागस्तेषां तत्त्ववित् अताडयत् अपातयत् १४ अस्तग दिग्धवक्षासो विरुद्धतलोचनश्च प्रवसत चित्तचक्षुरित्यर्थः न-

रणस्थभूमिर्नततापभानुमान् न वौनवायुः प्रचचाल नाचलः कपेः कुमारस्य च वीर्यसंयुगे न ना-
द च दौर्दधिश्च चुक्षुभे १३ स तस्य वीरः समुपोन्मत्तत्रिशाः सुवर्णपुंखान् स विषानिवोरगा-
न् समाधिसंयोगविमोक्षतत्त्ववित् छेदनपत्रीं कपिमूर्ध्न्यताडयत् १४ ततः शरैर्मूर्ध्नि स-
मेत्य पातितैः क्षरन्नसृग्धविरुतलोचनः न वोदितादित्यनिभः प्रांशुमान् व्यराजत ता-
दितस्ततो रक्षमालिकः १५ ततः स वेगाधिपमेत्रिसत्तमः समीक्ष्य तेराजवरात्मजे रुषा
उदस्य चित्रापुरुषश्चित्रकार्मुकं जहर्ष चापप्रतिचाहवोन्मुखः १६ स मंदराग्रस्य इवोग्र-
मानी विरुद्धकोपो वलवीर्यसंयुतः कुमारमक्षं सबलं स बाहने ददाहनेवाग्निमरीचि-

वोदितादित्यनिभः रक्तवर्ण इत्यर्थः प्रांशुरुमान् स्वमत्तकस्य प्रांशुरूपो प्रांशुमान् खं सुमालाध्यक्ष सूर्य इव व्यराजतः १५ आपूर्यत व्यवर्द्धत १६
मंदराग्रस्य उत्तरापतो मंदराभिमध्यान्हकालिकः सूर्य इत्यर्थः १७

२

श्री

१

हनुमन्

हम०
१६३

बाणासनचित्रकार्मुकः बाणाः अस्यन्ते क्षिप्यन्ते अनेनेति बाणासनम् बाणविमोक्षकचित्रकार्मुक इत्यर्थः १८ प्रवृद्धतेजोबलवीर्यसा
पकायस्तं १९ तैरतोरणस्थं तमहाकपिं गजपातनार्थीकृतगर्त्तं २० घनानादनिस्वनः मेघशब्दसदृशशब्दः भुजयोरूर्वोर्विक्षे

ततः स बाणासनचित्रकार्मुकः शरप्रवर्षो युधि राक्षसाम्बुदः शरान्मुमोचाशु हरीश्वराचले वला
हको वृष्टिमिवाचलोत्तमे १८ कपिस्ततस्तं रणचण्डविक्रमं प्रवृद्धतेजोबलवीर्यसायकम् कुमा
रमक्षं प्रसमीक्ष्य संयुगे ननाद हर्षात् घनतुल्यनिस्वनः १९ स बालभावाद्युधिवीर्यदर्पितः प्रवृद्ध
मन्युः क्षतजोपमेक्षणः समाससादाप्रतिमं रणे कपिं गजो महाकूपमिवावृतं तृणैः २० स तेन बा
णैः प्रसभं निपातितैश्चकार नादं घननादनिस्वनः समुत्पपाताशु नभः स मारुतिर्भुजोरुविक्षेपण
घोरदर्शनः २१ समुत्पतन्तं समभिद्रवद्बली स राक्षसानां प्रवरः प्रतापवान् रथी रथिश्रेष्ठतमः कि
रञ्छरैः पयोधरः शैलमिवाश्मवृष्टिभिः २२ स तांश्छरांस्तस्य हरिर्विमोक्षयंश्चचार वीरः प
थि वायुसेविते शरान्तरे मारुतवद्विनिष्पतन्मनोजवः संयति भीमविक्रमः २३ सीताणमासीता

पतनघोरदर्शनं यस्य सः २१ समभिद्रवत् अभ्याद्रवत् २२ शरान्विमोक्षयन् असंयोजयन् लाघवातिशयेनेति भावः तदाह शरान्तर इति २३

ह

आत्तराते खात् छादयंते चिंतां जगाम कपमेतादृशमेवं व चिंतयामीत्येवं २४ अथ शरान् व्यर्थीकुर्वतोपि भुजांतरभेदरू
प कर्मविशेषतत्त्वज्ञः पराक्रमविशेषेण चिंतयामास २५ चिंताप्रकारं अबालवदिति प्रमापणे हनने २६ समाहितो

तमात्तवालासनमाहवोन्मुखं खमात्तराते विविधैः शरोत्तमैः अवैक्षताक्षं बहुमानचक्षुषा
जगाम चिंतां स च मारुतात्मजः २४ ततः शरैर्भिन्नभुजांतरः कपिः कुमारवीरेण महात्मनानद
न् महाभुजः कर्मविशेषतत्त्ववित् विचिंतयामास रणे पराक्रमम् २५ अबालवद्बालदिवाकरः
प्रभः करोत्ययं कर्म महान्महाबलः न चास्य सर्वाहवकर्मशालिनः प्रमापणे मे मतिरत्र जायते २६
अयं महात्मा च महांश्च वीर्यतः समाहितश्चातिसहश्च संयुगे असंशयं कर्मगुणोदयादयं सनाग
यक्षैर्मुनिभिश्च पूजितः २७ पराक्रमोत्साहविवृद्धमानसः समीक्षते मां प्रमुखागतः स्थितः
पराक्रमो ह्यस्य मनांसि कंपयेत् सुरासुराणामपि शीघ्रकारिणः २८

बहितः अतिसहोऽतिरणक्लेशसहः कर्म
गुणोदयात् युद्धकर्मोत्कर्षेभिवृद्धैर्हेतोर्नागयक्षसहितैर्मुनिभिः पूजित इत्यर्थः २७ पराक्रमविषयोत्साहेन विवृद्धं मानसं यस्य तादृशः
स्मन् मां समीक्षते न तु कातर्येणेत्यर्थः २८

उपेक्षितो येनाभिभवेत् ग्रभिभवेद्वेस्यर्थः २९ इति परस्य शत्रोः प्रवेगं तर्कयन् स्वकर्मयोगं च विधाय पुरुक्रमं च तं कस्य पूर्वमश्वान्हत्वा ततो रथं भंक्ष्यामीति निश्चित्येत्यर्थः ३० विवर्तिते नानाविधमंडलगमने समाहितान् शिक्षितान् वायुसेविते पथि स्थितान् महाहयांस्तत्र स्थि

नचास्य येनाभिभवेदुपेक्षितः पराक्रमो ह्यस्य रतो विवर्धते प्रमापणो ह्यस्य ममाद्य रोचते न वर्धमानोग्निरुपेक्षितुं क्षमः २९ इति प्रवेगं तु परस्य तर्कयन् स्वकर्मयोगं च विधाय वीर्यवान् चकार वेगं तु महाबलस्तदा मतिं च चक्रेस्य वधे दुरात्मनः ३० ततस्य तानष्टवरान्महाहयान् समाहितान् भारसहान्विवर्तने जघान वीरः पथि वायुसेविते तलप्रहारैः पवनात्मजः कपिः ३१ ततस्ततेनाभिहतो महारथः स तस्य पिंगाधिपमंत्रिनिर्जितः प्रभग्ननीडः परिवृत्तकूबरः पपात भूमौ हतवाजिरेव तात् ३२ स तं परित्यज्य महारथो रथं स कार्मुकः खड्गधरः खमुत्पतन् तपोभियोगादृषिरुग्रवीर्यवान् विहाय देहं मरुतामिवालयम् ३३

तो जघान ३१ तलेनाभिहतः ग्रतएव पिंगाधिपमंत्रिणा हनूमता निर्जितः प्रभग्ननीडः प्रभग्नरथगर्तः परिवृत्तः कूबरो युगंधरोपस्य ततस्य महारथो हतवाजिरेव रथाद्भूमौ पपात ३२ मरुतामालयं स्वर्गमुत्पतन्नृषिरिव बभूवेति शेषः ३३

रा० वा० सुं०
१७

स महाबलो हनूमान् परैरनाधृष्यं सागरमतिक्रम्य त्रिकूटस्य लंकापरपर्यायस्य पर्वतस्य तटे स्थितः स्वस्थो भूत्वा लंकां ददर्श १ पुष्पमयः पुष्पमयकपिरिवेत्यर्थः २ अतिश्वसन् श्रमजन्यश्वासरहितः तदेवाह नग्लानिमिति समुद्रलंघनेन ग्लानिनाध्यगाच्छत् इत्यर्थः ३ अहं योजनानां बहूनि शतान्यपि क्रमेयं क्रमितुं शक्तः शतयोजनमिति संख्यातं सागरस्यांतं प

स सागरमनाधृष्यमतिक्रम्य महाबलः त्रिकूटस्य तटे लंकां स्थितां स्वस्थो ददर्श ह १ ततः पादपमुक्तेन पुष्पवर्षेण वीर्यवान् अभिवृष्टस्तत्र तस्थौ बभौ पुष्पमयो हरिः २ योजनानां शतं श्रीमांस्तीर्त्वाप्युत्तमविक्रमः अनिश्वसन् कपिस्तत्र न ग्लानिमधिगच्छति ३ शतान्यहं योजनानां क्रमेयं सुबहून्यपि किं पुनः सागरस्यांते संख्यातं शतयोजनम् ४ स तु वीर्यवतां श्रेष्ठः प्लवतामपि चोत्तमः जगाम वेगवाँल्लंकां लंघयित्वा महोदधिम् ५ शाद्वलानि च नीलानि गंधवंति वनानि च मधुमंति च मध्येन जगाम नगवंति च ६ शैलांश्च तरुसंछन्नान् वनराजीश्च पुष्पिताः अभिचक्राम तेजस्वी हनूमान् प्लवगर्षभः ७

य
रं पारं क्रमयैमितिकागतानामेऽद्विमन्यत्ते समितिशेषः ४ लंकां जगामपर्वतशिखरादरुह्येति शेषः ५ गंधवंति स्थूलपाषाणवंति क्षुद्रगिरिमंतिशाद्वलानि वनानि च पश्यन्निति शेषः मध्येन मार्गेण जगामेति संबंधः ६ शैलान्लंबगिरिपादरूपान् ७

रा०व्या०सुं०
१६५

पतत्रिराजो गरुडः वायुः सिद्धसंघैः सेविते वरेण्ये समेत्य पादयोर्जग्राहेत्यन्वयः ३४ स वानरोत्तमः संयति संग्रामे तं समाविध्य भ्रामयित्वा महो

ततः कपिं तं विचरन्तमेवं वरे पतत्रिप्रजानिलयसिद्धसेविते समेत्य तं मारुततुल्यविक्रमः करेण जग्राह च पादयोर्दृढम् ३४ स तं समाविध्य सहस्रशः कपिर्महोरगं गृह्य इवाण्डजेश्वरः मुमोच वेगात्पितृतुल्यविक्रमो महीतले संयति वानरोत्तमः ३५ स भग्नबाहूरुकटीशिरोधरः क्षरन्नसृङ्निर्मथितास्थिलोचनः सभिन्नसंधिः प्रविकीर्णबंधनो हतः क्षितौ वायुसुतेन राक्षसः ३६ महाकपिर्भूमितले निपीड्य तं चकार रक्षोधिपतेर्महद्भयम् महर्षिभिश्चक्रचरैर्महाव्रतैः समेत्य भूतैश्च सपन्नगैः सुरैश्च सेन्द्रैर्भृशजातविस्मयैर्हते कुमारे स कपिर्निरीक्षितः
३७

तले वेगान्मुमोच महोरगं गृहीत्वा अण्डजेश्वर इव ३५ ३६ चक्रचरैः ज्योतिश्चक्रचरैर्महाद्भिः समेत्य समागतैः
जातविस्मयैर्निरीक्षित इत्यन्वयः ३७

स्म०
१६५

वज्रिसुतोपमं जयेत तु न्यं हूत क्षणाः पुनर्ढि हे कृतोत्साहः ३८ इति सप्त चत्वारिंशः सर्गः ४७ मनः समाधाय पुत्रेनाशवि
न्नमपि चेत्तो धैर्यणाप्रकाशितमवंश्रुतिष्ठाय्य १ पितामहाराधनेन संचिताखैः श्रात्रव्रलाब्धोसीत्स पर्वः २ तवास्त्रव

निहत्य तं वज्रिसुतोपमश्रमं कुमारमक्षं क्षतजोपमेक्षणम्॥ तदेव वीरोभिजगाम तोरणं कृतक्ष
णः काल इव प्रजाक्षये॥ ३८ ॥ इति श्रीमद्रामायणे वाल्मीकीये सुंदरकाण्डे सप्त
चत्वारिंशः सर्गः॥ ४७ ॥ ततस्तु रक्षोधिपतिर्महात्मा हनूमताक्षे निहते कुमारे मनः समाधाय
तदेन्द्रकल्पं समादिदेशेन्द्रजितं सरोषम् १ त्वमस्त्रविच्छस्त्रभृतां वरिष्ठः सुरासुराणामपि शोक
दाता सुरेषु सेन्द्रेषु च दृष्टकर्मा पितामहाराधनसंचितास्त्रः २ तवास्त्रबलमासाद्य नासुरा न मरुद्
गणाः न शेकुः समरे स्थातुं सुरेश्वरसमाश्रिताः ३ न कश्चित्त्रिषु लोकेषु संयुगे न गतश्रमः भुजवी
र्याभिगुप्तश्च तपसा चाभिरक्षितः देशकालप्रधानश्च त्वमेव मतिसत्तमः ४ ४ ४ ४ सीतारम

त्वमासाद्य सुरेश्वरसमाश्रिताश्चरातोस्थातुं न शेकुः ३ त्रिषु संयुगे कश्चित्त्वन्यो न गतश्रमो न सर्वे शास्त्रमाइत्यर्थः
भुजवीर्याभिगुप्तः तपसाभिरक्षित देशकालप्रधानश्च मत्यासत्तमः प्राप्ततरश्च त्वमेवेत्यन्वयः ४ ४ ४ ४ ४

रा०वा०सुं०स
१६६

त्वेरश्च कर्तव्यानां कर्मणां मध्ये ऽशक्यं नास्ति मतिपूर्वमंतराले प्राप्त्यानुरूपं बुद्धिपूर्वं कर्तव्याराजकार्यविचारे तेः कार्यं नास्ति
कार्यसाधकविचारेणास्तीत्यर्थः त्रिषु संग्रहेषु त्रिष्वपि लोकेषु भोज्यः सिः कर्मणां संग्रहेत्ते इति संग्रहा लोकाः तेषु तेऽस्त्रबलं

न तेऽस्त्यशक्यं समरेषु कर्मणां न तेऽस्त्यकार्यं मतिपूर्वमंतरा न सोऽस्ति कश्चित्त्रिषु संग्रहेष्वपि न वेद यस्
तेऽस्त्रबलं बलं च ते ५ ममानुरूपं तपसा बलेन च ते पराक्रमश्चास्त्रबले च तेष्वपि न त्वां समासाद्य
रणावमर्दने मनः श्रमं गच्छति निश्चितार्थम ६ निहन्ताः किंकराः सर्वे जंबुमाली च राक्षसः अमा
त्यपुत्रा वीराश्च ये च सेनाग्रनायकाः ७ बलानि सुसमृद्धानि साश्वनागरथानि च सहोदरस्ते दयि
तः कुमारोऽक्षश्च सूदितः ८ न हि तेष्वेवमेतालं स्वप्यरिसूदन ९ सीतारामाभ्यां नमः राम

हजंच बलं येन न वेद स कश्चिद् विद्यते इति सर्वं प्रसिद्धं बलं हृदयं वा स्विमित्यर्थः ५ ममानुरूपं मत्सदृशं रणावमर्दे रणसंकट
विषये मम मनस्त्वां समासाद्य चिंतयित्वा निश्चितविजयरूपप्रयोजने सति श्रमं विषादं न गच्छतीत्यर्थः ६ प्रहस्तमाह
निहतारिति ७ ष्टे भ्यरिनिषूदन त्वयि मियः सारः उत्कर्षबुद्धिः सतेषु नास्त्येवा हि ८

एम०
१६६

इदं महद्वनं निहतं दृष्ट्वा कपेः प्रभावं माहात्म्यं पराक्रमं पौरुषं च दृष्ट्वा आत्मनं स्व सार सामर्थ्यं निरीक्ष्य स्व बलानुरूपं वेगं
कुरुष्व १० गते दूते यन्निर्गते त्वयि सन्निरूप्ये मति बलाबलं मैर्दैः अनेक बलप्रमथनैर्हेतुभिः प्रीतं तथा शत्रुः उपप्रान्तं बलः प्राज्ञः
यथा प्राप्स्यति तस्मात् स्वबलं परबलं च समीक्ष्य आरभस्व इत्यर्थः ११ अथ पतत्त्रसेनादिपरिग्रहो व्यर्थ इत्याह न वीरे इति हे वी
र सेनाभिरन्याद्याय तत्तत्प्रमाणाः ते घटाश्च्यवेतिपलायेत्तेन प्रेषितं च तथापि विशालं सारं प्रतितिष्ठ्यं कठिनं चभ्यत एव

इदं च दृष्ट्वा निहतं महद्वनं कपेः प्रभावं च पराक्रमं च त्वमात्मनश्चापि निरीक्ष्य सारं कुरुष्व वेगं स्व
बलानुरूपम् १० बलाबलं मैर्दैस्त्वयि संनिरूप्ये यथा गते प्राप्स्यति शान्तशत्रुः तथा समीक्ष्या।
त्मबलं परं च समारभस्वास्त्रभृतां वरिष्ठ ११ न वीरसेना गणशोऽच्यवन्ति न वज्रमादाय विशालसा
रं न मारुतस्यास्ति गतिप्रमाणं न चाग्निकल्पः करणेन हन्तुम् १२ सीतारामाभ्यां नमः सीतारामा सीतो

वज्रं तत्तुल्यं प्रायुधजालमादायापि न योजनं गणशः प्रयुक्तस्य तस्यापि प्रच्यवादेव कुतस्त्राहनेति मारुतस्य मारुतात्मजस्य
स हनूमतो गतेः सामर्थ्यस्य प्रमाणं परिच्छेदः एतावद्बलं निग्रहीतुं शक्तः इति परिच्छेदो नास्ति अतो निखिलमपि बलमा
युधजालं च तस्य किंचित्करमित्यर्थः किं चाग्निकल्पो सौ करणेन शस्त्रादिरूपेण हन्तुं न शक्यः एवं तस्य मारुतात्मजस्य
त्वज्ञाने हनूमान् शत्रुसैन्यानां निहन्ता मारुतात्मज इति हनुमद्वर्जनात् गणशोऽच्यवन्तीत्यत्र अप्रोक्षमार्थम् १२

ग० वा० तु०
१६७

किं वत्नावयेमेतन्नगंतव्यमिति पृंकायां तत्स्वविप्रो बभुपदिशातितमिति तेमदुक्तमर्थमेवमेव प्रसमीक्ष्य एवमेव तत्वमिति निश्चित्य
स्वकर्मसाम्यात् स्वेनैव कर्मणः प्रकृत कार्यस्य साम्यात् सिद्धेः सेपादनीयत्वात् [illegible] त्वं समाहितात्मा समाहितचित्तो भूत्वा स्व
विषये दिव्यं धनुषो वीर्यं दिव्यास्त्रमोक्षसामर्थ्यं स्मरन् निश्चिन्वन् प्रजगत्वा चास्ते परकीयप्रहारहीनं यथा भवति तथा प्रा
नु परामवकर्मारभस्व १३ ग्रहं त्वां संप्रेषयामीति यत् तदयं मतिर्न श्रेष्ठा लुनो वितेत्यर्थः ग्रयापि तदयं मतिः त्वत्प्रेषणाद्विषयामतिः

तमेवमर्थं प्रसमीक्ष्य सम्यक् त्वं कर्मसाम्याद्धि समाहितात्मा स्मरंश्च दिव्यं धनुषोऽस्य वीर्यं व्रजा
प्तते कर्म समारभस्व १३ नरवत्त्विय मतिः श्रेष्ठा यत्त्वां संप्रेषयाम्यहम् इयं च राजधर्माणां
क्षत्रियस्य मतिर्मता १४ नानाशास्त्रश्रुतं ज्ञानमेवैशारद्यमरिंदम अवश्यमेव बोद्धव्यं कामं श्रावि

राजधर्माणामन्याकं तथा क्षत्रस्य क्षत्रियस्य च मतिर्वशास्त्रतः संमतैव १४ अथ पाठः क्षत्रियस्य च रूलमाह नानेति नानाशास्त्रे
षु धर्मार्थनीत्यादिशास्त्रेषु श्रुतं ज्ञानं च वैशारद्यं संपाद्यमिति शेषः यस्य रतो विजयः कामो भवति तेनोक्तेनानाशास्त्रमवश्यं बोद्धव्य
मेवेत्यर्थः यद्वा परस्य नानाशास्त्रेषु यद्वैशारद्यमस्ति तद्योद्धावश्यमेव बोद्धव्यं तु अथापि रतो स्वस्य विजयः प्राप्य एव अहं जेष्याम्येवे
वेति युध्यायुद्धमारम्भमेव न तु ताहृशा शत्रोरपि निवर्तितव्यमित्यर्थः १५

एम०
१६७

दक्षसुतादेवसत्यायोक्तं विष्णुपुराणे मनसा त्वेव सृष्टानि पूर्वं दक्षोऽसृजत्तदा देवानृषीन्सगंधर्वानुरगान्पक्षिणस्तथेति तस्य दक्षस्य प्र
भावो भर्त्तारं रणे भवरणं प्रदक्षिणं चकार रणाय प्रतिपन्नबुद्धिः कृतबुद्धिर्बभूव १६ स्वर्गगैरन्यैः सभास्थैरा ज्ञैस्तैः प्रतिपूजितः

ततः पितुस्तद्वचनं निशम्य प्रदक्षिणं दक्षसुतप्रभावः चकार भर्त्तारमदीनसत्त्वो रणाय वीरः प्रति
पन्नबुद्धिः १६ ततस्तैः स्वर्गगैरिन्द्रजित्प्रति पूजितः युद्धोद्धतकृतोत्साहः संग्रामं संप्रपद्यत
१७ श्रीमान्पद्मपलाशाक्षो राक्षसाधिपतेः सुतः निर्जगाम महातेजाः समुद्र इव पर्वसु १८ स
पक्षिराजोपमतुल्यवेगैर्व्यालैश्चतुर्भिः सिततीक्ष्णदंष्ट्रैः रथं समायुक्तमसह्यवेगं समारुरोहेन्द्र
जिदिन्द्रकल्पः १९ स रथी धन्विनां श्रेष्ठः शस्त्रज्ञोऽस्त्रविदां वरः रथेनाभिययौ क्षिप्रं हनूमा
न्यत्र सोऽभवत् २० स तस्य रथनिर्घोषं ज्यास्वनं कार्मुकस्य च निशम्य हरिवीरोऽसौ संप्रहृष्टतरोऽभ
वत् २१

युद्धे उद्धतः श्लाघ्यः कृतोत्साहः संग्रामं संप्रपद्यत संप्रापद्यत १७ पर्वसु वर्धमान इति शेषः १८ पक्षिराजो गरुडस्तेनोपमा तुल्यवेगो
श्च व्यालैः सर्पैः १९ २० २१

शितशल्यान् तीक्ष्णाग्रान् २२ सेनापतिविद्धपेजातहर्षे दिशाश्च तुल्यात् दर्शनीयौ द्वामानगाः क्रोशुप्रसृतयः २३ चक्रचरतम्भाः पर

सुमहच्चापमादाय शितशल्यांश्च सायकान् हनूमंतमभिप्रेक्ष्य जगाम रणपंडितः २२ तस्मिं
स्ततः सेनापतिजातहर्षे रणाय निर्गच्छति बाणपाणौ दिशश्च सर्वाः कलुषा बभूवुर्मृगाश्च रौ
द्रा बहुधा विनेदुः २३ समागतास्तत्र तु नागयक्षा महर्षयश्चक्रचराश्च सिद्धाः नभः समा
वृत्य च पक्षिसंघा विनेदुरुच्चैः परमं प्रहृष्टाः २४ आयांतं सरथं दृष्ट्वा तूर्णमिंद्रजितं कपिः विन
नाद महानादं व्यवर्द्धत च वेगवान् २५ इंद्रजिच्च रथं दिव्यमास्थितश्चित्रकार्मुकः धनुर्वि
स्फारयामास तडिदूर्जितनिस्वनम् २६ ततः समेतावतितीक्ष्णवेगौ महाबलौ तौ रणनिर्विशं
कौ कपिश्च रक्षोधिपतेश्च पुत्रः सुरासुरेंद्राविव बद्धवैरौ २७ ततोस्य वीरस्य महारथस्य धनुष्म
तः संयति संमतस्य शरप्रवेगं व्यहनत्प्रवृद्धश्चचार मार्गे पितुरप्रमेयः २८ सीतारामाभ्यां नमः

मे हृष्टा विनेदुरिति प्रभुमनिमित्ते २४ २५ तडिदूर्जितनिस्वनं तडिल्लिमहूर्जितस्वनंच २६ २७ व्यहनत् व्याहनत् वंचितवान् २८

सुपत्रिणः कंकादिपक्षपुङ्खान् सुसंततान् अविरतान् २९ ३० अभिलक्ष्यस्य अभिमतलक्ष्यस्य लक्ष्यसंग्रहं लक्ष्यत्वेन संग्रहतो

ततः शराणामतितीक्ष्णवेगान् सुपत्रिणः काञ्चनचित्रपुङ्खान् मुमोच वीरः परवीरहन्ता सुसंततान्वज्रसमानवेगान् २९ स तस्य तत्स्यन्दननिःस्वनं च मृदङ्गभेरीपटहस्वनं च विकृष्यमाणस्य च कार्मुकस्य निशम्य घोषं पुनरुत्पपात ३० शराणामन्तरेष्वाशु व्यवर्तत महाकपिः हरिस्तस्याभिलक्ष्यस्य मोघयन्लक्ष्यसंग्रहम् ३१ शराणामग्रतस्तस्य पुनः समभिवर्तत प्रसार्य हस्तौ हनुमानुत्पपातानिलात्मजः ३२ तावुभौ वेगसंपन्नौ रणकर्मविशारदौ सर्वभूतमनोग्राहि चक्रतुर्युद्धमनुत्तमम् ३३ हनूमतो वेद न राक्षसोऽन्तरं न मारुतिस्तस्य महात्मनोऽन्तरम् परस्परं निर्विषहौ बभूवतुः समेत्य तौ देवसमानविक्रमौ ३४

मोघयन् मोघीकुर्वन् शराणामन्तरेषु रंध्रेषु व्यवर्तत परिवर्तते स्म सर्पः ३१ अभिवर्तत अभ्यवर्तत ततः शरमोक्षसमये पुनरुत्पपात ३२ ३३ निर्विषहौ दुःसहवेगौ ३४

अमोघेषु शरेषु संपतत्स्वपि लक्ष्ये लक्ष्यभूते हनुमति विहन्यमानेष्वमोघशरेभ्यो विमुच्यमाने सति शरैरभिघ्नमाने सति तीक्ष्णधीः हंतेर्गत्यर्थात्कर्मकर्तरि लट् शानज्वादेशः समाधिसंयोगसमाहितात्मा समाधीयत इति समाधिः लक्ष्यं तस्मिन्संयोगे शरसंधाने च समाहितात्मा

ततःस्तु लक्ष्ये स विहन्यमाने शरेष्वमोघेषु च संपतत्सु जगाम चिंतां महतीं महात्मा समाधिसंयोगसमाहितात्मा ३५ ततो मतिं राक्षसराजसूनुश्चकार तस्मिन्हरिवीरमुख्ये अवध्यतां तस्य कपेः समीक्ष्य कथं निगच्छेदिति निग्रहार्थम् ३६ ततः पैतामहं वीरः सोस्त्रमस्त्रविदां वरः संदधे समहातेजास्तं हरिप्रवरं प्रति ३७ अवध्योयमिति ज्ञात्वा तमस्त्रेणास्त्रतत्त्ववित् निजग्राह महाबाहुर्मारुतात्मजमिंद्रजित् ३८ तेन बद्धस्ततोस्त्रेण राक्षसेन स वानरः अभवन्निर्विचेष्टश्च पपात च महीतले ३९

प्रमत्तचित्तः लक्ष्यसंधानशरसंधानदत्तचित्त इत्यर्थः ३५ राक्षसराजसूनुः तस्य कपेः अवध्यतां समीक्ष्य निग्रहार्थं बंधनार्थं कथं निगच्छेत् निग्रहं प्राप्नुयादिति तस्मिन्हरिवीरमुख्ये मतिं च कारेति संबंधः ३६ ३७ ब्रह्मास्त्रेण अवध्यतां स्वात्मनः ज्ञात्वा तदस्त्रेण तं निजग्राह च बबंध ३८ ३९

सहनूमानस्त्वस्यतदस्त्रबंधं सतं बुध्वापि प्रभोर्ब्रह्मणः प्रभावाद्वरदानाच्छिन्नात्मवेगः विगतः स्वप्रयासः स्वप्रयत्नोपि वेगः विगतपीडायेन ताद्द
ताहृग्यः अभीतश्चिंतइति यावत् आत्मनः पितामहानुग्रहं मुहूर्त्तमात्रेणामदस्त्रनिरोधमुक्तिरित्येवरूपं विचिंतयामास ४० उक्त
मेवार्थं स्पष्टयति तत इति स्वायंभुवैः स्वयंभूदेवत्यैरनेकविधैर्मंत्रैरभिमंत्रितं सन्निरुद्धं भवतितादृशं ब्रह्मास्त्रं तत्कृतं निरोधं बुध्वा

ततोथ बुध्वा स तदस्त्रबंधं प्रभोः प्रभावाद्विगतात्मवेगः पितामहानुग्रहमात्मनश्च विचिंतयामा
सहरिप्रवीरः ४० ततः स्वायंभुवैर्मंत्रैर्ब्रह्मास्त्रमभिमंत्रितम् हनूमांश्चिंतयामास वरदानं पि
तामहात् ४१ न मेस्य बंधस्य च शक्तिरस्ति विमोक्षणे लोकगुरोः प्रभावात् इत्येवमेवं विहि
तोस्त्रबंधो मयात्मयोनेरनुवर्तितव्यः ४२ स वीर्यमस्त्रस्य कपिर्विचार्य पितामहानुग्रहमात्मन
श्च विमोक्षशक्तिं परिचिंतयित्वा पितामहाज्ञामनुवर्त्तते स्म ४३ सीतारामाभ्यां नमः

पितामहाद्ब्रह्मणः अबध्यं वररूपं दानं प्राग्लब्धं हृपं चिंतयामास ४१ लोकगुरोः प्रभावादस्य बंधस्य विमोक्षणे मे शक्तिर्नास्ति स बंधानेन ब्रह्मा
स्त्रेणैव विहितः इंद्रजिता एवमनूह्यमानप्रकारेण कृतः आत्मयोनेर स्त्रबंधो मयानुवर्तितव्यः एवं मुहूर्त्तमात्रं सोढव्य एव ४२ पि
तामहानुग्रहं विमोक्षहेतुभूतं मनुग्रहं आत्मनश्च विमोक्षशक्तिं मुहूर्तानंतरभाविनीं तां चिंतयित्वा मुहूर्त्तमात्रं पितामहाज्ञामनुवर्त्तते स्म
४३

स तस्मिन् लंबपर्वते तिष्ठन् लंकायां वनान्युपवनानि च ददर्श अपि च स पवनात्मजः तां लंकां नगाग्रे पर्वताग्रे स्थि
तां ददर्श ८ अस्यैव प्रपंचः सरलानित्यादि मुचुलिंदान् जंबीरान् ९ गंधपूर्णान् गंधाढ्यान् १० ११ रावणत

स तस्मिन्नचले तिष्ठन्वनान्युपवनानि च स नगाग्रे च लंकां ददर्श पवनात्मजः ८ सरला
न्कर्णिकारांश्च खर्जूरांश्च सुपुष्पितान् प्रियालान्मुचुलिंदांश्च कुटजान्केतकानपि ९ प्रि
यंगून्गंधपूर्णांश्च नीपान्सप्तच्छदांस्तथा असनान्कोविदारांश्च करवीरांश्च पुष्पितान् ११
पुष्पभारनिबद्धांश्च तथा मुकुलितानपि पादपान्विहगाकीर्णान्पवनाधूतमस्तकान् ११
हंसकारंडवाकीर्णा वापीः पद्मोत्पलावृताः आक्रीडान्विविधान्रम्यान्विविधांश्च जला
शयान् १२ संततान्विविधैर्वृक्षैः सर्वर्तुफलपुष्पितैः उद्यानानि च रम्याणि ददर्श कपिकुंज
रः १३ समासाद्य च लक्ष्मीवाल्लंकां रावणपालिताम् परिखाभिः सपद्माभिः सोत्पलाभिरलं
कृताम् १४

पोबलात् तस्यां सर्वे वृक्षाः सर्वदा पुष्पिताः इति न कश्चिद्विरोधः आक्रीडान् साधारणोद्याना
नि। १२ सर्वर्तुषु फले पुष्पे च संजातमेषां तैः १३ लंकां समासाद्य लंकासमीपं प्राप्य वक्ष्यमाणविशेषणां लंकां

रा०वा०तु०
१७०

अयं तत्र जायत इत्यत्र हेतुः पितामहेत्यादि प्रादिसमासः स्वनंतरं पितामहमहेंद्राभ्यामनिलेन च रक्षितत्वादित्यर्थः ४४ ममेह ग्रहणे दर्शनमस्तीति शेषः तदेवाह राक्षसेंद्रेण संवाद इति ४५ निश्चितार्थः उक्तप्रकारेणेति भावः समीक्ष्यकारी विचारपूर्वकं कार्यकर्ता अभिगतैः आभिमुख्येन गतैः परैः प्रसह्य निगृह्य बलाद्गृहीत्वा परिभर्त्स्यमानः सन्ननाद पीडित

अस्त्रेणापि हि बद्धस्य भयं मम न जायते पितामहमहेंद्राभ्यां रक्षितस्यानिलेन च ४४ ग्रह
णे चापि रक्षोभिर्महन्मे गुणदर्शनम् राक्षसेंद्रेण संवादस्तस्माद्गृह्णन्तु मां परे ४५ स नि
श्चितार्थः परवीरहंता समीक्ष्यकारी विनिवृत्तचेष्टः परैः प्रसह्याभिगतैर्निगृह्य ननाद
तैस्तैः परिभर्त्स्यमानः ४६ ततस्तं राक्षसा दृष्ट्वा निर्विचेष्टमरिंदमम् बबंधुः शणवल्कैश्च
द्रुमचीरैश्च संहतैः ४७ स रोचयामास परैश्च बंधं प्रसह्य वीरैरभिनिग्रहं च कौतू
हलान्मां यदि राक्षसेंद्रो द्रष्टुं व्यवस्येदिति निश्चितार्थः ४८

इवेति भावः ४६ शणवल्कैः तन्मयैः रज्जुभिः द्रुमचीरैः द्रुमवल्कलैः संहतैः त्रिगुणितैः ४७ राक्षसेंद्रः कौतूहलान्मां द्रष्टुं व्यवस्येदिति निश्चितार्थः निश्चितकार्यः ततः सन् स्वस्य तत्सभाप्रापेक्षितं परैर्बंधनादि रोचयामास ४८

राम०
१७०

अस्त्रवंधोपिमोक्षोपित्तदैवजायत्तइत्याहसइतिसवीर्यवान् तेनवल्कलेनतज्जन्यरज्ज्वैववद्धः अस्त्रेणतुविमुक्तः कुतस्त त्राह अस्त्रवंधोमंत्रवंधोन्यंवंधंनानुवर्ततेइतरवंधेनसहनतिष्ठति तस्मिन्सतिमंत्रवंधोनस्पृशतीत्यर्थः ४९ इममर्थंइंद्रजिद्दपितातवानित्याहअथेति इंद्रजित् द्रुमचीरवद्धंअतएवास्त्रेणविमुक्तंविचार्यअन्येनरज्जुवल्कादिनावद्धो हनूमान्अस्त्रमनुवर्ततेअस्त्रेणवद्धइववर्ततेइत्यपिविचार्यचिंताजगामेतिसंवंधः ५० चिंतांतरमाहअहोइति

सवद्धस्तेनवल्केनविमुक्तोस्त्रेणवीर्यवान् अस्त्रवंधःसचान्यंहिनवंधमनुवर्तते ४९
अथेंद्रजितद्रुमचीरवद्धंविचार्यवीरःकपिसत्तमंतम् विमुक्तमस्त्रेणजगामचिंतामन्येन
वद्धोह्यनुवर्ततेस्त्रम् ५० अहोमहत्कर्मकृतंनिरर्थंनराक्षसैर्मंत्रगतिर्विमृष्टा पुनश्च
नास्त्रेविहतेमन्यत्प्रवर्ततेसंशयिताःस्मसर्वे ५१

मयाकृतंमहत्कर्ममहास्त्रेणहनुमद्वंधनकर्मएतद्राक्षसैर्निरर्थंकृतंयतस्तैर्मंत्रगतिर्नविमृष्टानविचारिता अन्यवंधैर्मंत्रवंधोनस्पृशतीतिनज्ञातमित्यर्थः पुनरस्त्रेतदेवप्रयोज्यंतत्राहपुनश्चेति अस्त्रेब्राह्मेविहतेपुनरन्यदस्त्रंतदस्त्रप्रयोगांतरंनप्रवर्तते अतःसर्वेवयंसंशयिताः संशयितप्रायाः एवंमुक्तोयंसर्वान्नपिहन्यादितिभावः ५२

ए०वा०तु०न्नात्मानमवबुध्यते श्रेतभीवितलब्धवर्त्तयानावबोधयतिस्म अस्त्रमोक्षेन प्रकाशयतिस्मस्पर्धः तैर्वन्धैः लौकिकवन्धैः ५२५३
१७१

अस्त्रेणाहनुमान्मुक्तोनात्मानमवबुध्यते कृष्यमाणस्तुरक्षोभिस्तैश्चवंधैर्निपीडित ५२ हन्यमानस्ततःक्रूरैराक्षसैःकाष्ठमुष्टिभिः समीपंराक्षसेंद्रस्यप्राकृष्यतसवानरः ५३ अथेंद्रजितेप्रसमीक्ष्यमुक्तमस्त्रेणावद्धंद्रुमचीरवल्कैः व्यदर्शयत्तत्रमहावलंतंहरिप्रवीरंसगणाय राज्ञे ५४ तंमत्तमिवमातंगंवद्धंकपिवरोत्तमम् राक्षसाराक्षसेंद्रायरावणायन्यवेदयन् ५५ कोयंकस्यकुतोवापिकिंकार्यंकोव्यपाश्रयः इतिराक्षसवीराणांतत्रसंजज्ञिरेकथाः ५६ हन्यतांदह्यतांवापिभक्ष्यतामितिचापरे राक्षसास्तत्रसंक्रुद्धाःपरस्परमथाब्रुवन् ५७ अतीत्यमार्गंसहसामहात्मासतत्ररक्षोधिपपादमूले ददर्शराज्ञःपरिचारवृद्धान्गृहंमहारत्नविभूषितंच ५८ सददर्शमहातेजारावणःकपिसत्तमम् रक्षोभिर्विकृताकारैःकृष्यमा

५७ ५५ कोव्यपाश्रयः अपेक्षितिपोषः कस्याश्रयेणावंनिर्भयस्त्वमर्थः ५८ पत्रारावणाःस्थितस्तत्रस्थानप्राप्ताएवमब्रुवन्नित्यर्थः

६० व ध्यमानामंत्रोपो ऽयेति मंत्रीन् मंत्रिणः ६१ कार्यं च अर्थस्य कार्यकर्तव्यं अर्थस्य त्वया जनेन अर्थस्य मूलं मुख्य प्रयोजनं प्रवर्तकं च यथाक्रमं तैः पृष्टः कपिः हरीश्वरस्य सकाशाद्दूतोहमागतोस्मीति निवेदयामास दूरसंकृत्यपरेरकः सुग्रीव इत्युक्त

राक्षसाधिपतिं चापि ददर्श कपिसत्तमः तेजोबलसमायुक्तं ज्वलंतमिव भास्करम् ६० सरोष संवर्तितताम्रदृष्टिर्दशाननस्तं कपिमन्ववेक्ष्य अथोपविष्टान् कुलशीलवृद्धान् समादिशत्तं प्रतिमुख्यमंत्रीन् ॥६१॥ यथाक्रमं तैः स कपिस्तु पृष्टः कार्यार्थमर्थस्य च मूलमादौ निवेदयामास हरीश्वरस्य दूतः सकाशादहमागतोस्मि ॥६२॥ हरिः ॐ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये सुंदरकाण्डे ऽष्टचत्वारिंशः सर्गः ॥४८॥ ततः स कर्मणा तस्य विस्मितो भीमविक्रमः हनूमान् क्रोधताम्राक्षो रक्षोधिपमवैक्षत १ भ्राजमानं महार्हेण कांचनेन विराजता मुक्ताजालवृतेनाथ मुकुटेन महाद्युतिम् २

ति० ६२ ॥ अष्टचत्वारिंशः सर्गः ॥४८॥ स हनूमान् तस्य रावणस्य कर्मणा विस्मितः पु

रुषार्थ एव लोनागं तत्प्रमितिमपाय ल कृतः स तु रावणस्य एव इंद्रजिन्महावेगेन मोक्षानीत जानि स्यानयन कर्मणा

ज्ञात विस्मय रूपार्थः १ २

वज्रसंयोगेनतत् द्वद्वनेनसंयुक्तैः घटितैराभरणैर्भ्राजमानमिव्यनुषंगः ३ भक्तिभिः पङ्क्तिभिः पङ्क्तिभिः कस्तूर्यादिरचनाविशेषैः ४ विचित्रैराश्चर्यभूतैर्दर्शनीयैश्चरक्ताद्यैर्भीमदर्शनैर्दीप्ततीक्ष्णमहादंष्ट्रैः प्रलंबानिदशनच्छदानि योष्ठानि येषुतैरनेकविशेषणविशिष्टैर्दशाभिः शिरोभिर्भ्राजमानंनानाव्यालसमाकीर्णैः शिरोवरैर्भ्राजमानं

वज्रसंयोगसंयुक्तैर्महार्हमणिविग्रहैः हैमैराभरणैश्चित्रैर्मनसेवप्रकल्पितैः ३ महार्हक्षौमसंवीतंरक्तंचंदनरूषितम् स्वनुलिप्तंविचित्राभिर्विविधाभिश्चभक्तिभिः ४ विचित्रैर्दर्शनीयैश्चरक्ताक्षैर्भीमदर्शनैः दीप्ततीक्ष्णमहादंष्ट्रैःप्रलंबदशनच्छदैः ५ शिरोभिर्दशभिर्वीरंभ्राजमानंमहौजसम् नानाव्यालसमाकीर्णैःशिखरैरिवमंदरः ६ नीलांजनचयप्रख्यंहारेणोरसिराजता पूर्णचंद्राभवक्त्रेणसबालार्कमिवांबुदम् ७ बाहुभिर्बद्धकेयूरैश्चंदनोत्तमरूषितैः भ्राजमानांगदैःपीनैःपंचशीर्षैरिवोरगैः ८

मंदरमिवस्थितंरक्षःपतिंहनूमान्परपश्यत्‌ तस्यतेजसामोहितोमानसाविंतयामासेतिपंचदशानामश्लोकेनसंबंधः हनूमतोदर्शनकालेरावणोरवमीषणरूपकरणादितिबोध्यम् ५६ उरसिराजताहारेणचंद्राभवक्त्रेण उपलक्षितंसबालार्कमेघमिवस्थितं ७ केयूरंभुजोपरिधार्यमाणंगदंबाहुम

९ १० ११ चतुर्भिः सा[?] परिवृतः कृत्स्नः लोकः भूमंडलमिव स्पर्धः १२ मंत्री बुद्धिसहायः सचिवः कार्यसहायः १३ विष्ठितं

महति स्फाटिके चित्रे रत्नसंयोगचित्रिते उत्तमास्तरणास्तीर्णे सूपविष्टं वरासने ९ अलंकृताभिर
त्यर्थं प्रमदाभिः समंततः वालव्यजनहस्ताभिरारात्समुपसेवितम् १० दुर्धरेण प्रहस्तेन महापार्श्वे
न रक्षसा मंत्रिभिर्मंत्रतत्त्वज्ञैर्निकुंभेन च मंत्रिणा ११ उपोपविष्टं रक्षोभिश्चतुर्भिर्बलदर्पितैः कृ
त्स्नः परिवृतो लोकश्चतुर्भिरिव सागरैः १२ मंत्रिभिर्मंत्रतत्त्वज्ञैरन्यैश्च शुभदर्शिभिः अन्वास्य
मानं सचिवैः सुरैरिव सुरेश्वरम् १३ अपश्यद्राक्षसपतिं हनूमानतितेजसम् विष्ठितं मेरुशि
खरे सतोयमिव तोयदम् १४ मनसा चिंतयामास तेजसा तस्य मोहितः स तैः संपीड्यमानोपि र
क्षोभिर्भीमविक्रमैः विस्मयं परमं गत्वा रक्षोधिपमवैक्षत १५ भ्राजमानं ततो दृष्ट्वा हनू
मान् राक्षसेश्वरम् मनसा चिंतयामास तेजसा तस्य मोहितः १६ अहो रूपमहो धैर्यमहो सत्त्व
महो द्युतिः अहो राक्षसराजस्य सर्वलक्षणयुक्तता १७

स्थितं १४ रक्षोधिपमवैक्षत ननु तुरक्षः कृतपीडामितस्पर्धः
१५।१६।१७

रा०बा०सु० सर्वसंपत्तिमत्तोप्यधर्मबलोमहान्दोष इत्याह यदीति बलवान् एवंविधसमृद्धैरप्युन्मूलनक्षमोऽधर्मोपि यद्यस्मिन्न स्यात्तदायं
१७३ राक्षसेश्वरः सशक्रस्य सुरलोकस्यापि रक्षितास्यात् अधर्मेहतत्वात् स्वसृज्यानामपि नाशक एवेति भावः १८ केलोकान्विभ्य

पद्य धर्मेण बलवान्स्यादयं राक्षसेश्वरः स्यादयं सुरलोकस्य सशक्रस्यापि रक्षिता १८ अस्य
क्रूरैर्नृशंसैश्च कर्मभिर्लोककुत्सितैः तेन बिभ्यति खल्वस्मात्लोकाः सामरदानवाः १९ अ
पे ह्युस्य हते क्रुद्धः कर्तुमेकार्णवं जगत् इति चिंतां बहुविधामकरोन्मतिमान्कपिः दृष्ट्वा राक्षस
राजस्य प्रभावममितौजसः ॥२०॥ हरिः ॐ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये सुंदरकांडे एकोनपंचा
शः सर्गः ॥४९॥ तमुद्वीक्ष्य महाबाहुः पिंगाक्षं पुरतः स्थितम् रोषेण महताविष्टो रावणो लोक
रावणः १ स काहतात्मा दस्यौ स कपींद्रं तेजसा वृतं किमेष भगवान्नंदी भवेत्साक्षादिहागतः २

तीत्यन्वयः १९ २० इत्येकोनपंचाशः सर्गः ४९ ग्रा विवः ग्यासीदिति श्लोकः १ तेजसा वृतं दृष्ट्वेति शेषः स काहतात्मा दस्युः कां प्र
कामेवाह किमिवेति न दीवानरमुखो स्त्रोष प्रमथगणाधिपः २

शाप्तः मन्नु । एवमद्दृष्टामुखैः सर्वं नाशो भविष्यतीति भावः बलिसुतो वाली वा महेश्वरः भक्त्वा त्वं दिना प्रेषित इति शंका ३ का
लयुक्तं कालोचितं ४ कुतः आगत इति शेषः किं वास्य कारणं को वास्य प्रेषक इत्यर्थः ५ मत्पुरीं मद्दिश प्रेषेति शेषः आयोधने

येन शाप्तोऽस्मि कैलासे मया संहसितेन वा । सोऽयं वानरमूर्तिः स्यात्किं स्विद्बाणो महासुरः ३ स राजा
रोषताम्राक्षः प्रहस्तं मन्त्रिसत्तमम् । कालयुक्तमुवाचेदं वचो विपुलमर्थवत् ४ दूतमापृच्छ्य
तामेष कुतः किं वास्य कारणम् । वनभंगे च कोऽस्यार्थो राक्षसीनां च तर्जने ५ मत्पुरीमप्रधृष्यां
वै गमने किं प्रयोजनम् । आयोधने वा किं कार्यं पृच्छ्यतामेष दुर्मतिः ६ रावणस्य वचः श्रुत्वा
प्रहस्तो वाक्यमब्रवीत् । समाश्वसिहि भद्रं ते न भीः कार्या त्वया कपे ७ यदि तावत्त्वमिंद्रेण प्रेषितो
रावणालयम् । तत्त्वमाख्याहि मा ते भूद्भयं वानर मोक्ष्यसे ८ यदि वैश्रवणस्य त्वं यमस्य वरुणस्य
वा । कपिरूपमिदं कृत्वा प्रविष्टो नः पुरीमिमाम् ९

किं कराद्धिमि युद्धे ६ ७ मोक्ष्यसे बंधनादिति शेषः ८ वानररूपं वानराणां प्रच्छन्नवेषत्वात् छद्म कृत वानररूपं ९

कुतः एवं चिंतात आह नहीति वानरस्येदं वानरं तस्येदमित्यण् १० ११ अथवेति अथवेशस्य यः ये निमित्तं कृत्वा ते प्रवेशस्तेन निमित्तेन कथयस्वेति
पूर्वेणान्वयः एवमुक्तः प्रहस्तेनेति शेषः रक्षोगणेश्वरं प्रहस्तमलक्ष्मीकृतस्य रावणस्य मे वत्सया कृत्वा ब्रवीदिति उत्तरेणान्वयः १२

विष्णुना प्रेषितो वापि दूतो विजयकांक्षिणा न हि ते वानरं तेजो रूपमात्रं तु वानरम् १० तत्त्वतः कथयस्वाद्य ततो वानर मोक्ष्यसे अनृतं वदतश्चापि दुर्लभं तव जीवितम् ११ अथवा यन्निमित्तं ते प्रवेशो रावणालये एवमुक्तो हरिवरस्तदा रक्षोगणेश्वरम् १२ अब्रवीन्नास्मि शक्रस्य यमस्य वरुणस्य वा धनदेन न मे सख्यं विष्णुना नास्मि चोदितः १३ जातिरेव मम त्वेषा वानरोऽहमिहागतः दर्शने राक्षसेन्द्रस्य तदिदं दुर्लभं मया १४ वने राक्षसराजस्य दर्शनार्थे विनाशितम् ततस्ते राक्षसाः प्राप्ता बलिनो युद्धकांक्षिणः १५

वरुणस्य वा दूत इति शेषः धनदेन विष्णुना च न मे
सख्यं तत्ताभ्यां चोदितो नास्मि १३ एषा वानराकृतिर्मम जातिरेव अतो वानर एवाहमिहागतः वानरस्यात्रागमने किं प्रयो
जनं तत्राह दर्शनेति दर्शने दर्शननिमित्तमिहागत इत्यर्थः तदिदं तव दर्शनं दुर्लभं प्रकारान्तरेण शक्यं लाभमिति तिरोत्वा ततः वद
र्शनार्थे वने विनाशितं ततो मे गाद्धेतोर्युद्धकांक्षिणस्ते राक्षसाः प्राप्ताः १४ १५

पुच्छप्रयोजनमाह रक्षसामिति तन्न्वेवंभाविवंधाय पर्याप्तोप्यकथं पुच्छं रूतं तत्राह अस्त्रेति अस्त्रैः ब्रह्मास्त्रांतैः पाशैर्यथापाशांतैः
देवासुरैर्मिलितैरपीत्यर्थः १६ कुतस्तवैवं बलं तत्राह पितामहादिति तदनुग्रहादिसर्वः ममापि न तु केवलं तत्रैव एष वर इति ब्रह्मा
स्त्रावंधनरूपः तर्हि कथं वंधनमुपागतं तत्राह राजानमिति अस्त्रं ब्रह्मास्त्रं अनुवर्तितं निवर्तमप्यनुवर्तितमिव १७ तद्देशा
ह विमुक्त इति एवं पीडामनुभूय मद्दर्शने किं प्रयोजनं तत्राह केनचिदिति १८ रामस्य तव च कः संवंधस्तत्राह दूत

रक्षसां यैश्च देहस्म प्रतियुद्धं मया कृतम् अस्त्रपाशैर्न शक्योऽहं वद्धुं देवासुरैरपि १६ पितामहादेष वरो ममाप्येषोऽभ्युपागतः राजानं द्रष्टुकामेन मयास्त्रमनुवर्तितम् १७ विमुक्तोप्यहमस्त्रेण राक्षसैरभिपीडितः केनचिद्राजकार्येण संप्राप्तोऽस्मि तवांतिकम् १८ दूतोऽहमिति विज्ञेयो राघवस्यामितौजसः श्रूयतां चापि वचनं मम पथ्यमिदं प्रभो ॥१९॥ हरिः ॐ इत्यार्षे श्रीरामायणे सुंदरकांडे पंचाशः सर्गः ॥५०॥ तं समीक्ष्य महासत्त्वं सत्त्ववान्हरिसत्तमः वाक्यमर्थवदव्यग्रस्तमुवाच दशाननम् १

इति ननु रामदूतेनापि सीतान्वेषणमेव कार्यं एवं प्रयासेन मद्दर्शने किं फलं तत्राह
श्रूयतामिति वचनं संदेशवचनं तत्कथनार्थमयं प्रयासः इति भावः १९ इति पंचाशः सर्गः ५० अथ हनुमान्सुग्रीवसंदेशकथन
व्याजेन रामदंडान्तरविषयत्वनिवृत्त्यापथ्यानुसारेण वेति जिज्ञासति तमित्यादि १

सीतापहरणार्थं सीतां लंकां यामपहृत्य स्थापनार्थं तेन रावणेन राक्षसैः सुरक्षितामित्यर्थः १५ १६ प्रतोल्यो रथ्याः ता
सां पांडुरत्वमुच्चत्वं च तत्रत्यसौधसंबंधेन अट्टालकाः प्राकारशिरांसि पताकाध्वजपठः तद्युक्तध्वजशोभितां १७

सीतापहरणार्थेन रावणेन सुरक्षिताम् समंताद्विचरद्भिश्च राक्षसैरुग्रधन्विभिः १५ कां
चनेनावृतां रम्यां प्राकारेण महापुरीम् गृहैश्च गिरिसंकाशैः शारदांबुदसन्निभैः १६ पां
डुराभिः प्रतोलीभिरुच्चाभिरभिसंवृताम् अट्टालकशताकीर्णां पताकाध्वजशोभिताम्
१७ तोरणैः कांचनैर्दिव्यैर्लतापंक्तिविराजितैः ददर्श हनुमाँल्लंकां दिवि देवपुरीमिव १८
गिरिमूर्ध्नि स्थितां लंकां पांडुरैर्भवनैः शुभैः ददर्श स कपिः श्रीमान्पुरमाकाशगामिव १
९ पालितां राक्षसेंद्रेण निर्मितां विश्वकर्मणा प्लवमानामिवाकाशे ददर्श हनुमान्कपिः २०

लतापंक्तयस्तदाकारचित्रविशेषाः तया विराजितैः शोभमानैः तोरणैर्युक्तां ददर्श हनुमान् लंकामिति पुनर्दर्शनाभि
धानं विशेषांतरविवक्षया उपमानांतरविवक्षया च १८ १९ गिरिमूर्द्धस्थत्वादेवाकाशे प्लवमानामिवेत्युक्तिः २०

रा०वा०मुं० अहमिति वालिनावधायोऽहमिति स्वसंवेधित्वान्न्यूनत्वं कुशलमब्रवीत् अपश्यत् क्षीदित्यर्थः २ समादेशं संदेशं रूपं वाक्य
१७५ मिति सामानाधिकरण्यं क्षमं सुखसंपादकं ३ पथसंदेशं वक्तुमुपोद्घातो राजेति पितेव बंधुः रक्षक इत्यर्थः ४ ५ ६

१ प्रहृष्टः सुग्रीवसंदेशादिह प्राप्तस्तवाश्रयम् राघवस्तेन हरीशस्त्वां भ्राता कुशलमब्रवीत् २ श्रुत्वा तु समादेशं सुग्रीवस्य महात्मनः धर्मार्थोपहितं वाक्यमिह चामुत्र च क्षमम् ३ राजा दशरथो नाम रथकुंजरवाजिमान् पितेव बंधुर्लोकस्य सुरेश्वरसमद्युतिः ४ ज्येष्ठस्तस्य महाबाहुः पुत्रः प्रियकरः प्रभुः पितुर्निदेशान्निष्क्रांतः प्रविष्टो दंडकावनम् ५ लक्ष्मणेन सह भ्रात्रा सीतया चापि भार्यया रामो नाम महातेजा धर्म्यं पंथानमाश्रितः ६ तस्य भार्या वने नष्टा सीता पतिमनुव्रता वैदेहस्य सुता राज्ञो जनकस्य महात्मनः ७ स मार्गमाणस्तां देवीं राजपुत्रः सहानुजः ऋष्यमूकमनुप्राप्तः सुग्रीवेण च संगतः ८ तस्य तेन प्रतिज्ञातं सीतायाः परिमार्गणम् सुग्रीवस्यापि रामेण हरिराज्यं निवेदितम् ९

मित्यर्थः ७ तां मार्गमाणः सरामः ७ ऋष्यमूकं प्राप्तः सुग्रीवेण च संगतः ८ ९ नष्टाम् ताम्प्रपद्य ताविति विशिष्य ध्वनस्तात एवं०
१७५

१० त्वया विज्ञातपूर्वश्च वाली तिमिमोक्तिः स तेन निहत इति रामोक्तं सर्वं प्रतिपादितमिति ज्ञेयं ११ सत्यसंगरः सत्यप्रतिज्ञः

ततस्तेन मृधे हत्वा राजपुत्रेण वालिनम् सुग्रीवः स्थापितो राज्ये हर्यृक्षाणां गणेश्वरः १० त्व
या विज्ञातपूर्वश्च वाली वानरपुंगवः स तेन निहतः संख्ये शरेणैकेन वानरः ११ स सीतां मा
र्गितो व्यग्रः सुग्रीवः सत्यसंगरः हरीन्संप्रेषयामास दिशः सर्वा हरीश्वरः १२ ततो हरीणां तत्र सह
स्राणि शतानि नियुतानि च दिक्षु सर्वासु मार्गन्ते ह्यधश्चोपरि चांबरे १३ वैनतेयसमाः
केचित्केचित्तत्रानिलोपमाः असंगगतयः शीघ्रा हरिवीरा महाबलाः १४ अहं तु हनुमा
न्नाम मारुतस्यौरसः सुतः सीतायास्तु कृते तूर्णं शतयोजनमायतम् १५ समुद्रं लंघयि
त्वैव तां दिदृक्षुरिहागतः भ्रमता च मया दृष्टा गृहे ते जनकात्मजा १६ सीता रामारामा

१२ १३ असंगगतय इति शीघ्रं तातिखेहतुः १४ १५ तव गृहे भ्रमता मया जानकी दृष्टा १६

रा०वा०सुं०
१७६

स्पृतः परं पथ्यं वाक्यमित्रपक्षस्य पतद् दासीत्याह तद्वानिति दृष्टधर्मार्थः शास्त्रेणाविदितधर्मार्थस्वरूपः तपः कृतपरिग्रहः तपो
बलजातधनधान्यादिपरिग्रहः यस्मादेतादृशस्त्वं तस्मात्परदारान् उपरोद्धुं नार्हसि १७ अनेन मम का हानिरित्यत्राह नहीति
धर्मविरुद्धत्वादेव बह्वपायेषु बहुनर्थकारणेषु ननु सीतायाप्रतीकार समर्थस्य किमनया विभीषिकेत्यत आह मू

तद्वानदृष्टधर्मार्थस्तपःकृतपरिग्रहः परदारान्महाप्राज्ञ नोपरोद्धुं त्वमर्हसि १७ नहिधर्म
विरुद्धेषु बह्वपायेषु कर्मसु मूलघातिषु सज्जन्ते बुद्धिमन्तो भवद्विधाः १८ कश्च लक्ष्मणा
मुक्तानां रामकोपानुवर्तिनाम् शरणाममन्तःस्यात् शक्रो देवासुरेष्वपि १९ नचापि
त्रिषु लोकेषु राजन् विद्येत कश्चन राघवस्य व्यलीकं यः कृत्वा सुखमवाप्नुयात् २० न त्रि
कालहितं वाक्यं धर्म्यमर्थानुबन्धि च मन्यस्व नरदेवाय जानकी प्रतिदीयताम् २१ १

लघातिषु समूलेन घ्नत्सु एकं यं प्रतीकारसामर्थ्यमिति भावः १८ मूलघातित्वमेव प्रपंचयति कश्चेति १९ विद्येत विद्यतेऽस्य
व्यलीकम् अप्रियं २० तत्तस्मात् त्रिकालहितं सीतादानेन पूर्वापराधनाशात् वर्तमानेऽस्य विरोधात् भाविश्रेयहेतुत्वाच्चेति रा०म०
कालहितं धर्म्यं धर्मादनपेतं अर्थानुबन्धि चेति प्राप्त्यानुगतं वाक्यं मयोच्यमानं मन्यस्व तदाह नरदेवायेति २१ १७६

यत्रसीतानास्तीसपन्नवसत्त्वशकयरत्नाह दृष्टाहीति यतस्त्वदुर्हेमयादृष्टा ऽतोऽपलापोपशक्यरतिभावः किंच पद्मानरकोटि
भिरपिदुर्लभंसीतादर्शनेतत्स्यालब्धं यतः शेषं यदुत्तरं कर्मसीतानयनरूपंतत्रतत्साधनेरा घव एवनिमित्तंकारणंमत्कृ
संतुयन्विष्यानिवेदनमात्रमितिभावः २२ पुनःरावणाहितमाहलक्षितेति पंचास्यांपन्नगीमिव यांगृहीत्वानाभिजानाति

दृष्टाहीयंमयादेवीलब्धंयदिहदुर्लभम् उत्तरंकर्मयच्छेषंनिमित्तंतत्रराघवः २२ लक्षितेयं
मयासीतातथाशोकपरायणा गृहीत्वानाभिजानासिपंचास्यामिवपन्नगीम् २३ नेयंज
रयितुंशक्यासासुरैरमरैरपि विषसंसृष्टमत्यर्थंभुक्तमन्नमिवौजसा २४
तपःसंतानलब्धोऽयंधर्मपरिग्रहः नसनाशयितुंन्याय्यआत्मप्राणपरिग्रहः २५

सामयाशोकपरायणालक्षिता तदीयशोकाग्निनैवपपन्नगीविषाग्निनेवलंकादग्धाभविष्यतीति भावः २३ ओज
साजठराग्निना जरयितुं २४ तपःकरणेनलब्धोधर्मपरिग्रहो धर्मेणापरिगृहीतइतिव्युत्पाधर्मस्याधर्मस्यैर्व
आत्मप्राणपरिग्रहश्चयथात्मप्राणानांचिरकालपरिग्रहस्तथात्वंचिरस्नानाशयितुंनन्याय्यः २५

ननु पितामहवराद् वध्यस्य मे के पवित्भीषिके त्याशंक्याह अवध्यतामिति तपोवीर्यात् तपःप्रभावात् सुरैर्देवैरन्यैर्नोपामवध्यता भवान्सम
नुपश्यति तत्रापि यथा अवध्यत्वं तथैव वध्यत्वेपि महानयं हेतुरस्ति २६ कोसौ हेतुस्तत्राह सुग्रीव इत्यादिसप्तक फलितमाह तस्मा
दिति किं च देवाद्यवध्यस्यापि शाला त्राणसामर्थ्य दुष्करमित्याह सुग्रीव इति यस्माद् रमहणावेत्ता यो त्वं पृच्छे किं तहं तस्यो न्य एवा
म येत्यभ्रातस्तस्मात् सुग्रीवात् ते प्राणत्राणसामर्थ्यं नास्तीति भावः २७ ननु तपोबलान्मे सर्वेतो जयो भविष्यतीत्यत आह नन्वि

ऽवध्यतां तपोवीर्याद्भवान्समनुपश्यति आत्मनः सासुरैर्देवैर्हेतुस्तत्राप्ययं महान् २६ सुग्री
वो न च देवो ऽयं न यक्षो न च राक्षसः मानुषो राघवो राजन् सुग्रीवश्च हरीश्वरः तस्मात्प्राणपरि
त्राणं कथं राजन् करिष्यसि २७ न तु धर्मोपसंहारमधर्मफलसंहितः तदेव फलमन्वेति धर्मश्चाधर्म
नाशनः २८

ति यः पुमान् धर्मफलसंहितः बलवत्तया फलोन्मुखो धर्मः से वह्वलं पुरः बंधर्मोपसंहारमपि न त्वन्वेति धर्मफलमिति शेषः किं तु त
देव फलोन्मुखो धर्मफलमेवान्वेति ननु धर्मेणाशो भविष्यतीत्यत आह धर्मश्चेति उत्कटो धर्मोत्तरभावी धर्मः अधर्मनाशनश्चा
दुत्कटधर्मो धर्मनाशकः एवं चास्याधर्मस्य बलवत्त्वेन धर्मापेक्षयोत्कटत्वाच्चापमेव त्वया प्राक्संचितस्य सकलधर्मस्य
नाशक इति भावः २८

ननु किमेवं धर्मो व्ययीकृत इत्यत आह प्राप्तमिति धर्मफलं तावत्साकल्येन प्राप्तं अस्य परदाराहरणरूपस्याधर्मस्य फलं क्षिप्रमेव
प्रपत्स्यसे अस्तुत्कटैः पुण्यपापैरिहैव फलमश्नुत इति न्यायादिति भावः २९ अतः स्वहितं चिंतयेत्याह जनस्थाने
ति सख्यं च बुद्ध्वा आत्मनो हितं बुध्यस्वेत्यन्वयः ३० नन्वेवं कटुवादिनस्तव को रक्षक इति चेत्तत्राह काममितिप

प्राप्तं धर्मफलं तावद्भवता नात्र संशयः फलमस्याप्यधर्मस्य क्षिप्रमेव प्रपत्स्यसे २९ जन
स्थानवधं बुद्ध्वा वालिनश्च वधं तथा रामसुग्रीवसख्यं च बुध्यस्व हितमात्मनः ३०
कामं खल्वहमप्येकः सवाजिरथकुंजराम् लंकां नाशयितुं शक्तस्तस्यैव तु न निश्चयः
३१ रामेण हि प्रतिज्ञातं हर्यृक्षगणसंनिधौ उत्सादनममित्राणां सीता यैस्तु प्रधर्षिता ३२

येकमित्यर्थः तर्हि कुतस्तन्नाशनं करोषीत्यत्राह तस्येति यस्याहं दूतस्तस्य रामस्यैषः मत्कर्तृकलंकानाशनवि
षयो न निश्चयः नष्टं मतः स्वाम्याज्ञां विना तदनुष्ठानमशक्यमिति भावः ३१ तदीयनिश्चयाभावमेवोपपादयति रामेणे
ति हर्यृक्षगणसन्निधौ ऽऽह सभायां प्रतिज्ञातमनतिक्रमणीयमिति भावः ३२

रा० वा० सुं० उक्तमेवार्थं पदाभ्यामुपसंहरति अथाहेत्यर्धं कुर्वन्निति ३३ कालरात्रीं महाप्रलयकरीं मायामिव स्थितां कालरात्रिः ३४ कालपाशेन यमपाशेनावि
१७८ ष्टः शरीरं स्कंधावसक्तेन स्कंधे संबद्धकरसतेन आत्मनि आत्मत्राणे ३५ दह्यमानां वर्तमानसमीपे वर्तमाने लट् अदेः अहमिति प्रतीति

अपकुर्वन्हि रामस्य साक्षादपि पुरंदरः न सुखं प्राप्नुयादन्यः किं पुनस्त्वद्विधो जनः ३३ यां सी
तेत्यभिजानासि येयं तिष्ठति ते गृहे कालरात्रीति तां विद्धि सर्वलंकाविनाशिनीम् ३४ तद
लं कालपाशेन सीताविग्रहरूपिणा स्वयं स्कंधावसक्तेन क्षेममात्मनि चिंत्यताम् ३५ सी
तायास्तेजसा दग्धां रामकोपप्रदीपिताम् दह्यमानामिमां पश्य पुरीं साट्टप्रतोलिकाम् ३६ स्वा
नि मित्राणि मंत्रींश्च ज्ञातीन्भ्रातॄन्सुतान्हितान् भोगान्दारांश्च लंकां च मा विनाशमुपान
य ३७ सत्यं राक्षसराजेंद्र शृणुष्व वचनं मम रामदासस्य दूतस्य वानरस्य विशेषतः ३८ ३८

कावीरपि ३६ मंत्रीन्मंत्रिणः ३७ विशेषतः निष्कर्षोच्यमानं वचनमित्यर्थः रामदासस्येत्यनेन रामहिमवेदकत्वं दूतस्येत्यनेन
हितोपदेशाधिकारित्वं वानरस्येत्यनेन रक्षोतिरिक्तजातित्वेन पक्षपाताभावश्च सूचितम् ३८ राम० रामम

रा० म०
१७८

लंकां स्त्रीत्वेन वर्णयति वप्रेति वप्रः प्राकाराधारवेदिका तज्जघनरूपा प्राकारजघनां विपुलांबुः समुद्रः वनानि च अंबरं वा स्रोयस्यास्तां २१ विश्वकर्मणा निर्मितां तेनापि मनसा कृतामिव स्थितां द्वारमुत्तरमासाद्य समुद्रदक्षिणतटे प्रवनेन तस्यैव प्रथमं प्राप्तेः चिंता वक्ष्यमाणप्रकारा २२ कैलासो निलयः स्थानं यस्याः अलकायाः द्वारस्य तत्प्रख्यं तत्सदृशं

वप्रप्राकारजघनां विपुलांबुनवांबराम् शतघ्नीशूलकेशांतामट्टालकवतंसकाम्
२२ मनसेव कृतां लंकां निर्मितां विश्वकर्मणा द्वारमुत्तरमासाद्य चिंतयामास वानरः २२
कैलासनिलयप्रख्यमालिखंतमिवांबरम् डीयमानमिवाकाशमुच्छ्रितैर्भवनोत्तमैः २३
३ संपूर्णां राक्षसैर्घोरैर्नागैर्भोगवतीमिव अचिंत्यां सुकृतां स्पष्टां कुबेराध्युषितां पुरा २
४ दंष्ट्रिभिर्बहुभिः शूरैः शूलपट्टिशपाणिभिः रक्षितां राक्षसैर्घोरैर्गुहामाशीविषैरि
व २५ तस्याश्च महतीं गुप्तिं सागरं च निरीक्ष्य सः रावणं च रिपुं घोरं चिंतयामास वानरः २६

अंबरं आलिखंतमिव स्थितमुत्तरद्वारं उच्छ्रितैर्भवनोत्तमैराकाशं डीयमानामिव प्रत्युड्डीयंतीमिव स्थितां २३ डीयमा नत्वादिविशेषणविशिष्टां लंकां तस्या महतीं गुप्तिं रिपुं रावणं च सागरं च निरीक्ष्य ज्ञात्वा वानरश्चिंतयामास सादरं चिंतयामासेत्यर्थः २४ २५ २६

चिंताप्रकारमेवाह आगत्यापीति अपिना आगमनस्यैवाशक्यतासूचिता २७ । २८ अवकाशोनेति उपचितार्थत्वाद्
न्तदर्पपराक्रमत्वेपन्नत्वात्सु स्निग्धदृढप्रकृतित्वाच्चेन सामादीनामवकाशाइति भावः २९ पूर्वमागतस्यापि हरयस्तु
क्रमिदानीं सर्ववानरागमनासंभवप्रवेत्याह चतुर्णामेवेति ३० ननु जानकीजीवनज्ञानेनतन्मोक्षणाय यत्नादि

आगत्यापीहहरयोभविष्यंतिनिरर्थकाः नहियुद्धेनवैलंकांशक्याजेतुंसुरैरपि २७ इमां
चविषमांलंकांदुर्गांरक्षगणपालिताम् प्राप्यापिसुमहाबाहुःकिंकरिष्यतिराघवः २८
अवकाशोनसान्त्वस्यराक्षसेष्वभिगम्यते नदानस्यनभेदस्यनैवयुद्धस्यदृश्यते २९ चतु
र्णामेवहिगतिर्वानराणांतरस्विनाम् वालिपुत्रस्यनीलस्यममराज्ञश्चधीमतः ३० याव
ज्जानामिवैदेहींयदिजीवतिवानवा तदैवचिंतयिष्यामिदृष्ट्वातांजनकात्मजाम् ३१
ततःसचिंतयामासमुहूर्त्तंकपिकुंजरः गिरेःशृंगेस्थितस्तस्मिन्रामस्याभ्युदयेरतः ३२

चिंतनमतस्तद्दर्शनचिंतैवप्रथमंयुक्तेत्याह यावज्जानामीति जीवतिवानवेति वैदेहींजानामियावत् प्रथमंयदिजी
वतितदातांजनकात्मजांदृष्ट्वातत्रैवतस्मिन्कालएवचिंतयिष्यामीतियोजना ३१ अभ्युदयेसीतान्वेषणोपाये ३२

चिंताप्रकारोऽनेनेति ३३ ३४ लक्ष्यालक्ष्येणरूपेण सूक्ष्मशरीरेण महच्छरीरेण सीतान्वेषणरूपं साधयितुं लंकापुरं प्रवेष्टुं प्राप्तकालं नचिंतमिति चिंतयामासेति पूर्वेणसंबंधः ३५ तेन रूपेणान्वेषणं कथं घटेतेति पुनश्चिंतयति तां पुरीमिति ३६ केनोपायेन रावणेनादृष्टः सन्मैथिलीमुपश्येयं ३७ किंच रामस्य कार्यं कथं न विनश्येत् रहिते जनरहिते एकः एकाक

अनेन रूपेण मया न शक्या रक्षसां पुरीम् प्रवेष्टुं राक्षसैर्गुप्ता क्रूरैर्बलसमन्वितैः ३३ उग्रौजसो महावीर्या बलवंतश्च राक्षसाः वंचनीया मया सर्वे जानकीं परिमार्गता ३४ लक्ष्यालक्ष्येण रूपेण रात्रौ लंका पुरी मया प्राप्तकालं प्रवेष्टुं मे कृत्यं साधयितुं महत् ३५ तां पुरीं तादृशीं दृष्ट्वा दुराधर्षां सुरासुरैः हनुमांश्चिंतयामास विनिश्वस्य मुहुर्मुहुः ३६ केनोपायेन पश्येयं मैथिलीं जनकात्मजाम् अदृष्टो राक्षसेंद्रेण रावणेन दुरात्मना ३७ न विनश्येत्कथं कार्यं रामस्य विदितात्मनः एकामेकस्तु पश्येयं रहिते जनकात्मजाम् ३८ भूताश्चार्था विपद्यंते देशकालविरोधिताः विक्लवं दूतमासाद्य तमः सूर्योदये यथा ३९

यं पश्येयमिति च ३८ ननु सीतादर्शने किमर्थमेकांतापेक्षा तत्राह भूतार्थाश्चेति निष्पन्ना अपि प्रयोजनानीत्यर्थः विक्लवं भयविक्लवं दूतमासाद्य देशकालाभ्यामुचितप्रवृत्तिहीनाभ्यां विरोधिताः संतः सूर्योदये तम इव विपद्यंते नश्यंतीत्यर्थः अतोऽसहायेन मयैतादृशो देशे काले कार्यचिंतस्य

किंच न केवलं कार्यहानिः किंतु अन्यदपीत्याह अर्थानर्थान्तरे इति अर्थानर्थान्तरे कार्याकार्यविषये निश्चितापि स्वा
मिनामात्यैः सह निश्चितापि बुद्धिः न शोभते अकिंचित्करा भवति विक्लवे दूतमात्राधीनेति शेषः तस्माद् दूतदोषादेव राज्ञो
कार्यहानिरित्याह घातयंतीति एवं सति लोको मां स्वामिनं बुद्धिशून्यमपि जानीयादित्याशयः ४० यदेवमतः ।
कार्यं राजकार्यं न विनश्येत् वैक्लव्यं बुद्धिहीनता तत्र सिद्धिः स्वस्य स्वस्वामिनश्च ४१ रावणानर्थं रावणवधं ४२ अ

अर्थानर्थान्तरे बुद्धिर्निश्चितापि न शोभते घातयंति हि कार्याणि दूताः पंडितमानिनः ४०
न विनश्येत् कथं कार्यं वैक्लव्यं न कथं भवेत् लंघनं च समुद्रस्य कथं नु न भवेद् वृथा ४१ मयि
दृष्टे तु रक्षोभी रामस्याविदितात्मनः भवेद् व्यर्थमिदं कार्यं रावणानर्थमिच्छतः ४२ नहि श
क्यं क्वचित् स्थातुमविज्ञातेन राक्षसैः अपि राक्षसरूपेण किमुतान्येन केनचित् ४३ वायुर
प्यत्र नाज्ञातश्चरेदिति मतिर्मम न ह्यस्त्यविदितं किंचिद् राक्षसानां बलीयसाम् ४४ इहाहं य
दि तिष्ठामि स्वेन रूपेण संवृतः विनाशमुपयास्यामि भर्तुरर्थश्च हास्यति ४५

दृष्टीनेनं संचारश्च सर्वथाऽशक्य इत्याह नहीति ४३ रक्षसामविदितेर रक्षोभिरविदितेन किंचिदस्ति अतिसूक्ष्ममपि शेषः
अतः प्राकृतसहजकपिरूपेणावस्थातव्यमिति भावः ४४ किंच यावद्वृत्तमयं स्वगोपनमेवोचितमित्याह इहेति स्वेन महता रू
पेणावस्थानेऽपि संवृतः सन् गुप्तः सन् इह यदि तिष्ठामि तदा स्पष्टं परैरवगम्यमानत्वाद् विनाशमुपयास्यामि भर्तुरर्थो हानिश्च ४५

भूतैः पृथिव्यादिभिः सह २२ हित्वेत्यत्र विद्याधराः कर्त्तारः करकान् कमंडलून् करकोऽस्त्री कमंडलाविति कोषः २३ स्वार्षभानि ऋषभचर्म्माणि चर्म्माणि फलकानि कनकासरून् खड्गमुष्टीन् २४ कृताः कंठगुणाः स्रजो

भिद्यते यैर्गिरिभूतैररिति मत्वा तपस्विनः त्यक्तावि द्याधरास्तस्मादुत्सेतुः स्त्रीगणैः सह २२
पानभूमिगतं हित्वा हेममासनभाजनम् पात्राणि च महार्हाणि करकाश्चहिरण्मयान् २३
तैर्ह्यानुच्चावचान्भक्ष्यान्मांसानि विविधानि च स्वार्षभाणि च चर्म्माणि खड्गांश्च कनकत्सरून् २४
कृतकंठगुणाः क्षीवा रक्तमाल्यानुलेपनाः रक्ताक्षाः पुष्करक्षाश्च गगने प्रतिपेदिरे २५
हारनूपुरकेयूरपारिहार्यधराः स्त्रियः विस्मिताः सस्मितास्तस्थुराकाशे रमणैः सह २६
दर्शयंतो महाविद्यां विद्याधरमहर्षयः सभयास्तस्थुराकाशे वीक्षांचक्रुश्च पर्वतम् २७
शुश्रुवुश्च तदा शब्दमृषीणां भावितात्मनाम् चारणानां च सिद्धानां स्थितानां विमलेंऽबरे २८

पेशलक्षीवा मत्ताः पुष्करं पद्मं २५ पारिहार्यो वलयः आवापकः पारिहार्यः कटकेवलयास्त्रियामित्यमरः २६ विद्याधरमहर्षयः विद्याधरश्रेष्ठाः महाविद्यां माहात्म्यादिसिद्धिं दर्शयंतः २७ शब्दं वाक्यं २८

तस्मादास्तायमत्रैव वक्तविद्भिरिरुहायांनिःशंकं स्थित्वा रजन्यामपि स्वेन रूपेणोपहस्वो भूत्वा राघव वीर प्रयोजन साधना
र्थं लंकामभिपतिष्यामीति संबंधः ४६ प्रथमतः पुरीं प्रविश्य ततः सर्वं भवनं रावणागृहं प्रविश्य जनकात्मजां द्रक्ष्यामि ४७

तदहं स्वेन रूपेण रजन्यां ह्रस्वतां गतः लंकामभिपतिष्यामि राघवस्यार्थसिद्धये ४६ राव
णस्य पुरीं रम्यां प्रविश्य सुदुरासदाम् प्रविश्य भवने सर्वे द्रक्ष्यामि जनकात्मजाम् ४७ इति
निश्चित्य हनुमान्सूर्यस्यास्तमये कपिः आचचक्षे तदा वीरो वैदेह्या दर्शनोत्सुकः ४८ सू
र्ये चास्तं गते रात्रौ देहं संक्षिप्य मारुतिः एषदंशकमात्रोथ बभूवाद्भुतदर्शनः ४९ प्र
दोषकाले हनुमांस्तूर्णमुत्प्लुत्य वीर्यवान् प्रविवेश पुरीं रम्यां प्रविभक्तमहापथाम् ५० प्रा
सादमालाविततां स्तंभैः कांचनसंनिभैः शातकुंभनिभैर्जालैर्गंधर्वनगरोपमाम् ५१

४८ एषदंशकमात्रः एषतान्मृषकान् दशति स एषदंशको मार्जारः तत्परिमाणः ४९ प्रविवेश प्रवेष्टुमुपक्रांतः
प्रहारेण महाबाहुः प्राकारमभिपुप्लुवे इति वक्ष्यमाणत्वात् ५० स्तंभादिभिरुपलक्षिताम् ५१

१७

भूमिषु भवन्तीति भौमानि तलानि सप्त भौमानि तलानि येषां ते एवमष्टभौमास्तैः स्फटिकसंकीर्णैः स्फटिकरत्नखचितैः कार्तस्वरेण सुवर्णेन परिष्कृतैः स्थलैस्तैः प्रासादैरुपलक्षितां पुरीं ददर्शेति योजना ५२ अत्र षष्ठ्यर्थे रक्षसां तानि भवना

सप्तभौमाष्टभौमैश्च स ददर्श महापुरीम् स्थलैः स्फटिकसंकीर्णैः कार्तस्वरपरिष्कृतैः ५२
वैडूर्यमणिचित्रैश्च मुक्ताजालविभूषितैः तलैः शुशुभिरे तानि भवनान्यत्र रक्षसाम् ५३
कांचनानि विचित्राणि तोरणानि च रक्षसाम् लंकामुद्योतयामासुः सर्वतः समलंकृताम्
५४ अचिंत्यामद्भुताकारां दृष्ट्वा लंकां महाकपिः आसीद्विषण्णो हृष्टश्च वैदेह्या दर्शनोत्सुकः ५५ स पांडुरोद्विद्धविमानमालिनीं महार्हजांबूनदजालतोरणाम् यशस्विनीं रावणबाहुपालितां क्षपाचरैर्भीमबलैः समावृताम् ५६

नि उक्तविशेषणैस्तलैः शुशुभिरे ५३ रक्षसां तोरणानि रक्षोगृहद्वारस्य तोरणानि ५४ अचिंत्यां प्रशंसायान्वेषणाचिंतां अप्राप्यं विषादहेतुः अद्भुताकारामिति हर्षहेतुः
५५ पांडुरोद्विद्धविमानमालिनी धवलोन्नतसप्तभौमप्रासादपंक्तिमतीं तां प्रविवेशेति शेषः ५६

नैकसहस्ररश्मिश्चंद्रोपि ज्योत्स्नावितानेन ज्योत्स्नाविततस्य गगनस्य शोभां सम्यग्वल्लोकनसाधनतया ऽस्य हनूमतः साचिव्यं साहाय्यं कुर्वन्निव विराजन्मध्यगतः तारागणमध्यगतः सन्नोतिष्ठते प्रादुरभूदित्यन्वयः ५७ योस्नुयमानम् प्रोस्नयमानम् ५८

चंद्रोपि साचिव्यमिवास्य कुर्वंस्तारागणैर्मध्यगतो विराजन्‌ ज्योत्स्नावितानेन विततस्य लोकानुतिष्ठते नैकसहस्ररश्मिः ५७ शंखप्रभं क्षीरमृणालवर्णमुद्गच्छमानं व्यवभासमाने ५८ शीचंद्रं स कपिप्रवीरः पोस्नूयमानं सरसीव हंसम् ॥ ५८ ॥ इत्यार्षे रामायणे वाल्मीकीये सुंदरकाण्डे द्वितीयः सर्गः ॥ २ ॥ स लंबशिखरे लंबे लंबतोयदसन्निभे सत्वमास्थाय मेधावी हनुमान्मारुतात्मजः १ निशि लंकां महासत्वो विवेश कपिकुंजरः रम्यकाननतोयाढ्यां पुरीं रावणपालिताम् २

इति द्वितीयः सर्गः २ लंबशिखरे उन्नतशिखरे लंबे लंबाख्यपर्वते ऽप्रत एव लंबतोयदसदृशे सत्वं बलमास्थाय महासत्वो महाधैर्यो मेधावी कालोचितविचारज्ञः स कपिकुंजरो निशि लंकां विवेश १ २

सप्तदशो देवश कथा समाप्ता ९७

रा० वा० सुं० सागरोपमनिर्घोषां सागरशब्दः शारदाः प्राब्दवतीं ३ विटपावतीं पल्लवकाण्डवतीं निर्व्यूहा मत्तवारणाः चारुतोरणास्यनि
२२
र्व्यूहाः यस्यां तां पाण्डुरेषु धवलेषु द्वारेषु तोरणाः यस्यां तां ४ भुजगैराचरितां कृतसंचारां भोगवतीं सर्पनगरीमिवेति

शारदाम्बुदसदृक्षैर्भवनैः सपशोभिताम् सागरोपमनिर्घोषां सागरानिलशोभिताम् ३ सुघृ
ष्टवज्रसंघुष्टां यथैव विटपावतीम् चारुतोरणनिर्व्यूहां पाण्डुरध्वजतोरणाम् ४ भुज
गाचरितां गुप्तां गुहां भोगवतीमिव तोसविद्युद्घनाकीर्णां ज्योतिर्गणनिषेविताम् ५ चं
द्रमारुतनिर्ह्रादां यथा वाप्यमरावतीम् शातकुम्भेन महता प्राकारेणाभिसंवृताम् ६ किं
किणीजालघोषाभिः पताकाभिरलंकृताम् आसाद्य सहसा हृष्टः प्राकारमभिपेदिवा
न् ७

पूर्वान्वयि सविद्युद्भिर्घनैर्व्याप्तां ज्योतिषां ग्रहर्क्षादीनां गणैर्निषेविताम् इत्युत्तरान्वयि ५ चंद्रमारुता
नां परवहादीनां निर्ह्रादः शब्दो यस्यां तादृशीम् अमरावतीमिव स्थितां शातकुंभेन स्वर्णमयेन ६ किंकिणीजा
लैः क्षुद्रघंटिकासमूहैर्निर्घोषो यासां ताभिः पताकाभिः ७

जांबुनदमयैः द्वारैरित्युपलक्षणात् तोरणा राजहंसनिषेवितैरित्यंत विशेषणविशिष्टैः द्वारैः रूपलक्षितां लंकानगरीं समी
क्ष्य हनूमान् जहर्षेति संबंधः वैदूर्यमणिभिः कृता वेदिका अश्वत्थायवृताः द्वारैः ८ मणिस्फटिकमुक्ताभिर्भू
षितैरिति शेषः मणिकुट्टिमभूषितैः मणिनिबद्धभूमिप्रोतभितैः तप्तहाटकनिर्यूहैः तप्तसुवर्णमयमत्तवारणाद्
कैः राजतामलपांडरैः रजतमयामलपांडरोपरिप्रदेशैः ९ वैदूर्यमणिभिः कृतानि सोपानानि येषु तैः स्फाटिकाः

विस्मयाविष्टहृदयः पुरीमालोक्य सर्वतः जांबुनदमयैर्द्वारैर्वैदूर्यकृततोरणैः ८ मणिस्फ
टिकमुक्ताभिर्मणिकुट्टिमभूषितैः तप्तहाटकनिर्यूहै राजतामलपांडुरैः ९ वैदूर्यकृ
तसोपानैः स्फाटिकांतरपांसुभिः चारुसंजीवनोपेतैः खमिवोत्पतितैः शुभैः १० क्रौं
चबर्हिणसंघुष्टै राजहंसनिषेवितैः तूर्याभरणनिर्घोषैः सर्वतः प्रतिनादिताम् ११ व
स्वोकसाराप्रतिमां समीक्ष्य नगरीं ततः खमिवोत्पतितां लंकां जहर्ष हनुमान्कपिः १२ ।

स्फटिकरचिता अंतर्मध्यदेशा यत्पांसवश्च येषु तैः चारुसंजीवनोपेतैः रमणीयचतुःशालोपेतैः खमुत्पति
तैरिव प्रउन्नैर्हैः रूपलक्षितैर्द्वारैः १० संघुष्टैः कृतघोषैः ११ वस्वोकसारा अलका तत्सदृशीं हृष्टस्य पार्श्वः ।
जांबूनदमयद्वारत्वादिनासादृश्यसंभावना कार्या उत्पतितुमिच्छंतीमिव स्थितां गिरिमूर्ध्नि प्रतिष्ठितत्वात् १२

१३ १४ ग्प्रन्येषामसाध्याप्येषां साध्येत्याह कुमुदांगदयोरिति प्रसिद्धाप्रकर्षेस्मिंगतिका १५ विवस्वत्तनूजस्य सुग्रीवस्य
कुशपर्वणस्य प्राप्तोमवतः कपिमुख्यस्य ऋक्षस्य मन्थैव गतिरस्यामिति शेषः १६ विक्रांतविक्रमे रामलक्ष्मणाभ्यां

तां समीक्ष्य पुरीं लंकां राक्षसाधिपतेः शुभाम् ग्प्रनुत्तमामृद्धिमतीं चिंतयामास वीर्यवान् १३ ने
यम् न्येन नगरी प्राक्या धर्षयितुं बलात् रक्षिता रावणबलैरुद्यतायुधपाणिभिः १४ कुमु
दांगदयोर्वापि सुषेणस्य महाकपेः प्रसिद्धेयं भवेद्भूमिर्मैंदद्विविदयोरपि १५ विवस्वततनूज
स्य हरेश्च कुशप र्वणः ऋक्षस्य कपिमुख्यस्य मम चैव गतिर्भवेत् १६ समीक्ष्य च महाबाहो रा
घवस्य पराक्रमम् लक्ष्मणस्य च विक्रांतमभवत्प्रीतिमान्कपिः १७ तां रत्नवसनोपेतां गोष्ठागारा
वतंसिकाम् यंत्रागारस्तनीमृद्धां प्रमदामिव भूषिताम् १८ तां नष्टतिमिरां दीपैर्भास्वरैश्च महागृ
हैः नगरीं राक्षसेंद्रस्य ददर्श स महाकपिः १९

मनायासेन जेतुं शक्तोतिमत्वा प्रीतिमानभूदित्यर्थः १७ रत्नवसनो
पेतां रत्नप्राकारवाससं गोष्ठान्यगाराणि वावतंसोयस्यास्तां गोष्ठं गोशाला न्यारदं वाजिशाला दारप्रुपलक्षणं यंत्रागाराणि शाकारो
परिस्थापितानि क्षेपणपादीनि तदगृहस्तनीं १० तां प्रसिद्धां लंकां भास्वरैर्दीपैर्महागृहैश्च नष्टतिमिरां १९ सीतारामाय नमः
राम० २३

सा नगरी स्वेन रूपेणाधिष्ठातृदेवतारूपेणाग्रतः ते ददर्श २० स्वयमेवोत्थिता अग्रतः न्यग्रेरितेति यावत् २१ अतिष्ठत् तस्याग्रतः प्र
काशितवती २२ वनालय वानर ते तव प्राणा यावद्धरंति ध्रियंते तावद्यत्तत्त्वं सत्यं तत्कथयस्व २३ २४ २५ अथ तया पृष्टो ह

॥ अथ सा हरिशार्दूलं प्रविशंतं महाकपिम् नगरी स्वेन रूपेण ददर्श पवनात्मजम् २० सा तु हरिवरं दृ
ष्ट्वा लंका रावणपालिता स्वयमेवोत्थिता तत्र विकृतानन दर्शना २१ पुरस्तात्तस्य वीरस्य वायु
सूनोरतिष्ठत मुंचमाना महानादमब्रवीत्पवनात्मजम् २२ कस्त्वं केन च कार्येण इह प्राप्तो वना
लय कथयस्वेह यत्तत्त्वं यावत्प्राणा धरंति ते २३ ॥ इत्युक्तो कोपवल्लिविप्रलंकाप्रवेष्टुं वानर त्वया र
क्षिता रावणबलैरभिगुप्ता समंततः २४ ॥ अथ तामब्रवीद्वीरो हनूमानग्रतः स्थिताम् कथ
यिष्यामि यत्तत्त्वं यन्मां त्वं परिपृच्छसि २५ का त्वं विरूपनयना पुरीद्वारेऽवतिष्ठसे किमर्थं चा
पि मां क्रोधान्निर्भर्त्सयसि दारुणा २६ हनूमद्वचनं श्रुत्वा लंका कामरूपिणी उवाच वचनं
क्रुद्धा परुषं पवनात्मजम् २७

हनूमान् तस्य प्रश्नोत्तरे प्रतिज्ञायसुरसा वदे या पूज्या वासि हि का वद्ध्या वेति निर्णी
तुं तां पृच्छति का त्वमिति २६ २७

रा॰ वा॰ सुं॰
२६

आज्ञाप्रतीक्षा आज्ञानुवर्तिनी २८ २९ अद्यापि कालेन तत्राह अहं हीति स्वयं स्वदेवतारूपेणास्मीत्यर्थः ३० यत्नवान् लंकाधिष्ठातृदेवे

अहं राक्षसराजस्य रावणस्य महात्मनः आज्ञाप्रतीक्षा दुर्धर्षा रक्षामि नगरीमिमाम् २८ न शक्यं
मामवज्ञाय प्रवेष्टुं नगरीमिमाम् अद्य प्राणैः परित्यक्तः स्वप्स्यसे निहतो मया २९ अहं हि नगरी
लंका स्वयमेव प्लवंगम सर्वतः परिरक्षामि अतस्ते कथितं मया ३० लंकाया वचनं श्रुत्वा ह
नूमान्मारुतात्मजः यत्नवान्स हरिश्रेष्ठः स्थितः शैल इवापरः ३१ स तां स्त्रीरूपविकृतां दृ
ष्ट्वा वानरपुंगवः आबभाषेऽथ मेधावी सत्त्ववान्प्लवगर्षभः ३२ द्रक्ष्यामि नगरीं लंकां साट्ट
प्राकारतोरणाम् निर्विघ्नो किमिमं लोकं प्रपत्स्यामि तव सांप्रतम् ३३ इत्यर्थमिह संप्राप्तः परं
कौतूहलं हि मे वनान्युपवनानीह लंकायाः काननानि च ३४ सीतारामाभ्यां नमः

नावगतत्वात् द्विजयोपाये यत्नवान् ३१ स्त्रीरूपविकृतां विकृतस्त्रीरूपां अथ पश्च प्रश्नोत्तरं नाभानंतरं त्वत्प्रश्नोत्तरमा
वभाषे ३२ द्रक्ष्यामीत्यर्थमिह संप्राप्तः दर्शनं प्रयोजनं दृष्टिश्चेत्यर्थः ३३ वनं कृत्रिमं काननमकृत्रिमम् ३४

राम॰
२४

भूयोऽधिके परुषाक्षरं वाक्यं पुनर्बभाषे इत्यन्वयः ३५ ३६ मामनिर्जित्य दुद्धम प्राक्यमित्युक्तेऽपि केवलदर्शनमाचेतवकां

सर्वतो गहनं त्वानि द्रष्टुमागमनं हि मे तस्य तद्वचनं श्रुत्वा लंका सा कामरूपिणी ३५ भूय
एव पुनर्वाक्यं बभाषे परुषाक्षरम् मामनिर्जित्य दुर्बुद्धे राक्षसेश्वरपालिताम् ३६ न शक्या
ह्यद्य ते द्रष्टुं पुरीयं वानराधमः ३६ ततः स हरिशार्दूलस्तामुवाच निशाचरीम् ३७ दृष्ट्वा
पुरीमिमां भद्रे पुनर्यास्ये यथागतम् ३७ ततः कृत्वा महानादं सा वै लंका भयंकरम् तलेन
वानरश्रेष्ठं ताडयामास वेगिता ३८ ततः स हरिशार्दूलो लंकया ताडितो भृशम् ननाद सु
महानादं वीर्यवान्मारुतात्मजः ३९ ततः संवर्तयामास वामहस्तस्य सोंऽगुलीः मुष्टिनाभि
जघानैनां हनुमान् क्रोधमूर्छितः ४० स्त्री चेति मन्यमानेन नातिक्रोधः स्वयं कृतः ४१ सीता

क्षतिरित्याशयेनाहतत इति ३७ वेगितातिजातवेगा ३८ महान्नादेन नादेति निर्भयत्वद्योतनं ३९ अंगुलीः संवर्तयामासमु
ष्टिं बबंधेत्यर्थः ४० वामहस्तमुष्टिं बंधेभिप्रायमाह स्त्री चेति ४१ १४ १० ४१ ४१ १४ १४ १४ ४१ १४

तेनप्रहारेणवाममुष्टिकृतेनसदयताडनेनापिविकृताननदर्शनाविकृतवक्त्रदृष्टिःसहसाशीघ्रंभूमौपपात ४२ ४३ उद्विग्नो
भीता अगर्वितंगर्वरहितं ४४ त्रायस्वमाप्राणनाशंकर्षीत्सर्ग तत्रहेतुःसमयइति स्त्रीन्हंतव्येतिशास्त्रमर्यादायामित्य

सातुतेनप्रहारेणविह्वलांगीनिशाचरी पपातसहसाभूमौविकृताननदर्शना ४२ ततस्तुह
नुमान्वीरस्तांदृष्ट्वाविनिपातिताम् कृपांचकारतेजस्वीमन्यमानःस्त्रियंचताम् ४३ त
तोवैभृशमुद्विग्नालंकासागद्गदाक्षरम् उवाचागर्वितंवाक्यंहनूमंतंप्लवंगमम् ४४
प्रसीदसुमहावाहोत्रायस्वहरिसत्तम समयेसौम्यतिष्ठंतिसत्ववंतोमहावलाः ४५ अहंतुनगरीलं
कास्वयमेवप्लवंगम निर्जिताहंत्वयावीरविक्रमेणमहावल ४६ इदंचतथ्यंशृणुमेब्रुवंत्यावै
हरीश्वर स्वयंस्वयंभुवादत्तंवरदानंयथामम ४७ यदात्वांवानरःकश्चिद्विक्रमाद्वशमानयेत्
तदात्वयाहिविज्ञेयंरक्षसांभयमागतम् ४८ सहिमेसमयःसौम्यप्राप्तोद्यतवदर्शनात् स्वयंभू
विहितःसत्योनतस्यास्तिव्यतिक्रमः ४९

र्थः ४५ यद्यप्यहंलंकाधिष्ठात्रीदेवतात्वादुर्जेयातथापित्वया
निर्जिता ४६ वरदानंदत्तंकृतमित्यर्थः ४७ रक्षसांभयमितिएवंचमज्जयोयंसर्वरक्षसजयसूचकइतिभावः ४८ ४९

तमेवाहएवमृषतिश्लोकद्वयेन २९ ३० तेषामाकाशचारिणांपक्षिणामितिवाचः श्रुत्वाविद्याधरास्तमप्रमेयंवानरर्षभंददृशुः ३१
सहनूमान्रोमाणिदुधुवेस्पष्टोन्वयः ३२ आनुपूर्व्यात्क्रमेणवृत्तंत्रिवलयंलांगूलंविचिक्षेपेतिसंबंधः ३३ आविद्धंआस्फा

एषपर्वतसंकाशोहनूमान्मारुतात्मजः तितीर्षतिमहावेगंसमुद्रंवरुणालयम् २९ रामार्थं
वानरार्थंचचिकीर्षन्कर्मदुष्करम् समुद्रस्यपरंपारंदुष्प्रापंप्राप्तुमिच्छति ३० इतिविद्या
धरावाचःश्रुत्वातेषांमहात्मनाम् तमप्रमेयंददृशुःपर्वतेवानरर्षभम् ३१ दुधुवेच
सरोमाणिचकंपेचाचलोपमः ननादचमहानादंसुमहानिवतोयदः ३२ आनुपूर्व्या
चवृत्तंचलांगूलंलोमभिश्चितम् उत्पतिष्यन्विचिक्षेपपक्षिराजइवोरगम् ३३ तस्य
लांगूलमाविद्धमतिवेगस्यपृष्ठतः ददृशेगरुडेनेवह्रियमाणोमहोरगः ३४ बाहूसंस्तं
मा भयामासमहापरिघसंनिभौ ससादचकपिःकट्यांचरणौसंचुकोचच ३५

लितंभ्रमणंच ३४ बाहूसंस्तंभयामासपर्वतोपरिदृढविन्यासेननिष्पंदीचकार कपिःकट्यांकटिप्रदेशेअससादकाय
प्रसरणात्कटिप्रदेशेऽहश्रोभूदित्यर्थः चरणौसंचुकोचसंकोचयामास ३५

तेनप्रहारेणवाममुष्टिकृतसदयताडनेनापिविकृताननदर्शनाविकृतवक्त्रदृष्टिः सहसाशीघ्रंभूमौपपात ४२ ४३ उद्विग्ना भीता अगर्वितंगर्वरहितं ४४ त्रायस्वमाप्राणनाशात्कर्विंत्स्यर्थः तत्रहेतुःसमयइति स्त्रीनहंतव्येतिशास्त्रमर्यादायामित्य

सातुतेनप्रहारेणविह्वलांगीनिशाचरी पपातसहसाभूमौविकृताननदर्शना ४२ ततस्तुह
नुमान्वीरस्तांदृष्ट्वाविनिपातिताम् कृपांचकारतेजस्वीमन्यमानःस्त्रियंचताम् ४३ त
तोवैभृशमुद्विग्नालंकासागद्गदाक्षरम् उवाचागर्वितंवाक्यंहनूमंतंप्लवंगमम् ४४
प्रसीदसुमहाबाहोत्रायस्वहरिसत्तम समयेसौम्यतिष्ठंतिसत्ववंतोमहाबलाः ४५ अहंतुनगरीलं
कास्वयमेवप्लवंगम निर्जिताहंत्वयावीरविक्रमेणमहाबल ४६ इदंचतथ्यंशृणुमेब्रुवंत्यावै
हरीश्वर स्वयंस्वयंभुवादत्तंवरदानंयथामम ४७ यदात्वांवानरःकश्चिद्विक्रमाद्वशमानयेत्
तदात्वयाहिविज्ञेयंरक्षसांभयमागतम् ४८ सहिमेसमयःसौम्यप्राप्तोद्यतवदर्शनात् स्वयंभू
विहितःसत्योनतस्यास्तिव्यतिक्रमः ४९

र्थः ४५ यद्यप्यहंलंकाधिष्ठात्रीदेवतात्वाद्दुर्जेयाथापित्वया
निर्जिता ४६ वरदानंदत्तंकृतमित्यर्थः ४७ रक्षसांभयमितिएवंचमज्जयोयेनसर्वेषांरक्षसांपराजयसूचकइतिभावः ४८ ४९

५० विधात्स्वगृतिष्ठ १५१ शापोपहतांसस्यसेकः त्यभगवद्वचनेननंदिकेश्वरायेनचशापितत्वाशकालोशरीहरीश्वरस्त्वंप्र
विप्रपयदृच्छयात्वेच्छयासर्वत्रगवतांतः शरपर्यंपत्तंयथासुखंगतः सन्सतीमन्वेषुतयात्तिसोजानकीविमार्गीश्वन्वे

सीतानिमित्तंराजस्तु रावणस्यदुरात्मनः रक्षसांचैवसर्वेषांविनाशःसमुपागतः ५० तत्प्र
विश्यहरिश्रेष्ठपुरींरावणपालिताम् विधत्स्वसर्वकार्याणियानियानीहवांछसि ५१ प्रवि
श्यशापोपहतांहरीश्वरः पुरीं शुभांराक्षसमुख्यपालिताम् यदृच्छयात्वंजनकात्मजांसतींवि
मार्गसर्वत्रगतोयथासुखम् ॥ ५२ ॥ हरिः ॐ इत्यार्षे श्रीरामायणे सुंदरकांडे तृतीयः सर्गः
३ सनिर्जित्यपुरींलंकांश्रेष्ठांतांकामरूपिणीम् विक्रमेणमहातेजाहनूमान्कपिसत्तमः
१ अद्वारेणमहावीर्यःप्राकारंचसमुत्प्लुवे निशिलंकांमहासत्वोविवेशकपिकुंजरः २

थयेतिसंबंधः ५२ इतितृतीयःसर्गः ३ शत्रुस्थानमद्वारेणप्रवेष्टव्यमिति शास्त्राद द्वारेणोस्तुत्कम् २२२ २२२

ततः प्रविष्टपश्वेष्वसुपक्रम्यसव्यंपादंचक्रे॥ प्रम्वरतिशेषः सुतुप्रथमनिक्षिप्तवामपादस्तु पश्चान्नूरांमूर्द्धन्येव हतोभवतीति पालेन प्रात्रवःपत्नभूताःस्मुरितिभावः ३ क्रंच प्रयाणकालेस्वगृहप्रवेशविवाहकालेपिच दक्षिणांघ्रि हलाग्रतः शत्रुगृहप्रवेशेवामंनिदध्याच्चरांत्रपालयेश्रति ३ महापथंराजमार्गमास्थायागम्यलेनाक्लेव्यप्रविष्टः ४ हसितैरुद्गृहा

प्रविष्टपनगरींलंकां कपिराजहितेकरः चक्रेथपादंसव्यंचशत्रूणांसतुमूर्धनि ३ प्रविष्टःसत्वसंपन्नोनिशायांमारुतात्मजः समहापथमास्थायमुक्तपुष्पविराजितम् ४ ततस्तुतांपुरींलंकांरम्यामभिययौकपिः हसितोत्कृष्टनिनदैस्तूर्यघोषपुरस्कृतम् ५ वज्रांकुशनिकाशैश्चवज्रजालविभूषितैः गृहमेघैःपुरीरम्यावभासेद्यौरिवांबुदैः ६ प्रजज्वालतदालंकारक्षोगणगृह[illegible] गृहमुख्यैःपुरीभूयोवभासेद्यौरिवांबुदैः ७ सिताभ

सैरुत्पन्नावैउत्कृष्टनिनदास्तूर्यघोषैःपुरस्कृतापन्नलक्षिता ५ वज्राणामंकुशानांनिःकाशाःप्रतिमायेषुतैः वज्रनिर्मितानिजालानिगवाक्षाणितैर्विभूषितैर्गृहमेघैर्गृहश्रेष्ठैर्वभासे ६ पद्मादिसंज्ञकंसंस्थितैःसंस्थानेयेषांतैर्गृहैः प्रजज्वालेप्रचकाशे ७ वर्धमानगृहैःवर्धमाननामकासंस्थानवद्गृहैः उक्तंचचतुःशालेचतुर्द्वारैरलंकृतोभद्रसंज्ञितं पश्चिमद्वाररहितंनंद्यावर्ताह्वयंतुतत् दक्षिणद्वाररहितंवर्धमानंधनप्रदं प्राग्द्वाररहितंस्वस्तिकम्

गृहैःशुभैःसिताभ्रसदृशैश्चित्रैःपद्मस्वस्तिकसंस्थितैः ७ वर्द्धमानगृहैश्चापिसर्वतःसुविभूषितैः

[illegible]

चरन्तां ददर्शेत्यन्वयः ९ विविधाकृतिरूपाणि विविधाश्चाकाराः रूपाणि वर्णाश्च येषां तानि भवनानि ददर्शेत्यन्वयः १० त्रिस्था नस्वरभूषितं उरः कंठशिरःस्थानत्रयोत्पन्नैर्मन्द्रमध्यतारैःस्वरैर्भूषितं ११ सोपान निनदान् सोपानेषु चंक्रमतां जनानां काञ्ची

तां चित्रमाल्याभरणां कपिराजहितंकरः राघवार्थे चरन् श्रीमान् ददर्श च ननन्द च ९ भवना द्भवनं गच्छन् ददर्श कपिकुंजरः विविधाकृतिरूपाणि भवनानि ततस्ततः १० शुश्राव मधु रं गीतं त्रिस्थानस्वरभूषितं स्त्रीणां मदनविद्धानां दिवि चाप्सरसामिव ११ शुश्राव कांची निनदं नूपुराणां च निस्वनम् सोपाननिनदांश्चापि भवनेषु महात्मनाम् १२ आस्फोटितनि नादांश्च क्ष्वेलितांश्च ततस्ततः शुश्राव जपतां तत्र मंत्रान् रक्षोगृहेषु वै १३ स्वाध्याय निरतांश्चैव यातुधानान् ददर्श सः रावणस्तवसंयुक्तान् गर्जतो राक्षसानपि १४ राजमार्गं समावृ त्य स्थितं रक्षोबलं महत् ददर्श मध्यमे गुल्मे रावणस्य चरान् बहून् १५ सीतारामाभ्यां नमः

मंजीरनिनदान् १२ आस्फोटितं विलासार्थं करास्फालनं तज्जन्यनिनदान् क्ष्वेडितान् सिंहनादान् मंत्रान् वेदमंत्रान् १३ मध्यमे गुल्मे नगरमध्यस्थसैन्यसंघे चरान् नगरवृत्तान्तवेदकगूढचरान् १५ सीतारामसीतारामसीतारामसीता

दीक्षितजटिलमुण्डान् गृहीतव्रतनियमान् गोजिनांबरवाससः गोचर्मैवाम्बरं वासो वसनं येषां ते १६ मुनिरूपनिवार
कानुष्ठानसाधनतयाग्निदर्भमुष्टीनामायुधत्वं यथा वज्रं हरेः पाणौ न यो विप्रकरे कुशा इति स्मृतेः दृस्याद्युत्था

दीक्षितान् जटिलान् मुण्डान् गोजिनांबरवाससः दर्भमुष्टिप्रहरणान् अग्निकुण्डायुधांस्तथा १६
कूटमुद्गरपाणींश्च दण्डायुधधरानपि एकाक्षानेककर्णांश्च लम्बोदरपयोधरान् १७
करालान् भुग्नवक्त्रांश्च विकटान्वामनांस्तथा धन्विनः खड्गिनश्चैव शतघ्नीमुसलायुधान् १८
परिघोत्तमहस्तांश्च विचित्रकवचोज्ज्वलान् १९ नातिस्थूलान्नातिकृशान्नातिदीर्घा
तिह्रस्वकान् नातिगौरान्नातिकृष्णान्नातिकुब्जान्न वामनान् २० विरूपान्बहुरूपां
श्च सुरूपांश्च सुवर्चसः पताकाध्वजिनश्चैव ददर्श विविधायुधान् २१ शक्तिवृक्षायु
धांश्चैव पट्टिशाशनिधारिणः क्षेपणीपाशहस्तांश्च ददर्श स महाकपिः २२ सीता

नह्यणस्तु मारकतयाऽग्निकुण्डानामायुधत्वं १६ कूटोऽयस्कारकूटः आयुधविशेषः १७ विकटान् विषमाङ्गान् १८
१९ २० पट्टिशाशनी आयुधविशेषौ क्षेपणी भिण्डिपालः २२

यथास्वैरगतान् यथेष्टं स्वैरं विहारं गतान् २३ एवमव्यग्रं सावधानं आरक्षं रक्षासमेतादिनः पुरः रक्षकसैन्यं मध्यमं मध्यमकक्ष्यास्थितं रक्षोधिपतिनिर्दिष्टं कपिर्ददर्श २४ स इत्यादिश्लोकद्वयमेकं वाक्यं द्वितीयतृतीयच्छेदः प्रसिद्ध्यर्थं यन्तः

व्य

स्रग्विणश्चानुलिप्तांश्च वराभरणभूषितान् नानावेषसमायुक्तान्यथास्वैरगतान्बहून् २३ तीक्ष्णशूलधरांश्चैव वज्रिणश्च महाबलान् शतसाहस्रमव्यग्रमारक्षं मध्यमं कपिः २४ रक्षोधिपतिनिर्दिष्टं ददर्शान्तःपुराग्रतः स तदा तद्गृहं दृष्ट्वा महाहाटकतोरणम् २५ राक्षसेन्द्रस्य विख्यातमद्रिमूर्ध्नि प्रतिष्ठितम् पुंडरीकावतंसाभिः परिखाभिः समावृतम् २६ प्राकारावृतमत्यंतं ददर्श स महाकपिः त्रिविष्टपनिभं दिव्यंनादनिनादितम् २७ वाजिहेषितसंघुष्टं नादितं भूषणास्वनैः रथैर्यानैर्विमानैश्च तथा हयगजैः शुभैः २८

श्रिम

पुराग्रतः एवं तदा पुरस्याग्रतः तद्गृहं अन्तःपुरं रक्षावस्थितिगृहं दृष्ट्वा सः प्लुतः प्रसिद्धः कपिः राक्षसेन्द्रस्योच्यमानविशेषणं गृहं ददर्श पुंडरीकावतंसाभिः श्वेतपद्मभूषिताभिः २५ २६ २७ यानैः शिबिकादिभिः विमानैः पुष्पकादिभिः हयगजैः हयाकारैर्गजैः स्वच्छ गजैरिति यावत् २८

सु०वा०टी० २८

द्वारमित्यस्य ददर्शेति शेषः २९ प्राविवेश ग्रासमसाद ३० स हनूमान् ततः पुरं अंतर्नगरमाविवेश तत्किं हेमसमवर्णं स्वर्णं तत्सहितेन जांबूनदेन षोडशवर्णेन स्वर्णेन निर्मितं चक्रवालं प्राकारमंडलं यस्य महार्हमुक्तामणिभिः भूषितो ततः शिरोभागो यस्य परार्ध्याभ्यामुत्तमाभ्यां कालागरुचंदनाभ्यां महोहितां पूजां यस्येति ३१ इति चतुर्थः स

वारितोश्वचतुर्दंतैः श्वेताभ्रनिचयोपमैः भूषितं रुचिरद्वारं मत्तैश्च मृगपक्षिभिः॥२९॥ रक्षितं सुमहावीर्यैर्यातुधानैः सहस्रशः राक्षसाधिपतेर्गुप्तमाविवेश गृहं कपिः॥३०॥ सहेमजांबूनदचक्रवालं महार्हमुक्तामणिभूषितांतरम् परार्ध्यकालागरुचंदनांकितं स रावणांतःपुरमाविवेश ३१

हरिः ॐ इत्यार्षे रामायणे वाल्मीकीये सुंदरकांडे चतुर्थः सर्गः॥४॥ ततः स मध्यंगतमंशुमंतं ज्योत्स्नावितानं मुहुरुद्वमंतम् ददर्श धीमान्भुवि भानुमंतं गोष्ठे वृषं मत्तमिव भ्रमंतम् १ लोकस्य पापानि विनाशयंतं महोदधिं चापि समेधयंतम् भूतानि सर्वाणि विराजयंतं ददर्श शीतांशुमथाभियांतम् २

र्गः ततः प्रवेशानंतरं स धीमान् मध्यंगतं आकाशमध्यं तारामध्ये च शशिनं भानुमंतं दीप्तिमंतं अंशुमंतं शीतांशुं गोष्ठे भ्रमंतं वृषमिव ददर्श १ पापानि पापफलं दुःखानि नाशयंतं लोकाह्लादजनकत्वात् समेधयंतं वर्धयंतं विराजयंतं प्रकाशयंतं अभितो यांतं प्रतः पुरदर्शनसाधनत्वेन रावणमंदिरां प्रसीतां शुंददर्शेत्यन्वयः २ सु०मं० २८

यालक्ष्मीः मंदारादिस्थानेषु भाति सा लक्ष्मीः चारुनिशाकरस्याभातीति पर्यायालंकारः पादचतुष्टयेस्येमत्येकयदयम
केंच ३ हंसोयथेति किंचिदाधारप्रतिष्ठितशुक्लवस्तुत्वमात्रेणांवरस्थचंद्रसादृश्यं कुंजरोप्यत्रश्वेत एवांवरमपितत्कि
रणैरेवश्वेतमितिवोध्यं ४ परिपूर्णशृंगः परिपूर्णकलंकरूपहरिणशृंगरसस्पर्धः जांबूनदवद्धेतितिस्वरूपकथनेनतु

२

याभातिलक्ष्मीर्भुविमंदरस्यप्रदोषकालेषुचसागरस्या यथैवतोयेषुचपुष्करस्याऽराज
साचारुनिशाकरस्या ३ हंसोयथाराजतपंजरस्थःसिंहोयथामंदरकंदरस्थःवीरोयथागा
र्वितकुंजरस्थश्चंद्रोपिवभ्राजततथांवरस्थः ४ स्थितःककुद्मानिवतीक्ष्णशृंगोमहाव
लेःश्वेततरवोर्ध्वशृंगः हस्तीवजांबूनदवद्धशृंगोविभातिचंद्रःपरिपूर्णशृंगः ५ विन
ष्टशीतांवुतुषारपंकोमहाग्रहग्राहविनष्टपंकः प्रकाशलक्ष्म्याश्रयनिर्मलांकोरराज
चंद्रोभगवान्शशांकः ६ पमोपयोगी ५ विनष्टः शीतांवुतुषाररूपः शीतलजलविंदुसंपर्करूपः पंकोयस्य

सः वर्षाकालस्यातीतत्वात्महाग्रहस्यसूर्यस्यग्राहेणकिरणसंक्रमेणविनष्टोविनाशितः पंकस्तमोयेनसः तद्वत्के
वग्राहेणमलिनसमये शशिनिरवेर्दीधितयोमूर्छितास्तमोनैशंक्षपयंतिदर्पणांतर्निहिताइवमंदिरस्यांतइति ग्र
तएवप्रकाशलक्ष्म्याश्रयत्वात्सुव्यक्तलांछनः रराजगगनमध्यंप्राप्येतिशेषः ६

शिलातलेऽगुहावहिस्थं शकाशाः प्रकाशमानः ७ प्रकाशशुभ्रश्चंद्रः स्योदयेन उद्धमानमने ननष्टः दोषस्तिमिररूपो यस्य
सः तथा शुभ्रश्चावधिता रक्षसां पिशिताशनरूपा दोषा येन पिशिताशनस्य दोषत्वमविहितजीवहिंसाहेतुत्वा
द् रामाः कांताश्च अभिरामाः रमणाः स्त्रीभिः कांतैश्च ईरितो निरस्तो श्चितदोषः प्रणयकलहरूपो येन सः स्वर्गश्शका

शिलातले प्राप्य पयांसि गौरौ द्रुमहारसं प्राप्य पयांसि जैद्रुः रामेसमासाद्य पयानैरिंद्रुस्तथाश्र
काशो विरराज चंद्रः ७ प्रकाशचंद्रोदयनष्टदोषः प्रक्षुद्ररक्षःपिशिताशदोषः रामाभिरामे
रितचित्तदोषः स्वर्गश्शकाशो भगवान् स्वदोषः ८ तंत्रीस्वनाः कर्णसुखाः प्रवृत्ताः स्वपतिना
यैः पतिभिः सुपुत्राः न केचनाश्चापि तदाप्रवृत्ता विहर्तुमस्य प्रभुतैरोद्रवृत्ताः ९ मत्तप्रमत्तानि
समाकुलानि रथाश्वभद्रासनसंकुलानि वीरश्रिया चापि समाकुलानि ददर्श धीमान् सक

शः स्वर्गस्य सुखस्य प्रकाशो यस्मात् अत एव भगवान् पूज्यः प्रदोषो रजनीमुखं राजेत्यनुकर्षः ८ सुपुत्राः
से दम्न हाविषयाः अस्य प्रभुतैरोद्रवृत्तानां न केचन उलूको द्योरण सांश्चत याविहर्तुं प्रवृत्ता इत्यन्वयः ९ स धीमा
न्कपिः ऐश्वर्यादिनामत्ताः मद्यादिना प्रमत्तापेक्षितानि अत एव समाकुलानि कुलानि रक्षसां गृहादीनि ददर्श रथाश्वेति सर्वं या

परस्परं चेत्यादि श्लोकद्वयमेकं वाक्यं आक्षिपंतीत्यादि शार्दूलानि रक्षांसीत्यस्य विशेषणानि आक्षिपंतीउत्तरश्लोके उत्तरं कुर्वंतीति भुजान् अधिविक्षि
पंति अन्योन्यस्योपरि निक्षिपंति मत्ताः प्रलापान् अधिकं विक्षिपंतिमुंचंतीति भर्त्सयंतीत्यर्थः मत्तानि रक्षांसि अन्योन्यमधिक्षिपंति तिरस्कु

परस्परं चाधिकमाक्षिपंति भुजांश्चापीनान् अधिविक्षिपंति मत्तप्रलापान् अधिविक्षिपंति मत्ता
नि चान्योन्यमधिक्षिपंति ११ रक्षांसि वक्षांसि च विक्षिपंति गात्राणि कांतासु च विक्षिपं
ति रूपाणि चित्राणि च विक्षिपंति दृढानि चापानि च विक्षिपंति १२ ददर्श कांताश्च स
मानभंत्यस्तथापराः तत्र पुनः स्वपंत्यः सुरूपवक्त्राश्च तथा हसंत्यः क्रुद्धाः पराश्चापि विनिश्वस
त्यः १३

र्वंति ११ वक्षांसि विक्षिपंति परस्परं धिव्वरणं इति गात्राणि हस्तादीनि कांतासु विक्षिपंति न्यस्यंति चित्राणि रूपाणि नानाविधवेषान् वि
क्षिपंति कांताप्रीतये संपादयंति चापानि विक्षिपंति विस्फारयंति इ ददर्शेति रक्षांसि कपिर्ददर्शेति पूर्वत्र क्रियान्वयः आत्रेतान्ये
नाति १२ समानभंत्यस्तादोद्वितीयार्थे प्रथमा समानभंत्यः चंदनानुलिंपंत्यः समालंभानुलेपनमित्यमरः ताश्च ददर्शेति शेषः १३

रा० वा० सुं० भुजौ संहृत्य स्वे स्वे देशे संकुच्य शिरोधरां ग्रीवां कंठदेशे संकुच्य तेजः पराभिभवसामर्थ्यं सत्वं प्राणिरं बलं वीर्यमांतरं बलमाविवेश आस्थीरीचकार ३६ दूरात् मार्गमालोकयन् अत एवोर्ध्वं प्रणिहितेक्षणः हृदये प्राणाशक्ति स्थास्याने ३७
४

सहृत्य च भुजौ श्रीमान् तस्थौ वचपिरोधगाम् तेजः सत्वं तथा वीर्यमाविवेश स वीर्यवान् ३६
मार्गमालोकयन् दूरादूर्ध्वं प्रणिहितेक्षणः रुरोध हृदये प्राणानाकाशमवलोकयन्
३७ पद्भ्यां दृढमवस्थानं कृत्वा स कपिकुंजरः निकुंच्य कर्णौ हनुमानुत्पतिष्यन्महाबलः
३८ वानरान्वानरश्रेष्ठ इदं वचनमब्रवीत् ३८ यथा राघवनिर्मुक्तः शरः श्वसनविक्रमः ग
च्छेत्तद्वद्गमिष्यामि लंकां रावणपालिताम् ३९ न हि द्रक्ष्यामि यदि तां लंकायां जनकात्म
जाम् अनेनैव हि वेगेन गमिष्यामि सुरालयम् ४० यदि वा त्रिदिवे सीतां न द्रक्ष्यामि कृ
तश्रमः बध्वा राक्षसराजानमानयिष्यामि रावणम् ४१ सीतारामाभ्यां नमः सीताराम

कर्णौ निकुंच्य संकुच्य उत्पतनसन्नाहवशात् कर्णसंकोचो भवति ३८ श्वसनस्य वायोरिव विक्रमो वेगो यस्य सः ३९ अनेनैव एवंविधेनैव ४० आनयिष्यामि आनेष्यामि ४१ सीतारामाभ्यां नमः सीतारामासाराम०

सुहृद्भिर्विभीषणादिभिः राजपुरमिति शेषः विनिश्वसद्भिः स्वापेक्षितयोद्धृत्वाभावात् निश्वसद्भिर्भुजंगैर्ह्रद इव १४ बुद्धिं
प्रधानेषु प्रधानगुणो येषां रुचिरमभिधानवचनं येषां सम्यक्श्रद्दधानान् आस्तिकान् नानाविधानान् नानाव्यापारान्
रुचिराभिधानान् रुचिरनामधेयान् यातुधानान् तस्योपरि ददर्श १५ आत्मगुणानुरूपान् आत्मगुणानुरूपव्यापारान्

महागजैश्चापि तथा नदद्भिः सुपूजितैश्चापि तथा सुहृद्भिः राजवीरैश्च विनिश्वसद्भिर्ह्रदो भुजंगैरिव निश्वसद्भिः १४ बुद्धिप्रधानान् रुचिराभिधानान् संश्रद्दधानान् जगतः प्रधानान् नानाविधानान् रुचिराभिधानान् ददर्श तस्यां पुरि यातुधानान् १५ ननन्द दृष्ट्वा स तथा सुरूपान् नानागुणानात्मगुणानुरूपान् विद्योतमानान् स च तान् सुरूपान् ददर्श कांश्चिच्च पुनर्विरूपान् १६ ततो वरार्हाः सुविशुद्धभावास्तेषां स्त्रियस्तत्र महानुभावाः प्रियेषु पानेषु च सक्तभावा ददर्श तारा इव सुस्वभावाः १७

कांश्चिच्च पुनर्विरूपानपि विद्योतमानान् सुरूपानि व ददर्शेत्यर्थः १६ ततस्तत्र
वरार्हाः श्रेष्ठभूषणाम्बुलेपनादियोग्याः सुविशुद्धभावाः कटाक्षादयो यासां महाननुभावः प्रभावो यासां प्रियेषु पा
नेषु च सक्तः भावोन्तःकरणं यासां तास्तेषां स्त्रियः सुस्वभावास्तारा इव ददर्श १७

श्रियारूपसंपदा ज्वलंत्य इव त्रपया उपगूढाः संवृताः श्रमदेन हर्षेण उपगूढाः यथा विहंगाः विहंगीभिरिवेत्सर्थः १८ भर्तुः परा उत्कृष्टेनाभिमताः धर्मपराः भर्तुः सेवा लक्षणधर्मतत्पराः निविष्टा उढाः निवेशः शिविरोद्वाहविन्यासे इत्यमरः मदन उपविष्टो पासुमदनाश्च

श्रिया ज्वलंत्यस्त्रपयोपगूढा निशीथकाले रमणोपगूढाः ददर्श काश्चित्प्रमदोपगूढा यथा विहंगाः कुसुमोपगूढाः १८ अन्याः पुनर्हर्म्यतलोपविष्टास्तत्र प्रियांके सुखोपविष्टाः भर्तुः पराः धर्मपरा निविष्टा ददर्श धीमान्मदनोपविष्टाः १९ अप्रावृताः काञ्चनराजिवर्णाः काश्चित्परार्ध्यास्तपनीयवर्णाः पुनश्च काश्चिच्छशलक्ष्मवर्णाः कांतप्रहीणा रुचिरांगवर्णाः २० ततः प्रियान्प्राप्य मनोभिरामान्सुप्रीतियुक्ताः सुमनोभिरामाः गृहेषु हृष्टाः परमाभिरामा हरिप्रवीरः सददर्श रामाः २१

याददर्शेति सर्पः १९ अप्रावृता इत्यादि श्लोकद्वयमेकं वाक्यं अत्र ददर्शेति क्रियायाः सर्वत्र संबंधः अप्रावृताः उत्तरीयरहिताः काञ्चनराजिवर्णाः कनकरेखाकाराः परार्ध्याः उत्तमाः तपनीयवर्णाः तप्तसुवर्णवर्णाः शशलक्ष्मा चंद्रस्तद्वर्णाः कांतप्रहीणा अप्रियुक्ताः रुचिरांगवर्णाः सुंदरदेहकांतयः प्रथमं ददर्श २० ततः मनोभिरामान् प्रियान्प्राप्य सुप्रीतियुक्ताः सुमनोभिः पुष्पैरभिरामाः स्वत

चहि शब्दौ पादपूरकौ चंद्रवत्प्रकाशाः वक्त्रमालाः वक्त्रसमूहः वक्त्रप्रेक्षणाः सुपक्ष्माः शोभनपक्ष्मयुक्तानि नेत्रमाला याददर्श शातह्रदा
नामाल्या रुक्मभूषणानां मालया ददर्श २२ परमाभिजातां श्रेष्ठयंतामभिरूपां मनसाभिजातां श्रेयो निर्मां सीतां तु नैव ददर्श सीत्यन्व
यः साधुजातामिति [illegible] त्तविशेषणं २३ सनातने वर्त्मनि प्रविष्टे देन प्रवृत्तेपाति व्रत्यमार्गे सन्निविष्टो सम्य
ङ्गिः स्मातां राममीक्षतेध्यायतीति रामेक्षणीं मदनेन कामविषयेणाभिविष्टो व्याप्तो श्रीमत्स्वदुर्मनो नु प्रविष्टां श्वने

चंद्रप्रकाशाश्च हि वक्त्रमाला वक्त्राः सुपक्ष्माः सुनेत्रमालाः विभूषणानां च ददर्श मालाः शात
ह्रदानामिव चारुमालाः २२ न त्वेव सीतां परमाभिजातां पथि स्थितेराजकुले प्रजाताम् लतां प्र
फुल्लामिव साधुजातां ददर्शतन्वीं मनसाभिजाताम् २३ सनातने वर्त्मनि संनिविष्टां रामेक्षणीं तां
मदनाभिविष्टाम् भर्तुर्मनः श्रीमदनुप्रविष्टां स्त्रीभ्यः पराभ्यश्च सदा विशिष्टाम् २४ उष्णार्दि
तां सानुसृतास्त्रकंठीं पुरावराहोत्तमनिष्ककंठीम् सुजातपक्ष्मामभिरक्तकंठीं वने प्रवृत्तामिव नीलकं
ठीम् २५

न परस्यानुरागो ध्वनितः २४ उष्णार्दितां विरहतापपीडितां स्रस्तुतास्त्रेण प्रवृत्त बाष्पेण सहवर्तमानः कंठो यस्यास्तां अश्र
उंवाषैः पुरा राम सन्निधिकाले वराणामुत्तमभूषणानां महौ तम निष्कः उत्तमभूषणं कंठो यस्यास्ता उरः कंठस्य बंधी
भूषणविशेषो निष्कः सुजातानि पक्ष्माणि यस्यास्तां अभिरक्तो मधुरस्वरः कंठो यस्यास्तां नीलकंठीं मयूरीमिव वने

ऽभ्रमक्ताऽभ्रादिना ऽस्पष्टौ रखे ऽप्राकाशे यस्मात्तां चंद्रुरेखां चंदुकलामिव स्थितां ऽस्त्यंतकृशत्वे कांतिहीनत्वे च दृष्टांतो ये पांसुप्रदिग्धां पांसुरूषितां हेमरेखां स्वर्णरेखा कामिव [illegible] स्थितां शुद्धस्वभावस्यागंतुकमालिन्ये दृष्टांतो ये क्षतप्ररूढां क्षता वमाप्ररूढां च तां ऽयंतर्व्रणां बहिर्म्लानादितां बाणरेखां बाणक्षतमिव स्थितां ऽयंतर्वेदनातिशये दृष्टांतः वायुप्रभग्नामिवेति घनरसमाधेयत्वे चित्ये दृष्टांतः २५ सीतामिति चिरस्य [illegible] चिरमित्यर्थः व्ययं मनुजेश्वरस्य रामस्य पत्नीं सीतां चिरस्या

ऽभ्रमक्करे खेमिव चंद्रलेखां पांसुप्रदिग्धामिव हेमरेखाम् ॥ क्षतप्ररूढामिव बाणरेखां वायुप्रभ ग्नामिव मेघरेखाम् ॥ २६ ॥ सीतामपश्यन्मनुजेश्वरस्य रामस्य पत्नीं वदतां वरस्य ॥ बभूव दुःखा भिहतश्चिरस्य प्लवंगमो मंद इवाचिरस्य ॥ २७ ॥ हरिः ॐ इत्यार्षे रामायणे वाल्मीकीये सुंदरकांडे पंचमः सर्गः ॥ ५ ॥ स निकामं विमानेषु विचरन्कामरूपधृक् विचचार कपिर्लंकां लाघवे न समन्वितः १

[illegible] पश्यन् चिरमन्विष्याप्यपश्यन् प्लवंगमः ऽचिरस्य सद्यः मंद इव ऽप्राज्ञ इव रामा घकुशलः स्वदुः खोपहतो बभूव ऽयत्र सर्गे यमकालंकारः २७ इति पंचमः सर्गः स कपिः कामरूपधृक् लंकां विचचार ततो लाघवेन प्रौढ्येन समन्वितोति कामं यथेच्छं विमानेषु सप्तभूमिप्रासादेषु विचरन् राक्षसेंद्रनिवेशनमाससाद ११११११११

२ चक्रा ग्रोविसमपाद इवत्यात ३ रूप्यकोपहितेः रजतनिर्मितैः कक्ष्याभिः प्रकोष्ठैः कक्ष्याप्रकोष्ठे हर्म्यादेरित्यमरः ४ गजस्थितैर्गजारूढैः महामात्रैर्हस्तिपकैरुपस्थितं युक्तम् संग्रहसंहार्यैरप्रतिहतवेगैः स्यंदनवाहकैर्हयैरश्वोपस्थितं ५ सिंहव्याघ्राणां चर्मनिर्मितवर्म

१ श्रीसमाढ्यं चलक्ष्मीवान्राक्षसेंद्रनिवेशनम् प्राकारेणार्कवर्णेन भास्वरेणाभिसंवृतम् २ २
क्षितं राक्षसैर्भीमैः सिंहैरिव महद्वनम् समीक्षमाणे भवनं चकाशे कपिकुंजरः ३ रूप्यकोपहि
तैश्चित्रैस्तोरणैर्हेमभूषणैः विचित्राभिश्च कक्ष्याभिर्द्वारैश्च रुचिरैर्वृतम् ४ गजस्थितै
र्महामात्रैः शूरैश्च विगतश्रमैः उपस्थितमसंहार्यैर्हयैः स्यंदनयायिभिः ५ सिंहव्याघ्रतनुत्राणै
र्दांतकांचनराजतैः घोषवद्भिर्विचित्रैश्च सदा विचरितं रथैः ६ बहुरत्नसमाकीर्णं परार्ध्यासनभू
षितम् महारथसमावापं महारथमहासनम् ७ दृश्यैश्च परमोदारैस्तैस्तैश्च मृगपक्षिभिः विवि
धैर्बहुसाहस्रैः परिपूर्णं समंततः ८

भिः दंतमदिविकारांदंतादयः तस्यशक्तिमास्ताधरम्हिरिति प्रोषः किंकिणया
दिघोषवद्भिर्विचित्रैरथैश्च सदा विचरितं हत संचारं ६ महतां रथानां समंतात्त वायः स्थानं यस्मिन् तत् महारथानां रथि
कविश्रेष्ठानां महासनं सदावासस्थानम् ७ ८ दृश्यैर्दर्शनीयैः रत्नपरमोदारैः रतिसुंदरैः मृगपक्षिभिः समंततः रा०म०

ऽन्तपालैः बाह्यरक्षकैः ९ रक्षसां दुर्गाणां महापार्श्वादीनां निवेशना नियस्मिन्निति सर्वैः छन्नया वक्ष्यमाणा वेश्मपदेनपुनरुक्तिः स्यात्
संह्रादैः शब्दैःभूषणाद्यैः समुद्रस्वनसदृशनिस्वनम् १० तैः राजगुरोः राजोपचारैश्छत्रचामरादिभिः संपन्नैर्वस्त्रैश्चन्दनैश्च सं

विनीतैरन्तपालैश्च रक्षोभिश्च सुरक्षितम् मुख्याभिश्च वरस्त्रीभिः परिपूर्णं समन्ततः ९ मुदि
तप्रमदारत्नेराजसंदुन्निवेशनम् वारणानां महाह्रादैः समुद्रमिव निस्वनम् १० तद्राजगुरुसंप
न्नैर्मुख्यैश्च वनचंदनैः महाजनसमाकीर्णं सिंहैरिव महद्वनम् ११ भेरीमृदंगाभिरुतं शंखघ
घोषविनादितम् नित्यार्चितं पर्वहुतं पूजितं राक्षसैः सदा १२ समुद्रमिव गंभीरं समुद्रमिव निस्व
नम् महात्मनो महावेश्म महारत्नपरिच्छदम् १३ महारत्नसमाकीर्णं ददर्श स महाकपिः विरा
जमानं वपुषा गजाश्वरथसंकुलम् १४

पन्नमित्यन्वयः ११ नित्यार्चितं गन्धादिभिः पर्वहुतं पर्वसु हुतं होमो
यस्मिन् तत् रावणस्याहिताग्नित्वात् १२ परिच्छेदोऽलंकारः महात्मनो रावणस्य महद्वेश्म ददर्श सन्वयः १३ १४

श्चमन्यत तत्र देशेमेति शेषः एवं तस्य रावणभवनस्य समीपतस्तत्प्राकारप्रदेशेषु १५ गृहाद्गृहं राजवेश्म महाशाकालंनवर्ति

त्येकाभरणमित्येवमसोऽमन्यत महाकपिः चचार हनुमांस्तत्र रावणस्य समीपतः १५ गृहाद्गृहं रा
क्षसानामुद्यानानि च सर्वशः वीक्षमाणोऽप्यसंत्रस्तः प्रासादांश्च चचार सः १६ अवप्लुत्य महा
वेगः प्रहस्तस्य निवेशनम् ततोऽन्यत्पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान् १७ अथ मेघप्रतीका
शं कुंभकर्णनिवेशनम् विभीषणस्य च तथा पुप्लुवे स महाकपिः १८ महोदरस्य च तथा विरूपा
क्षस्य चैव हि विद्युज्जिह्वस्य भवनं विद्युन्मालेस्तथैव च १९ वज्रदंष्ट्रस्य च तथा पुप्लुवे स महा
कपिः शुकस्य च महावेगः सारणस्य च धीमतः २० तथा चेंद्रजितो वेश्म जगाम हरियूथपः जंबु
मालेः सुमालेश्च जगाम हरिसत्तमः २१ रश्मिकेतोश्च भवनं सूर्यशत्रोस्तथैव च वज्रकायस्य
च तथा पुप्लुवे स महाकपिः २२

रा

प्रधानरक्षसां नेकस्य गृहाद् परं गृहमित्यर्थः १६ अथ सैव प्रपंचोऽवप्लुत्येत्यादि १९

१८ १९ २० २१ २२ २२ २२ २२२२२

२३ २४ विद्युज्जिह्वेंद्रजिह्वानामिति बहुवचनमार्षं तयोरित्यर्थः २५ २६ २७ २८ उपस्थायिन्यः समीपस्थायिनीः पर्यायेणाश्रा

धूम्राक्षस्याथ संपातेर्भवनं मारुतात्मजः । विद्युद्रूपस्य भीमस्य घनस्य विघनस्य च २३ शुकनाभस्य
वक्रस्य शठस्य विकटस्य च । ह्रस्वकर्णस्य दंष्ट्रस्य रोमशस्य च रक्षसः २४ युद्धोन्मत्तस्य मत्तस्य ध्व
जग्रीवस्य सादिनः । विद्युज्जिह्वेंद्रजिह्वानां तथा हस्तिमुखस्य च २५ करालस्य विशालस्य शो
णिताक्षस्य चैव हि । प्लवमानः क्रमेणैव हनूमान्मारुतात्मजः २६ तेषु तेषु महार्हेषु भवनेषु म
हायशाः । तेषामृद्धिमतामृद्धिं ददर्श स महाकपिः २७ सर्वेषां समतिक्रम्य भवनानि समंततः ।
आससादाथ लक्ष्मीवान्राक्षसेंद्रनिवेशनम् २८ रावणस्योपशायिन्यो ददर्श हरिसत्तमः ।
विचरन्हरिशार्दूलो राक्षसीर्विकृतेक्षणाः २९ शूलमुद्गरहस्ताश्च शक्तितोमरधारिणीः । दद
र्श विविधान्गुल्मांस्तस्य रक्षःपतेर्गृहे ३० राक्षसांश्च महाकायान्नानाप्रहरणोद्यतान् । र
क्तान्श्वेतान्सितांश्चापि हरींश्चापि महाजवान् ३१

शयनस्थानरक्षिका इत्यर्थः २९ गुल्मान् राक्षससमू
हान् ३० सितान् तीक्ष्णान् हरीन् नम्रश्वान् ३१ ३१३१३१३१

परगजारुजान् प्रत्युग्रजानारुजेतिमंजतितान् ३२ ३३ मेघस्तनितनिर्घोषत्वादिविशिष्टान् गजान्ददर्शेत्यन्वयः ३४ सहस्रं वाजिनः श्वेनेकान श्वान् हेमजालैरविच्छिन्नाः सर्वतो भूषिताः इति शिबिकाविशेषणं ३५ शिबिकाः ददर्शेत्यनुकर्षः चित्रशा

कुलीनान् रूपसंपन्नान् गजान् परगजारुजान् शिक्षितान् गजशिक्षायामैरावतसमान्युधि ३२ निहन्तॄन् परसैन्यानां गृहे तस्मिन्ददर्श सः क्षरतश्च यथा मेघान् स्रवतश्च यथा गिरीन् ३३ मेघस्तनितनिर्घोषान् दुर्धर्षान् समरे परैः सहस्रं वाजिनस्तत्र जाम्बूनदपरिष्कृतान् ३४ हेमजालैरविच्छिन्नास्तरुणादित्यसन्निभान् ददर्श राक्षसेंद्रस्य रावणस्य निवेशने ३५ शिबिका विविधाकाराः स कपिर्मारुतात्मजः लतागृहाणि चित्राणि चित्रशालागृहाणि च ३६ क्रीडागृहाणि चान्यानि दारुपर्वतकानि च कामस्य गृहकं रम्यं दिवागृहकमेव च ३७ ददर्श राक्षसेंद्रस्य रावणस्य निवेशने स मंदरतलप्रख्यं मयूरस्थानसंकुलम् ३८

लतागृहाणि चित्रपृष्ठशालावेतिगृहाणि ३६ दारुपर्वतकानि दारुनिर्मितक्रीडापर्वतान् क्रीडार्थं कामस्य गृहके कामोद्दीपकगृहं दिवागृहके दिवाविहारोचितगृहं सर्वत्रात्यन्तस्वार्थिकः कन् ३७ मयूरस्थानसंकुले क्रीडामयूरस्थानैर्व्याप्तम् ३८ ३८

निष्ठितं

निधिजालं नेनिधिजालं नवदिसर्पैः धीरनिष्ठितकर्मांतं धीरैर्निर्भयस्थिरचित्तैर्निर्वर्तितं कर्मांतो निधिरक्षादरंगं महिषा
दिवल्लिरूपं यस्मिन् तत् भूतपतेः शिवस्य ३९ रश्मिमान् सूर्यः ४० ४१ मध्वासवैर्मद्यभेदैः कृतक्लेदमार्द्रमिसर्पः ४२ घो

ध्वजयष्टिभिराकीर्णं ददर्श भवनोत्तमम् अनंतरत्ननिचयं निधिजालं समंततः धीरनिष्ठि
तकर्मांतं गृहं भूतपतेरिव ३९ अर्चिर्भिश्चापि रत्नानां तेजसा रावणस्य च विरराज च तद्वेश्म र
श्मिवानिव रश्मिभिः ४० जांबूनदमयान्येव शयनान्यासनानि च भाजनानि च शुभ्रा
णि ददर्श हरियूथपः ४१ मध्वासवकृतक्लेदं मणिभाजनसंकुलम् मनोरममसंबाधं कु
बेरभवनं यथा ४२ नूपुराणां च घोषेण कांचीनां निस्वनेन च मृदंगतलनिर्घोषैर्घो
षवद्भिर्विनादितम् ४३ प्रासादसंघातयुतं स्त्रीरत्नशतसंकुलम् सुव्यूढकक्ष्यं हनूमान् प्र
विवेश महागृहम् ॥४४॥ हरिः ॐ इत्यार्षे रामायणे वाल्मीकीये सुंदरकांडे षष्ठः सर्गः ॥६॥

घोषवद्भिः अन्यैरपि वाद्यैर्विनादितं ४३ सुव्यूढकक्ष्यं विशालप्रकोष्ठम् ४४ इति षष्ठः सर्गः ॥ ६॥॥॥॥॥

सीतयासहमिलित्वेति पूर्वोक्तः समुत्पाद्येति शैलधिपर्वतोत्पाटनवदितिभावः ४२ अविचारयन्नत्वेनदक्षैः शालैराममुपगतायन् ४३ तस्यैवदर्शनं चनेसुपर्णमित्यादि ४४ वेगाद्धनूमतिसमुत्पतति सतितेननगरोहिराः पर्वतस्थावृक्षाः सर्वी

सर्वथाकृतकार्योहमेष्यामिसहसीतया आनयिष्यामिवालंकांसमुत्पाद्यसरावणाम् ४२

एवमुक्त्वातुहनुमान्वानरान्वानरोत्तमः उत्पपाताथवेगेनवेगवानविचारयन् ४३ सुपर्णमिवचात्मानंमेनेसकपिकुंजरः ४४ समुत्पततिवेगात्तुवेगात्तेनगरोहिणः संहृत्यविटपान्सर्वान्समुत्पेतुःसमंततः ४५ समत्तकोयष्टिमकान्पादपान्पुष्पशालिनः उद्वहन्नूरुवेगेनजगामविमलेंऽवरे ४६ ऊरुवेगोत्थितावृक्षामुहूर्तंकपिमन्वयुः प्रस्थितंदीर्घमध्वानंस्वबंधुमिवबांधवाः ४७ तमूरुवेगोन्मथिताःसालाश्चान्येनगोत्तमाः अनुजग्मुर्हनूमंतंसैन्याइवमहीपतिम् ४८ सपुष्पिताग्रैर्बहुभिःपादपैरन्वितःकपिः हनूमान्पर्वताकारोवभूवाद्भुतदर्शनः ४९

न्विटपान्सर्वाः शाखासंहृत्यसंक्षिप्यवेगात्समुत्पेतुरित्यर्थः ४५ मत्ताःकोयष्टिमादिद्विमायेषुतान् ४६ ४७ सैन्याश्चाद्योऽर्धर्चादिः ४८ पर्वताकारः तत्वंच हतत्वेनपुष्पितवृक्षवत्वेनच ४९

अथ रावणस्य प्रधानगृहं वर्णयति स इति स बलवान् व्यासक्तवैडूर्यसुवर्णजालं खचितवैडूर्यस्वर्णगवाक्षं वेश्मजालं श
ऋषिविद्युत्पिनद्धं महन्मेघजालमिव ददर्श सविहंगजालमिति गृहमेघयोर्विशेषणं १ प्रधानैः प्रशस्तैः शंखायुध
चापैः शालंते शोभंते ता दशीर्ति वेश्मनानां गृहाणां विविधाः शालाः शुद्धांतरगृहाणि ददर्श पुनश्च वेश्मादिषु गृहोन्नता

स वेश्मजालं बलवान्ददर्श व्यासक्तवैडूर्यसुवर्णजालम् यथा महत्प्रावृषि मेघजालं वि
द्युत्पिनद्धं सविहंगजालम् १ निवेशनानां विविधाश्च शालाः प्रधानशंखायुधचापशा
लाः मनोहराश्चापि पुनर्विशाला ददर्श वेश्माद्रिषु चंद्रशालाः २ गृहाणि नानावसुरा
जितानि देवासुरैश्चापि सुपूजितानि सर्वैश्च दोषैः परिवर्जितानि कपिर्ददर्श स्वबलार्जिता
नि ३ तानि प्रयत्नाभिसमाहितानि मयेन साक्षादिव निर्मितानि महीतले सर्वगुणोत्तराणि द
दर्श लंकाधिपतेर्गृहाणि ४

दद्रिसु मेरुवेश्मसु मनोहराः विशालाः चंद्रशालाः चंद्रकांतमणिबद्धशिरोगृहाणि
ददर्श २ नानावसुराजितानि नानाविधधनैर्दीप्तानि स्वबलार्जितानि कुबेरमाक्रम्य हृतानि यद्वा स्वबलेन हनुमद्दर्शी स्व
बलेनार्जितानि लब्धप्रवेशानि ३ प्रयत्नेनाभितः सम्यगाहितानि यथायोगं स्थापितानि विश्वकर्मनिर्मितान्यपि मयेन राम०
विचित्रविधानेन समाहितत्वेनैव साक्षान्निर्मितानीवेत्यर्थः ४

ग्र यत्तदंतर्वर्त्ति पुष्पकविमानं वर्णयति ततइत्यादिना गृहोत्तमं प्रधानगृहं ह्यप्रतिरूपं रूपं निरुपमरूपं ५
प्रकीर्णं पातितं बहुरत्नपूर्णं रजसा पुष्परजसा ६ रवशब्दः प्रेमोधरमित्यस्यानंतरं द्रष्टव्यः नारीप्रवेकैः नारीश्रेष्ठैः
दीप्यमानं तडिद्भिरभ्यर्च्यमानं पूज्यमानमंभोधरं मेघमिव हंसश्रेष्ठैर्वाह्यमानमुह्यमानं खे श्रिया युक्तं सुकृतं वि

ततो ददर्शोच्छ्रितमेघरूपं मनोहरं कांचनचारुरूपम् रक्षोधिपस्यात्मबलानुरूपं गृ
होत्तमं ह्यप्रतिरूपरूपम् ५ महीतले स्वर्गमिव प्रकीर्णं श्रिया ज्वलंतं बहुरत्नकीर्णं
नानातरूणां कुसुमावकीर्णं गिरेरिवाग्रं रजसावकीर्णम् ६ नारीप्रवेकैरिव दीप्यमानं
तडिद्भिरंभोधरमर्च्यमानम् हंसप्रवेकैरिव वाह्यमानं श्रिया युतं खे सुकृतं विमानम् ७
यथा नगाग्रं बहुधातुचित्रं यथा नभश्च ग्रहचंद्रचित्रम् ददर्श युक्तीकृतचारुमेघचित्रं वि
मानं बहुरत्नचित्रम् ८

मानमिवस्थितमित्यन्वयः ७ युक्तीकृतचारुमेघचित्रमिति नानावर्णैर्युक्तोपित
घुक्तः कृतो युक्तीकृतः स चासौ चारुमेघश्च तद्वद्विचित्रं विमानं पुष्पकाख्यं ददर्शेत्यर्थः ८ सीतारामाभ्यां नमः ॥

महीकृतेत्यारभ्य षट्स्लोकमेकं वाक्यं पत्रेति शेषः ददर्शेत्यनुषज्यते पत्र पुष्पके महीमणिस्वर्णादिनिर्मितपर्वताल्यापूर्णा कृता शैलाः वृक्षसमूहपूर्णाः कृताः वृक्षाः पुष्पसमूहपूर्णाः कृताः पुष्पं केसरपत्रैः पूर्णां कृतं अत्र पूर्वं पूर्वं प्रत्युत्तरोत्तरस्य विशेषत्वादेकावल्यलंकारः ९ यत्र पांडुराणि वेश्मानि कृतानि १० तत्पुष्पाक्हयं नाम विमानं ददर्शेत्यन्वयः वेश्मो

महीकृता पर्वतराजिपूर्णा शैलाः कृता वृक्षवितानपूर्णाः वृक्षाः कृताः पुष्पवितानपूर्णाः
पुष्पं कृतं केसरपत्रपूर्णम् ९ कृतानि वेश्मानि च पांडुराणि तथा सुपुष्पाण्यपि पुष्करिण्यः
पुनश्च पद्मानि सकेसराणि वनानि चित्राणि सरोवराणि १० पुष्पाह्वयं नाम विराजमानं
रत्नप्रभाभिश्च विघूर्णमानम् वेश्मोत्तमानामपि चोच्चमानं महाकपिस्तत्र महाविमानम्
११ कृताश्च वैडूर्यमया विहंगाः रूप्यप्रवालैश्च तथा विहंगाः चित्राश्च नाना वसुभिर्भुजंगा
जात्यानुरूपास्तुरगाः शुभांगाः १२

तमाल्लामिति यष्ठीपंचम्यर्थे तेभ्यो पुच्चमानं उन्नतप्रमाणं ११ तत्र कृत्रमाः पक्ष्याद्योपि संतीत्याह कृताश्चेत्यादिना तत्र विमाने इति शेषः नानावसुभिः रूप्यस्वर्णादिभिः जात्यानुरूपाः जातितुरगसदृशाः १२

प्रवालजो वृन्तदम्यानिपुष्याणि पक्षेषु येषां ते सखीत्वमावर्जिताः श्याकुंचिताः जितावक्राः पक्षा येषां ते साक्षात्कामस्य पक्षा इव येषां पक्षा
भांति तदृष्टिघकत्वात्तदृष्टा उच्यमानम् उरगाविहंगास्तत्र कृताः १३ यत्र सुहस्ताः शोभनशुंडाः पद्माकरसेवंधात्तकेसराः उत्पलहस्तालच्छम्या प्र
मिषे केनियुज्यमानाः स्वयमेव व्याप्रियमाणाः कृतानजाः संतीति शेषः कर्मकर्तरियक् तथापि द्विनिपद्मवन्तरानिय द्वहस्तादेवीस्व

प्रवालजोवृन्तदपुष्पपक्षाः सखीत्वमावर्जितजिह्मपक्षाः कामस्य साक्षादिव भांति पक्षाः कृता
विहंगाः सुमुखाः सुपक्षाः १३ नियुज्यमाना इव नागजाः सुहस्ताः सकेसराश्चोत्पलनपद्महस्ताः वस्र
वदेवीच कृता सुहस्तात्वच्छमीस्तदा पद्मिनिपद्महस्ता १४ इतीव तद्गृहमभिगम्य शोभनं स
विस्मयो नगामिव चारुदर्शनम् पुनश्च तत्परमसुगंधिसुंदरं हिमात्यये नगमिव चारुदर्शनम्
१५

च्छमीश्च यत्र कृता बभूव १४ इतीवरवेश्मकारं चारुकंदरं नगमिव पर्वतमिव चारुदर्शने तद्गृहमभिगम्य सविस्मयोभू
दिति शेषः हिमात्यये वसंतकाले चारुकंदरं नगमिव चारु कोटरं वृक्षमिव परमसुगंधिसुंदरं तद्गृहं पुनश्चा
धिगम्य सविस्मयोभूत् परिच्छेदानधिगमादिभावः रुचिरा वनमिदं चतुर्गृहे रिहरुचिरा भजन्तस्मा इति लक्षणात्
१५

रा० वा० सुं० ३७

ततस्तां पुरीमभिप्रसंचरन् स कपिः पतिगुणावेगेन पतिगुणानिरंतरध्यानेन निर्जितदुःखां जनकात्मजामदृष्ट्वा सुदुःखितो ऽभूदिति शेषः ॥ आर्षो ल्यप् १६ ततस्तदा बहुविधभाविता्मनः बहुप्रकारेण सर्वजगत्पूजितस्वभावस्य कृतात्मनः । शिक्षितांतःकरणस्य सुवर्त्मनः शोभननीतिमार्गवर्तिनः सुचक्षुषो महात्मनः प्रियां जनकसुतामपश्यतः प्रविचरतो

ततः स तां कपिरभिप्लुत्य निर्जितां चरन्पुरीं दर्पमुखबाहुनिर्जिताम् ऽप्रदृष्टपतां जनकसुतां सुपूजितां सुदुःखितां पतिगुणवेगनिर्जिताम् १६ ततस्तदा बहुविधभावितात्मनः कृतात्मनो जनकसुतां सुवर्त्मनः अपश्यतोऽभवदतिदुःखितं मनः सुचक्षुषः प्रविचरतो महात्मनः ॥ १७ ॥ हरिः ॐ इत्यार्षे रामायणे वाल्मीकीये सुंदरकांडे सप्तमः सर्गः ॥ ७ ॥ स तस्य मध्ये भवनस्य संस्थितं महद्विमानं मणिरत्नचित्रितम् प्रतप्तजांबूनदजालकृत्रिमं ददर्श धीमान्पवनात्मजः कपिः १

मनोऽतिदुःखितमभवत् १७ इति सप्तमः सर्गः ७ भूयः पुष्पकं वर्णयति स तस्येत्यादि मणिरत्नैश्चित्रितं प्रतप्तजांबूनदजालानां तन्मयगवाक्षाणां कृत्रिमं निर्माणं यस्मिन् ततस्य भवनस्य रावणगृहस्य मध्ये महत्

॰प्रमेयेऽप्रमेयसौंदर्यादिभिः प्रतिकारैः प्रतिमादिभिः मकृत्रिमं निर्वचनचित्रशोभं विश्वकर्मणा च स्वयं साधिष्ठितं तन्निर्माणे वेत्ता
यांश्च शोभापूर्वकं कृतमित्यर्थः सर्वत्राप्रतिहतसंचारं चैतद्विमानं दिवं गतं आकाशं गतं वायुपथे प्रतिष्ठितं वायुपथस्यैवादित्य
पथत्वात् सप्तर्षिचिन्हमिव स्थितं २ तत्र तादृशं किंचिन्न यत् प्रयत्नतो न कृतं अपितु सर्वं प्रयत्नकृतमेवेत्यर्थः यद्वद्वयवजातं
महार्घरत्नं बहुमूल्यरत्नं वत्तत्तादृशं किंचिददयितं वनये विशेषा रचनाविशेषास्ति त्रनियताः प्रतिष्ठितास्तु सुरेष्वपि सु

तदप्रमेयप्रतिकारकृत्रिमं कृतं स्वयं साधिष्ठितविश्वकर्मणा दिवं गतं वायुपथे प्रतिष्ठितं व्यरा-
जतादित्यपथस्य लक्ष्मवत् २ न तत्र किंचिन्न कृतं प्रयत्नतो न तत्र किंचिन्न महार्घरत्नवत्
न ते विशेषा नियताः सुरेष्वपि न तत्र किंचिन्न महाविशेषवत् ३ तपःसमाधानपराक्रमार्जि-
तं मनःसमाधानविचारचारिणम् अनेकसंस्थानविशेषनिर्मितं ततस्ततस्तुल्यविशेषनिर्मि-
तम् ४

रविमानेष्वपि न तत्र यन्महाविशेषवन्न तत्किंचित् तत्र नेत्यर्थः महाविशेषो गुणाधिक्यं ३ तपःसमाधाने त्यादि
पंचश्लोकी कुलकं सर्वत्र ददर्श इति संबंधः तपःसमाधानं तपोनुष्ठानं तेन तद्वपराक्रमेण च अर्जितं मनःसमाधानेनुप
त्रविचारो गमनं यस्य तं मनःसंचरणशीलं मनःसंकल्पितदेशगमनशीलमित्यर्थः अनेके संस्थानविशेषा रचनाविशेषास्ते
निर्मितं ततस्ततस्तस्मादाहृतेन तुल्येनादित्यविमाननिर्माणोचितेन विशेषेण विशिष्टं यदा येन निर्मितम् ४ सीताराम

ग०वा०सु०
३८

मनःसमाधायतुस्वामिमनोनुरूध्यतुशीघ्रगामिन्नित्यादिधर्मकं दुरासदंपापिभिरितिशेषः दुरावरमितिपाठेश्रुतिर्दुर्निवा
रमित्यर्थः महर्द्धिनोदीर्घाभावश्छांदसः उत्तमदोमहानेदानामिदादीनामात्मयमिव उपरुतस्याचेतनत्वेपितदभि
मानिदेवतायाअभिप्रेतत्वादिवोध्यं ५ विशेषविशिष्टदिव्यरत्नादिवस्तुजातमात्रेव्याप्तेव्यविशेषसंस्थितेदिव्य
संस्थानविशेषेणास्थितेविचित्राणामाश्चर्यवस्तूनां कूटंसमवायभूतंवहुकूटमंडितेवहुरत्नरश्मिरवेरत्नेहतताविवि

मनःसमाधायतुशीघ्रगामिने दुरासदंमारुततुल्यगामिनम् महात्मनोऽपि प्रणयप्रहतोमहर्द्धिनोऽय
प्राप्तिनामगम्यमुदामिवात्मयम् ५ विशेषमात्रेव्यविशेषसंस्थितेविचित्रकूटं वहुकूटमंडि
तम् मनोभिरामंप्रशरदिंदुनिर्मलेविचित्रकूटंशिखरंगिरेर्यथा ६ वहंतियंकुंडलवंशोभितानना महा
प्राणाव्योमचराणिशाचराः विवृत्तविध्वस्तविशालनलोचनानामहाजवाभूतगणाःसहस्रशः ७ ३

त्रमहाप्रावरं गिरेर्विचित्राकांतरंगगवक्षिखरमिव ६ महद्दर्शनंयेषांतेविततानिविघूर्णितानिविध्वस्तानिसंकुचितानिमेषा
णिविशालानिलोचनानियेषांतेनिशाचराः वहंतीवेतीवशब्दोऽध्याहार्यः तथाचविमानेनिर्मितनिशाचराकाराःप्र
तिमावहंतीवेत्सर्थः तेविमानंददृशुरित्युत्तरेणासंवेधः २ अन्यपाकाममगास्यांतःपुरेविघ्नमानस्मराःक्षमरक्षणावहनयोरयोगात् ७

एम०
३८

वसंतपुष्पोत्करचारुदर्शनं वसंतकालिकपुष्पसमूहेन चारुदर्शनं ८ इत्यष्टमः सर्गः ८ तस्येत्यादिश्लोकद्वयमेकं वाक्यं तस्यालयवरिष्ठस्य पूर्वोक्तपुष्पकस्य मध्ये भवनश्रेष्ठं भवनेषूत्तमं राक्षसेंद्रस्य भवनं ददर्शेति संबंधः १ अर्धयोजन

प्रतप्तचामीकरचारुदर्शनं वसंतमासादपि चारुदर्शनम् स पुष्पकं तत्र विमानमुत्तमं ददर्शत द्वानरवीरसत्तमः॥८॥हरिः ॐ इत्यार्षे रामायणे वाल्मीकीये सुंदरकांडेऽष्टमः सर्गः॥ ८॥तस्या लयवरिष्ठस्य मध्ये विपुलमायतम् ददर्श भवनश्रेष्ठं हनूमान्मारुतात्मजः १ अर्धयोजनविस्तीर्णमायतं योजनं महत् भवनं राक्षसेंद्रस्य बहुप्रासादसंकुलम् २ मार्गमाणस्तु वैदेहीं सीतामायतलोचनाम् सर्वतः परिचक्राम हनूमानरिसूदनः ३ उत्तमं राक्षसावासं हनूमानवलोकयन् आससादाथ लक्ष्मीवान्राक्षसेंद्रनिवेशनम् ४

विस्तीर्णेति तिर्यक्प्रमाणं २ सीतां मार्गमाणः सर्वतः पुष्पकादन्यत्र सर्वत्र परिचक्राम संचचार पुष्पकारोहणस्य पश्चाद्वक्ष्यमाणत्वात् ३ उत्तममित्यादिश्लोकद्वयमेकं वाक्यं आवासं बहुराक्षससाधारणावासस्थानं राक्षसेंद्रनिवेशनं पुष्पकमध्यालयादन्यन्मूलस्थानम् ४

परिक्षिप्तं परिवेष्टितं उदायुधै राक्षसैरिति शेषः ईदृशगजादिसत्त्वेपि असंबाधत्वेनातिविस्तृतत्वं सूच्यते ५ रावण
स्य निवेशनं निवेश्यं तेन परिगृहीतेन पत्न्यो यत्रेति वेशनेर रमणस्थानमित्यर्थः ग्रतए वपत्नीभिरावृतं ६ नक्रः कुंभी

चतुर्विधाभोगिभिरद्रिरत्नैस्त्रिविधाभोगिस्तथैव च परिक्षिप्तमसंबाधं रक्ष्यमाणमुदायुधैः ५ रा
क्षसीभिश्च पत्नीभी रावणस्य निवेशनम् आहृताभिश्च विक्रम्य राजकन्याभिरावृतम्
६ तन्नक्रमकराकीर्णं तिमिंगिलझषाकुलम् वायुवेगसमाधूतैः पन्नगैरिव सागरम् ७
या हि वैश्रवणे लक्ष्मीर्या चेंद्रे हरिवाहने सा रावणगृहे रम्या नित्यमेवानपायिनी ८ या
च राज्ञः कुबेरस्य यमस्य वरुणस्य च तादृशी तद्विशिष्टा वा ऋद्धी रक्षोगृहेष्विह ९ तस्य
हर्म्यस्य मध्यस्थं वेश्म चान्यत्सुनिर्मितम् बहुनिर्यूहसंयुक्तं ददर्श पवनात्मजः १०

रः तिमिंगिलो महामत्स्यः झषः केवलमत्स्यः वायुवेगसमाधूतैः पन्नगैर्युक्तं सागरमिव तत्स्वरूपमित्यर्थः ७ लक्ष्मीः
शोभा ८ ऋद्धिः ऐश्वर्यं तद्विशिष्टा ततोप्यधिका ९ वेश्म पुष्पकाख्यं निर्यूहा मत्तवारणाः १० १० १० १० रा०सु०
३९

पुनर्हेमन्दातोऽहमाश्रेषतया पुष्पकं वर्णयति ब्रह्मणोऽर्थे इति भावव्रीत्वा फलकमित्यर्थः ११ १२ ईहामृगसमायुक्तैरित्यादी
नां षष्ठ्यन्ताकल्पनात्सोऽहमहाकपिरिति नेनेनसंबंधः ईहामृगो वृकस्तत्प्रतिमायुक्तैः कार्तस्वरहिरण्मयैः रूप्यस्वर्णमयैः
१३ कूटागारैः उन्नतस्वल्पगृहैः शुभागारैः विहारयोग्यगृहैः १४ चार्व्यः सुंदराः प्रवराः श्रेष्ठाः वेदिका यस्मिंस्तत् १५ जाल

ब्रह्मणोऽर्थे कृतं दिव्यं दिवि यद्विश्वकर्मणा विमानं पुष्पकं नाम सर्वरत्नविभूषितम् ११ परेण त
पसा लेभे यत्कुबेरः पितामहात् कुबेरमोजसा जित्वा लेभे तद्राक्षसेश्वरः १२ ईहामृगसमायु
क्तैः कार्त्तस्वरहिरण्मयैः सुकृतैराचितैः स्तंभैः प्रदीप्तमिव च श्रिया १३ मेरुमंदरसंकाशैरुल्लि
खद्भिरिवांबरम् कूटागारैः शुभागारैः सर्वतः समलंकृतम् १४ ज्वलनार्कप्रतीकाशं सुकृतं
विश्वकर्मणा हेमसोपानसंयुक्तं चारुप्रवरवेदिकम् १५ जालवातायनैर्युक्तं कांचनैः स्फा
टिकैरपि इंद्रनीलमहानीलमणिप्रवरवेदिकम् १६ विद्रुमेण विचित्रेण मणिभिश्च महाध
नैः वर्त्तुलाभिश्च मुक्ताभिस्तलेनाभिविराजितम् १७

वातायनैर्युक्तं कुड्योपरिभागेऽलंकारार्थं स्वस्तिकसर्वतो
भद्राद्याकारेण कृतं जालं वायुसंचारार्थं कृतो गवाक्षो वातायनं इंद्रनीलः क्षीरसनैल्योत्पादकः महानीलः सिंहलद्वीपाकारोद्भूता
१६ विद्रुमेण महाधनैर्मणिभिर्निस्तुलाभिर्वर्तुलाभिर्मुक्ताभिश्च करणैर्विचित्रेण तलेन कुट्टिमप्रदेशेन विराजितमिति संबंधः १७

रा०वा०सुं०
५

सारवंतः गुरुत्वातिशययुक्ताः खदिरादयस्ते लवणांभसि न्यमज्जन् महेंद्रस्य भयात्पक्षच्छेदभयात्पर्वता इव ५० नानाकुसुमैः स्वानुयायिद्रुमार्पितैः सांकुरकोरकैः कानिचित्कुसुमानि निःशंकुरितानि कानिचित्कोरकरूपाणि कानिचिद्विकसितानीति रि

वणां

सारवंतोथ ये वृक्षा न्यमज्जन्ल्लंभसि भयादिव महेंद्रस्य पर्वता वरुणालये ५० स नानाकुसुमैः
कीर्णः कपिः सांकुरकोरकैः शुशुभे मेघसंकाशः खद्योतैरिव पर्वतः ५१ विमुक्तास्तस्य वेगे
नमुक्त्वा पुष्पाणि ते द्रुमाः व्यवशीर्यंत सलिले निवृत्ताः सुहृदो यथा ५२ लघुत्वेनोपप
न्नं तद्विचित्रं सागरे पतत् द्रुमाणां विविधं पुष्पं कपिवायुसमीरितम् ५३ पुष्पौघेन सुगं
धेन नानावर्णेन वानरः बभौ मेघ इवोद्यन्वै विद्युद्गणविभूषितः ५४

त्यर्थः ५१ तस्य हनुमतो वेगेन वियुक्तास्ततो विभक्तास्ते द्रुमाः पुष्पाणि मुक्त्वा सलिले व्यवशीर्यंत वेधु प्रस्थानार्थं गताः
सुहृदो वेधु प्रस्थाप्य यथा निवृत्ताः पीडां तेन कृत ५२ विचित्रं पुष्पं सागरे पतत् तद् लघुत्वेन उपपन्नं उपपत्तिमदित्यर्थः ५३
सर्ववर्णानां विद्युत्सु सत्वात् नानावर्णपुष्पौघविभूषितस्य हनुमतः सविद्युद्गणमेघोपमा ५४ ४ ५ ५ ५ ५

राम० ५

म्यादित्यतरुणोपमं तरुणादित्यसदृशं १८ तत्रस्थः पुष्पकविमानस्थः संमूर्छितं व्याप्तं जिघ्रत् जिघ्रन् रूपवन्तमिवानिलं गन्धरूपस्य वायोर्गं
धवद्द्रव्यगुणत्वाद्रूपवत्वोत्प्रेक्षा १९ पवनसु रावणस्तत्रस्थाने इतो हीत्युवाचेव दिव्यगंधेन रावणशयनगृहं सूचितवानिसर्गः २०
ततस्तामित्यारभ्य श्रियः सञ्जननीमिवेत्यंतं श्लोकाष्टकमेकं वाक्यं ततस्तदनंतरं तां गंधानुमितां पुष्पकस्य शालां प्रस्थितो हनूमान्

चंदनेन च रक्तेन तत्प्रदीपनिभेन च सुपुण्यगंधिनं युक्तमादित्यतरुणोपमम् विमाने पुष्पके दि
व्ये मारुते ह महाकपिः १८ तत्रस्थः सर्वतो गंधं पानभक्षान्नसंभवम् दिव्यं संमूर्छितं जिघ्रद्रूप
वन्तमिवानिलम् १९ स गंधस्तं महासत्वं बंधुर्बंधुमिवोत्तमम् इत एहीत्युवाचेव तत्र यत्र स
रावणः २० ततस्तां प्रस्थितः शालां ददर्श महतीं शिवां रावणस्य मनःकान्तां कान्तामिव वरस्त्रियम्
२१ मणिसोपानविकृतां हेमजालविराजिताम् स्फाटिकैरावृततलां दंतान्तरितरूपिकाम् २२
मुक्तावज्रप्रवालैश्च रूप्यचामीकरैरपि विभूषितां मणिस्तंभैः सुबहुस्तंभभूषिताम् २३

तां शालां ददर्श इत्यन्वयः मनःकांतां मनोरमां कांतां कमनीयां श्रेष्ठस्त्रियमिव २१ शालामेव विशिनष्टि मणीत्यादिना
मणिकृतसोपानानि विशेषेण कृतानि यस्याः स्फाटिकैरावृततलं कुट्टिमभूर्यस्याः दंतैरंतरितानि मध्ये मध्ये निमि
तानि रूपाणि यस्याः सा दंतांतरितरूपिकां २२ बहुलबोधनाय स्तंभानुवादाल्पो न रत्नमयम् २३ सीतारामाभ्यां नमः राम०

समंतात्सुविभूषितैः रत्नादिभिरिति शेषः । स्तंभैः पक्षैरिव स्थितैरत्युच्चैस्तंभैर्दिवं संश्रयितामिव उत्प्रेक्षा २४ पृथिवीत्वक्ष्णकया सरित्समुद्रगिरिग्रामादिभिः पृथिवीत्वक्ष्णाकारं कृतया महत्या कुथ्यया विशालया विचित्ररत्नकंबलास्तरणेनास्तीर्णां छन्नां तीरणां सराष्ट्रगृहमालिनीमिति पृथिवीविशेषणं २५ २६ हंसपाण्डुरां हंसवत् शुभ्रां कल्माषीं शबलवर्णां विशिष्ट धेनु

समैत्रैः जनुभिस्तुच्चैः समंतात्सुविभूषितैः । स्तंभैः पक्षैरिवात्युच्चैर्दिवं संश्रयितामिव २४
महत्या कुथ्ययास्तीर्णां पृथिवीत्वक्ष्णकया । पृथिवीमिव विस्तीर्णां सराष्ट्रगृहमालिनीम्
२५ नादितां मत्तविहगैर्दिव्यगंधाधिवासिताम् । परार्ध्यास्तरणोपेतां रक्षोधिपनिषेविताम्
२६ धूम्रामगरुधूपेन विमलां हंसपाण्डुराम् । पत्रपुष्पोपहारेण कल्माषीमिव सुप्रभाम् २७
मनसो मोदजननीं वर्णस्यापि प्रसाधिनीम् । तां शोकनाशिनीं दिव्यां श्रियः संजननीमिव २८
इंद्रियाणीन्द्रियार्थैस्तु पंचपंचभिरुत्तमैः । तर्पयामास मातेव तदा रावणपालिता २९ २९

मिव स्थितां श्वेतेन सवर्णेन ददाति अत्र वैरिपूर्णाम धष्पालेच सूच्यते २७ वर्णस्य देहकान्तेः प्रसाधिनीं संपादिकां तां शालां ददर्शेति पूर्वेणान्वयः तत्तत्स्थामिति वर्तमाने पुनस्तामितिच्छेदः उपसंहारार्थः २८ पंचभिरिन्द्रियार्थैः शब्द स्पर्शरूपरसगन्धैः पंचेन्द्रियाणि श्रोत्रत्वक्चक्षूरसनाघ्राणानि तर्पयामास हनूमत इति शेषः रावणपालिता शालेति शेषः २९ २९ २९

रा०वा०पु०
४१

स्वर्गः ज्योतिष्टोमादिफलभोगभूमिः देवलोको वायुवरुणादिलोकः इंद्रस्य पुरी अमरावती पातालसिद्धिर्ब्रह्मणः स्थाने वेत्स्व
तरोलक्षः ३० तत्र काञ्चनप्रदीपान् प्रध्यायतो ध्यानतिष्ठानि वा प्रपश्यत् यथा महाधूर्तैर्महाक्ष देवने धूर्ता अल्पाक्ष
देवनाः पराजिता धनं नाशाच्छ्यायंतः रवासतेन तथा काञ्चनान्दीपान् काञ्चनदीपसिंभस्य प्रदीपान् विपुल दीपाग्नेक्षुद्र

स्वर्गोयं देवलोकोयमिंद्रस्यापि पुरी भवेत् सिद्धिर्वेयं परा हि स्यादित्यमन्यत मारुतिः ३० प्रध्याय
तरवापश्यत्प्रदीपांस्तत्र काञ्चनान् धूर्तानिव महाधूर्तैर्देवनेन पराजितान् ३१ दीपानांच प्रका
शेन तेजसा रावणस्य च अर्चिर्भिर्भूषणानांच प्रदीप्तस्यभ्यमन्यत ३२ ततोपश्यत्कुथासीनं नाना
वर्णाम्बरस्रजम् सहस्रं वरनारीणां नानावेषविभूषितम् ३३ परिवृत्तेर्धरात्रे तु पाननिद्रावशं गतम्
क्रीडित्वोपरतं रात्रौ प्रसुप्तं बलवत्तदा ३४ तत्प्रसुप्तं विरुरुचे निःशब्दान्तरभूषितम् निःशब्दहंसभ्रम
रं यथा पद्मवनं महत् ३५

दीपप्रभा रवणस्य तेजोभिभूतान पश्यदित्यर्थः ३१ प्रदीप्तेति प्रकाशाद्दग्धेत्यभ्यमन्यतान्यने
नाग्निमोग्निदाहः सूचितः ३२ कुथासीनं प्रास्तीर्णकुथायां शयानं ३३ रात्रौ क्रीडित्वोपरतं पाननिद्रावशं गतं पर्धरात्रे प
रिवृत्ते परिवृत्ते सति तदा बलवत्प्रसुप्तम् यपश्यदित्यनुकर्षः ३४ तच्च स्त्रैणं प्रसुप्तजनेन रावणगृहे निःशब्दोतरैर्निर्गत स्वस्वप्रा
दुर्भवैर्नूपुरकिंकिण्यादिभिर्भूषितं विरुरुचे ३५

राम०
४१

तासां पद्मगंधीनि वदनानि निद्रितत्वात् संवृतदलानि निमीलिताक्षीण्यपश्यत ३६ प्रबुद्धानीति वदनानीत्यनुषज्यते तासां वदना
नि क्षपाक्षये दिवसे पद्मानीव प्रबुद्धानि भूत्वा रात्रौ पुनः संवृतपत्राणि पद्मानीव बभुरित्यन्वयः ३७ मुखानि दृष्ट्वा हनु
मनोजातां से भावनामाह इमानीति मत्तषट्पदाः इमानि मुखपद्मानि प्रफुल्लान्यम्बुजानीव नियतं नित्यं पुनः प्रार्थयंतीति प्रा

तदं

तासां संवृत्तानि निमीलिताक्षीणि मारुतिः । अपश्यत्पद्मगंधीनि वदनानि सुयोषिताम् ३६ प्रबुद्धा
नीव पद्मानि तासां भूत्वा क्षपाक्षये । पुनः संवृतपत्राणि रात्राविव बभुस्तदा ३७ इमानि मुखप

नि

द्मानि नियतं मत्तषट्पदाः । अंबुजानीव फुल्लानि प्रार्थयंति पुनः पुनः ३८ इति वामन्यत श्रीमानुपप
त्त्या महाकपिः । मेने हि गुणतस्तानि समानि सलिलोद्भवैः ३९ सा तस्य शुशुभे शाला ताभिः स्त्री
भिर्विराजिता । शारदीव प्रसन्ना द्यौस्ताराभिरभिशोभिता ४० स च ताभिः परिवृतः शुशुभे राक्षसा
धिपः । यथा ह्युडुपतिः श्रीमांस्ताराभिरभिसंवृतः ४१

र्थयेरन् मधुलुब्धतयात्र पुनः पुनः पतेयुरि
त्यर्थः ३८ उपपत्त्या युक्त्या इति वामन्यत इत्येवोत्प्रेक्षितवान् तामेवाह हि येनेति तानि मुखानि गुणतः शैत्यसौगं
ध्यादिगुणैः सलिलोद्भवैरम्बुजैः समानि मेने इति योजना ३९ ४० ४१

रा० वा० सु०
४२

प्रत्यपशेषसमावृता इत्युक्ताः संगताः एकदेशमिलिताः यत्रसौंदर्यातिशुक्तिरूपोस्तुतालंकारः ४२ तदेवाह ताराणामिवेति शुभोदेहकांतिः वर्णौरूपं प्रसादस्त्वौज्ज्वल्यं ४३ पानव्यायामकालेषु पानानंतरभाविरतिव्यापारसमयेषु व्यावृत्ताः कुचाः पीनस्रजश्च यासां ताश्च प्रकीर्णानि इतस्ततः क्षिप्तानि वरभूषणानि यासां ताश्च निद्रोपहतचेतसो विरेजुरितिपूर्वेणसंबंधः ४४ उक्तं भूषणप्रकिरणमेव प्रपंचयति व्यावृत्ततिलकाः इति उन्मृष्टतिलकाः इत्यर्थः उद्भ्रान्ताः स्वस्था

पाश्चाद्वेत्तेवरा नाराः प्रत्यपशेषसमावृताः इमास्ताः संगताः कान्त्या रतिमेनेह रत्निदा ४२ ताराणा
मिव सुव्यक्तं महतीनां शुभार्चिषाम् प्रभावर्णप्रसादाश्च विरेजुस्तत्र योषिताम् ४३ व्यावृत्ता
कुचपीनस्रकप्रकीर्णावरभूषणाः पानव्यायामकालेषु निद्रोपहतचेतसः ४४ व्यावृत्ततिलकाः
काश्चित्काश्चिदुद्भ्रान्तनूपुराः पार्श्वे गलितहाराश्च काश्चित्परमयोषितः ४५ मुक्ताहारवृता
श्चान्याः काश्चिद्विस्रस्तवाससः व्याविद्धरशनादामाः किशोर्य इव वाहिताः ४६ सीतालमा

नात्स्खलितानूपुरा यासां ताः पार्श्वे एकस्मिन्गलिता विस्रस्ताहारा यासां ताः ४५ मुक्ताहारैर्वृताः छिन्नमुक्ताहाराः व्याविद्धं विक्षिप्तं रशनादाम कांचीगुणो यासां ताः एवं भूषणाबंधस्सहि तेन श्रमेनेनउपवाहिताः किशोर्य इव किशोर्यो वडवाः वाहिताः गमधत्वश्रमनिवृत्तये भूमौ चेष्टनेकारिताः श्लथबंधनाः शरतेनत्यदित्यर्थः ४६ ६ ६

८

अथ कुंडलधराः कुंडलधारणरहिताः गलितकुंडला इति यावत् विच्छिन्नाभ्रमर्दिताश्च स्रजो यासां ताः अत्र रेजुरित्यनुकर्षः ४७
चंद्रांशुकिरणाभाः चंद्रांशुः सूर्यः अयांशुः स्यान्मुखेंदुसविता पि पीदधानाः चंद्रसूर्ययोः किरणा नामाभेवाभा येषां ते उद्गताः वैप
रीत्येन स्थिताः हाराः मुक्ताहाराः योषितां स्तनमध्येषु सुप्ता हंसा इव बभुः ४८ वैडूर्याः वैडूर्यमणिमालाः कादंबाः कलहं

अथ कुंडलधराश्चान्या विच्छिन्नाभ्रदितस्रजः गजेंद्रमर्दिताः फुल्ला लता इव महावने ४७ चं
द्रांशुकिरणाभाश्च हाराः कासांचिदुद्गताः हंसा इव बभुः सुप्तास्तनमध्येषु योषिताम् ४८ अ
परासां च वैडूर्याः कादंबा इव पक्षिणः हेमसूत्राणि चान्यासां चक्रवाका इवाभवन् ४९ हंसका
रंडवोपेताश्च चक्रवाकोपशोभिताः आपगा इव ता रेजुर्जघनैः पुलिनैरिव ५० सीतारम्याया

साः अत्र कादंबशब्देन कारंडवपदवाच्यो जलकाक उच्यते अन्यथा वैडूर्योपमानत्वमसंगतं स्यात् हेमसूत्राणि चापरासामपि
नमध्योद्गतानीत्यनुकर्षः चक्रवाकानां पीतत्वसादृश्यादुपमानत्वं स्त्रीषु नानावर्णभूषणानि हंसादिस्थानीयानि स्त्रीक
टीपुरोभागो जघनम् ५०

श्च यासां नदीत्वं वर्णयति किंकिणीति किंकिणीजालान्येव सकोशाः मुकुलानि यासां ताः हैमानि हेमविभूषणान्येव विद्रुमाण्यंबुजालानि यासां ताः भावाः शृंगारस्य चेष्टाः ता एव ग्राहा नक्रादयो यासां ताः सुष्ठु दर्शनीया यामपि वासनानां वस्त्राणां दावाग्नि ध्वजकसंस्थानवत्त्वाम्दावग्ना हा इत्युक्तं यथाः प्राक् दैनय प्राप्तो हेतुभूत पर्यन्त प्रदेशः तत्र भोग्यत्ते सेवती रं यासां ताः रुष्णा वा पीन घुरवा बभुः ५१ भूषणाराजयः भूषणाविमर्दजनितैरवाः विसक्त भूषणानामपि कासांचिन्मूषणास्थानरेखा भूषणानीव बभुरित्यर्थः ५२ मुखमारुत

किंकिणीजालवसंकोशास्ताहेमविद्रुमांबुजाः भावग्राहाह्यशास्तीराः सुष्ठान घुरवा बभुः ५१ मदु
ष्वंगेषु कासांचित्कुचाग्रेषु च संस्थिताः बभूवुर्भूषणानीव शुभ्राभूषणराजयः ५२ शुभ्रकांता
श्च कासांचिन्मुखमारुत कंपिताः [illegible] उपर्युपरि वक्त्राणां व्याधूयंते पुनः पुनः ५३ ताः पत्ता
का इवोद्भूताः पल्लीनां रुचिरप्रभाः नानावर्णा सुवर्णानां वक्त्रमूले बभुरेजिरे ५४ ५४ ५४

कंपिताः सूक्ष्मशुभ्र कांताः सूक्ष्म वस्त्रदेशाः वक्त्राणामुपर्युपरि पुनः पुनर्व्याधूयेत इत्यन्वयः ५३ व्याधूयमान शुभ्रकांतमु
त्थ क्षान्ते ता इति विधेयप्राधान्यात्स्त्रीलिंगनिर्देशः ताः शुभ्रकांताः पल्लीनां अर्थाद्भावना पल्लीनां अनेकवर्णा वा सुव
र्णातंतुनिर्मितवाससो वक्त्रमूले पताका इव रेजिरे शुशुभिरे इत्यन्वयः ५४ ५४ ५४ ५४ ५४ ५४

शुभ्राचिषां कासांचिद्योषितां कुड्मलानि मुखमारुतसंकंपैः मुखमारुतसंसर्गकृतच [illegible]न तैर्मंदं मंदं ववल्गुः संचेलुः अनेन कुड्
मलानाम तिलघुत्वेन च तासाम तिसौकुमार्यं व्यंग्यं ५५ शार्करासव अ्ास नवि ग्रोषस्त घोगात् क्रधः प्रफुल्लाचसुभिरतए वसुरवस्ता
सां वदननिश्वासोत्र वर्णासि षेवे ५६ एवर्णाननग्रो काः मदनि द्रोम पजन्यचित्ते वैव प्रपात् सपत्नीनां च सपत्नीनामपि मुखान्युपा

ववल्गुरत्र कासांचित्कुड्मलानि शुभानि च मुखमारुतसंकंपैर्मंदं मंदं च योषिताम् ५५ शार्करा
सवगंधः सः प्रफुल्लासुरभिः सुखम् तासां वदननिश्वासैः सिषेवे तत्र वर्णितदा ५६ एवर्णाननग्रो काश्व
काश्चिद्द्वावर्णयोषितः मुखानि स्वसपत्नीनामुपाजिघ्रन्पुनः पुनः ५७ अस्तर्पथसंक्रमनमोरवरोत्ता
वास्त्रियः अस्वतंत्राः सपत्नीनां प्रियमेवाचरंस्तदा ५८ बाहूनुपनिधायान्याः पारिहार्यवि
भूषितान् अंसेषु कानिचरम्याणि प्रमदास्तत्र शिश्यिरे ५९

जिघ्रन् ५७ न तु सपत्नीभिः कृतेमुखाघ्राणे ताः कथमसहंते तत्रत आह अस्तर्पथमिति अस्वतंत्राः एगोधाः रावरोः अस्तर्पथसंक्रमनसत्ता
वराः स्त्रियः सपत्नीभिराघातमुखाः अपि तदा घ्राणेन पत्युः प्रियमिति मत्वा सपत्नीनां प्रियमेवाचरन एगोधाः किं किं न कुर्वंतीति
भावः ५८ पारिहार्यैः कनपत्रादिभिर्भूषितान्बाहूनुपतिधाय उपधानं कृत्वा अन्याः काश्चित्प्रमदाः सुरम्याण्यंसेषु कानिचोपनिधा
य तत्र शिश्यिरे इति संबंधः ५९

ए० वा० सुं० ४४ अन्येत्यादिश्लोकद्वये श्लिष्टपरे इति पदे यथायोगं वचनविपरिणामेनयोज्यं उपनिधायेति पदं च ६० स्नेहोत्रावगीयः ६१ एकीकृतस्सुजाः परस्परसंबद्धभुजाः ६२ अत्र एवाह अन्योन्यति माला पुष्पमाला उपमेयमत्तषट्पदस्थानीयाः कुचभागे नेत्रद्वंद्वानिच ६३ लतानामित्यादिश्लोकद्वयमेकान्वयं जद्वावराख्नीवने स्त्रीसमूहः लतानां वनमिव आसीदिति संबंधः विशेषणानुभयत्रयो

अन्या वक्षसि चान्यस्यास्तस्याः काचित्पुनर्भुजम् अपरा त्वंकमन्यस्यास्तस्याश्चाप्यपरा भुजौ ६०
ऊरुपार्श्वकटीपृष्ठमन्योन्यस्य समाश्रिताः परस्परनिविष्टांगास्तोमदस्नेहवशानुगाः ६१ अन्यो
न्यस्यांगसंस्पर्शात्प्रीयमाणाः सुमध्यमाः एकीकृतस्वभुजाः सर्वाः सुषुपुस्तत्र योषितः ६२ अ
न्योन्यभुजसूत्रेण स्त्रीमाला ग्रथिता हि सा मालेव ग्रथिता सूत्रे शुशुभे मत्तषट्पदाः ६३
लतानां माधवे मासि फुल्लानां वायुसेवनात् अन्योन्यमालाग्रथितं संसक्तकुसुमोच्चयम् ६४
प्रतिवेष्टितसुस्कंधमन्योन्यभ्रमराकुलम् आसीद्वनमिवोद्धूतं स्त्रीवनं रावणस्य तत् ६५

न्यानि वायुसेवनाद्धेतोरन्योन्यमालाग्रथितमालारूपेणग्रथितं मुखमारुतसेवनादन्योन्यग्रथितमित्यत्र स्त्रीपक्षे संसक्तकुसुमो
च्चयं अन्योन्यसंसक्तनीवीसंसक्तकुसुमसमूहेच ६४ प्रतिवेष्टितसुस्कंधं प्रतिवेष्टिता वृक्षाणां नायकानां च प्रोन्नताः स्कं
धा येन तत् अन्योन्यं धावंतो भ्रमरास्तैराकुलं अन्योन्यचिकुरैराकुलं स्त्रीपक्षे भ्रमरभ्रमिकरे इति विश्वः ६५ ६५ ए०म०
४४

तासां योषितामुचितेषु स्थानेषु सत्स्वङ्गं प्रतिष्ठितानामपि भूषणानां गोवरस्रजां विवेकमाधातुं कर्तुं न शक्यं अपरिमितत्वात् भूषणभूष्य योरेकरूप्यात् परस्परसंग्रथितत्वेन सुप्रत्वाच्च इमान्यस्या भूषणानि इमान्यस्या इति विवेकः कर्तुमशक्य इति भावः प्रतिमानेत्वं का रोऽत्र्यङ्गयः ६६ रावणो रवसंविष्टे रवसंसृष्टे सति काञ्चनाः काञ्चनसंभवास्ता दीपाः दीपस्थाग्निप्रदेहपाः कर्तारः विविधप्र

उचितेष्वपि सत्स्वङ्गे न तासां योषितां तदा विवेकः शक्य आधातुं भूषणाङ्गावरस्रजाम् ६६ रावणो रवसंविष्टे ताः स्त्रियो विविधप्रभाः ज्वलंतः काञ्चना दीपाः प्रेक्षन्तेऽनिमिषा इव ६७ राजर्षिपितृदैत्यानां गन्धर्वाणां च योषितः रक्षसां चाभवन्कन्यास्तस्य कामवशं गताः ६८ युद्धकामेन ताः सर्वा रावणेन जिताः स्त्रियः समदा मदनेनैव मोहिताः काश्चिदागताः ६९ रमसाना

मात्ता स्त्रियः कर्मगृह अनिमिषा इव प्रेक्षन्ते अनेन रावणो जाग्रति तिष्ठामपि तद्दर्शने भयं सूचितं ६७ कामवशं गताः सत्यस्तस्य योषितोऽभवन् अनेन तासामप्यनुरागः सूचितः ६८ अवश्यं बहुस्त्रीप्राप्तिर्बलात्स्याच्चेत्याह युद्धेत्यादि सर्वा इति वा कुल्याभिप्राये ण्वासां हरणे एतद् बुद्धिर्युद्धं भविष्यतीति युद्धकामना पूर्वं हृताः काश्चित्समदास्तरुणायो मदनमोहिताः स्वयमेवैनं वव्रुः ६९

अभिरामाभिः रमणीयाभिः ५५ ५६ अर्णवसमीपगमनवेलायामुदधिपिबन्निव बभौ ऽपरिगमनावस्थायां प्राकाशोपि
पासुरिव ददृशे ५७ विप्रकाशेते विशेषेण प्रकाशेतेस्म ज्वलन्तौ दावानलौ ५८ पिंगाक्षमुख्यस्य वानरश्रेष्ठस्य पिंगे पीतव

तस्य वेगसमुद्धूतैः पुष्पैस्तोयमदृश्यत ताराभिरभिरामाभिरुदिताभिरिवांबरम् ५५ तस्यां
बरगतौ बाहू ददृशाते प्रसारितौ पर्वताग्राद्विनिष्क्रांतौ पंचास्याविव पन्नगौ ५६ पिब
न्निव बभौ चापि सोर्मिमालं महार्णवम् पिपासुरिव चाकाशं ददृशे स महाकपिः ५७ त
स्य विद्युत्प्रभाकारे वायुमार्गानुसारिणः नयने विप्रकाशेते पर्वतस्थाविवानलौ ५८
पिंगे पिंगाक्षमुख्यस्य बृहती परिमंडले चक्षुषी संप्रकाशेते चंद्रसूर्याविव स्थितौ ५९
मुखं नासिकया तस्य ताम्रया ताम्रमाबभौ संध्यया समभिस्पृष्टं यथा स्यात्सूर्यमंडलम् ६०

र्णौ बृहती विशाले चक्षुषी संप्रकाशेते परिमंडले परितो वृत्ते प्रभामंडले स्थितौ चंद्रसूर्याविव एकगिरौ उदये पिंगलमंडल
तया वस्थितौ चंद्रसूर्याविवेत्सम्भूतोपमा ५९ तस्य ताम्रया नासिकया युक्तं ताम्रं मुखं संध्याकालिकं सूर्यमंडले यथा तथाब

सुंदर

टी०वा०सुं० एतमेवार्थंविवृणोतिनतत्रेति वीर्योपपन्नेनापितेनतत्र तासुमध्ये काश्चित्प्रमदाःप्रसह्यनहृताः किंतुगुणेन निरतिशयैश्वर्य सौंदर्यादिगुणेनस्वतएवलब्धाः तत्रत्वंकायामन्यकामाचनाहृताऽन्यपूर्वाचनाहृता कथमेवंप्रसक्त्यापवादमाह विनेति वरार्हांजनकात्मजांविना ७० तस्यभार्यास्वकुलीनानामवत् उपचारउत्तमांवरभूषणमाल्यादिःकांतस्यएवतस्य

नतत्रकाश्चित्प्रमदाःप्रसह्यवीर्योपपन्नेनगुणेनलब्धा नचान्यकामापिनचान्यपूर्वाविना वरार्हांजनकात्मजांतु ७० नचाकुलीनानचहीनरूपानादक्षिणानानुपचारयुक्ता भार्याभवत्तस्यनहीनसत्वानचापिकांतस्यनकामनीया ७१ बभूवबुद्धिस्तुहरीश्वरस्ययदीदृशीराघवधर्मपत्नी इमायथाराक्षसराजभार्याःसुजातमस्येतिहिसाधुबुद्धेः ७२ ७२ ७२

नकामनीयाप्रमनोज्ञाचनामवत् ७१ इमाःराक्षसराजभार्याःयथास्वभर्तृविशिष्टाःसकलभोगयुक्तास्तथाराघवधर्मपत्नी ईदृशीयदिस्वभर्तृसहितायदितदाऽस्यरावणस्यसुजातंशोभनमन्यथादुर्दशैवेतिसाधुबुद्धेर्हरीश्वरस्यहनूमतोबुद्धिर्बभूव अस्यरावणस्यराघवधर्मपत्नीयदिसर्वथैतदासजन्मशोभनंस्यादितिहरीश्वरस्यबुद्धिर्जातेत्यर्थः ७२ ७७ एम०

चिंतांतरमाह पुनश्चेति सीता गुणतः पातिव्रत्यादिगुणतो ध्रुवं विशिष्टा हि अस्यामेतादृश्यां लंकेश्वरः अनार्यं कर्म अपहरणरू
पं कर्म कृतवान् कष्टमिति इति स महात्मा हनूमान् आर्तरूपः सन् पुनश्चाचिंतयदिति संबंधः ७३ इति नवमः सर्गः ९ तत्र तिष्ठन् क
दाचिदेकं वाक्यं तत्र शालायां दिव्योपमं दिवि भवेन स्वर्गेण तुल्यं दिव्योपमं आयतं तत् शयनं तस्य पल्यंकस्य आसनं प्र

पुनश्च सोऽचिंतयदार्तरूपो ध्रुवं विशिष्टा गुणतो हि सीता अथायमस्यां कृतवान्महात्मा लंकेश्व
रः कष्टमनार्यकर्म ॥७३॥ इति श्रीमद्रामायणे वाल्मीकीये सुंदरकांडे नवमः सर्गः ॥९॥
तत्र दिव्योपमं मुख्यं स्फाटिकं रत्नभूषितम् अवेक्षमाणो हनुमान्ददर्श शयनासनम् १ दांत
कांचनचित्रांगैर्वैदूर्यैश्च वरासनैः महार्हास्तरणोपेतैरुपपन्नं महाधनैः २ तस्य चैकत
मे देशे दिव्यमाल्योपशोभितम् ददर्श पांडुरं छत्रं ताराधिपतिसन्निभम् ३ ३ ३ ३ ३ ३

तिष्ठन् वेदिकाः अवेक्षमाणः इतस्ततः पश्यन् ददर्श १ तस्य वर्णनं दांतैरित्यादि गजदंतमयानि स्वर्णमयानि च चित्रा
णि चित्रयुतानि अंगानि पादादिरूपाणि येषां तैर्महार्हास्तरणोपेतैर्बहुमूल्यास्तरणयुक्तैः वैदूर्यैरिव पललक्षणैः वैदू
र्यपद्मरागादिनिर्मितैर्वरासनैः शयनपल्यंकैर्महाधनैर्बहुमूल्यैरुपपन्नं २ तस्य पर्यंकस्य एकतमे देशे शिरोभागस्थले पार्श्वे
३

अथ यात्रागमनाद्दर्शनं कथयन्नाथपुनः पर्यंकदर्शनमाह जातरूपेत्यादि श्लोकत्रयेण जातरूपपरिक्षिप्तं स्वर्णनिर्मितं चित्रभानोः सूर्यस्य समानकांति अथ शोकपुष्पमालाभिवृतं परमासनं तस्यैकदेशे ददर्श ४ यंत्रनिर्मितस्त्रीप्रतिमा वालव्यजनं चामरं न तु मेमोगम् हे तत्रापि निद्रायास्पकयं वालव्यजनवीजने कथं चहनूमतस्ताभिरदर्शनमिति चेन्न यंत्रनिर्मितस्त्रीप्रतिमादिभिस्तत्रापि तत्संभ

जातरूपपरिक्षिप्तं चित्रभानोः समप्रभम् अथ शोकमालाविततं ददर्श परमासनम् ४ वालव्यजनहस्ताभिर्वीज्यमानं समंततः गंधैश्च विविधैर्जुष्टं वरधूपेन धूपितम् ५ परमास्तरणास्तीर्णं मेषाविकाजिनसंवृतम् दामभिर्वनमाल्यानां समंतादुपशोभितम् ६ तस्मिन् जीमूतसंकाशं प्रदीप्तोज्वलकुंडलम् लोहिताक्षं महाबाहुं महारजतवाससम् ७ लोहितेनानुलिप्तांगं चंदनेन सुगंधिना संध्यारक्तमिवाकाशे तोयदं सतडिद्गुणम् ८ वृतमाभरणैर्दिव्यैः सुरूपं कामरूपिणम् सवृक्षवनगुल्माढ्यं प्रसुप्तमिव मेदरम् ९ सीताभ्याम्भ्यो नमः सीताराघवात्

५ अविकाजिनं ऊर्णायुचर्म तद्द्विपरम् मृदुलं तेन संवृतं संवृतं तत्प्रदेशे मास्येषुष्पं ६ तस्मिन्प्रसुप्तमिति शेषः महारजतं स्वर्णतंतुनिर्मितं वासो धारिणं ७ एवलास्यतडित्स्थानीयसौवर्णं वासः ८ सवृक्षवनगुल्माढ्यं पुष्पसहिते वृक्षैर्वनैर्गुल्मैश्चाढ्यं प्रसुप्तमिव निश्चलं मंदरमिवस्थितं बाहवोऽस्य वृक्षा नाभादयो गुल्माः ९

१० पीत्वाऽपि नाक्रीडित्वाप्युपरतम् ११ यथा नागं गजमिव निःश्वसंतं रावणं आसाद्य प्राप्य परमोद्विग्नः अयं पापी देवीं हृतवा-
निति तत्समीपेऽवस्थानमनुचितमिति खिन्नचित्तो यात्सर्पत् सुभीतवत्तत्सुभीतो यथा भयहेतुपिशाचादिसंमुखे स्थातुमशक्तो-
ऽपसर्पति तद्वत् १२ अथापसर्पणानंतरं आरोहणं सोपानमासाद्य वेदिकांतरं सोपानपर्वमध्यमाश्रितः क्षीबं मदिरामत्तं

क्रीडित्वोपरतं रात्रौ वराभरणभूषितम् प्रियं राक्षसकन्यानां राक्षसानां सुखावहम् १० पीत्वा-
प्युपरतं चापि ददर्श स महाकपिः भास्वरे शयने वीरं प्रसुप्तं राक्षसाधिपम् ११ निश्वसंतं
यथा नागं रावणं वानरोत्तमः आसाद्य परमोद्विग्नः सोपसर्पत्सुभीतवत् १२ अथारोहण-
मासाद्य वेदिकांतरमाश्रितः क्षीबं राक्षसशार्दूलं प्रेक्षते स्म महाकपिः १३ शुशुभे राक्ष-
सेंद्रस्य स्वपतः शयनं शुभम् गंधहस्तिनि संविष्टे यथा प्रस्रवणं महत् १४ कांचनांगदसन्न-
द्धौ ददर्श स महात्मनः विक्षिप्तौ राक्षसेंद्रस्य भुजाविंद्रध्वजोपमौ १५ ऐरावतविषाणाग्रै-
रापीडनकृतव्रणौ वज्रोल्लिखितपीनांसौ विष्णुचक्रपरिक्षतौ १६ १३ यस्य गंधेनान्ये गजाः पला-

यंते स गंधहस्ती मत्तगजो नितरां संविष्टे अधिष्ठिते महत्प्रस्रवणं महानिर्झरमिव १४ महात्मनः महाशरीरस्य विक्षिप्तौ प्रसारि-
तौ १५ आपीडने मर्दने कृतव्रणौ कृतव्रणकिणौ वज्रेणोल्लिखितौ क्षतौ पीनांसौ ययोस्तौ वज्रचक्रयोरप्यसाध्यमस्त्विति भावः १६

समौ सुजातौ चांसौ ययोस्तौ संगतौ देहानुरूपौ स्वङ्गुलीयकलक्षितौ शोभनाङ्गुलीयकभूषितौ १७ संहतौ दृढसंधिबंधौ विक्षिप्तौ प्रसारितौ एतौ दृष्टौ बाहू ददर्शेति पूर्वेणान्वयः १८ शशस्य क्षतजं रक्तमतिलोहितवर्णं १९ उत्तमस्त्रीणां विमृदितं विमर्दनमालिंगना

पीनौ समसुजातांसौ संगतौ वल्गसंयुतौ सुलक्षणनखाङ्गुष्ठौ स्वङ्गुलीयकलक्षितौ १७ संहतौ परिघाकारौ वृत्तौ करिकरोपमौ विक्षिप्तौ शयने शुभ्रे पंचशीर्षाविवोरगौ १८ शश क्षतजकल्पेन सुशीतेन सुगंधिना चंदनेन परार्ध्येन स्वनुलिप्तौ स्वलंकृतौ १९ उत्तमस्त्रीविमृदितौ गंधोत्तमनिषेवितौ यक्षपन्नगगंधर्वदेवदानवराविणौ २० ददर्श स कपिस्तस्य बाहू शयनसंस्थितौ मंदरस्यांतरे सुप्तौ महाहीरुषिताविव २१ ताभ्यां स परिपूर्णाभ्यामुभाभ्यां राक्षसेश्वरः शुशुभेऽचलसंकाशः शृङ्गाभ्यामिव मंदरः २२

दिपयोस्तौ २० ददर्शेत्यस्यादरेण ददर्शेनातः पुनरुक्तिः महाही महासर्पौ [illegible] जलकल्पनाद्यु[illegible]द्धादिकाल एव वि
प्राप्ति भुजत्वं दर्शाशीर्षत्वं चेति बोध्यं २१ परिपूर्णाभ्यां दीर्घवृत्ताभ्यामित्यर्थः २२

चूतेत्यादि श्लोकद्वयमेकान्वयं चूतपुंनागसुरभिः रसालनागकेसरवासित वस्तुसेवना सुरभिरित्यर्थः वकुलोत्त
मसंवृतः उत्तमवकुलेनोपयुक्तः मृष्टान्नरससंयुक्तः षड्रसोत्तमान्नानां धोपेतः पानगंधधरः स्रक् पिपतः इति पानं मधुत
द्गंधयुतः विनिश्वासः श्वासानपतस्य तस्याननं महामुखात् निःश्वसितमित्यन्वयः २३ २४ मुक्तेत्यादि श्लोकषट्कं

नस

चूतपुंनागसुरभिर्वकुलोत्तमसंवृतः । मृष्टान्नरससंयुक्तः पानगंधधरः स्रक् २३ तस्यान
नाज्जस्य निश्वसितमहामुखात् । श्यामा विनिश्वासः पूरयन्निव तेऽकुहम् २४ मुक्तामणि
विचित्रेण कांचनेन विराजता । मुकुटेनापवृत्तेन कुंडलोज्ज्वलिताननम् २५ रक्तचंदन
दिग्धेन तथा हारेण शोभिना । पीनायतविशालेन वक्षसाभिविराजता २६ पांडुरेणा
पविद्धेन क्षौमेण क्षतजेक्षणम् । महार्हेणानुसंवीतं पीतेनोत्तमवाससा २७ मासनस्थिश्र
ती कायं निश्वसंतं भुजंगवत् । गंगोमहति तोयांते प्रसुप्तमिव कुंजरम् २८ २८ २८ २८

मेकान्वयं अपवृत्तेन निद्रावशात्पर्यस्तेन विराजता मुकुटेनोपलक्षितमिति शेषः २५ शोभिनाहारेण शोभ
नहारवता वक्षसा उपलक्षितामिति शेषः २६ अपविद्धेन पर्यस्तेन पांडुरेण क्षौमेण परिधानीयेन कट्यधःसंवीतं
पीतेनोत्तरीयेणाच संवीतमित्यर्थः २७ तोयांते तोयमध्ये २८

कांचनैः कांचनस्तंभाद्यैश्चतुर्दिशं चतुर्दिक्षु दीप्यमानं विद्युद्भिर्गौरिव विद्युत्स्वम्भैरिव २९ सहनूमानुक्तविशेषणविशि
ष्टं एवं तां ददर्श पादमूलगताः स्तस्त्रीश्च ददर्श रक्षःपतेर्गृहे स्तुत्तरान्वयि ३० अम्लानमाल्याभरणत्वादेव कन्याः

चतुर्भिः कांचनैर्दीपैर्दीप्यमानं चतुर्दिशम् प्रकाशीकृतसर्वांगं मेघं विद्युद्भिर्गौरिव २९ पादमू
लगताश्चापि ददर्श सुमहात्मनः पत्नीः स प्रियभार्यस्य तस्य रक्षःपतेर्गृहे ३० शशिप्रकाशव
दना वरकुंडलभूषणाः अम्लानमाल्याभरणा ददर्श हरियूथपः ३१ नृत्यवादित्रकुशला
राक्षसेंद्रभुजांकगाः वराभरणधारिण्यो निषण्णा ददृशे कपिः ३२ वज्रवैदूर्यगर्भाणि श्र
वणांतेषु योषिताम् ददर्श तापनीयानि कुंडलान्यंगदानि च ३३ तासां चंद्रोपमैर्वक्त्रैः शुभैर्ल
लितकुंडलैः विराजत विमानं तन्नभस्तारागणैरिव ३४ मदव्यायामखिन्नास्ता राक्षसेंद्रस्य
योषितः तेषु तेष्ववकाशेषु प्रसुप्तास्तनुमध्यमाः ३५ सर्वेषु ३१ राक्षसेंद्रस्य भुजावेकं च मच्छंतीति
या वक्षोमात्रतियावत् धारिणाफ धारिण्यः निषण्णाः शायिताः कपिर्ददृशे आत्मने पदमार्षं ३२ बाहुप्रधानत्वादं
गदानामपि श्रवणांते दर्शनं बोध्यं ३३ विराजत अराजत ३४ मदव्यायामो मदाधिक्यम ३५ ३५ ५५५

कोमलैः श्लक्ष्णकर्कशैः अंगहारैः अंगविक्षेपैः नृत्यशालिनीति विशेषणेन प्रसुप्तावस्थायामपि वासनावशेन नृत्यसन्निवेशविशिष्टाऽस्थितेति सूचयति विशेषणान्यत्र प्रबंधे बुधाः ... नारस्थानि सर्वाण्यंगानि यस्याः ३६

प्र

अंगहारैस्तथैवान्या कोमलैर्नृत्यशालिनी विन्यस्तशुभसर्वांगी प्रसुप्ता वरवर्णिनी ३६ काचिद्वीणां परिष्वज्य प्रसुप्ता संप्रकाशते महानदीप्रकीर्णेव नलिनी पोतमाश्रिता ३७ अन्या कक्षगतेनैव मड्डुकेनासितेक्षणा प्रसुप्ता भामिनी भाति बालपुत्रेव वत्सला ३८ पटहं चारुसर्वांगी न्यस्य शेते शुभस्तनी चिरस्य रमणं लब्ध्वा परिष्वज्येव कामिनी ३९ काचिद्वीणां परिष्वज्य सुप्ता कमललोचना वरं प्रियतमं गृह्य सकामेव हि कामिनी ४० विपंचीं परिगृह्यान्या नियता नृत्तशालिनी निद्रावशमनुप्राप्ता सह कांतेव भामिनी ४१

महानदीप्रकीर्णा महानद्यां प्लवमाना दैवात् संगतं पोतं प्लवमाश्रिता नलिनी पद्मिनीव काचित् सा तस्यां वीणायां वीणां परिष्वज्य प्रसुप्ता संप्रकाशते प्रशोभत इत्यर्थः प्रकीर्णेति पाठे प्रकीर्णा शुष्कपत्रेत्यर्थः ३७ मड्डुको वाद्यभेदः ३८ न्यस्य आश्लिष्येत्यर्थः ३९ ४० विपंची षट्तंत्री वीणा ४१

रा० वा० सुं० ४२ पल्लवेन मर्दलेन ४३ डिंडिमे परिगृह्यालिंग्य आसक्ता डिंडिमा वक्षदेशासेवक्षन्य डिंडिमा तरुणो रमणो वत्सं पुत्रे च परिगृ
४९ ह्यैव सुप्तैव ४४ आडंबरं वाद्यभेदः भुजसंभोगेन भुजाश्लेषेणापीडितं आश्लिष्य कृत्वा ४५ कलशीं सलिलसंभृतां आम

अन्या कनककलशं कांश्चैर्मृदु पीनैर्मनोरमैः स्पृष्टं गं परिविध्यांगैः प्रसुप्ता मत्तलोचना ४२ भुजपा
शांतरस्थेन कक्षगेन कृशोदरी पल्लवेन सहानिद्रामुपागमद्दलतन्वमाः ४३ डिंडिमं परिगृ
ह्यान्या तथैवासक्तडिंडिमा प्रसुप्ता तरुणं वत्समुपगुह्येव भामिनी ४४ काचिदाडंबरं नारी
भुजसंभोगपीडितम् कृत्वा कमलपत्राक्षी प्रसुप्ता मदमोहिता ४५ कलशीमपविध्यान्या
प्रसुप्ता भाति भामिनी वसंते पुष्पशबला मालेव परिमार्जिता ४६ पाणिभ्यां च कुचौ काचित्सु
वर्णकलशोपमौ उपगुह्याबला सुप्ता निद्राबलमुपागता ४७ अन्या कमलपत्राक्षी पू
र्णेंदुसदृशानना अन्यामालिंग्य सुश्रोणी निद्रावशमुपागता ४८ ४

पविध्य पर्यस्य स्त्र्यपर्य
स्ता कलशोदका दूरीशरीरात् वसंते परिमार्जिता ग्लानिपरिहाराय कृतजलसेका पुष्पशबला शबलपुष्पामालेव भाति
४६ ४७ ४८

रा० सुं०
४९

ग्प्रातो घानिततानद्धसषिरकांस्यनाम कानि चतुर्विध वाद्यानि तेत्रिवीराणादिकं वाद्यमानद्धं मुरजादिकं वंशादिकं
तुसषिरं कांस्यंता लादिकं घनं चतुर्विधमिदं वाद्यं वादितोघनाम कमित्यमरः ४० ग्पप्रधानमहिवीदशीनमा

ग्प्रात्तो द्यानि विचित्राणिपरिष्वज्य वरास्त्रियः निपीड्य चकुचौस्ष्टाः कामिन्यः कामुका निव
४० नास्तामेकांतविन्यस्तेशयानोशयनेशुभे दद्रशोरूपसंपन्नाम थतांसकपिः स्त्रियम् ४०
मुक्तामणिसमायुक्तै र्भूषणैः सुविभूषिताम् विभूषयंतीमिव चस्वश्रियाभवनोत्तमम् ५११

हतासामिति एकांतविन्यस्तेतासांशयनेपथग्विन्यस्तेशुभेशयनेशयानांतांवक्ष्यमाणगुणांस्त्रियंसकपिर्द ५०
दर्श ५१

सभूतान्सर्वजातीयप्राणिसहितान्सचराचरान्सभूतान्सुसंहृत्य पुनरेव तथा स्रष्टुं शक्तो रामः स्वत्र्यशमात्मा महामहायशा इति ९ महायशा

सर्वांल्लोकान्सुसंहृत्य सभूतान्सचराचरान् पुनरेव तथा स्रष्टुं शक्तो रामो महायशाः ३९ देवासुरनरेंद्रेषु यक्षरक्षोरगेषु च विद्याधरेषु नागेषु गंधर्वेषु मृगेषु च ४० सिद्धेषु किंनरेंद्रेषु पतत्रिषु च सर्वशः सर्वत्र सर्वभूतेषु सर्वकालेषु नास्ति सः यो रामं प्रतियुध्येत विष्णुतुल्यपराक्रमम् ४१ सर्वलोकेश्वरस्येह कृत्वा विप्रियमीदृशम् रामस्य राजसिंहस्य दुर्लभं तव जीवितम् ४२ देवाश्च दैत्याश्च निशाचरेंद्र गंधर्वविद्याधरनागयक्षाः रामस्य लोकत्रयनायकस्य स्थातुं न शक्ताः समरेषु सर्वे ४३

एवमेव नान्य इति स्वप्राक्रिमामात्रवैभवेन श्रीरामचंद्रस्यैव सर्वव्यापादिकर्तृत्वं सूचितेन तस्य लोकत्रयनतस्य नाममहद्य प्राप्ति श्रुतेः ३९ ४० सर्वत्र देशे ४१ ४२ उक्तमेवार्थं द्राढ्यीय पुनराह देवाश्चेति ४३

वेष्टयंतेऽत्र वेष्टयंते स्म पर्यायः ६।७ तान् अवध्यान् इति हन्तृ ८ संगतैर्मिलितै राक्षसैः स भूयो निबद्ध इति शेषः ९ १० निबद्धो वीरः तत्का

तस्य तद्वचनं श्रुत्वा राक्षसाः कोपकर्कशाः वेष्टयंते स्म लांगूलं जीर्णैः कार्पासिकैः पटैः ६ संवे
ष्ट्यमाने लांगूले व्यवर्द्धत महाकपिः शुष्कमिंधनमासाद्य वनेष्विव हुताशनः ७ तैलेन प
रिषिच्याथ तेऽग्निं तत्र प्रदीपयन् लांगूलेन प्रदीप्तेन राक्षसांस्तानताडयत् ८ रोषामर्षपरीतात्मा
बालसूर्यसमाननः सभूयः संगतैः क्रूरैः राक्षसैर्हरिपुंगवः ९ लांगूलं संप्रदीप्तं तं दृष्ट्वा तस्य महा
त्मनः सहस्त्रीबालवृद्धाश्च जग्मुः प्रीतिं निशाचराः १० निबद्धः कृतवान्वीरस्तत्कालसदृ
शीं मतिम् कामं खलु न मे शक्ता निबद्धस्यापि राक्षसाः ११ सीतारामाभ्यां नमः सीताराम

लसदृशीं मतिं कृतवान् ११ तां मतिमभिनयति काममिति कामं यथेष्टं निबद्धस्यापि मेन शक्ताः मम तिरस्कारे असमर्था इत्यर्थः ११ ११

वेगाप्लुघ्नं वेगायामुद्भ्रमनयोर्ण्य ३१ त्वरेत्वरावान्जात स्तप्र्णः ३२ विवर्धमानं समुद्रत्तरणायेति ग्रोषः ३३ ३४

सा समीक्ष्य दिशः सर्वा वेगाप्लुघ्नमुत्तमम् मुक्ताबन्धाद्द्रैमहंमणिमेतं महावल ३१ प्रति
गृह्य मणिं दिव्यां तव हेतो रघुप्रिय शिरसा संप्रणम्यैनामहमागमने त्वरे ३२ गमने च कृतो
त्साहमवेक्ष्य वरवर्णिनी विवर्धमानं मां चेदमुवाच जनकात्मजा ३३ अश्रुपूर्णमुखी दीना
बाष्पसंदिग्धभाषिणी ममोत्पतनसंभ्रान्ता शोकवेगसमाहता ३४ हनुमन्सिंहसंकाशौ।
भ्रातरौ रामलक्ष्मणौ सुग्रीवं च सहामात्यं सर्वान्ब्रूया ह्यनामयम् ३५ यथा तु स महाबाहुर्मां
तारयति राघवः अस्माद्दुःखाम्बुसंरोधात्त्वं समाधातुमर्हसि ३६ इमं च तीव्रं मम शोकवेगं रक्षो।
भिरेभिः परिभर्त्सनं च ब्रूयास्तु रामस्य गतः समीपं शिवश्च तेऽध्वास्तु हरिप्रवीर ३७ एतत्तवा
र्य नृपराजसिंह सीता वचः प्राह विषादपूर्वम् एतच्च बुद्ध्वा गदितं यथा त्वं श्रद्धत्स्व सीतां कु
शलां समग्राम् ३८ ॥ हरिः ॐ ॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये सुंदरकांडे सप्तषष्टितमः सर्गः ६७

३५ ३६ ३७ ३८ ॥ इति सप्तषष्टितमः सर्गः ६७

संमान्य

हे नरव्याघ्र तव स्नेहान्मयि सौहृदात्सुहृद्भावान्मामनुमान्य स संभ्रमो गन्तुं सत्वरोहमुत्तरं कार्यं प्रति पुनः पुनरूचुः १ प

श्रुत्वाहमुत्तरं देव्याः पुनरूचुः ससंभ्रमः । तव स्नेहान्नरव्याघ्र सौहार्दादनुमान्य वै ॥ १ ॥ ए
वं बहुविधं वाच्यो गणो दाशारथिस्त्वया । यथा मां प्राप्नुयाच्छीघ्रं हत्वा रावणमाहवे ॥ २ ॥ यदि
वा मन्यसे वीर वसैकाहमरिंदम । कस्मिंश्चित्संवृते देशे विश्रान्तः श्वो गमिष्यसि ॥ ३ ॥ मम चा
प्यल्पभाग्यायाः सान्निध्यात्तव वानर । अस्य शोकविपाकस्य मुहूर्तं स्याद्विमोक्षणम् ॥ ४ ॥ ग
ते हि त्वयि विक्रान्ते पुनरागमनाय वै । प्राणानामपि संदेहो मम स्यान्नात्र संशयः ॥ ५ ॥ तवाद
र्शनजः शोको भूयो मां परितापयेत् । दुःखाद्दुःखाभिभूतां च दुर्गतां दुःखभागिनीम् ॥ ६ ॥

यथा मां प्राप्नुयात्तथा यतस्वेति शेषः २ ३ एकदिनवासफलमाह मम चेति तव सान्निध्यादल्पभाग्याया मम अस्य शोक
विपाकस्य शोकस्य शोकरूपस्य पापफलस्य मुहूर्तं मोक्षणं स्यादित्यन्वयः ४ पुनरागमनाय गते ईक्षमाणाया मम
प्राणानामपि संदेहः स्यादिति योजना ५ ६

उत्तरकार्यविषयामुक्तिमाह अयं चेति निःसंशयः बाधकसंशयरहितः ७ संदेहमेवाह कथंचिति ८ ९ १० यद्यपि त्वमेव पर्याप्तः सकलरावणवधपूर्वमन्मोचने इति शेषः तथापि यशोबलोदयस्ते वेव यशस्यो यशोवर्धकः स्यात् ११ यदि

स पंचवीरसंदेहस्तिष्ठतीव ममाग्रतः सुमहांस्त्वत्सहायेषु हर्यृक्षेषु न संशयः ७ कथं नु खलु दुष्पारं तरिष्यंति महोदधिम् तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ ८ त्रयाणामेव भूतानां सागरस्येह लंघने शक्तिः स्याद्वैनतेयस्य वायोर्वा तव वानघ ९ तदस्मिन्कार्यनिर्योगे वीरैवं दुरतिक्रमे किं पश्यसि समाधानं ब्रूहि कार्यविदांवर १० काममस्य त्वमेवैकः कार्यस्य परिसाधने पर्याप्तः परवीरघ्न यशस्यस्ते बलोदयः ११ बलैः समग्रैर्यदि मां हत्वा रावणमाहवे विजयी स्वां पुरीं रामो नयेन्मां तद्यशस्करः १२ यथाहं तस्य वीरस्य वनादुपधिना हृता रक्षसा तद्भयादेव तथा नार्हति राघवः १३ शरैस्तु संकुलां कृत्वा लंकां परबलार्दनः मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् १४

तु रामो रावणं हत्वा मां नयेत्तदा तन्नयनं तस्य यशस्करं स्यात् स्वतस्तेनैव रामस्य मोचनं युक्तमिति भावः उपधिना छलेन १३ १४

यथा तस्यानुरूपं विक्रांतं भवति तत्तथा त्वमेवोपपादय १५ प्रोयं प्रियं १६ १७ १८ १९ १२० २१ २२ मन्युर्दैन्यं २३ २४ २५

तद्यथा तस्य विक्रांतमनुरूपं महात्मनः भवत्याह्वयग्रूरस्य तत्त्वमेवोपपादय १५ तदर्थोप
हितं वाक्यं प्रश्रितं हेतुसंहितम् निशम्याहं ततः शेषं वाक्यमुत्तरमब्रुवम् १६ देवि हर्यृ
क्षसैन्यानामीश्वरः प्लवतां वरः सुग्रीवः सत्वसंपन्नस्तवार्थे कृतनिश्चयः १७ तस्य विक्रमसं
पन्नाः सत्ववंतो महाबलाः मनःसंकल्पसंपाता निदेशे हरयः स्थिताः १८ येषां नोपरि ना
धस्तान्न तिर्यक्सज्जते गतिः न च कर्मसु सीदंति महत्स्वमिततेजसः १९ असकृत्तैर्महाभागैः
ससागरधराधरा प्रदक्षिणीकृता भूमिर्वायुमार्गानुसारिभिः २० मद्विशिष्टाश्च तुल्याश्च
संति तत्र वनौकसः मत्तः प्रत्यवरः कश्चिन्नास्ति सुग्रीवसन्निधौ २१ अहं तावदिह प्राप्तः किं पुन
स्ते महाबलाः नहि प्रकृष्टाः प्रेष्यंतैर्हीतरे जनाः २२ तदलं परितापेन देवि मन्युर्व्यपैतु ते एको

प्रेष्यंते

त्पातेन वै लंकामेष्यंति हरियूथपाः २३ मम पृष्ठगतौ तौ च चंद्रसूर्याविवोदितौ त्वत्समी
पं महाभागौ नृसिंहावागमिष्यतः २४ अरिघ्नं सिंहसंकाशं क्षिप्रं द्रक्ष्यसि राघवम् लक्ष्मणं च ध
नुष्मंतं लंकाद्वारमुपागतम् २५

रा० वा० सुं०
२३०

२६ २७ २८ तवापि शोकेन नैवं दंष्ट्रान्नमश्राकानित्यादिमदुक्त्या श्रुतेन लक्ष्मीकेन तत्पात्वद्धिरह शोकेन च मम पुरस्तादतिपीडि
तामैथिलात्मजा अदीनभाषिणा मया शिवाभिरिष्टाभिर्वाग्भिरभिप्रसादिता शान्तिं दुःखनिवृत्तिं जगाम २९ इति श्रीमज्जा
नकीरमणपदपंकजपरिचरणपरायणशिवलालपाठकपादानुयायि हृद्देवरामसेवकहितेति श्रीमद्रामायणशिरोविभूषणव्या

नखदंष्ट्रायुधान्वीरान्सिंहशार्दूलविक्रमान् वानरान्वारणेन्द्राभान्क्षिप्रं द्रक्ष्यसि संगतान्
२६ शैलाम्बुदनिकाशानां लंकामलयसानुषु नर्दतां कपिमुख्यानां नचिरात्श्रोष्यसे स्वनम्
२७ निवृत्तवनवासं च त्वया सार्द्धमरिंदमम् अभिषिक्तमयोध्यायां क्षिप्रं द्रक्ष्यसि राघवम् २८
ततो मया वाग्भिरदीनभाषिणा शिवाभिरिष्टाभिरभिप्रसादिता जगाम शान्तिं मम मैथिलात्म
जा तवापि शोकेन तथातिपीडिता ॥२९॥हरिः ॐ॥ इत्यार्षे श्रीमद्रामायणे आदिकाव्ये श्रीम
द्वाल्मीकीये चतुर्विंशतिसहस्रसंहितायां श्रीमत्सुंदरकांडे अभिज्ञानप्रत्यर्पणं समापितमपि(?) श्रोत्राभिरामा
स्तात्म्येवचनेनामाष्टषष्टितमः सर्गः ॥६८॥

ख्याने सुंदरकांडे समाप्तिमगमत् कौशलेशकालेहतकलाकु
तुकः कोसलेन्द्रस्य कार्यं कुर्वन्कंकेलिकेलिक्रमकदनकरः कूजयन्कंबुकंठीं कल्याणं कीर्तिकर्त्ता कपिकुलकुशलैः
कीर्तनीयः करोतु क्रव्यादानां कलापे कलितकलकलः कोपि कोपी कपीन्द्रः १ श्रीसीतारामारव्यचरणकमलाभ्यां नमः

रा० सं०
२३०

४०

वे. १५ ग्रं.सं. ६५

श्रीसुंदरकां डअंतकोपत्रा



तदेवं समर्थश्चेत्तर्हि किं स्वेति तर्हि कुतो न हन्येतानत आह यदीति भर्तू रामस्य हितनिमित्तं चरंतं मां भर्तृराघवस्य शासनाद् यदि एते मां निब
ध्नंति निबध्नंतु केवलं न तु मे निष्कृतिः कृता मया कृतस्य बंधनमात्रं प्रतिकृत्यानं भवतीत्यर्थः यदि वधरूपां प्रतिकृतिं चिकीर्षेयुस्त
दा सर्वानहं निहन्यामेवेत्याह सर्वेषामिति १२ १३ यदि पर्याप्तस्तर्हि किं पतौ शत्रुवधस्तत्राह किंत्विति रामस्य प्रीत्यर्थं ईदृशमव

छित्वा पाशान्समुत्पत्य हन्यामहमिमान्पुनः यदि भर्तुर्हितार्थाय चरंतं भर्तृशासनात् १२ ब
ध्नंत्येते दुरात्मानो न तु मे निष्कृतिः कृता सर्वेषामेव पर्याप्तो राक्षसानामहं युधि १३ किंतु
रामस्य प्रीत्यर्थं विषहिष्येऽहमीदृशम् लंका चारयितव्या मे पुनरेव भवेदिति १४ रात्रौ न हि सु
ता: दृष्टा मे दुर्गकर्मविधानतः अवश्यमेव द्रष्टव्या मया लंका निशाक्षये १५ कामं बध्नंतु मे भूयः
पुच्छस्योद्दीपनेन च पीडां कुर्वंतु रक्षांसि न मेऽस्ति मनसः श्रमः १६ ॥

मानं विषहिष्ये सर्वराक्षससंहारस्य रामेण प्रतिज्ञातत्वादिति भावः फलितार्थमपि सोढव्यमेवेत्याह लंकेति एतैरेव राक्षसैर्याप
नरेव सकललंकाचारयितव्या चारसौष्ठवदर्शयितव्या अतो विषहिष्ये १४ ननु दृष्टप्रायाः किं पुनर्दर्शनेनेत्यत्राह रात्राविति
दुर्गकर्मविधानाद्धेतोः दुर्गं प्राकार इति प्राचः रात्रौ लंका न हि सुदृष्टा अतो निशाक्षये मया लंकावश्यमेव द्रष्टव्या १५
उपसंहरति काममिति न मनसः श्रमः मनः खेदो न मेऽस्तीति चिंतयामासेत्यन्वयः १६

संवृताकारं गूढस्वभावं १७ स्वकर्मभिः राजद्रोहितोद्घोषैः एवं दंड्यते एवमादिभिर्घोषयंतः १८ चारयामास स्वाचीराणि च चराणि न ददर्शेत्यर्थः १९ चत्वरान् गृहवहिरंगणानि २० गृहैः संबाधाः निविडा रथ्याः शृंगाटकानि चतुःपथान् उपरथ्याः स्व

ततस्तं संवृताकारं सत्ववंतं महाकपिम् परिगृह्य ययुर्हृष्टा राक्षसाः कपिकुंजरम् १७
शंखभेरीनिनादैश्च घोषयंतः स्वकर्मभिः राक्षसाः क्रूरकर्माणश्चारयंति स्म तां पुरीम् १८
अन्वीयमानो रक्षोभिर्ययौ सुखमरिंदमः हनूमांश्चारयामास राक्षसानां महापुरीम् १९
अथापश्यद्विमानानि विचित्राणि महाकपिः संवृतान् भूमिभागांश्च सुविभक्तांश्च चत्वरान्
२० रथ्याश्च गृहसंबाधाः कपिः शृंगाटकानि च तथा रथ्योपरथ्याश्च तथैव च गृहांतरान्
२१ चत्वरेषु चतुष्केषु राजमार्गे तथैव च घोषयंति कपिं सर्वे चारीक इति राक्षसाः २२

ल्पवीथ्यः गृहांतरान् गृहद्वयमध्यभागान् २१ चत्वरेषु चतसृणां रथ्यानां संभेदेषु चतुष्केषु चतुस्तंभमंडपेषु चार
एव चारीकः चारशब्दात्स्वार्थे ईकप्रत्ययः २२

रा० वा० सुं०
१८४

तस्य हनूमतो लांगूलाग्रे दीप्यमाने तदप्रियं देव्याः शंसुः शशंसुः २३ परिणीयते परितो नीयते २४ आत्मापहरणोपमं तादृक्

दीप्यमानेन ततस्य लांगूलेन तु हनूमतः राक्षस्यस्ता विरूपाक्ष्यः शंसुर्देव्यास्तदप्रियम् २३ य
स्त्वया कृतसंवादः सीते ताम्रमुखः कपिः लांगूलेन प्रदीप्तेन स एष परिणीयते २४ श्रुत्वा
तद्वचनं क्रूरमात्मापहरणोपमम् वैदेही शोकसंतप्ता हुताशनमुपागमत् २५ मंगलाभि
मुखी तस्य सा तदासीन्महाकपेः उपतस्थे विशालाक्षी प्रयता हव्यवाहनम् २६ यद्यस्ति
पतिशुश्रूषा यद्यस्ति चरितं तपः यदि वा त्वेकपत्नीत्वं शीतो भव हनूमतः २७ यदि किंचि
दनुक्रोशस्तस्य मय्यस्ति धीमतः यदि वा भाग्यशेषं मे शीतो भव हनूमतः २८ यदि मां वृत्तसं
पन्नां तत्समागमलालसाम् स विजानाति धर्मात्मा शीतो भव हनूमतः २९ यदि मां
तारयेदार्यः सुग्रीवः सत्यसंगरः अस्माद्दुःखाम्बुसंरोधाच्छीतो भव हनूमतः ३० ३०

एस०
१८४

दुःखजनकं हुताशनमुपागमत् ध्यानेन उपासितवती २५ प्रयता शुद्धिमती पवित्रः प्रयत पूतसंयमरः २६ एकपत्नीत्वं पातिव्रत्यं २७ २८
२९ ३०

ततः सीतोपासनानन्तरं मृगशावाक्ष्याः सीतायाः महिम्नेति शेषः तीक्ष्णार्चिरव्यग्रोऽनलः पुच्छानलः प्रदक्षिणशिखः प्रदक्षिणाकारज्वालः सन् कपेः शिवं शंसन्निव जज्वालेति संबन्धः ३१ किं च हनूमज्जनको निलो वायुः पुच्छानलयुतोऽपि देव्याः संमुखे स्वास्थ्यकरः कपेः स्वास्थ्यसूचकः सन् प्रालेयानिलशीतलः हिममारुतवच्छीतलो ववौ ३२ सर्वतः

ततस्तीक्ष्णार्चिरव्यग्रः प्रदक्षिणशिखोऽनलः जज्वाल मृगशावाक्ष्याः शंसन्निव शिवं कपेः ३१ हनुमज्जनकश्चापि पुच्छानलसमन्वितः ववौ स्वास्थ्यकरो देव्याः प्रालेयानिलशीतलः ३२ दह्यमाने च लाङ्गूले चिन्तयामास वानरः प्रदीप्तोऽग्निरयं कस्मान्न मां दहति सर्वतः ३३ दृश्यते च महाज्वालः करोति च न मे रुजम् शिशिरस्येव संपातो लाङ्गूलाग्रे प्रतिष्ठितः ३४ अथवा तदिदं व्यक्तं यद्दृष्टं प्लवता मया रामप्रभावादाश्चर्यं पर्वतः

प्रदीप्तोऽग्निरित्यन्वयः ३३ मे रुजं न करोति शिशिरस्य संपातः वहिमसंघातः वर्तते अत्र हेतुं न पश्यामीति शेषः ३४ तत्रोपपत्तिं चिन्तयति अथवेति यद्यस्मात् प्लवता मया सरितां पतौ समुद्रे पर्वतः रूपमाश्चर्यं दृष्टं ततो रामप्रभावादेव दहनः शीतलमपि संजातं व्यक्तं निश्चितमित्यर्थः ३५

रा० वा० सुं०
१८५

एतदेवोपपादयद्दीति तावदिति तावदितिवाक्यालंकारे समुद्रस्यमैनाकस्यच राम.... तादृक्संभ्रमोपदिशमकार्यस्यादरपूर्विकात्वा यदि तदाग्निः किमितिनकरिष्यतिश्लो० त्वमितिश्लो० ३६ प्रानृशंस्येनाप्राश्रितजनदयया ३७ भूयः संचिंतयामास अनेनेतर किंयमितिश्लो० मह्यंमयिपराक्रमेसतिग्रस्यवंधनस्यप्रतिक्रियालं कादाह रूपाशुक्तास्यात् ३८ ततस्तान्परितताभ्यां श्चित्त्वा उ

स

यदितावत्समुद्रस्यमैनाकस्यचधीमतः रामार्थेसंभ्रमस्तादृक् किमग्निर्नकरिष्यति ३६ सीतायाश्चानृशंस्येनतेजसाराघवस्यच पितुश्चममसख्येननमांदहतिपावकः ३७ भूयः संचिंतयामासमुहूर्तंकपिकुंजरः कथमस्मद्विधस्येहवंधनंराक्षसाधमैः प्रतिक्रियास्ययुक्तास्यात्सतिमह्यंपराक्रमे ३८ ततश्छित्त्वाचतान् पाशान्वेगवान्वैमहाकपिः उत्पपाताथवेगेननंनादचमहाकपिः पुरद्वारंततः श्रीमान् शैलशृंगमिवोन्नतम् विभक्तरक्षःसंबाधमाससादानिलात्मजः ४० सभूत्वाशैलसंकाशः क्षणेनपुनरात्मवान् ह्रस्वतांपरमांप्राप्तोवंधना

त्पपातउच्छ्रितनावंधतेनचसहैवेतिश्लो० ३९ विभक्तरक्षःसंबाधंरक्षःसंचाररहितंपरस्परमाससाद ४० शैलसंकाश्रोम हान्भूत्वाह्रस्वतांप्राप्तः स्वल्पं... देहसौक्ष्म्यात्स्वयमेववंधनानिमुक्तं एवंविस्तावंधनान्यवशातयत्दूरीकृतवान् ४११११

यम०
१८५

विमुक्त्वानंतरं पुनः पर्वताकारोऽभवत् परितो वीक्षमाणोम्बरतोरणाश्रितेपरि घंटद्गृश्रो ४२।४३ प्रदीप्तलांगूलकृतार्चिमालीव प्रदीप्तलां
गूलेन कृता ज्वालामाला ःयस्य अर्चिमाली तेजःपुंजवान् आदित्य इव प्रकाशतेत्यन्वयः दंडमध्यवारेफाभावः कांदसः ४४ इतित्रि

विमुक्तभ्रामवच्छ्रीमान्पुनःपर्वतसंनिभः वीक्षमाणोम्बरदृश्योपरि घंतोरणाश्रितम् ४२
सतंगृह्यमहाबाहुः कालायसपरिष्कृतम् रक्षिणस्तान्पुनः सर्वान्सूदयामास मारुतिः ४३
सतान्निहत्वा रणचंडविक्रमः समीक्षमाणः पुनरेव लंकाम् प्रदीप्तलांगूलकृतार्चिमाली प्र
काशतादित्य इवार्चिमाली ॥४४॥ हरिः ॐ इत्यार्षे रामायणे वाल्मीकीये सुंदरकांडे त्रिपंचा
शः सर्गः ॥५३॥ वीक्षमाणस्ततो लंकां कपिः कृतमनोरथः वर्धमानसमुत्साहः कार्यशेषमचिं
तयत् १ किंनु खल्ववशिष्टं मे कर्तव्यमिह सांप्रतम् यदेषां रक्षसां भूयः संतापजननं भ
वेत् २ वनं तावत्प्रमथितं [illegible] प्रकृष्टा राक्षसा हताः बलैकदेशः क्षपितः शेषं दुर्गविना

पंचाशः सर्गः ॥५३॥ कृतमनोरथः पर्याप्तमनोरथः १ यदेषां भूयः संतापजननं भवेत् तादृशमवशिष्टं सांप्रतं कर्तव्यं किमिति कार्य
शेषमचिंतयदित्यर्थः २ तद्वनमित्यत्र वनमिति बलैकदेशः सैनैकदेशः क्षपितो नाशितः दुर्गविनाशनं पुरविनाशनं शेष
मवशिष्टमित्यर्थः ३

सुंदर ३

दुर्गविनाशिते कर्मसमुद्रलंघनादिकं सुखपरिश्रमं सफलश्रमं भवेत् उक्तमेव विवृणोति अल्पेति अस्मिन् सीतान्वेषणाप्रवृत्तिरूपे कार्ये योमयाद्भुतः श्रमः स त्वल्पेन यत्नेन स्वल्पयत्नसाध्येन करिष्यमाणलंकादाहेन सफलो भविष्यति ४ तदेवाह य इति न्याय्यं स्व

दुर्गे विनाशिते कर्म भवेत्सुखपरिश्रमम् अल्पयत्नेन कार्येऽस्मिन्मम स्यात्सफलः श्रमः ४ यो ह्ययं मम लांगूले दीप्यते हव्यवाहनः अस्य संतर्पणं न्याय्यं कर्तुमेभिर्गृहोत्तमैः ५ ततः प्रदीप्तलांगूलः सविद्युदिव तोयदः भवनाग्रेषु लंकाया विचचार महाकपिः ६ गृहाद्गृहं राक्षसानामुद्यानानि च वानरः वीक्षमाणो ह्यसंत्रस्तः प्रासादांश्च चचार सः ७ अवप्लुत्य महावेगः प्रहस्तस्य निवेशनम् अग्निं तत्र विनिक्षिप्य श्वसनेन समो बली ८ ततोऽन्यत्पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान् मुमोच हनुमानग्निं कालानलशिखोपमम् ९ वज्रदंष्ट्रस्य च तदा पुप्लुवे स महाकपिः शुकस्य च महातेजाः सारणस्य च धीमतः १० १० १० १० १०

स्य पीडायाः प्रकाशनादिति भावः ५ तोयदः संध्याभ्रतोयदः हनूमतोऽरक्तवर्णत्वात् ६-७ उद्यानानि गृहारामाः ७ प्रहस्तस्य प्रधानमं त्रित्वादादौ तद्गृहे अग्निप्रक्षेपः ८-९-१०

लान

११ १२ १३ भवनं ददाहेत्यनुकर्षः १४ १५ विभीषणोत्तमस्य स्वस्य वधं तोरक्षणादि भीषणगृहं वर्जयित्वा प्रतिगृहं क्रममाणो ददर्श सम्बन्धः

तथाचैंद्रजितो वेश्म ददाह हरियूथपः जंबुमालेः सुमालेश्च ददाह भवनं ततः रश्मिकेतोश्च भवनं सूर्यशत्रोस्तथैव च ह्रस्वकर्णस्य दंष्ट्रस्य रोमशस्य च रक्षसः १२ युद्धोन्मत्तस्य मत्तस्य ध्वजग्रीवस्य रक्षसः विद्युज्जिह्वस्य घोरस्य तथा हस्तिमुखस्य च १३ करालस्य विशालस्य शोणिताक्षस्य चैव हि कुंभकर्णस्य भवनं मकराक्षस्य चैव हि १४ नरान्तकस्य कुंभस्य निकुंभस्य महात्मनः यज्ञशत्रोश्च भवनं ब्रह्मशत्रोस्तथैव च १५ वर्जयित्वा महातेजा विभीषणगृहं शुभं ति क्रममाणः क्रमेणैव ददाह हरिपुंगवः १६ तेषु तेषु महार्हेषु भवनेषु महायशाः गृहेष्वृद्धिमतामृद्धिं ददाह स महाकपिः १७ सर्वेषां समतिक्रम्य राक्षसेन्द्रस्य वीर्यवान् आससादाथ लक्ष्मीवान् रावणस्य निवेशनम् १८ ततस्तस्मिन् गृहे मुख्ये नानारत्नविभूषिते मेरुमन्दरसंकाशे नानामंगलशोभिते १९ प्रदीप्तमग्निमुत्सृज्य लांगूलाग्रे प्रतिष्ठितम् ददाह हनुमान्वीरो युगान्तज्वलनोपमः २० १६ १७ १८ १९ २०

टी० वा० सुं०
१८०

श्वसनसंयोगादित्यादिपूर्वार्धस्य गाढ़तिभीतावन्यानि नौह दानीं सीतातेजःसंबन्धेन तन्नि श्वासमिश्रितवायुसंयोगेन चलितः प्रोकाव भू-
तां सीताया स्तेजसा दग्धामितिहनुमदुक्तिरिति भावः २१ २२ भग्नविमानानि भग्नप्रासादानि १३ भग्नोत्साहा श्वेते

ततः श्वसनसंयोगादतिवेगो महाबलः कालाग्निरिव जज्वाल प्रावर्धत हुताशनः २१ तानि कांच
नजालानि मुक्तामणिमयानि च भवनान्यवशीर्यंत रत्नवंति महांति च २२ तानि भग्नविमानानि
निपेतुर्वसुधातलम भवनानि च सिद्धानामंबरात्पुण्यसंक्षये २३ संजज्ञे तुमुलः शब्दो राक्षसानां प्रधा
वताम् स्वगृहस्य परित्राणे भग्नोत्साहोज्झितश्रियाम २४ नूनमेषोग्निरायातः कपिरूपेण हा इति क्रं
दंत्यः सहसा पेतुः स्तनंधयधराः स्त्रियः २५ काश्चिदग्निपरीतेभ्यो हर्म्येभ्यो मुक्तमूर्धजाः पतंत्योरे
जिरेऽभ्रेभ्यः सौदामिन्य इवांबरात् २६ वज्रविद्रुमवैदूर्यमुक्तारजतसंहितान् विचित्रान्भवनाद्धा
तून् स्यंदमानान्ददर्श सः २७ नाग्निस्तृप्यति काष्ठानां तृणानां च यथा तथा हनूमान्राक्षसेंद्राणां

ज०

उज्झितश्रियः श्वेतयर्थः २४ पेतुरग्नाविति प्रोषः स्तनंधयः शिशुः २५ अभ्रेभ्यो मेघेभ्यः २६ स्रुतिसंबद्धान्स्वनाद्धेमरजतादिधातून्
स्यंदमानान्ददर्श २७ यथाग्निस्तृणानां काष्ठानां तृप्तिः काष्ठैरित्यर्थः अतृप्तिर्भवति तथा राक्षसवधे क्रियमाणे हनूमान् १८७
किंचिदपि न तृप्यति २८

रामद्रुहं त्रातुं न कोपि समर्थ इत्याह ब्रह्मेत्यादि स्वयंभूरित्यादि विशेषणानि तत्तत्सामर्थ्यविशेषद्योतनार्थं शक्रर्षीतु रोधाद्युक्तमेरा व्याख्यायते इंद्रः परमैश्वर्यवान् त्रैलोक्याधिपतिरपि महान्वाप्ययमहम् द्योतनमवधीदिति तन्महेंद्रस्महेंद्रत्वमिति शु नेर्वृत्रहापि सुरनायकोपि स्वतुल्यत्रयस्त्रिंशत्कोटिगणसहायोपि न पालयितुं रामवध्यं वध्यमर्हतीति वध्यः रामस्य वध्यो

ब्रह्मास्वयंभूश्चतुराननो वा रुद्रस्त्रिनेत्रस्त्रिपुरांतको वा॥ इंद्रो महेंद्रः सुरनायको वा त्रातुं न शक्ता युधि रामवध्यम्॥४४॥ ससौष्ठवोपेतमदीनवादिनः कपेर्निशम्याप्रतिमोऽप्रियं वचः दशाननः कोपविवृत्तलोचनः समादिशत्तस्य वधं महाकपेः॥ ४५॥ हरिःॐ इत्यार्षे श्रीरामायणे वाल्मीकीये सुंदरकांडे एकपंचाशः सर्गः॥५१॥

रामवध्यस्तं युधि त्रातुं न शक्ताः संहारकाले प्रजाः संहरन् रोदयतीति रुद्रः त्रिनेत्रः निटिलनयनदहनज्वालोज्जितमदनोपि त्रिपुरांतको वा प्रबलतरमहासुरकोपहेतुश्च रोवानरशक्तः वं हंतीति ब्रह्मा हिरण्यगर्भः सर्वविदिः स्वयमेव स्वतंत्रो भवति न परतंत्र इति स्वयंभूरपि चतुराननो वा युगपदेव सर्ववेदोच्चारणसंपादितातिशयोपि न शक्तः सर्वे संभूयापि न शक्ता इति बहुवचनार्थः ४४ ४५ इत्येकपंचाशः सर्गः ५१ सीतारामाभ्यां नमः

हनूमद्विशस्तानां राक्षसानां शयनाय लंकाभूमिर्न पर्याप्ताभूदिति शेषः २९ ३० लंकापुरपर्वताग्रे लंकापुराधारत्रिकूटाच
लशिखरे चूडावलयं ज्वालासमूहं प्रसार्य समुत्थितोग्निः विरेजे इति शेषः भीमपराक्रमः भयंकरवेगः ३१ दिविस्पृक् गगन
विटहत्पुम्यामित्यलुक् विधूमरश्मिर्विधूमज्वालः रक्षःशरीररूपाज्येन समर्पिता संपादिताऽर्चिर्ज्वाला यस्य सः ३२

न हनूमद्विशस्तानां राक्षसानां वसुंधरा २९ हनूमता वेगवता वानरेण महात्मना लंकापुरं
प्रदग्धं तद्रुद्रेण त्रिपुरं यथा ३० ततस्तु लंकापुरपर्वताग्रे समुत्थितो भीमपराक्रमोऽग्निः प्र
सार्य चूडावलयं प्रदीप्तो हनूमता वेगवता विसृष्टः ३१ युगान्तकालानलतुल्यरूपः समारुतो

पु:

ऽग्निर्ववृधे दिविस्पृक् विधूमरश्मिर्भवने षु सक्तो रक्षःशरीराज्य समर्पितार्चिः ३२ आ
दित्यकोटीसदृशः [illegible] सुतेजा लंकां समस्तां परिवार्य तिष्ठन् शब्दैरनेकैरशनि
प्ररूढैर्भिन्दन्निवाण्डं प्रबभौ महाग्निः ३३ आदित्येत्यादि श्लोकद्वयमेकं वाक्यं अंबरात् अंबरपर्यंत
मतिवृद्धः रुक्मप्रभः कूरकोतिः किंशुकपुष्पचूडः तत्समज्वालः अग्निः हनुमद्विसृष्टोऽग्निः अशनिप्ररूढैः अशनि
वत्प्रगल्भैरनेकैः शब्दैः समस्तां लंकां परिवार्य परिवेष्ट्य तिष्ठन् ब्रह्माण्डं भिन्दन् महाग्निः प्रलयाग्निरिव बभौ ३३

तत्र तदा निर्वाणधूमाकुलराजयः पूर्वं दग्धभवनाग्निनिर्वाणसमयोत्थितधूमैर्व्याप्तपंक्तयः अभ्राः नीलोत्पलाभाः प्रचकाशिरे इति संबन्धः अभ्रा इति पुल्लिंगत्वमार्षं ३४ वज्रीत्यत्र त्रिदशेश्वरत्वविशिष्टो महेन्द्र इत्यर्थः ३५ रक्षोपसंहारेत्यत्र सलोपश्छार्षः प्रकोपः प्रकोपवत्कृतमूर्तिः ३६ अनन्तेति त्रिविधपरिच्छेदरहितं अव्यक्तं चक्षुराद्यगोचरं अचिन्त्यं मनसोऽविष

तत्रावनादग्निरतिप्रवृद्धो रक्षोभः किंशुकपुष्पचूडः । निर्वाणधूमाकुलराजयश्च नीलोत्पलाभाः प्रचकाशिरेभ्राः ३४ वज्री महेन्द्रस्त्रिदशेश्वरो वा साक्षाद्यमो वा वरुणोऽनिलो वा रुद्रोऽग्निरर्को धनदश्च सोमो न वानरोऽयं स्वयमेव कालः ३५ किं ब्रह्मणः सर्वपितामहस्य लोकस्य धातुश्चतुराननस्य इहागतो वानररूपधारी रक्षोपसंहारकरः प्रकोपः ३६ किं वैष्णवं वा कपिरूपमेत्य रक्षोविनाशाय परं सुतेजः अचिन्त्यमव्यक्तमनन्तमेकं स्वमायया साम्प्रतमागातं वा ३७ इत्येवमूचुर्बहवो विशिष्टा रक्षोगणास्तत्र समेत्य सर्वे सप्राणिसंघां सगृहां सवृक्षां दग्धां पुरीं तां सहसा समीक्ष्य ३८

एकमद्वितीयं वैष्णवं सुतेजः स्वमायया साम्प्रतं कपिरूपमेत्य रक्षोविनाशाय संप्राप्तमागतं किं वेति योजना ३७ विशिष्टा महाबलाः प्रहस्तादयः समीक्ष्य इत्येवमूचुरित्यन्वयः ३८ सीतारामायनमः

३९ हा इत्यादावार्त्ते शोके च हा शब्दो वर्त्तते सुपुण्यं प्रतिशापितमार्जितं त्वयं ४० परिवृत्तयोधा यस्य वृतमरा ४१ स्वयंभुकोपोप

ततस्तु लंकां सहसा प्रदग्धां सराक्षसां साश्वरथां सनागां सपक्षिसंघां समृगां सवृक्षां रुरोद दीना तुमुलं सशब्दम् ३९ हा तात हा पुत्रक कान्त मित्र हा जीवितं भोगयुतं सुपुण्यम् रक्षोभिरेवं बहुधा ब्रुवद्भिः शब्दः कृतो घोरतरः सुभीमः ४० हुताशनज्वालसमावृता सा हतप्रवीरा परिवृत्तयोधा हनूमतः क्रोधबलाभिभूता बभूव शापोपहतेव लंका ४१ ससंभ्रमत्रस्त विषण्णराक्षसां समुज्ज्वलज्ज्वालहुताशनाङ्किताम् ददर्श लंकां हनुमान्महामनाः स्वयंभुकोपोपहतामिवावनिम् ४२ भंक्त्वा वनं पादपरत्नसंकुलं हत्वा तु रक्षांसि महान्ति संयुगे दग्ध्वा पुरीं तां गृहरत्नमालिनीं तस्थौ हनूमान्पवनात्मजः कपिः ४३ स राक्षसांस्तांस्तु बहूंश्च हत्वा वनं च भंक्त्वा बहुपादपं तत् विसृज्य रक्षोभवनेषु चाग्निं जगाम रामं मनसा महात्मा ४४ सी

हताः प्रत्येभगावत्वाद्दग्धाभिस्पर्धीः ४२ रत्नशब्दः श्रेष्ठवाची तस्थौ सेकल्पितकार्यस्य परिसमाप्तत्वादुपरतो घोगोभूदित्यर्थः ४३ जगाम रामं मनसेति हृतरूपत्वाद्रामं गन्तुमिच्छेदित्यर्थः ४४

वरिष्ठमिति वलवतामिति शेषः ४५ प्रणमिसम्यग्विरणामतुल्यरूपामिति ४६ इति चतुःपंचाशः सर्गः ५४ १ २ लांगूलेनाग्निं

ततस्तु ते वानरवीरमुख्यं महाबलं मारुततुल्यवेगम् महामतिं वायुसुतं वरिष्ठं प्रतुष्टुवुर्देवगणाश्च सर्वे ४५ देवाश्च सर्वे मुनिपुंगवाश्च गंधर्वविद्याधरकिंनराश्च भूतानि सर्वाणि महांति तत्र जग्मुः परां प्रीतिमतुल्यरूपाम् ॥४६॥ हरिः ॐ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये सुंदरकांडे चतुःपंचाशः सर्गः ॥५४॥ संत्रास्य वनं महातेजा हत्वा रक्षांसि संयुगे दग्ध्वा लंकापुरीं सर्वां रराज स महाकपिः १ तं दृष्ट्वा वानरश्रेष्ठं हनूमंतं महाकपिम् कालाग्निमिव संवित्रस्त सर्वभूतानि तत्र तु २ लंकां समस्तां संदीप्य लांगूलाग्निं महाबलः निर्वापयामास तदा समुद्रे हरिपुंगवः ३ ततो देवाः सगंधर्वाः सिद्धाश्च परमर्षयः दृष्ट्वा लंकां प्रदग्धां तां विस्मयं परमं गताः ४ संदीप्यमानां विध्वस्तां त्रस्तरक्षोगणां पुरीम् अवेक्ष्य हनुमांल्लंकां चिंतयामास वानरः ५ तस्याभूत्सुमहांस्त्रासः कुत्सा चात्मन्यजायत लंकां प्रदहता कर्म किंस्वित्कृतमिदं मया ६ ६ ६

समुद्रे निर्वापयामास शामयामास ३ ४ ५ कुत्सा चात्मन्यजायतेत्युक्तां उत्साह लंकामिति किंस्वित्कर्म कृतं कुत्सितमेव कृतमित्यर्थः ६

उक्तं कुत्सितं कार्यमूलं कोपं दुःखितो निन्दति तद्वति तान्स्तौति धन्या इति दुःखातिशयादेव महात्मपदं यो नरः क्रुध्येन दोषाय: ७ ८ नविजानाती
त्येतद्वस्य घटितानाकार्यमिति क्रुद्धस्याकार्यमप्रकृतबुद्ध्यास्य करणीयं न किंचिदप्यस्ति अतो गुरुहननाद्यपि करोतीत्यर्थः ९ १०

धन्याः खलु महात्मानो ये बुध्या कोपमुत्थितम् निरुंधंति महात्मानो दीप्तमग्निमिवांभसा ७ क्रु
द्धः पापं न कुर्यात्कः क्रुद्धो हन्याद्गुरूनपि क्रुद्धः परुषया वाचा नरः साधूनधिक्षिपेत् ८ वाच्यावा
च्यं प्रकुपितो न विजानाति कर्हिचित् नाकार्यमस्ति क्रुद्धस्य नावाच्यं विद्यते क्वचित् ९ यः समुत्प
तितं क्रोधं क्षमयैव निरस्यति यथोरगस्त्वचं जीर्णां स वै पुरुष उच्यते १० धिगस्तु मां सुदुर्बुद्धिं
निर्लज्जं पापकृत्तमम् अचिंतयित्वा तां सीतामग्निदं स्वामिघातकम् ११ यदि दग्धात्वियं लंका
नूनमार्यापि जानकी दग्धा तेन मया भर्तुर्हतं कार्यमजानता १२

११ धिगस्तु मामित्यनेनोक्तं स्वधिक्कारमाह यदीति इयं लंका सर्वापि नूनं दग्धैव यदि जानक्या अप्यत्र स्याद्दग्धा स्यात्तदा तेन प्रज्ञा
नता मया भर्तुः कार्यं हतं भवेत् १२

११० वा० सुं०
१९०

एतदेव विवृणोति यद्दर्पमिति १३ इदं कार्यमिति कारणमाह रूपं दर्पात्कार्यमिव स्वप्रपाप्रसाध्यकार्यमिव कृतमनुष्ठितमासीत्तत्रतत्रे
प्रायः भर्तुः कार्यं तु मया सर्वथा नोद्यातमेव स्याहतमेवेति क्रोधाभिभूतेन मयासीता न परिरक्षिता कृतस्य सीतादर्शनरूपस्य

यद्दर्पमयमारंभस्तत्कार्यमवसादितम्‌ मयाहि दहताले कान सीता परिरक्षिता १३ स्वकार्यमिदं कार्यं कृतमासीन्नतं प्रायः तस्य क्रोधाभिभूतेन मयामूलच्छेदः कृतः १४ विनष्टा जानकी व्यक्तं न ह्यदग्धः प्रदृश्यते लंकायां कश्चिदुद्देशः सर्वा भस्मीकृता पुरी १५ यदि तद्विहतं कार्यं मम प्रज्ञाविपर्ययात्‌ इहैव प्राणसंन्यासो ममापि ह्यद्य रोचते १६ किमग्नौ निपताम्यद्य आहोस्विद्वडवामुखे शरीरमाहोस्वित्‌ सत्त्वानां दद्मि सागरवासिनाम्‌ १७ कथं हि जीवता शक्यो मया द्रष्टुं हरीश्वरः तौ वा पुरुषशार्दूलौ कार्यसर्वस्वघातिना १८ मया खलु तदेवेदं रोषदोषात्प्रदर्शितम्‌ प्रथितं त्रिषु लोकेषु कपित्वमनवस्थितम्‌ १९ सीता एमाभ्यामः

कार्यमूलच्छेदः कृतः १४ ननु सीता विना प्राणिष्यति कथमेतत्राह विनष्टेति १५ विहतं सीता विनाशादिनाशितं १६ व
डवामुखे वा निपतामि दद्मि दद्मि १७ १८ यत्कपित्वं कार्यं गतं वस्थितं १९ अनवस्थितं कार्यकारीति त्रिषु लोकेषु प्रसिद्धं
तदेवेदं रोषदोषान्मया प्रदर्शितं खलु १९

एमा०
१९०

राजसे भावे वैरं रजोगुणनिबंधनचेष्टाविशेषं वस्तुनीशः कार्यासमर्थं अनवस्थितम् १९ व्यवस्थितफलजनकं धिगस्तु यद्यस्मा
दीश्वरेणापि समर्थेनापि मयाऽगात् रजोगुणमूलक्रोधवशात् सीता न रक्षिता अतो धिगिति संबंधः २० उभौ रामलक्ष्म

धिगस्तु राजसं भावमनीशमनवस्थितम् १९ स्वैरेणापि यदुद्भ्रान्त्या यासीता न रक्षिता २० विना ययो
र्ध्य सीता याता तावुभौ विनशिष्यतः । तयोर्विनाशे सुग्रीवः सबन्धुर्विनशिष्यति २१ एतदेव वचः श्रु
त्वा भरतो भ्रातृवत्सलः । धर्मात्मा सहशत्रुघ्नः कथं शक्ष्यति जीवितुम् २२ इक्ष्वाकुवंशो धर्मि
ष्ठे गते नाशमसंशयः । भविष्यन्ति प्रजाः सर्वाः शोकसंतापपीडिताः २३ तदहं भाग्यरहितो लु
प्तधर्मार्थसंग्रहः । रोषदोषपरीतात्मा व्यक्तं लोकविनाशनः २४ इति चिंतयतस्तस्य निमि त
त्तान्युपपेदिरे । पूर्वमप्युपलब्धानि साक्षात्पुनरचिंतयत् २५ अथवा चारुसर्वाङ्गी रक्षि
तास्वेन तेजसा । न नशिष्यति कल्याणी नाग्निरग्नौ प्रवर्तते २६

णौ २१ २२ स्पष्टः २४ साक्षादुप
लब्धानि पूर्वं साक्षादनुभूतशुभफलानि उपपेदिरे जातानि दृष्ट्वा पुनरचिंतयदित्यर्थः २५ चिंतामेव दर्शयति अथ
वेति नाग्निरग्नौ प्रवर्तते अग्निरग्निं न दहतीत्यर्थः २६

२७ दहनकर्मा भस्मीकरणस्वभावोपि हव्यवाहनः मां तप्तिकरं यद्यतो नादहत् अतस्तां स्प्रष्टुमपि नार्हतीति पूर्वेणान्वयः २८ त्रयाणां भरतजनकशत्रुघ्नानां देवतात्वात् तस्यामन्यप्रवृत्तौ एमभयाच्चेति भावः २९ सर्वत्र प्रभुरविपत्तेर्वक्तव्यान्मे लाङ्गूलेन दहतीति

नहि धर्मात्मनस्तस्य भार्याममिततेजसः स्वचरित्राभिगुप्तां तां स्प्रष्टुमर्हति पावकः २७ नूनं रामप्रभावेन वैदेह्याः सुकृतेन च यन्मां दहनकर्मायं नादहद्धव्यवाहनः २८ त्रयाणां भरतादीनां भ्रातॄणां देवता च या रामस्य च मनःकान्ता सा कथं विनशिष्यति २९ यद्वा दहनकर्मायं सर्वत्र प्रभुरव्ययः न मे दहति लाङ्गूलं कथमार्यां प्रधक्ष्यति ३० पुनश्चाचिन्तयत्तत्र हनुमान्विस्मितस्तदा हिरण्यनाभस्य गिरेर्जलमध्ये प्रदर्शनम् ३१ तपसा सत्यवाक्येन अनन्यत्वाच्च भर्तरि अप्यसौ विनिर्दहेदग्निं न तामग्निः प्रधक्ष्यति ३२ स तथा चिन्तयंस्तत्र देव्या धर्मपरिग्रहम् शुश्राव हनुमांस्तत्र चारणानां महात्मनाम् ३३

तत्तां कथं धक्ष्यतीति ३० देवीप्रभावात्तिरोभावो मद्दृष्टान्तनिमित्तादिदर्शनहेतुर्नाऽस्तीति भाववक्ष्यन्तीं न दहतीत्याह पुनश्चेति ३१ विनिर्दहेत् दाहविषयवाक्यप्रयोगेणेति शेषः ३२ देव्या धर्मपरिग्रहं धर्मप्रभावं चिन्तयन् हनुमान् चारणानां वाक्यं शुश्रावेति सम्बन्धः ३३

दुर्विषह्यं केनाप्यसह्यमित्यर्थः ३४ ३५ विस्मय आश्चर्यं अद्भुतः अभूतपूर्वः ३६ तत्कालसंभवः तत्काले जातः चारणवाक्यजः ३७ दृष्टार्थैः दृष्टप्रत्ययैर्निमित्तैर्दक्षिणाक्षिस्पन्दनादिभिः कारणैः सीतापातिव्रत्यरामप्रभावादिभिः ऋषिवाक्यैश्चारणानां वाक्यैरि

अहो खल्वनुकृतं कर्म दुर्विषह्यं हनूमता अग्निं विसृजता तीक्ष्णं भीमं राक्षससद्मनि ३४ प्रपलायितरक्षःस्त्रीबालवृद्धसमाकुला जनकोलाहलाध्माता क्रन्दतीवाद्रिकन्दरैः ३५ दग्धेयं नगरी लङ्का साट्टप्राकारतोरणा जानकी न च दग्धेति विस्मयोऽद्भुत एव नः ३६ इति शुश्राव हनुमान्वाचं ताममृतोपमाम् बभूव चास्य मनसो हर्षस्तत्कालसंभवः ३७ स निमित्तैश्च दृष्टार्थैः कारणैश्च महागुणैः ऋषिवाक्यैश्च हनुमानभवत्प्रीतमानसः ३८ ततः कपिः प्राप्तमनोरथार्थस्तामक्षतां राजसुतां विदित्वा प्रत्यक्षतस्तां पुनरेव दृष्ट्वा प्रतिप्रयाणाय मतिं चकार ॥ ३९ ॥ हरिः ॐ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये सुंदरकांडे पंचपंचाशः सर्गः ॥ ५५ ॥

त्यर्थः ३८ विदित्वा पूर्वं चारणोक्त्या विदित्वा पश्चात् प्रत्यक्षतो दृष्ट्वा ततः प्रतिप्रयाणाय किष्किन्धां प्रति गन्तुं मतिं चकारेति संबन्धः ३९ इति पंचपंचाशः सर्गः ॥ ५५

ग० वा० सु० इत्यष्टरम्या पुनर्माध्येन सागरेपि संचा श्चतुर्वि शतिश्लो काः शाख्यातप्रापाराव १ प्रस्थितं प्रस्थानोद्युक्तं २ ३ ४ ५ ६ अप्रयमि

ततस्तु शिंशुपामूले जानकीं पर्यवस्थिताम् अभिवाद्याब्रवीद् दृष्ट्वा पश्यामि त्वामिहागताम् १ ततस्तं प्र
स्थितं सीतावीक्षमाणा पुनःपुनः भर्तृस्नेहान्वितं वाक्यं हनूमंतमभाषत २ यदि त्वं मन्यसे तात वसैका
हमिहानघ क्वचित्सुसंवृते देशे विश्रांतः श्वो गमिष्यसि ३ मम चैवाल्पभाग्यायाः सांनिध्यात्तव वानर
शोकस्याप्रमेयस्य मुहूर्त्तं स्यादपि क्षयः ४ गते हि हरिशार्दूल पुनः संप्राप्तये त्वयि प्राणेष्वपि न विश्वा
सो मम वानरपुंगव ५ अदर्शनं च ते वीर भूयो मां दारयिष्यति दुःखाद्दुःखतरं प्राप्तां दुर्मनः शोककर्
शिताम् ६ अयं च वीर संदेहस्तिष्ठतीव ममाग्रतः सुमहांस्त्वत्सहायेषु हर्यृक्षेषु महाबलः ७ क
थं नु खलु दुष्पारं संतरिष्यति सागरम् तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ ८ त्रयाणा
मेव भूतानां सागरस्यास्य लंघने शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा ९ तदत्र कार्यनि
र्वाहे समुत्पन्ने दुरासदे किं पश्यसि समाधानं त्वं हि कार्यविशारद १०

तिहर्यृक्षेषु मध्ये महाबलः सुग्रीवः ७ ८ ९

सभूतान्सर्वजातीयप्राणिसहितान्सचराचरान्सभूतान्सुसंहृत्य पुनरेव तथा स्रष्टुं शक्तो रामः श्रमाभावात् महायशा इति ३९ महायशा

सर्वांल्लोकान्सुसंहृत्य सभूतान्सचराचरान् पुनरेव तथा स्रष्टुं शक्तो रामो महायशाः ३९ देवासुरनरेंद्रेषु यक्षरक्षोरगेषु च विद्याधरेषु नागेषु गंधर्वेषु मृगेषु च ४० सिद्धेषु किंनरेंद्रेषु पतत्रिषु च सर्वशः सर्वत्र सर्वभूतेषु सर्वकालेषु नास्ति सः यो रामं प्रतियुध्येत विष्णुतुल्यपराक्रमम् ४१ सर्वलोकेश्वरस्येह कृत्वा विप्रियमीदृशम् रामस्य राजसिंहस्य दुर्लभं तव जीवितम् ४२ देवाश्च दैत्याश्च निशाचरेंद्रा गंधर्वविद्याधरनागयक्षाः रामस्य लोकत्रयनायकस्य स्थातुं न शक्ताः समरेषु सर्वे ४३

एवमेव वनान्यरतिस्व प्राक्निमामा वैभवेन श्रीरामचंद्रस्यैव सृष्ट्यादिकर्तृत्वं सूचितं न तस्य श्लोकस्य नान्तस्य नाम महद्यशः इति श्रुतेः ३९ ४० सर्वत्र देशे ४१ ४२ उक्तमेवार्थं द्रढयितुं पुनराह देवाश्चेति ४३

स्त

अस्य कार्यस्य वैराक्षससंहारपूर्वकसत्वापणरूपकार्यस्य परिसाधने त्वमेक एव कामं पर्याप्त्यावन्तोदयस्ते तवैव यशस्यः ननु

काममस्य त्वमेवैकः कार्यस्य परिसाधने सुग्रीवः परवीरघ्न यशस्त्वं त्ववलोदयः ११ शौरैस्तु संकु
लोन्मत्वाल्लंकां परबलार्दनः मानये यादिका कुत्स्यत्त तस्य सदृशो भवेत् १२ तद्यथा तस्य वि
क्रान्तमनुरूपं महात्मनः भवत्याहवशूरस्य तथा त्वमुपपादय १३ तदर्थोपहितं वाक्यं प्रश्रितं
हेतुसंहितम् निशम्य हनूमान्वीरो वाक्यमुत्तरमब्रवीत् १४ देविहर्यक्षसैन्यानामीश्वरः प्लवतां
वरः सुग्रीवः सत्वसंपन्नस्तवार्थे कृतनिश्चयः १५ स वानरसहस्राणां कोटीभिरभिसंवृतः
क्षिप्रमेष्यति वैदेहि सुग्रीवः प्लवगाधिपः १६ तौ च वीरौ नरवरौ सहितौ रामलक्ष्मणौ आग
म्य नगरीं लंकां सायकैर्विधमिष्यतः १७ सगणं राक्षसं हत्वा न चिराद्रघुनन्दनः त्वामादा
य वरारोहे स्वां पुरीं प्रतियास्यति १८ समाश्वसिहि भद्रं ते भव त्वं कालकांक्षिणी क्षिप्रं द्रक्ष्य
सि रामेण निहतं रावणं रणे १९ निहते राक्षसेन्द्रे च सपुत्रामात्यबान्धवे त्वं समेष्यसि रामेण शशांके

रामस्येति शेषः ११ नहि रामस्य किंपुरस्कारमित्यत्राह शौरैरिति १२ विक्रान्तं विक्रमणं १३ प्रश्रितं स्निग्धं हेतुसंहितं न्यायोपेतम् १४ १५ १६ १७
१८ १९ २०

२०

ए० वा० सुं० २१ २२ २३ २४ अरिष्टं अरिष्टाख्यं पर्वतं २५ अर्थैर्नगिरिं चतुर्दशाधो स्वेक्षतेतुंगे त्यादि नात्तुंगाः पद्मकाः पद्मवर्णाः
१९३ कष्टास्तैर्जुष्टाभिर्नीलाभिर्वनराजिभिः सपरिधानमिवस्थितमितिशेषः शृंगांतरविलंबिभिरंभोदैः सोत्तरीयमिवकं

क्षिप्रमेष्यति काकुत्स्थो हर्यृक्षप्रवरैर्युतः यस्ते युधि विजित्यारीन् शोकं व्यपनयिष्यति २१
एवमाश्वास्य वैदेहीं हनूमान्मारुतात्मजः गमनाय मतिं कृत्वा वैदेहीमभ्यवादयत् २२ रा
क्षसान्प्रवरान्हत्वा नाम विश्राव्य चात्मनः समाश्वास्य च वैदेहीं दर्शयित्वा परं बलम् २३
नगरीमाकुलां कृत्वा वंचयित्वा च रावणम् दर्शयित्वा बलं घोरं वैदेहीमभिवाद्य च प्रतिगंतु
मनश्चक्रे पुनर्मध्येन सागरम् २४ ततः स कपिशार्दूलः स्वामिसंदर्शनोत्सुकः आरुरोह गि
रिश्रेष्ठमरिष्टमरिमर्दनः २५ तुंगपद्मकजुष्टाभिर्नीलाभिर्वनराजिभिः सोत्तरीयमिवांभो
दैः शृंगांतरविलंबिभिः २६ बोध्यमानमिव प्रीत्या दिवाकरकरैः शुभैः उन्मिषंतमिवोद्धूतै

२
सुं० टि०

टासन्को तरीय धारिणमिवस्थितं २६ शुभैस्तरुणैर्दिवाकरकरैरंशुभिः प्रीत्या बोध्यमानमिवस्थितं रविकिरणस्पर्शेन सर्वेषां
तत्रस्थवस्तूनां विकासादिति भावः उद्धूतैरुद्गतैर्लोचनसदृशैर्धातुभिरुन्मिषंतं पश्यंतमिवस्थितम् २७ सीताराम

तोयौघनिःस्वनैर्मंद्रैः सर्वतः प्राधीतमिव गंभीरमध्येतुमुपक्रांतमिव कृतशिक्षः नानाप्रस्रवणस्वनैः पर्वतमूलादुद्गृहिः प्रवहंति जलानि प्रस्रवणानि तेषां स्वनैर्विस्पष्टं प्रगीतमिव गातुमुपक्रांतमिव नानास्वनानां मंद्रत्वात् २८ उद्धूतैर्देवदारुभिरूर्ध्वबाहुमुत्पतंतमिव स्थितं प्रपातजलनिर्घोषैः प्रपाता भृगवस्तेषां जलानि भृगुदेशेभ्यः पतंति तानि निर्झराणि तेषां निर्घोषैः प्राक्रुष्टं क्रोशितुं प्रारब्धमिव सर्वतः २९

तोयौघनिःस्वनैर्मंद्रैः प्राधीतमिव सर्वतः प्रगीतमिव विस्पष्टं नानाप्रस्रवणस्वनैः २८ देवदारुभिरुद्धूतैरूर्ध्वबाहुमिव स्थितम् प्रपातजलनिर्घोषैः प्राक्रुष्टमिव सर्वतः २९ वेपमानमिव श्यामैः कंपमानैः शरद्द्रुमैः वेणुभिर्मारुतोद्धूतैः कूजंतमिव कीचकैः ३० निःश्वसंतमिवामर्षात् घोरैराशीविषोत्तमैः नीहारकृतगंभीरैर्ध्यायंतमिव गह्वरैः ३१ सीताराम

शरदि पेघनीभवंतीति शरद्द्रुमाः सप्तपर्णादि शारदवृक्षास्तैः कंपमानैर्वेपमानमिव स्थितं मारुतोद्धूतैः कीचकाख्यैर्वेणुभिः कूजंतमिव स्थितं ३० घोरैराशीविषोत्तमैर्निःश्वसंतमिव स्थितं निःश्वासैर्निःश्वसंतमिव अमर्षात् हनुमति क्रोधादित्यर्थः नीहारकृतगंभीरैः नीहारैर्गुप्तैः गंभीरैरभ्यंकंदरैर्गुहाभिर्ध्यानं निरुद्धेंद्रियस्यांतःपरिध्यायंतमिव निरुद्धेंद्रियं ध्यानारूढमिव स्थितमित्यर्थः ३१

ग

मेघपादः मेघसदृशास्तन्निभैः पादैः प्रत्यन्तपर्वतैः प्रक्रान्तमिवाक्रम्य गमनमिव अभ्रमालिभिर्मेघपालावद्भिः शिखरैरुज्जंगमानामिव गात्रमोटनं कुर्वाणमिव ३२ कूटैः शृङ्गैः ३३ पुष्पवद्भिर्विततैर्लतारूपैर्वितानैरलंकृतं धातुस्यन्दैः धातुनिर्गमैः

मेघपादपनिभैः पादैः प्रक्रान्तमिव सर्वतः जंगमानामिवाकाशे शिखरैरभ्रमालिभिः ३२ कू
टैश्च बहुधाकीर्णं शोभितं बहुकन्दरैः सालतालाश्वकर्णैश्च बहुभिर्वृतम् ३३ लतावि
तानैर्विततैः पुष्पवद्भिरलंकृतम् नानामृगगणाकीर्णं धातुनिष्यन्दभूषितम् ३४ बहुप्रस्रवणो
पेतं शिलासंचयसंकटम् महर्षियक्षगन्धर्वकिन्नरोरगसेवितम् ३५ लतापादप
संबाधं सिंहाधिष्ठितकंदरम् व्याघ्रादिभिः समाकीर्णं स्वादुमूलफलद्रुमम् ३६ प्रा
रुरोहानिलसुतः पर्वतं प्लवगोत्तमः रामदर्शनशीघ्रेण प्रहर्षेणाभिचोदितः ३७ ते
न पादतलाक्रान्ता रम्येषु गिरिसानुषु सघोषाः समशीर्यन्त शिलाश्चूर्णीकृतास्ततः ३८

वंशैश्च

भूषितं ३४ शिलानां संचयेन शिलासमूहेन संकटं नीरंध्रं ३५ लताभिः पादपैश्च संबाधं व्याप्तं ३६ रामदर्शने शीघ्रेण
उत्कंठेन प्रहर्षेण प्रेरितः ३७ तेन हनूमता ३८

न्मा

पार्थयन् गमनप्राप्यत्वेनेच्छन् ३९ अधिरुह्य ततो मूर्ध्वं गत्वा ४० स हनूमान्मारुत इवाकाशमिवो उत्तरां दिशं प्रपेदे मनसा प्राप ४१
कंपमानैः शिखरैः पतद्भिर्द्रुमैश्चोपलक्षितः पर्वतोत्तमः वसुधां प्रविशन्निव विविधैर्भूतैस्त्रस्तजंतुभी ररासेत्यन्वयः ४२

स तमारुह्य शैलेंद्रं व्यवर्धत महाकपिः दक्षिणादुत्तरं पारं प्रार्थयँल्लवणाम्भसः ३९ अधि
रुह्य ततो वीरः पर्वतं पवनात्मजः ददर्श सागरं भीमं मीनोरगनिषेवितम् ४० स मारुत इ
वाकाशं मारुतस्यात्मसंभवः प्रपेदे हरिशार्दूलो दक्षिणादुत्तरां दिशम् ४१ स तदा पी
डितस्तेन कपिना पर्वतोत्तमः ररास विविधैर्भूतैः प्रविशन् वसुधातलम् कंपमानैश्च
शिखरैः पतद्भिरपि च द्रुमैः ४२ तस्योरुवेगान्मथिताः पादपाः पुष्पशालिनः निपे
तुर्भुवि भग्नाः शक्रायुधहता इव ४३ कंदरोदरसंस्थानां पीडितानां महौजसाम् सिं
हानां निनदो भूयो नभो भिंदन् हि शुश्रुवे ४४ त्रस्त व्याविद्धवसना व्याकुलीकृत
भूषणाः विद्याधर्यः समुत्पेतुः सहसा धरणीधरात् ४५

भूत

शक्रायुधहताः वज्रहताः नभो भिंदन्निति महत्त्वे तात्पर्यं ४४ त्रस्तेन त्रासेन व्याविद्धानि व्यस्तानि वसनानि यासां ताः ४५

रा० बा० सुं० व्यवेष्टन्त प्रलुठन्ति स्म ४६ ४७ स वृक्षशिखरैरुदग्र उन्नतः रसातलं प्रविवेश शृंगेण भूमिसमशिखरोऽभवदित्यर्थः
१९५ तदर्थः ४८ तदेव दर्शयति दशेति ४९ कल्लोलैरास्फालयन्तीत्यस्य पतेता दृग्रावेलान्तं तत्तीरं प्रांतो यस्य तं लवणार्णवं लिलंघ

तु प्रतिशमात्मा बलिनो दीप्तजिह्वा महाविषाः निपीडितशिरोग्रीवा व्यवेष्टन्त महोरगाः ॥४६॥
किन्नरोरगगन्धर्वयक्षविद्याधरास्तथा पीडितं तं नगवरं त्यक्त्वा गगनमास्थिताः ॥४७॥ स
च भूमिधरः श्रीमान्बलिना तेन पीडितः सवृक्षशिखरोदग्रः प्रविवेश रसातलम् ॥४८॥
दशयोजनविस्तीर्णस्त्रिंशद्योजनमुच्छ्रितः धरण्यां समतां यातः स बभूव धराधरः ॥४९॥
स लिलंघयिषुर्भीमं सलीलं लवणार्णवम् कल्लोलास्फालवेलान्तमुत्पपात नभो हरिः
५० ॥ हरिः ॐ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये सुन्दरकांडे षट्पंचाशः सर्गः ॥ ५६ ॥ आ
प्लुत्य च महावेगः पक्षवानिव पर्वतः भुजंगयक्षगन्धर्वप्रबुद्धकमलोत्पलम् १ सीताराम

घयिषुर्नभ उत्पपातेति संबंधः ५० इति षट्पंचाशः सर्गः ॥ ५६ ॥ लंघनीयं गगनमतीव तत्वेन वर्णयति शशीत्यादि
दिचतुर्भिः आप्लुत्य उत्प्लुत्य भुजंगयक्षगन्धर्वा एव विकसितानि कमलोत्पलानि यस्मिन् तं १११ रा०सु०
१९५

चंद्रएवकुमुदंयस्मिंस्तेनसहितं अर्करूपकारंडवाख्यजलपक्षिसहितं पुष्यश्रवणावेवकादंबाः कलहंसापक्षिणस्ते अभ्रा
मेघाएवशैवलानिशाद्वलानिचयस्मिन् तं २ पुनर्वसुरेवमहामीनोयस्मिन् लोहितांगोभौमएवमहाग्राहोयस्मिन् ऐरा
वतइंद्रगजएवमहाद्वीपंयस्मिन् स्वातीरूपंहंसेनविलोडितमवगाढं ३ वातसंघातोवात्यातज्जालंतत्समूहएवोर्मियो

सचंद्रकुमुदंरम्यंसार्ककारंडवंशुभम् तिष्यश्रवणकादंबमभ्रशैवलशाद्वलम् २ पुनर्व
सुमहामीनंलोहितांगमहाग्रहम् ऐरावतमहाद्वीपंस्वातीहंसविलोडितम् ३ वातसंघा
तजातोर्मिंचंद्रांशुशिशिरांबुमत् हनूमानपरिश्रांतः पुप्लुवेगगनार्णवम् ४ ग्रसमानइ
वाकाशंताराधिपमिवोल्लिखन् हरन्निवसनक्षत्रंगगनंसार्कमंडलम् ५ मारुतस्या
त्मजः श्रीमान्कपिर्व्योमचरोमहान् हनूमान्मेघजालानिविकर्षन्निवगच्छति ६६

यत्रतत् चंद्रांशुशिशिरांबुमत् चंद्रांशवएवशिशिरांबुतदस्यास्तीतितद्वत् अत्रगगनस्यार्णवत्वेनचंद्रादीनां तदवय
वकुमुदादित्वेनचनिरूपणात्सावयवरूपकं ईदृग्विधंगगनार्णवमपरिश्रांतोहनूमान्पुप्लुवेतरतिस्मेत्यन्वयः ४ ता
राधिपमुल्लिखन्निवकरैर्विदारयन्निवग्रसमानः हरन्निवगृह्णन्निव ५ ६

महाभ्राणीत्यस्य कपिना कृष्यमाणानीति शेषः ७ ८ प्रविशन्नित्युक्तमेवार्थं भंग्यंतरेणाह विविधेति विविधघनाभ्रघनेषु आ

पांडुरारुणवर्णानि नीलमांजिष्ठकानि च हरितारुणवर्णानि महाभ्राणि चकाशिरे ७ प्रविशन्नभ्रजालानि निष्पतंश्च पुनः पुनः प्रच्छन्नश्च प्रकाशश्च चंद्रमा इव लक्ष्यते ८ विविधाभ्रघनापन्नगोचरो धवलांबरः दृश्यादृश्यतनुर्वीरस्तदा चंद्रायतेंबरे ९ तार्क्ष्यायमाणो गगने बभासे वायुनंदनः दारयन्मेघजालानि निष्पतंश्च पुनः पुनः १० नदन्नादेन महता मेघस्वनमहास्वनः ११ प्रवरान्राक्षसान्हत्वा नाम विश्राव्य चात्मनः आकुलां नगरीं कृत्वा व्यथयित्वा च रावणम् १२ अर्दयित्वा बलं घोरं वैदेहीमभिवाद्य च आजगाम महातेजाः पुनर्मध्येन सागरम् १३ पर्वतेंद्रं सुनाभं च समुपस्पृश्य वीर्यवान् ज्यामुक्त इव नाराचो महावेगोभ्युपागमत् १४ स किंचिदनुसंप्राप्तः समालोक्य महागिरिम् महेंद्रं मेघसंकाशं ननाद हरिपुंगवः १५ स पूरयामास कपिर्दिशो दश समंततः नदन्नादेन महता मेघस्वनमहास्वनः १६ १६ १६

पन्नः गोचरो मार्गो येन सः मेघांतः प्रवेशनिष्क्रमाभ्यां दृश्यादृश्यतनुः ९ १० मेघस्वनवन्महास्वनो यस्य सः ११

लोलाङ्गूलं चाप्यकंपयन्निति स्वभावोक्तिः १७ फलतीव विदीर्यतीव १८ ये पूर्वं विष्ठितास्ते तोयदस्येव निस्वनमिव ऊरुवेगं तज्जन्यं घोषं शुश्रुवुरित्यन्वयः १९ २० दीनमनसः प्रतिवचनाभावेन शंकयेति भावः वानरेंद्रस्य निर्घोषं तादृशं सिंहनादं

स तं देशमनुप्राप्तः सुहृद्दर्शनलालसः ननाद हरिशार्दूलो लाङ्गूलं चाप्यकंपयत् १७ तस्य नानद्यमानस्य सुपर्णचरिते पथि फलतीवास्य घोषेण गगनं सार्कमंडलम् १८ ये तु तत्रोत्तरे कूले समुद्रस्य महाबलाः पूर्वं संविष्ठिताः शूरा वायुपुत्रदिदृक्षवः १९ महतो वायुनुन्नस्य तोयदस्येव निस्वनम् शुश्रुवुस्ते तदा घोषमूरुवेगं हनूमतः २० ते दीनमनसः सर्वे शुश्रुवुः काननौकसः वानरेंद्रस्य निर्घोषं पर्जन्यनिनदोपमम् २१ निशम्य नदतो नादं वानरास्ते समंततः बभूवुरुत्सुकाः सर्वे सुहृद्दर्शनकांक्षिणः २२ जांबवान्स हरिश्रेष्ठः प्रीतिसंहृष्टमानसः उपामंत्र्य हरीन्सर्वानिदं वचनमब्रवीत् २३ सर्वथा कृतकार्योऽसौ हनूमान्नात्र संशयः न ह्यस्याकृतकार्यस्य नाद एवंविधो भवेत् २४

२१ सुहृद्दर्शनकांक्षिणः तेन शब्देन हनूमानेवेतीति निश्चित्य तद्दर्शनलालसाः २२ २३ २४ २४ ४४

वा० रा० सुं०
१९७

बाहू ऊरू वेगं तज्जन्यशब्दं निनादं च कंठशब्दं च २५ नगाग्रात् वृक्षाग्रात् ऊर्ध्वदेशस्थानि नगाग्राणि प्रति समपद्यन्त संघीभू
ताः २६ ते वानराः प्रीताः सन्तः शाखां गृहीत्वा अवस्थिताः हनूमन्निति क्षणे पतन भिया शाखां गृहीत्वा पादपाग्रेषु तदग्रशाखासु।
स्थिताः प्रकाशानि निर्मलानि यथाश्वकर्णाणि भ्रामयन्तो निवासांसि समाविध्यन्त तत्पर्यभ्रामयन्नित्यर्थः २७ २८ अभ्रघन

तस्य बाहूरुवेगं च निनादं च महात्मनः निशम्य हरयो हृष्टाः समुत्पेतुर्यतस्ततः २५ ते नगा
ग्रान्नगाग्राणि शिखराच्छिखराणि च प्रहृष्टाः समपद्यन्त हनूमन्तं दिदृक्षवः २६ ते प्री
ताः पादपाग्रेषु गृह्य शाखामवस्थिताः वासांसि च प्रकाशानि समाविध्यन्त वानराः २७ गि
रिगह्वरसंलीनो यथा गर्जति मारुतः एवं जगर्ज बलवान् हनूमान्मारुतात्मजः २८ तमभ्रघ
नसंकाशमापतन्तं महाकपिम् दृष्ट्वा ते वानराः सर्वे तस्थुः प्राञ्जलयस्तदा २९ ततस्तु वेग
वांस्तस्य गिरेर्गिरिनिभः कपिः निपपात गिरेस्तस्य शिखरे पादपाकुले ३० सीताराम

संकाशं मेघसमूहतुल्यं आपतन्तं महाकपिं दृष्ट्वा स्वजीवनदातृत्वेन स्वपूज्यत्वात् सर्वे प्राञ्जलयः स्थिताः २९ ततो गिरेररिष्टा
ख्यात् स्थितः कपिस्तस्य महेन्द्रस्य गिरेः शिखरे पपात रभसेनाविश्रममागमनं ध्वनितम् ३० ३० ३० ३० ३० ३०

रा० म०
१९७

१ दौत्यं स्वीयं दूतकर्म यथावन्निवेदितवतो हनूमतो हननं परिधित्वाद्वध्यत्वं मत्वा रावणाज्ञप्तं वधं नानुमेने नानुमतं चकार २ रक्षोधिपतिं क्रुद्धं विदित्वा तच्च कार्यं दूतवधरूपमुपस्थितं विदित्वा कार्यविधौ उचितकृत्यसंपादने स्थितः निश्चितं बुद्धिं विभीषणो निश्चित

स तस्य वचनं श्रुत्वा वानरस्य महात्मनः । आज्ञापयद्वधं तस्य रावणः क्रोधमूर्छितः १ वधे तस्य
समाज्ञप्ते रावणेन दुरात्मना निवेदितवतो दौत्यं नानुमेने विभीषणः २ तं रक्षोधिपतिं
क्रुद्धं तच्च कार्यमुपस्थितम् विदित्वा चिंतयामास कार्यं कार्यविधौ स्थितः ३ निश्चितार्थ
स्ततः साम्ना पूज्य शत्रुजिदग्रजम् उवाच हितमत्यर्थं वाक्यं वाक्यविशारदः ४ क्षमस्व
रोषं त्यज राक्षसेन्द्र प्रसीद मे वाक्यमिदं शृणुष्व वधं न कुर्वंति परावरज्ञा दूतस्य संतो
वसुधाधिपेंद्राः ५

चिंतयामास ३ तत निश्चितनानेतरं निश्चितार्थः स च शत्रुजिच्छासावग्रजस्य तेरावणं साम्ना पूजयित्वा अत्यर्थं हितं वाक्यमुवाच ४ हे राक्षसेन्द्र प्रसीद रोषं त्यज रोषं क्षमस्व परावरज्ञाः सर्वकार्यविषयकोत्कर्षज्ञाः संतो दूतस्य वधं न कुर्वंति ५ ५

हर्षेणा पूर्यमाणः पूर्यमाणहृदयः पर्वतनिर्झरे निर्झरप्रवर्तिके शिखरे छिन्नपक्षो धरणीधर इवाकाशात्पपात ३१ ३२ प्रहृष्टा

हर्षेणापूर्यमाणोसौ रम्ये पर्वतनिर्झरे छिन्नपक्ष इवाकाशात्पपात धरणीधरः ३१ ततस्ते प्रीतमनसः सर्वे वानरपुंगवाः हनूमंतं महात्मानं परिवार्योपतस्थिरे ३२ परिवार्य च ते सर्वे परां प्रीतिमुपागताः प्रहृष्टवदनाः सर्वे तमरोगमुपागतं ३३ उपायनानि चादाय मूलानि च फलानि च प्रत्यर्चयन्हरिश्रेष्ठं हरयो मारुतात्मजम् ३४ हनूमांस्तु गुरून्वृद्धान्जांबवत्प्रमुखांस्तदा कुमारमंगदं चैव सोवंदत महाकपिः ३५ स ताभ्यां पूजितः पूज्यः कपिभिश्च प्रसादितः दृष्टा देवीति विक्रांतः संक्षेपेण न्यवेदयत् ३६ निषसाद च हस्तेन गृहीत्वा वालिनः सुतं रमणीये वनोद्देशे महेंद्रस्य गिरेस्तदा ३७ हनूमानब्रवीद्धृष्टस्तदा तान्वानरर्षभान् ३८

प्रहृष्टवदनाः प्रसन्नमुखाः अप्रासन्निति शेषः अरोगे कुशलिनमित्यर्थः ३३ उपायना निउपहारान् ३४ ३५ ताभ्यां जांबवदंगदाभ्यां प्रसादितः प्रसन्नः दृष्टा कारिनाम निरीक्षराः ३६

रा०वा०सुं० ३९ ४० ४१ क्ष्वेलन्ति सिंहनादं कुर्वन्ति गर्जन्ति वृषभनादं कुर्वन्ति किलकिलो स्वजात्युचितकिलकिलाशब्दं ४२ आ
१९८

अशोकवनिकामध्ये दृष्टा सा जनकात्मजा रक्ष्यमाणा सुघोराभी राक्षसीभिरनिन्दिता ३९ एकवेणीधरा बाला रामदर्शनलालसा उपवासपरिश्रान्ता मलिना जटिला कृशा ४० ततो दृष्टेति वचनं महार्थममृतोपमम् निशम्य मारुतेः सर्वे मुदिता वानरा भवन् ४१ क्ष्वेलन्त्यन्ये नदन्त्यन्ये गर्जन्त्यन्ये महाबलाः चक्रुः किलकिलामन्ये प्रतिगर्जन्ति चापरे ४२ केचिदुच्छ्रितलाङ्गूलाः प्रहृष्टाः कपिकुञ्जराः आयताञ्चितदीर्घाणि लाङ्गूलानि प्रविव्यधुः ४३ अपरे तु हनूमन्तं वानरा वारणोपमम् आप्लुत्य गिरिशृङ्गेभ्यः संस्पृशन्ति स्म हर्षिताः ४४ उक्तवाक्यं हनूमन्तमङ्गदस्तु तदाब्रवीत् सर्वेषां हरिवीराणां मध्ये वाचमनुत्तमाम् ४५ सत्त्वे वीर्ये न ते कश्चित् समो वानर विद्यते यदवप्लुत्य विस्तीर्णं सागरं पुनरागतः ४६

रामा०
१९८

यतांचितदीर्घाणि सत्र दीर्घ प्राक् सन्निधानादायत प्राध्वेन स्थौल्यमुच्यते प्रविव्यधुः लाङ्गूलान्युद्धस्य भूमावताडयन्नित्यर्थः ४३ गिरिशृङ्गेषु गिरिशृङ्गेभ्यः ४४ ४५ ४६

समेष्यामः संगता भविष्यामः ४७ अहो इति तत्त्वस्वामिभक्त्यादिकमाश्चर्यं ४८ ४९ ५० ५१ विविधैर्देवैरुपास्यमानस्त्वर्पीः ५२

जीवितस्य प्रदाता नस्त्वमेको वानरोत्तम त्वत्प्रसादात् समेष्यामः सिद्धार्था राघवेण ह ४७ अहो स्वामिनि ते भक्तिरहो वीर्यमहो धृतिः दिष्ट्या दृष्टा त्वया देवी रामपत्नी यशस्विनी दिष्ट्या संत्यक्ष्यति काकुत्स्थः शोकं सीतावियोगजम् ४८ ततोङ्गदं हनूमन्तं जाम्बवन्तं च वानराः परिवार्य प्रमुदिता भेजिरे विपुलाः शिलाः ४९ उपविष्टा गिरेस्तस्य शिलासु विपुलासु ते श्रोतुकामाः समुद्रस्य लङ्घनं वानरोत्तमाः ५० दर्शनं चापि लङ्कायाः सीताया रावणस्य च तस्थुः प्राञ्जलयः सर्वे हनुमद्वचनोन्मुखाः ५१ तस्थौ तत्राङ्गदः श्रीमान्वानरैर्बहुभिर्वृतः उपास्यमानो विबुधैर्दिवि देवपतिर्यथा ५२ हनूमता कीर्तिमता यशस्विना मथांगदेनांगदनद्धबाहुना मुदा तदाध्यासितमुन्नतं महन्महीधराग्रं ज्वलितं श्रिया भवत् ॥५३॥ इत्यार्षे रामायणे वाल्मीकीये सुन्दरकाण्डे सप्तपञ्चाशः सर्गः ॥५७॥

कीर्तिमता हनूमता तथा यशस्विनांगदेन मुदाध्यासितं निषेवितं तन्महीधराग्रं श्रिया ज्वलितमभवदिति सम्बन्धः ५३ इति सप्तपञ्चाशः सर्गः ५७

हनूमत्प्रमुखाः परस्परं मिलिता इति शेषः १ २ कार्यविषयं ह्नोतेः ३ कथं च ततः कीदृग्व्यापारः ४ ५ चिंतनीयनिश्चय मेवाह पश्येतिर

ततस्तस्य गिरेः शृंगे महेंद्रस्य महाबलाः हनूमत्प्रमुखाः प्रीतिं हरयो जग्मुरुत्तमाम् १ प्रीतिमत्सूपविष्टेषु वानरेषु महात्मसु तं ततः प्रीतिसंहृष्टः प्रीतियुक्तं महाकपिम् २ जांबवान्कार्यवृत्तांतमपृच्छदनिलात्मजं कथं दृष्टा त्वया देवी कथं वा तत्र वर्तते ३ तस्यां वापि कथं वृत्तः क्रूरकर्मा दशाननः तत्त्वतः सर्वमेतन्नः प्रब्रूहि त्वं महाकपे ४ संमार्गिता कथं देवी किं च सा प्रत्यभाषत श्रुतार्थाश्चिंतयिष्यामो भूयः कार्यविनिश्चयम् ५ यश्चार्थस्तत्र वक्तव्यो गतैरस्माभिरात्मवान् रक्षितव्यं च यत्तत्र तद्भवान्व्याकरोतु नः ६ स नियुक्तस्ततस्तेन संप्रहृष्टतनूरुहः नमस्यञ्छिरसा देव्यै सीतायै प्रत्यभाषत ७ प्रत्यक्षमेव भवतां महेंद्राग्रात्खमाप्लुतः उदधेर्दक्षिणं पारं कांक्षमाणः समाहितः ८ गच्छतश्च हि मे घोरं विघ्नरूपमिवाभवत् कांचनं शिखरं दिव्यं पश्यामि सुमनोहरम् ९ मेवाह पश्येति रक्षितव्यं रामसन्निधौ गोपनीयं वक्तव्यमिति यावत् वक्तव्यं च यत्तच्चिंतयामोऽतस्तत्प्रवृत्तं सर्वमात्मवान्बुद्धिमान्भवान्व्याकरोतु ६ ७ ८ विघ्नरूपमिवेत्युक्तं तदेवाह कांचन

[illegible]

मेनेलिङ्गुत्तमपुरुषैकवचनं गमातीतपर्यः उपसंगम्यशाप्य १० व्यवसायेस्वभेदनरूपे ११ १२ १३ छेदतःस्वेच्छ्येत्यर्थः १४

स्थितेयेयानमात्रसमेनेविघ्नंचतेनगेम उपसंगम्यतेदिव्यंकांचनेनगमुत्तमम् १० कृताममनसाबुद्धिर्मेतव्योयंमयेतिच प्रहृष्टंचमयालस्यत्योंगृत्नेनमहागिरेः प्राग्वरेसूर्यसंकाशंव्यश्रीयितसहस्त्वया ११ व्यवसायंचमेबुध्वासहोवाचमहागिरिः पत्रेतिमधुरांवाचमिनःप्रहृष्टादयन्निव १२ पितृव्यंचापिमांविद्धिसखायंमातरिश्वनः मैनाकइतिमोविद्धिनिवसंतमहोदधौ १३ पक्षवंतःपुरापुत्रवभूवुःपर्वतोत्तमाः छंदतःपृथिवींचेरुर्वाधमानाःसमंततः १४ श्रुत्वानगानांचरितंमहेंद्रःपाकशासनः वज्रेणाभगवान्पक्षौचिच्छेदैषांसहस्रशः १५ अहंतुमोचितस्तस्मात्तवपित्रामहात्मना मारुतेनतदावत्सप्रक्षिप्तोस्मिमहार्णवे १६ एवंवस्यमयासाह्येवर्ततिवमरिंदम एमोधर्ममतोश्रेष्ठोमहेंद्रसमविक्रमः १७ एतच्छ्रुत्वामयातस्यमैनाकस्यमहात्मनः कार्यमावेद्यचागिरेरुद्यतंचमनोमम १८ चरितंप्रजापाधनरूपं १५ मोचनप्रकारमाहमाहतेनेति १६ तान्द्येतान्हाप्येतत्रहेतु

रा० वा० सु० ५८ शैलो मानुषेण वपुष्मता प्रशस्तेन शरीरेणान्तर्हितः शैलेन शिलारूपेण तनु महोदधौ सागरे परिस्थित इति शेषः स
२००

तेन चाहमनुज्ञातो मैनाकेन महात्मना स चाप्यन्तर्हितः शैलो मानुषेण वपुष्मता १९ श
रीरेण महाशैलः शैलेन च महोदधौ उत्तमं जवमास्थाय शेषमध्वानमास्थितः २० ततो
ऽहं सुचिरं कालं वेगेनाभ्यागमं पथि ततः पश्याम्यहं देवीं सुरसां नागमातरम् २१ समुद्र
मध्ये सा देवी वचनं मामभाषत मम भक्ष्यः प्रदिष्टस्त्वममरैर्हरिसत्तम २२ ततस्त्वां भ
क्षयिष्यामि विहितस्त्वं चिरस्य मे एवमुक्तः सुरसया प्राञ्जलिः प्रणतः स्थितः २३ विष
ण्णवदनो भूत्वा वाक्यं चेदमुदीरयम् कृते राघवकार्ये मामागतं भक्षयाहृताः २४ एवमुक्त्वा तु
तां देवीं राम कार्यं निवेदितम् रामो दाशरथिः श्रीमान्प्रविष्टो दण्डकावनम् २५ लक्ष्म
णेन सह भ्रात्रा सीतया च परन्तपः तस्य सीता हृता भार्या रावणेन दुरात्मना २६ तस्याः स
काशं दूतोऽहं गमिष्ये रामशासनात् कर्तुमर्हसि रामस्य साह्यं विषयवासिनि २७

वैदस्तवरः शैलो नो वभूवावस्थितस्तदेसा घुत्तेः ११ १२ २० २१ प्रदिष्टो विहित इत्यन्वयः २२ विहितः प्रापित इत्यर्थः २००

२३ २४ २५ २६ एकार्थं सकाशं समीपं विषयवताम

रा० म० ... शाखानिवासिनि २६ २७

मैथिलीदर्शननिवेदनार्थं रामं च दृष्ट्वा २८ नातिवर्तेत नातिक्रमेत २९ ३० कृत्स्नं स्वप्रातिरमिति शेषः ३१ तदेवाह अंगुष्ठ

अथ वा मैथिलीं दृष्ट्वा रामं चाक्लिष्टकारिणम् आगमिष्यामि ते वक्त्रं सत्यं प्रतिशृणोमि ते २८ एवमुक्ता मया सा तु सुरसा कामरूपिणी अब्रवीन्नातिवर्तेत कश्चिदेष वरो मम २९ एवमुक्तः सुरसया दशयोजनमायतः ततोऽर्द्धगुणविस्तारो बभूवाहं क्षणेन तु ३० मत्प्रमाणाधिकं चैव व्यादितं तु मुखं तया तद्दृष्ट्वा व्यादितं चास्यं ह्रस्वं ह्यकरवं पुनः ३१ तस्मिन्मुहूर्ते च पुनर्बभूवाङ्गुष्ठसंमितः अभिपत्याशु तद्वक्त्रं निर्गतोऽहं ततः क्षणात् ३२ अब्रवीत्सुरसा देवी स्वेन रूपेण मां पुनः अर्थसिद्ध्यै हरिश्रेष्ठ गच्छ सौम्य यथासुखम् ३३ समानय च वैदेहीं राघवेण महात्मना सुखी भव महाबाहो प्रीतास्मि तव वानर ३४ ततोऽहं साधु साध्वीति सर्वभूतैः प्रशंसितः ३५ ततोऽन्तरिक्षं विपुलं प्लुतोऽहं गरुडो यथा छाया मे निगृहीता च न च पश्यामि किंचन ३६ संमितः इति देहः इति शेषः ३२ ३३ समानय संगमय ३४ साधु साध्वीति दीर्घं प्राषः ३५ ३६

येन मे गतिर्विहिता तत् किंचिन्न पश्यामि नापश्यामि इत्यन्वयः ३७ ३८ ३९ अवस्थितं दृढीभूतं अस्मिन्नात्मन्यगमो लब्धो इति स्वदेवा कायमहमुक्त इत्यन्वयः ४० मम इति तो भक्षस्त्वमतो मे देहं पीडय इत्यन्वयः ४१ इत्युक्त्वा अंगीकृतवान् तस्या

सोऽहं विगतवेगस्तु दिशो दश विलोकयन् न किंचित्तत्र पश्यामि येन मे विहिता गतिः ३७ ततो मे बुद्धिरुत्पन्ना किं न्वागमनं मम ईदृशो विघ्न उत्पन्नो रूपमत्र न दृश्यते ३८ अधोभागेन मे दृष्टिः शोचता पतिता तदा ततो द्राक्षं महद्भीमां राक्षसीं सलिलेशयाम् ३९ प्रहस्य च महानादमुक्तोऽहं भीमया तया अवस्थितमसंभ्रान्तमिदं वाक्यमशोभनम् ४० क्वासि गंता महाकाय क्षुधिताया ममेप्सितः भक्षः प्रीणय मे देहं चिरमाहारवर्जितम् ४१ बाढमित्येव तां वाणीं प्रत्यगृह्णामहं ततः आस्यप्रमाणादधिकं तस्याः कायमपूरयम् ४२ तस्याश्चास्यं महद्भीमं वर्धते मम भक्षणे न च मां सा तु बुबुधे मम वा विकृतं कृतम् ४३ ततोऽहं विपुलं रूपं संक्षिप्य निमिषान्तरात् तस्या हृदयमादाय प्रपतामि नभस्तलम् ४४

आस्यप्रमाणादधिकं यथा भवति तथा आत्मनः कायमपूरयं अवर्धयं ४२ मां सा न बुबुधे अयं कामरूपी सर्वविघ्ननिर्दलन इति मां न ज्ञातवती त्वया किम मम कृतं विकृतं वा मया कृतं विकारस्वरूपं वा न बुबुधे ४३ तदेवाह तत इति हृदयमादाय हृदयं कर्तित्वा प्रपतामि प्राप्तवान् ४४

विसृष्टभुजा विप्र कीर्तिभुजा ४५ सिंहिका हनूमता हतेति रक्षसा नां देवानां वाचः ॥ रोमाभिस्तुताः ४६ श्यात्यपि कैलात
कालविलेवेहस्ते सीता दर्शनं स्मरन्नेव महद्ध्वानं गत्वा उदधेर्दक्षिणं तीरं पश्यामि ६४ वान् ४७ ४८ ४९ मांजि

सा विसृष्टभुजा भीमा पपात लवणोंभसि मया पर्वतसंकाशा निकृत्तहृदया सती ४५ रोमाभि
रेवगतानां च सिद्धानां चारणैमह राक्षसी सिंहिका भीमा क्षिप्रं हनुमता हता ४६ तां हत्वा पुनरे
वाहं कृत्यमात्ययिकं स्मरन् गत्वा च महदध्वानं पश्यामि नगमंडितम् दक्षिणं तीरमुदधेर्लंका यत्र
महापुरी ४७ अस्तं दिनकरे याते रक्षसां निलयं पुरम् प्रविष्टोहमविज्ञातो रक्षोभिर्भीमविक्रमैः
४८ तत्र प्रविशतश्चापि कल्पांतघनसंनिभा अट्टहासं विमुंचंती नारी काप्युत्थिता पुरः ४९
जिघांसंतीं महं तां तु ज्वलदग्निशिरोरुहाम् सव्यमुष्टिप्रहारेण पराजित्य सुभैरवां प्रदोषका
ले प्रविष्टो भीतयाहं तयोदितः ५० अहं लंकापुरी वीर निर्जिता विक्रमेण ते यस्मात्तस्माद्वि
जेतासि रक्षांस्यशेषतः ५१ घोरां तां ज्वलदग्नितुल्यकेशां पापां सुभैरवां खतिप्रायेन नयं करूपां
सव्यमुष्टिप्रहारेणाविजित्य प्रविष्टोस्मि विशाम् ५० ५१

सर्वरात्रं सर्वरात्रिं ५२ उपलक्षये उपालक्षयम् ५३ विकृष्टेन विप्रकृष्टोर्ध्वभागेन अत्युच्चेनेति यावत् तादृशेन प्राकारे-
णावृतं किंचित्स्थानं मया दृष्टं ५४ ततः प्राकारमवप्लुत्य बहुपादपं गृहोपवनमुद्यानं पश्यामि अपश्यं तत्र अशोकव-

तत्राहं सर्वरात्रं तु विचिन्वन्जनकात्मजाम् । रावणान्तःपुरगतां न चापश्यं सुमध्यमाम् ॥ ५२ ॥
ततः सीतामपश्यंस्तु रावणस्य निवेशने । शोकसागरमासाद्य न पारमुपलक्षये ॥ ५३ ॥ शो-
चता च मया दृष्टं प्राकारेणाभिसंवृतम् । काञ्चनेन विकृष्टेन गृहोपवनमुत्तमम् ॥ ५४ ॥
स प्राकारमवप्लुत्य पश्यामि बहुपादपम् । अशोकवनिकामध्ये शिंशपापादपो महान् ॥
५५ ॥ तमारुह्य च पश्यामि काञ्चनं कदलीवनम् । अदूराच्छिंशपावृक्षात्पश्यामि वरव-
र्णिनीम् ॥ ५६ ॥ श्यामां कमलपत्राक्षीमुपवासकृशाननाम् । तदेकवासःसंवीतां रजोध्वस्त-
शिरोरुहाम् ॥ ५७ ॥ शोकसंतापदीनाङ्गीं सीतां भर्तृहिते स्थिताम् । राक्षसीभिर्विरूपाभिः क्रूराभि-

निकामध्ये शिंशपापादपो महान् दृष्ट इति शेषः ५५ काञ्चनं तत् कदलीवनं दूराच्छिंशपावृक्षात् शिंशपावृक्षस-
मीपे वरवर्णिनीं पश्यामि अपश्यं ५६ तदेकवासः तेनैव तेन हरणकाले ऋष्यमूके दृष्टेनैकवाससा संवीताम् ५७ ५८

लोकवृत्ते लोकव्यवहारस्य प्रमापणं वधः ६ कृतज्ञत्वेनापकारित्वेऽपि वधोऽन्याय्यो नातो दृष्टोऽस्मिन् ७ त्वादृशः रतिविक्लिष्टं बहुवच

राजधर्मविरुद्धं च लोकवृत्तेश्च गर्हितम् तव चासदृशं वीर कपेरस्य प्रमापणम् ६ धर्मज्ञश्च कृतज्ञश्च राजधर्मविशारदः परावरज्ञो भूतानां त्वमेव परमार्थवित् ७ गृह्यन्ते यदि रोषेण त्वादृशोऽपि विपश्चितः ततः शास्त्रविपश्चित्त्वं श्रम एव हि केवलम् ८ तस्मात्प्रसीद शत्रुघ्न राक्षसेन्द्र दुरासद युक्तायुक्तं विनिश्चित्य दूतदण्डो विधीयताम् ९ विभीषणवचः श्रुत्वा रावणो राक्षसेश्वरः कोपेन महताविष्टो वाक्यमुत्तरमब्रवीत् १० न पापानां वधे पापं विद्यते शत्रुसूदन तस्मादेनं वधिष्यामि वानरं पापकारिणम् ११ अधर्ममूलं बहुदोषयुक्तमनार्यजुष्टं वचनं निशम्य उवाच वाक्यं परमार्थतत्त्वं विभीषणो बुद्धिमतां वरिष्ठः १२ १२

ने शास्त्रविपश्चित्त्वं शास्त्रपाण्डित्यं तत्संपादनश्रमः केवलं श्रम एव व्यर्थप्रयास एवेत्यर्थः ८ दूतदण्डः दूतविहितो दण्डः ९ १० पापकारिणां राजद्रोहिणाम् ११ अधर्मस्य मूलम् अधर्ममूलं दोषोऽपकीर्तिरूपः १२

व्याघ्रीपरिवृतो हरिणीमिव तामपश्यामीति संबंधः राक्षसीमध्ये तामिरेव तर्ज्यमानां सास्रदुःखामपां कथंचिन्तूर्णमासादितेस
न्वयः ५९ ६० रावणाद्विनिवृत्तो विनिवृत्तो विनिवर्तितोर्थः प्रयोजनं यया मर्तव्ये मरणे कृतनिश्चये [illegible] ६१ ६२ शृणोमिश्र

मांसशोणितभक्ष्याभिर्व्याघ्रीभिर्हरिणीं यथा तामपारक्षसीमध्ये तर्ज्यमानां मुहुर्मुहुः ५९ ए
कवेणीधरां दीनां भर्तृचिन्तापरायणाम् भूमिशय्यां विवर्णाङ्गीं पद्मिनीमिव हिमागमे ६० रावणाद्वि
निवृत्तार्थां मर्तव्ये कृतनिश्चयाम् कथंचिन्मृगशावाक्षीं तूर्णमासादितां मया ६१ तां दृष्ट्वा तादृ
शीं नारीं रामपत्नीमनिन्दिताम् तत्रैव शिंशुपावृक्षे पश्यन्नहमवस्थितः ६२ ततो हलहलाशब्दं
काञ्चीनूपुरमिश्रितम् शृणोम्यधिकगम्भीरं रावणस्य निवेशने ६३ ततोहं सुभृशोद्विग्नः
स्वरूपं प्रत्यसंहरम् अहं च शिंशुपावृक्षे पक्षीव गहने स्थितः ६४ ततो रावणदाराश्च राव
णश्च महाबलः तं देशमनुसंप्राप्तो यत्र सीताभवत्स्थिता ६५ तं दृष्ट्वाथ वरारोहा सीता रक्षोगणे
श्वरम् संकुच्योरू स्तनौ पीनौ बाहुभ्यां परिरभ्य च ६६ वित्रस्तां परमोद्विग्नां वीक्षमाणां मितस्त
स्ततः त्राणं किंचिदपश्यन्तीं वेपमानां तपस्विनीम् ६७

तदा रावणस्य निवेशने सीतासमीपं प्रकाले ६३ प्र
स्वसंहरं सूक्ष्ममकरवं गहने पर्णसमूहगूढप्रदेशे ६४ ६५ परिरभ्य चेति वित्रस्तेव बभूवेति शेषः ६६ ६७
वेश्मन

स

तामुवाच दशग्रीवः सीतां परमदुःखिताम् अवाक्शिराः प्रपतितो बहुमन्यस्व मामिति ६८
यदि चेत्त्वं तमोदर्पाल्लामिनं दस्यगर्विते दौमासावेतरसीते पास्यामि रुधिरं तव ६९
एतच्छ्रुत्वा वचस्तस्य रावणस्य दुरात्मनः उवाच परमक्रुद्धा सीता वचनमुत्तमम् ७० राक्ष
साधम रामस्य भार्याममिततेजसः इक्ष्वाकुवंशनाथस्य स्नुषां दशरथस्य च अवाच्यं व
वदतो जिह्वा कथं न पतिता तव ७१ किंचिद्वीर्यं तवानार्य यो मां भर्तुरसंनिधौ अपहृ
त्यागतः पाप तेनादृष्टो महात्मना ७२ न त्वं रामस्य सदृशो दास्येऽप्यस्य न युज्यसे अजेयः स
त्यवाक् शूरो रणश्लाघी च राघवः ७३ जानक्या परुषं वाक्यमेवमुक्तो दशाननः जज्वा
ल सहसा कोपाच्चितास्थ इव पावकः ७४ विवृत्य नयने क्रूरे मुष्टिमुद्यम्य दक्षिणम् मैथिली
हंतुमारब्धः स्त्रीभिर्हाहाकृते तदा ७५ अपतन्यथा तदैवतैहननं स्यादित्यर्थः २२ सादृश्यप्रसंभावनापि दूरापास्तेत्याह

मंदोदरीनामेति पूर्वं धान्यमालिन्याशंतिर्षिद्ध एवमुक्तं इदानीं मंदोदर्याः सन्निधानाद्भाम्यामपीति कल्प्यते तथा च संग्रहामंदोदर्या

स्त्रीणां मध्यात्समुत्सृज्य तस्य भार्या दुरात्मनः । एवं मंदोदरी नाम तया स संप्रतिबोधितः ७६ उक्त्वा श्च
मधुरां वाणीं तया सम मदनार्दितः ७७ सीतया तव किं कार्यं महेंद्रसमविक्रम मया सह रमस्वाद्य
मद्विशिष्टा न जानकी ७८ देवगंधर्वकन्याभिर्यक्षकन्याभिरेव च सार्धं प्रभो रमस्वेति
सीतया किं करिष्यसि ७९ ततस्ताभिः समेताभिर्नारीभिः स महाबलः प्रसाद्य सहसा नीतो
भवनं स्वं निशाचरः ८० याते तस्मिन्दशग्रीवे राक्षस्यो विकृताननाः सीतां निर्भर्त्सयां
मासुर्वाक्यैः क्रूरैः सुदारुणैः ८१ तृणवद्भाषितं तासां गणयामास जानकी तर्जितं च
तदा तासां सीतां प्राप्य निरर्थकम् ८२ वृथा गर्जितनिश्चेष्टा राक्षस्यः पिशिताशनाः
रावणाय शशंसुस्ताः सीताव्यवसितं महत् ८३

एवं सा नामांतरं धान्यमालिनीति ७७ ७८ ७९ ८०
८१ निरर्थकमासीदिति शेषः ८२ सीताव्यवसितं महत् मत्तोऽन्यं न तु लभमीकर्तव्यमित्येतद्रूपम् ८३

रा० वा० सुं०
२०४

विहताशा शरणाभावात् अनुकूल्यमस्माभिरेव प्रपंपादनीयमिति ताः सामाशा अतएव तद्विषये निरुद्यमाः परिक्षिप्येति पूर्वव्यापार कृतेः क्लेशः ८४ विलप्य प्रशुशोच विलापपूर्वकं शोकं चकार ८५ ८६ रक्षो विनाशकत्वाद्दारुणो महर्षणाः ८७ राक्षसी

ततस्ताः सहिताः सर्वा विहताशा निरुद्यमाः परिक्षिप्य समन्तात्तां निद्रावशमुपागताः ८४
तास्त्वेवं प्रसुप्तासु सीता भर्तृहिते रता विलप्य करुणं दीना प्रशुशोच सुदुःखिता ८५ ता
सां मध्यात् समुत्थाय त्रिजटा वाक्यमब्रवीत् आत्मानं खादत क्षिप्रं न सीता विनशिष्यति ज
नकस्यात्मजा साध्वी स्नुषा दशरथस्य च ८६ स्वप्नो ह्यद्य मया दृष्टो दारुणो रोमहर्षणः र
क्षसां च विनाशाय भर्तुरस्या जयाय च ८७ अलमस्मात् परित्रातुं राघवाद्राक्षसीगणम् अ
भियाचाम वैदेहीमेतद्धि मम रोचते ८८ यदि ह्येवंविधः स्वप्नो दुःखितायाः प्रदृश्यते सा दुः
खैर्विविधैर्मुक्ता सुखमाप्नोत्यनुत्तमम् प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा अलमेषा
८९ परित्रातुं राक्षस्यो महतो भयात् ९०

गणामस्मात् राक्षसीरूपात् अस्मान् परित्रातुमलमेषा सीतेति शेषः अभियाचाम स्वरक्षणायेति शेषः ८८ एषा परित्रातुमलं तत्र हेतुः सर्वः अपराधिजनपरित्राणे हेतुः प्रणिपात इति ९०

राम०
२०४

ततस्त्रिजटावाक्यानंतरं कृतावस्थानामिति सच्चिताविजटा कथितस्वप्नसूचितरामविजयहर्षितानां तत्त्रिजटास्वप्नवाक्यं
तथ्यं यदि तदावः प्रारब्धं भवेद्यमिस्य वो वदिति सेवं धा ९१ प्रहं चिंतयामासेति लिङु तमः ईदृशा गपी दृशोदुःखमिति लिवि

ततः साहृीमतीवाल्नामतुर्विजयहर्षिता ध्रुवोवचयदि तत्तथ्यं भवेयं प्रारब्धो हि वः ९१ तांचाहं
तादृशीं दृष्ट्वा सीतायादारुणां दशाम् चिंतयामास विक्रांतो नचमे निर्वृतं मनः ९२ संभाव
णार्थं च मयाजानक्याश्चिंतितो विधिः इक्ष्वाकुकुलवंशस्तु ततो मम पुरस्कृतः ९३ श्रुत्वा
तु गदितां वाचं राजर्षिगुणभूषिताम् प्रत्यभाषत मां देवी बाष्पैः पिहितलोचना ९४ कस्त्वं के
न कथं चेह प्राप्तो वानरपुंगव कः च रामेण ते प्रीतिस्तन्मे शंसितुमर्हसि ९५ तस्यास्तद्वचनं श्रुत्वा
ह्यहमप्यब्रुवं वचः ९६ देवि रामस्य भर्तुस्ते सहायो भीमविक्रमः सुग्रीवो नाम विक्रांतो वानरेंद्रो
महाबलः ९७ तस्य मां विद्धि भृत्यं च हनूमंतमिहागतम् भर्त्रा संप्रहितं तुभ्यं रामेणाक्लिष्टकर्म
णा ९८

तोकृतवानित्यर्थः मममनो न च निर्वृतं न चिंतारहितं जातं ९२ विधिरुपायः ममस्तु ततो मयास्तुतः ९३ ९४ ९५ ९६ ९७

९९ त्वयाज्ञप्तं त्वत्कर्तृकमाज्ञापनं किंमुत्तरं किं ब्रूहीति शेषः १०० उत्पाद्य समूलेनापि सित्वा १०१ १०२ १०३ सं
१० वा० सुं० दि० देशगामि केवेद्यतिलकनिर्माणादिकं संदिष्टवतीत्यर्थः १०४ रहाभ्युद्गतमानसः रहागतुनिश्चितमानसः ११५
२०५

इदं तु पुरुषव्याघ्रः श्रीमान्दाशरथिः स्वयम् अंगुलीयमभिज्ञानमदात्तुभ्यं यशस्विनि ९९
तदिच्छामि त्वयाज्ञप्तं देवि किं करवाण्यहम् रामलक्ष्मणयोः पार्श्वे नयामि त्वां किमुत्तरम्
१०० एतत् श्रुत्वा विदित्वा च सीता जनकनंदिनी आह रावणमुत्साद्य राघवो मां नयत्विति
१०१ प्रणम्य शिरसा देवीमहमार्यामनिंदिताम् राघवस्य मनोह्लादि द्वितीयमभिज्ञानम्
याचिषम् १०२ अथ मामब्रवीत्सीता गृह्यतामयमुत्तमः मणिर्येन महाबाहू रामस्त्वां बहुम
न्यते १०३ इत्युक्त्वा तु वरारोहा मणिप्रवरमुत्तमम् प्रायच्छत्परमोद्विग्ना वाचा मां संदिदे
श ह १०४ ततस्तस्यै प्रणम्याहं राजपुत्र्यै समाहितः प्रदक्षिणं परिक्रम्य रहाभ्युद्गतमानसः
१०५ उत्तरं पुनरेवाह निश्चित्य मनसा तदा हनूमन्मम वृत्तांतं वक्तुमर्हसि राघवे १०६ यथा
श्रुत्वैव न चिरात्तावुभौ रामलक्ष्मणौ सुग्रीवसहितौ वीरावुपेयातां तथा कुरु १०७

मम वृत्तांतं त्वयानुभूतं मद्विषये रावणराक्षसीवृत्तांतम् १०६ १०७ १०७ १०७ १०७ १०७ १०७ १०७

पत्यमात् अन्यथा ऽनागमने द्वौमासौ मम जीवनं भवेत् पुना पश्चात्प्रियाराक्षसी कृतवधेनेति भावः १०८ उत्तरं कार्यं प्राप्य

यद्यन्यथा भवेदेतत् द्वौमासौ जीवितं मम न मां द्रक्ष्यति काकुत्स्थो म्रियेऽहमनाथवत् १०८
तच्छ्रुत्वा करुणं वाक्यं क्रोधो मामभ्यवर्त्तत उत्तरं च मया दृष्टं कार्यं प्राप्तमनुत्तमम् १०९ ततो
ऽवर्द्धत मे कायः तदा पर्वतसन्निभः युद्धकांक्षी वनं तच्च विनाशयितुमारभे ११० तद्भग्नं व
नखण्डं तु भ्रान्तत्रस्तमृगद्विजम् प्रतिबुद्धा निरीक्षन्ते राक्षस्यो विकृताननाः १११ मां च दृष्ट्वा व
ने तस्मिन् समागम्य ततस्ततः ताः समभ्यागताः क्षिप्रं रावणायाचचक्षिरे ११२ राजन्वन
मिदं दुर्गं तव भग्नं दुरात्मना वानरेण ह्यविज्ञाय तव वीर्यं महाबलः ११३ दुर्बुद्धेस्तस्य राजेन्
द्र तव विप्रियकारिणः वधमाज्ञापय क्षिप्रं यथासौ विलयं व्रजेत् ११४ ततश्रुत्वा राक्ष
सेन्द्रेण विसृष्टा भृशदुर्जयाः राक्षसाः किंकरा नाम रावणस्य मनोऽनुगाः ११५ तेषामशी
तिसाहस्रं शूलमुद्गरपाणिनाम् मया तस्मिन्वनोद्देशे परिघेण निषूदितम् ११६ ११६

लंकानाशनरूपं ९ १० ११ समागम्य मिलित्वा १२ १३ १४ १५ १६

तेषांतुहतशिष्टायेतेगत्वालघुविक्रमाः निहतंचमयासैन्यंरावणायाचचक्षिरे ११७
ततोमेबुद्धिरुत्पन्नाचैत्यप्रासादमुत्तमम् तत्रस्थान्राक्षसान्हत्वाशतंस्तंभेनवैपुनः ११८
ललामभूतोलंकायामयाविध्वंसितोरुषा ततःप्रहस्तस्यसुतंजंबुमालिनमादिशत् ११९
राक्षसैर्बहुभिःसार्द्धंघोररूपैर्भयानकैः तमहंबलसंपन्नंराक्षसंरणकोविदम् १२०
परिघेणातिघोरेणसूदयामिमहानुगम् ततःश्रुत्वाराक्षसेंद्रस्तुमंत्रिपुत्रान्महाबलान् १२१
पदातिबलसंपन्नान्प्रेषयामासरावणः परिघेणैवतान्सर्वान्नयामियमसादनम् १२२
मंत्रिपुत्रान्हतान्श्रुत्वासमरेलघुविक्रमान् पंचसेनाग्रगान्शूरान्प्रेषयामासरावणः
१२३ तानहंसहसैन्यान्वैसर्वानेवाभ्यसूदयम् ततःपुनर्दशग्रीवःपुत्रमक्षंमहाबलम्
१२४ बहुभीराक्षसैःसार्द्धंप्रेषयामाससंयुगे तमहंमंदोदरीपुत्रंकुमारंरणपंडितम् १२५

११७ चैत्यप्रासादंविनाशयितुमितिश्लोकः ११८ ललामभूतश्चैत्यप्रासादइतिश्लोकः ११९ १२० १२१ १२२ १२३ १२४ १२५

१२६ द्वितीयं प्रेषितप्रत्ययेक्षया द्वितीयं १२७ १२८ महता प्रत्ययेन विश्वासेन १२९ १३० प्रबध्वा प्रबध्या राक्षसेभ्योऽर्थ

सहसा वेगमुद्धूतं पादयोश्च गृहीतवान् चर्मनिर्मितपाशाभ्यामपि बध्वा व्यपेतभयम् १२६ तमक्षमागतं भग्नं निशम्य स दशाननः ततश्चेन्द्रजितं नाम द्वितीयं रावणः सुतम् १२७ व्यादिदेश सुसंक्रुद्धो बलिनं युद्धदुर्मदम् तस्याप्यहं बलं सर्वं तं च राक्षसपुंगवम् १२८ नष्टौजसं रणे कृत्वा परं हर्षमुपागमम् महतापि महाबाहुः प्रत्ययेन महाबलः १२९ प्रहितो रावणेनैष सह वीरैर्मदोद्धतैः सोऽविषह्यं हि मां बुध्वा स्वबलं चावमर्दितम् १३० ब्राह्मेणास्त्रेण स तु मां प्रबध्वा चातिवेगतः रज्जुभिश्चापि बध्नन्ति ततो मां तत्र राक्षसाः १३१ रावणस्य समीपं च गृहीत्वा मामुपागमन् दृष्ट्वा संभाषितश्चाहं रावणेन दुरात्मना १३२ प्रब ध्वलंकागमने राक्षसानां च तं वधम् तत्सर्वं च रणे तत्र सीतार्थमुपजल्पितम् १३३ ३२२

यदिति शेषः बध्नन्ति १३१ प्रबध्न र १३१ १३२ सीता र्थं मिति कथित मि त्यर्थः १३३ ३३

रा० वा० सु० एष्याहं दर्शनाकांक्षी त्वत्संदर्शः लब्धं वनेप्राप्तोहं हनुमानित्यह मित्यस्य चक्षुर्द्वयस्यति वीहः १३४ १३५ १३६
२०७

१ एष्याहं दर्शनाकांक्षी प्राप्तस्त्वन्मद्वनं विभो मारुतस्यौरसः पुत्रो वानरो हनुमानहम् १३४
रामदूतं च मां विद्धि सुग्रीवसचिवं कपिम् सोहं दौत्येन रामस्य त्वत्सकाशमिहागतः १३५
शृणु चापि समादेशं यदहं प्रब्रवीमि ते राक्षसेशं हरि श्रुत्वा वाक्यं प्राह समाहितम् १३६
सुग्रीवश्च महाभाग स त्वां कौशलमब्रवीत् धर्मार्थकामसहितं हितं पथ्यमुवाच ह १३७ व
सतो ऋष्यमूके मे पर्वते विपुलद्रुमे राघवो रणविक्रान्तो मित्रत्वं समुपागतः १३८ तेन मे
कथितं राजन् भार्या मे रक्षसा हृता तत्र साहाय्यहेतोर्मे समयं कर्तुमर्हसि १३९ वालिना
हृतराज्येन सुग्रीवेण सह प्रभुः चक्रेऽग्निसाक्षिकं सख्यं राघवः सहलक्ष्मणः १४० तेन
वालिनमाहत्य शरेणैकेन संयुगे वानराणां महाराजः कृतः संप्लवतां प्रभुः १४१॥

धर्मार्थकामसहितं धर्मसहितं त्वाच्छितं परलोकोपयोग धर्मकामयुक्तत्वात् पथ्यं ३७ १३८ समये प्रतिज्ञा १३९ १४० वानराणां

महाराजः॥ श्रीः॥ अथ मिलितश्लोकः १४१

रा० सु०
२०७

समयेषुरक्षस्वामिनियोगानुष्ठानकालेषु १३ १४ मौंड्यं मुंडनं लक्ष्मणसन्निपातः वैरूप्यादीनामेकैकं वा तथा लक्षणानां सन्निपातः सर्वानु

प्रसीद लंकेश्वर राक्षसेंद्र धर्मार्थयुक्तं वचनं शृणुष्व दूतानवध्यान्समयेषु राजन्सर्वेषु सर्वत्र वदं
ति संतः १३ असंशयं शत्रुरयं प्रवृद्धः कृतं ह्यनेनाप्रियमप्रमेयम् न दूतवध्यां प्रवदंति
संतो दूतस्य दंडा बहवो हि दृष्टाः १४ वैरूप्यमंगेषु कशाभिघातो मौंड्यं तथा लक्षणसंनिपात
म ए तान् हि दूते प्रवदंति दंडान् वधस्तु दूतस्य न नः श्रुतो वै १५ कथं च धर्मार्थविनीतबुद्धिः प
रावरप्रत्ययनिश्चितार्थः भवद्विधः कोपवशेमितिष्ठेत्कोपं नियच्छंति हि सत्ववंतः १६ ६।

ष्टानं वेसर्पणः दूतस्य वधस्तु नोस्माकं श्रुतोपि नास्ति दृष्टीतं तु दूरापास्तमिति भावः १४ परावरप्रत्ययनिश्चितार्थः उत्कृष्टापकृष्टज्ञानेन नि
श्चितकार्यः १६ अस्मिन्विषये इदं परं इदमवरमिति विवेकेन निश्चितप्रयोजन इत्यर्थः सत्ववंतः व्यवसायवंतः १६ श्रीसीतारामाय।

तस्य एतस्य तेन एतस्य साहाय्यस्य कर्त्तव्यत्वेन तुभ्यं समीपं तव समीपं प्रस्थापितो दूत इति शेषः दूतप्रेषणं विना प्रथममेव कृत्स्ना धर्मत्वादिति भावः १४२ सीतादानाभावे बाधकमाह यावदिति विधर्मं तिविधर्मिष्ठेति १४३ नैकानां प्राने वानरा

तस्य साहाय्यमस्माभिः कार्यं सर्वात्मना त्विह । तेन प्रस्थापितस्तुभ्यं समीपमिह धर्मितः १४२
क्षिप्रमानीयतां सीता दीयतां राघवस्य तु । यावन्न हरयो वीरा विधमन्ति बलं तव १४३ वा-
नराणां प्रभावो हि न केन विदितः पुरा । देवतानां सकाशं च ये गच्छन्ति निमन्त्रिताः १४४
इति वानरराजस्त्वामाहेत्यभिहितो मया । मामैक्षत ततो रुष्टश्चक्षुषा प्रदहन्निव १४५
तेन वध्योऽहमाज्ञप्तो रक्षसा रौद्रकर्मणा । मत्प्रभावमविज्ञाय रावणेन दुरात्मना १४६ ततो
विभीषणो नाम तस्य भ्राता महामतिः । तेन राक्षसराजः स याचितो मम कारणात् १४७

तेषां सामर्थ्यमस्तीत्याशयेनाह वानराणामिति येनिमन्त्रिताः पुरुषसाहाय्यार्थमाहताः देवताः देवतानां सकाशं गच्छन्ति तेषां वानराणां प्रभावः पुरा केन विदितः न विज्ञातो हि १४४ १४५ मत्प्रभावं वरदानं लब्ध्वा वध्यत्वरूपम् १४६ १४७

रा०वा०सु० नैवं प्रथमवध्य इत्यर्थः एवमिति प्रश्नः एतद्धननिश्चयः संलक्ष्यते विचार्यते १४८ वेदितव्यं निवेदनीयं एवं चैवमुक्तिर्दूतस्य
२०८

नैवंराक्षसशार्दूलत्वत्तोमेधननिश्चयः राजधर्माद्व्यपेतोहिमार्गःसंलक्ष्यतेत्वया १४८ दूत
वध्यानदृष्टाहिराजधर्मेषुराक्षस दूतेनवेदितव्यंचयथार्थंहितवादिना १४९ सुमहत्य
पराधेचदूतस्यामितविक्रम विरूपकरणंदृष्टंनवधोऽस्तीतिहिशास्त्रतः १५० विभीषणेनै
वमुक्तोरावणःसंदिदेशतान् राक्षसानेतदेवास्यलांगूलंदह्यतामिति १५१ ततस्तस्य
वचःश्रुत्वाहनुमत्पुच्छंसमंततः वेष्टितंशणवल्कैश्चपटैःकार्पासकैस्तथा १५२ राक्षसाः
सिद्धसन्नाहास्ततस्तेचंडविक्रमाः तदादीप्यंतेमपुच्छंनिघ्नंतःकाष्ठमुष्टिभिः १५३ बद्धस्य
बहुभिःपाशैर्यंत्रितस्यचराक्षसैः नमेपीडाभवत्कापिदिदृक्षोर्नगरींदिवा १५४ ततस्तेरा
क्षसाःशूराबद्धंमामग्निसंवृतम् अघोषयन्राजमार्गेनगरद्वारमागताः १५५ सीताराम

राम०
२०८

नापराधइत्यर्थः १४९ १५० १५१ १५२ १५३ यंत्रितस्यनिरुद्धस्य १५४ नगरद्वारमागताःसंतःराजमार्गेअघोषयन्नित्यन्वयः १५५

१५६ १५७ १५८ १५९ १६० १६१ विस्मयोदंतभाषिणां विस्मयकारी यद् उदंतो वृत्तांतस्तद्भाषिणां तेषां वदतां १६२
निमित्तैश्चोपलक्षिता प्राकृतैर्दग्धिमिश्च सीता न दग्धेति निश्चितैस्तैः निमित्तान्याह दीप्यमान इत्यादि १६३ हृदयं च

२५

ततो हं सुमहद्रूपं संक्षिप्य पुनरात्मनः विमोचयित्वा तेनैव बंधं शत्रुकृतं स्वयं पुनः स्थितः १५६ अथ प्रसंप
रिघं गृह्य तान्निरक्षांस्समूदयम् ततस्तन्नगरद्वारं वेगेनाप्लुतवानहम् १५७ पुच्छेनैव प्रदी
प्तेन पुरीं सार्द्धं लंकां गोपुराम् ददाह महमसंभ्रांतो युगांताग्निरिव प्रजाः १५८ विनष्टा जानकी
व्यक्तं न ह्यदग्धः प्रदृश्यते लंकायां कश्चिदुद्देशः सर्वा भस्मीकृता पुरी १५९ दहता च मया लं
कां दग्धा सीता न संशयः रामस्य हि महत्कार्यं मयैवेदं वितथीकृतम् १६० इति शोकसमाविष्ट
श्चिंतामहमुपागतः अथाहं वाचमश्रौषं चारणानां शुभाक्षराम् १६१ जानकी न च दग्धेति वि
स्मयोदंतभाषिणाम् ततो मे बुद्धिरुत्पन्ना श्रुत्वा तामद्भुतां गिरम् १६२ अदग्धा जानकीत्येवं निमित्तै
श्चोपलक्षिता दीप्यमाने तु लांगूले न मां दहति पावकः १६३ हृदयं च प्रहृष्टं मे वाताः सुरभिगंधि
नः तैर्निमित्तैश्च दृष्टार्थैः कारणैश्च महागुणैः १६४ हृदयं प्राप्तासीदिति शेषः सुरभिगंधिनः आसन्निति शेषः दृ
ष्टार्थैः दृष्टं सेवादैः महागुणैः कारणैः सत्त्व व तिकारणैः सीतारामरूपैः १६५

रा० वा० सुं० सिद्धार्थैरवाधितार्थैः पुनरिष्यधर्मैकं वा कर्यविस्रब्धः प्रेरितोस्मि १६५ तत्र लंकासमीपे वर्तमानं ऽप्यरिष्टप
२०९

ऋषिवाक्यैश्च सिद्धैश्च चैरमवेद्यमानतः पुनर्दृष्टा च वैदेही विस्रब्धस्तु तया पुनः १६५
ततः पर्वतमासाद्य तत्रारिष्टमहं पुनः प्रति प्लवनमारेभे युष्मद्दर्शनकांक्षया १६६ ततः
पवनचंद्रार्कसिद्धगंधर्वसेवितम् पंथानमहमाक्रम्य भवतो दृष्टवानिह १६७ राघवस्य प्रभा
देन भवतां चैव तेजसा सुग्रीवस्य च कार्यार्थं मया सर्वमनुष्ठितम् १६८ एतत्सर्वं मया तत्र
यथावदुपपादितम् अत्रोपपन्नं मे प्रोक्तं तास्तु वै क्रियतामिति १६९ ॥ इति श्रीमद्रामाय
णे वाल्मीकीये सुंदरकांडे ष्टपंचाशः सर्गः ॥ ५८ एतदाख्याय तत्सर्वं हनूमान्मारु
तात्मजः भूयः समुपचक्राम वक्तुं वचनमुत्तरम् १

वेतं प्रारे भे लिंदुत्तमः १६६ भवतो दृष्टवान् १६७ तम...
१६८ १६९ इत्यष्टपंचाशः सर्गः ५८ एतदाख्याय उत्तरं वचनं वक्तुमुपचक्राम मे तत्त्वतः १ ... १२०९

अथ संश्रये व रावणं जित्वा सीतायाः सन्देशो हनुमानिति पात्रप्रमिति हृदि निधायाह सफलमित्यादि संभ्रम आदर उत्साह इत्यर्थः कुतः साफल्य
मित्याशंक्य सीतायाति वृत्तोपलम्भादित्याह प्रीतिमिति सीतायाः प्रीतिं संदृष्टं पाति वृत्तमासाद्य दृष्ट्वा राघवोद्योगादेः साफल्य
स्यानेन मम च मनः श्रवणं संतोषश्रवणं मम भूदिति प्राचः सीतायाति वृत्तस्य न किंचित्साध्यमस्तीति मम निश्चयो भूदिति भावः
२ सदृशं पतिव्रतानामरुन्धत्यादीनां सदृशामित्यर्थः ३ तर्हि दुरात्मानं रावणं किमिति न दहदित्यत आह सर्वथेति प्रतिप्रवृद्धः म

सफलो राघवोद्योगः सुग्रीवस्य च संभ्रमः प्रीतिमासाद्य सीताया मम च श्रवणं मनः २ आर्या
याः सदृशं प्रीतिं सीतायाः श्रवणार्थिभाः तपसा राघवेन्द्रो कान् क्रुद्धा वा निर्दहेदपि ३ सर्वथापि
प्रवृद्धोसौ रावणो राक्षसेश्वरः यस्य सेव्य प्राप्तो गात्रे तपसा न विनाशितम् ४ न तदग्निशिखा वा
कुर्यात्स्वष्टापापिनाः सती जनकस्य सुता कुर्याद्यत्क्रोधकलुषीकृता ५ सीतापमाराम

हात्तयः संपन्न इत्यर्थः अप्रतप वृत्तो सीतां स्पृष्टो तोपि यस्य गात्रे तपसा न विनाशितमिति संबंधः ४ तर्हि सीताप्रीत्ये दुर्वृत्तमस्माकं कि
मुपकरिष्यतीत्याशंक्याद्दुर्वृत्तेन भवतीत्याह न तदिति जनकस्यात्मजा क्रोधकलुषीकृता सती यत्कुर्यात्तत्स्वष्टाग्निशिखा वा
पि न कुर्यादिति संबंधः क्रोधकलुषीकृतेति विश्रावणान्मद्वर्तः मुखेन वैरनिर्यातनं वीरपत्नीधर्मः अपतो द्याघापि भर्तृवी
र्यपरिपालनायतादृक्क्रोधाकारणाद्रावणो जीवति अत एव प्रागसंदेशान्तु रामस्य प्रोक्तमिति भावः ५ ५ ५

रा० वा० सुं० इदानीं स जयोपिष्यामि त्वयएवेति कृत्वा वयमेव सीतां प्राप्ता इति प्रसमहिम्ना रावणं जित्वा देव्या सह रघवोद्रष्टव्या

२१०

मह स्याहजांववत्प्रमुखान् जांववदादीननुज्ञाप्य अनुज्ञां कुर्वित्विति सेश्यर्थः अस्मिन् कार्ये सीतान्वेषणरूपे एवं गते उक्तप्रका रप्राप्ते तत्कारविश्लिष्टे च भवतां निवेदिते सति तौ पार्थिवात्मजौ वैदेह्या सह द्रष्टुं न्याय्यमिति संवन्धः इति शेषः ६ न चा त्र शङ्किशंका कार्येत्याह अहमेकोपीत्यादि एवं च एकस्मान् हत्वा देव्यानयनं कृत्वा देव्यासहेवतौ द्रष्टव्याविति शेषः ७ कृतास्त्रै

जांववत्प्रमुखान्सर्वाननुज्ञाप्य महाकपीन् अस्मिन्नेवंगते कार्ये भवतां च निवेदिते न्याय्यंस्म सह वैदेह्या द्रष्टुं तौ पार्थिवात्मजौ ६ अहमेकोपि पर्याप्तः सराक्षसगणां पुरीम् तां लङ्कां तरसा हन्तुं रावणं च महाबलम् ७ किं पुनः सहितो वीरैर्बलवद्भिर्महाबलैः कृतास्त्रैः प्लवगैः शक्तै र्भवद्भिर्विजयैषिभिः ८ अहं तु रावणं युद्धे ससैन्यं सपुरःसरम् सहपुत्रं वधिष्यामि सहोदरयुतं युधि ९ ब्राह्ममैन्द्रं च रौद्रं च वायव्यं वारुणं तथा १० यदि शक्रजितोस्त्राणि दुर्निरीक्ष्याणि संयुगे

विधमि

तान्यहं निहनिष्यामि विधमिष्यामि राक्षसान् ११ देवान्प्राप्य वाद स्वप्रयोगसमर्थैः ८ उक्तमेवार्थं संभ्रमेण पुनराह अहं हेल

ला अहमेवेत्यर्थः ९ तथा सर्वाण्यस्त्राणि च वधिष्यामि १० यद्यपि दुर्निरीक्ष्याणि तथापि तान्यहं निहनिष्यामि वृत्त्या वरदाना न्निवारयिष्यामि पश्चात्तैस्तैरवरक्षकान्विधमिष्यामि हनिष्यामि अप्रमन्तुज्ञातः अप्रमत्तेन नाना वेविक्रमः तेन वरो हृदा

रा०म० २१०

१२ भवतामनुज्ञातः अनुज्ञां विना मे विक्रमो राक्षसवधप्रवृत्तिर्मा रुणद्धि प्रतः पूर्वमेवमयाऽनपराक्रान्तमित्यर्थः १३ हृदा
नीसर्वम वंतस्तद्वधे समर्थोऽस्मीत्याह सागरोपीति १४ येच पूर्वजा राक्षसास्तेषां नाशाये कोपीत्यन्वयः १५ १६ १७ १८

भवताम्भ्यनुज्ञातो विक्रमो मे रणाह्नितम् मयाऽतुल्यो विसृष्टो हि शैलस्यापि निरंतरं देवानपि
रणे हन्यात्किं पुनस्तान्निशाचरान् १२ भवतामनभ्यनुज्ञातो विक्रमो मे रुणद्धि माम् १३ सागरश्च
तियाद्वेलां मंदरः प्रचलेदपि न जांबवंतं समरे कंपयेदरिवाहिनी १४ सर्वराक्षससंघानां राक्ष
सा ये च पूर्वजाः अलमेको विनाशाय वीरो वालिसुतः कपिः १५ पनसस्योरुवेगेन नीलस्य च महा

स्व

त्मनः मंदरोप्यवशीर्येत किं पुनर्युधि राक्षसाः १६ सदेवासुरयक्षेषु गंधर्वोरगपक्षिषु मैंदस्य प्र
तियोद्धारं शंस द्विविदस्य वा १७ अश्विपुत्रौ महाभागावेतौ प्लवगसत्तमौ एतयोः प्रतियो
द्धारं न पश्यामि रणाजिरे १८ मयैव निहता लंका दग्धा भस्मीकृता पुरी राजमार्गेषु सर्वेषु ना
म विश्रावितं मया १९ मयैव निहतानिहतप्राया एवं च सर्वैर्मिलित्वा नाशनीये ति किं वाच्यमिति भावः नाम

श्रावितं सुग्रीवादेरिति शेषः १९

रा० वा० सुं० तदेवाह जयतीति २० २१ सीतादुःखविमर्षिपिसंप्रश्ने वसमाने तु सुचिंतेतित दृष्टां वर्णयति अशोके त्यादि २२ २३ अचिं
२११ तयंतीयोग्यत्वेनागण्यंतीअगणनेहेतुः पतिव्रतेति अगणना चेवष्टब्धानिरुद्धाश्वस्तोत्तिशेषः २४ रामे रामसमी

जयसत्तिबलो रामो लक्ष्मणश्च महाबलः राजा जयति सुग्रीवो राघवेणाभिपालितः २० अहं
कोसलराजस्य दासः पवनसंभवः हनूमानिति सर्वत्र नाम विश्रावितं मया २१ अशोकवनिकाम
ध्ये रावणस्य दुरात्मनः अधस्ताच्छिंशपामूले साध्वी करुणमास्थिता २२ अ[illegible]
राक्षसीभिः परिवृता शोकसंतापकर्शिता मेघलेखापरिवृता चंद्रलेखेव निष्प्रभा २३
अचिंतयंती वैदेही रावणं बलदर्पितम् पतिव्रता च सुश्रोणी अवष्टब्धा च जानकी २४
अनुरक्ता हि वैदेही रामं सर्वात्मना शुभा अनन्यचित्ता रामे सा पौलोमीव पुरंदरे २५ तदेक
वासः संवीता रजोध्वस्ता तथैव च सा मया राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः २६ राक्षसीभि
र्विरूपाभिर्दृष्टा हि प्रमदावने एकवेणीधरा दीना भर्तृचिंतापरायणा २७ सीतारामायनमः राम

ता अनन्यचित्ता पौलोमीव पुरंदरे इति न हु परुद्धापीति भावः राक्षसीभिस्तर्ज्यमाना दृष्टेत्युत्तरेणान्वयः २६ २७ राम

२८ कथंचित् प्रश्नादौ तूष्णीं रामकथाश्रुत्या येन सर्वमर्थं रामसुग्रीवसख्यं तोत्तम् तदेवाह रामसुग्रीवसख्यं चेति २९ नियतः समुदाचा
रो दृढपातिव्रत्यं भर्तरि उत्तमा भक्तिश्चास्ति स्वस्यापि सामर्थ्याद्दशाननं प्रायादिन्नानहं तीति यत् अतः स द्दशाननो महात्मा श्रा

ऽधः प्राप्ता विवर्णांगी पद्मिनीव हिमोदये एवमास्थितवृत्ता या धर्मतत्परा कृतनिश्चया २८ कथं
चिन्मृगशावाक्षी विश्वासमुपपादिता ततः संभाषिता चैव सर्वमर्थं प्रदर्शिता रामसुग्रीवसख्यं
च श्रुत्वा प्रीतिमुपागता २९ नियतः समुदाचारो भक्तिर्भर्तरि चोत्तमा यन्न हंति दशग्रीवं स महा
त्मा दशाननः ३० निमित्तमात्रं रामस्तु वधे तस्य भविष्यति ३१ सा प्रकृत्यैव तन्वंगी तद्वियोगा
च्च कर्शिता प्रतिपत्पाठशीलस्य विद्येव तनुतां गता ३२ एवमास्ते महाभागा सीता शोकपराय
णा यदत्र प्रतिकर्तव्यं तत्सर्वमुपकल्प्यताम् ३३ ॥ इति श्रीमदार्षे रामायणे सुंदरकांडे एकोनषष्टि
तमः सर्गः ॥ ५९ ॥

यन्निबंधनदुर्मरणाभावादिति भावः ३० अथापि सीतावरोधजन्यपापेनम् तत्प्रायः एव सरत्या
ह निमित्तमात्रमिति अतोऽस्माभिरपि सुशकवध्य एव सहृ इति भावः ३१ तत्प्रकारमाह सा प्रकृत्यैवेति ३२ ३३ इत्येकोन
षष्टितमः सर्गः ॥ ५९

रा० वा० सु० १२३४ ५६ दृष्टादेवीनचानीताइतितत्रसमीपेनिवेदितुंनयुक्तमितिपश्यामीतिसंबंधः तुल्योस्तीतिशेषः ८ ९ हनूम
२१२

तस्यतद्वचनंश्रुत्वावालिसूनुरभाषत जांववत्प्रमुखान्मुख्याननुज्ञाप्यमहाकपीन् १ अश्विपुत्रौ
महावेगौवलवंतौप्लवंगमौ एतयोःशतियोद्धारंनपश्यामिरणाजिरे २ पितामहावरोत्सेकात्प
रमंदर्पसमास्थितौ अमृतप्राशिनावेतौसर्ववानरसत्तमौ ३ अश्विनोर्माननार्थंहिसर्वलोकपि
तामहः सर्वावध्यत्वमतुलमनयोर्दत्तवान्पुरा ४ वरोत्सेकेनमत्तौचप्रमथ्यमहतींचमूम् सुरा
णाममृतंवीरौपीतवंतौप्लवंगमौ ५ एतावेवहिसंक्रुद्धौसवाजिरथकुंजराम् लंकांनाशयितुं
शक्तौसर्वेतिष्ठंतुवानराः ६ दृष्टादेवीनचानीताइतितत्रनिवेदितुम् अयुक्तमिवपश्यामिभव
द्भिःख्यातविक्रमैः ७ नहिवःप्लवनेकश्चिन्नापिकश्चित्पराक्रमे तुल्यःसामरदैत्येषुलोकेषु
हरिसत्तमाः ८ जित्वालंकांसरक्षौघांहत्वातंरावणंरणे सीतामादायगच्छामःसिद्धार्थाहृष्ट
मानसाः ९ तेष्वेवहतशेषेषुराक्षसेषुहनूमता किमन्यदत्रकर्तव्यंगृहीत्वायामजानकीम् १०

ता तेषुराक्षसेषुहतशेषेषुसत्सुअस्माकंकर्तव्यंकिमस्तिकाकुरत्र अपितुजानकीग्रहणपूर्वकगमनादन्यत्रकिमपीत्यर्थः १० म

[illegible]

रा० २१२

तवान्येनोपदेष्टव्योंशो नास्तीत्याह नधर्मवादेति शास्त्रबुद्ध्या लोकबुद्ध्या निश्रयात्मिकया लौकिकया च गृहीतो निश्चित इत्यर्थः १७ महावीरस्य तव नकुत्रा भयप्रोक्तस्यायेनाह पराक्रमेत्यादि हे नैर्ऋतानां मनोनन्दन सुरासुराणामपि दुर्जयेन त्वया पराक्रमे उत्साहे हेतौ च प्रशस्तमनोवतां नैर्ऋतानां युद्धाय तिर्यग्भागमो नाशयितुं न युक्तेत्यर्थः नैर्ऋतानामित्यत्र तंत्रं १८ १९ परबलवक्तायमवध्यं इह तथ्य इत्यत आह साधुरिति

नधर्मवादेन चलोकवृत्तेन शास्त्रबुद्धिग्रहतेन वापि विद्येत कश्चित्तव वीरतुल्यस्त्वं ह्युत्तमः सर्वसुरासुराणाम् १७ पराक्रमोत्साहमनस्विनां च सुरासुराणामपि दुर्जयेन त्वया मनोनंदन नैर्ऋतानां युद्धायतिर्नाशयितुं नयुक्ता १८ नचाप्यस्य कपेर्घाते कंचित्पश्याम्यहं गुणम् तेष्वयं पात्यतां दंडो यैरयं प्रेषितः कपिः १९ साधुर्वा यदि वासाधुः परैरेष समर्पितः ब्रुवन्परार्थं परवान् नदूतो वधमर्हति २० अपि चास्मिन्हते राजन्नान्यं पश्यामि खेचरम् इह यः पुनरागच्छेत्परं पारं महोदधेः २१

समर्पितः प्रेषितः २० अस्मिन्हते सति वृत्तांत निवेदकाभावाद्रामलक्ष्मणयोरिहागमनाभावेन तव शत्रुक्षयो न स्यात् विमुक्ते त्वस्मिन्वृत्तान्तनिवेदिते वृत्तांते तयोस्तयोरिहागमनादप्यलेन तव शत्रुनाशो भवेदित्यभिप्रायेनाह अपि चेत्यादिनान्यं पश्यामि यो आगच्छेदित्यर्थः २१

१२ १३ नैषा बुद्धिर्युक्तेति शेषः तत्र हेतुमाह विचेतुमिति १४ प्रथमं जय एव दुर्लभः कथंचिज्जयेऽपि यदि न रोचयेत्तदा का विना
शा इति भावः अरुचौ हेतुः कुलं व्यपदिशन्निति १५ हेत्वंतरमाह प्रतिज्ञायेति अग्रतः कपिमुख्यानामित्यन्वयः १६

वयमेव हि गत्वा तान्हत्वा राक्षसपुंगवान् राघवेंद्रं महीमध्ये सुग्रीवं सहलक्ष्मणम् १२ तमेवं कृतसं
कल्पं जांबवान्हरिसत्तमः उवाच परमप्रीतो वाक्यमर्थवदर्थवित् १३ नैषा बुद्धिर्महाबुद्धे यद्ब्र
वीषि महाकपे विचेतुं वयमाज्ञप्ता दक्षिणां दिशमुत्तमाम् नानेतुं कपिराजेन नैव रामेण धीमता
१४ कथंचिन्निर्जितां सीतामस्माभिर्नाभिरोचयेत् राघवो नृपशार्दूलः कुलं व्यपदिशन्स्वकम् १५ प्र
तिज्ञाय स्वयं राजा सीताविजयमग्रतः सर्वेषां कपिमुख्यानां कथं मिथ्या करिष्यति १६ विफ
लं कर्म च कृतं भवेत्तुष्टिर्न तस्य च वृथा च दर्शितं वीर्यं भवेद्वानरपुंगवाः १७ तस्माद्गच्छाम वै
सर्वे यत्र रामः सलक्ष्मणः सुग्रीवश्च महातेजाः कार्यस्यास्य निवेदने १८ सीतारामाभ्यां स

अरुचौ फलं वै परी[illegible] संदर्शयति विफलमिति १७ अस्य कार्यस्य निवेदने मतिं कृत्वेति शेषः १८ १८ ८८२२२

रा० वा० सुं० अथ जांववानेदममतं वहुमान्यसुहृद्भावेन निवर्तयति नतावदिति हे राजपुत्र यथा भवान्प्रपतिविचारयति ए
२२३ षामतिर्नैलाकमक्षमानयपुक्ता नकिंतु युक्तैवतथापि यथा त्मक्षमतिर्निर्विक्ष्याग्रवस्थितातत्याकार्यसिद्धिं भवान्य
श्यत्वितिसर्गः १९ इति षष्ठितमः सर्गः ६० ॥ अर्गहूं ततुक्तिं युक्तत्वादमन्यंत १ प्लुवंगः प्लवंतोजग्मुः २ प्राकाशं छाद

न तावदेषामतिरक्षमा नो यथा भवान्पश्यति राजपुत्र यथातु रामस्य मतिर्निविष्टा तथा भवान्
पश्यतु कार्यसिद्धिम् ॥ १९ ॥ हरिः ॐ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये सुंदरकांडे षष्ठितमः सर्गः ॥
६० ततो जांबवतो वाक्यमगृह्णंत वनौकसः अंगदप्रमुखा वीरा हनूमांश्च महाकपिः १
प्रीतिमंतस्ततः सर्वे वायुपुत्रपुरःसराः महेंद्राग्रात्समुत्पेतुः प्लुवुः प्लवगर्षभाः २ मेरुमंदरसं
काशा मत्ता इव महागजाः छादयंत इवाकाशं महाकाया महाबलाः ३ सभाज्यमानं भूतै
स्तमात्मवंतं महाबलम् हनूमंतं महावेगं वहंत इव दृष्टिभिः ४ राघवे चार्थनिर्वृत्तिं कर्तुंच
परमं यशः समाधाय समृद्धार्थाः कर्मसिद्धिभिरुन्नताः ५ यंत इवोत्प्रेक्षा ३ सभाज्यमानं पूज्यमानं भूतैः
सिद्धादिभिः दृष्टिभिर्वहंत इवेति पूर्वकानिमिषदर्शनात् दृष्टीनां वाहकत्वोत्प्रेक्षा ४ राघवे प्रर्थनिर्वृत्तिं कार्य
सिद्धिं समाधाय निश्चित्य तस्यात्मनश्च परमं यशः कर्तुं च निश्चित्य प्लुवुरिति पूर्वेणान्वयः कर्मसिद्धिभिः सीतादर्श

स

[illegible]

रा० म०
२२३

रामप्रतिकारेरामस्यप्रत्युपकारेनिश्चितार्थाश्चभवन्नितिशेषः ६ वनेसुग्रीवस्यमधुवनं ७ ८ दधिमुखस्तन्नामा ९ परमो

प्रियाख्यानोन्मुखाः सर्वेसर्वेयुद्धाभिनंदिनः सर्वेरामप्रतीकारेनिश्चितार्थामनस्विनः ६ प्ल
वमानाःखमाप्लुत्यततस्तेकाननौकसः नंदनोपममासेदुर्वनंद्रुमशतायुतम् ७ यत्तन्म
धुवनंनामसुग्रीवस्याभिरक्षितम् अधृष्यंसर्वभूतानांसर्वभूतमनोहरम् ८ यद्रक्षति
महावीर्यःसदादधिमुखःकपिः मातुलःकपिमुख्यस्यसुग्रीवस्यमहात्मनः ९ तेतद्वनमु
पागम्यबभूवुःपरमोत्कटाः वानराधिपतेरम्यमनःकांतंमहावनम् १० ततस्तेवानराहृष्टा
दृष्ट्वामधुवनंमहत् कुमारमभ्ययाचंतमधूनिमधुपिंगलाः ११ ततःकुमारस्तान्वृ
द्धान्जांबवत्प्रमुखान्कपीन् अनुमान्यददौतेषांनिसर्गंमधुभक्षणे १२ २२१२१

त्कटाः तत्रत्यमधुपानादौपरमोत्सुकाःमहावनात्स्ववनमित्यर्थः १० मधुपिंगलाःमधुवत्पिंगलवर्णाः ११ अ
नुमान्यहृत्वा अनुमतिकान्कृत्वानिसर्गमाज्ञाम् १२

१० वा० सुं० निसृष्टाः कृताज्ञाः १३ भक्षयंतः भक्षयन्निति पर्यायः १४ अनुमताः मधुपानादौ कृतानुमतिकाः हर्षमोदयोर्वा ह्याभ्यंतरत्वकृ
२१४

ते विसृष्टाः कुमारेण धीमता वालिसूनुना हरयः समपद्यन्त द्रुमान्मधुकराकुलान् १३ भक्ष
यंतः सुगंधीनि मूलानि च फलानि च जग्मुः प्रहर्षं ते सर्वे बभूवुश्च मदोत्कटाः १४ ततः श्चानु
मताः सर्वे सुसंहृष्टा वनौकसः मुदिताश्च ततस्ते च प्रनृत्यंति ततस्ततः १५ गायंति केचित्प्रह
संति केचिन्नृत्यंति केचित्प्रणमंति केचित्पठंति केचित्प्रचरंति केचित्प्लुवंति केचित्प्रलपंति
केचित् १६ परस्परं केचिदुपाश्रयंते परस्परं केचिदतिब्रुवंति परस्परं केचिदुपारमंते पर
स्परं केचिदुपाक्रमंते १७ द्रुमाद्द्रुमं केचिदभिद्रवंते क्षितौ नगाग्रान्निपतंति केचित् महीतला
त्केचिदुदीर्णवेगा महाद्रुमाग्राण्यभिसंपतंति १८ गायंतमन्यः प्रहसन्नुपैति हसंतमन्यः प्ररु
दन्नुपैति रुदंतमन्यः प्रणुदन्नुपैति नदंतमन्यः प्रतुदन्नुपैति प्लवंतमन्यः प्रपतन्नुपैति पतं

रा० म०
२१४

तो भेदः १५ तत्र वाह्यमाने दक्षूचिकमाह गायंतीति १६ अतिब्रुवंति विवादं कुर्वंति १७ नगाग्रात् वृक्षाग्रात् १८ गान
रोदनहासाभ्यां मधुपानमत्तानां धर्माः १९

मधुप्रपानेन उत्कटं सत्वं चेष्टमत्तचित्तचेष्टमित्यर्थः अतएव समाकुलम व्यवस्थितम २०.२१ प्रवृद्धैः प्रवृद्धमदैः २२.२३ मदात्
प्रतिवार्यैर्निवारयितुमशक्यैर्वीर्यैर्गायवीर्यैः तेन दधिमुखेन बलात्प्रतिवार्यमाणाः प्रधर्षितो दोषं राजदण्डमनवेक्ष्य प्रवृत्त

मधुप्रपानोत्कटसत्वचेष्टं समाकुलं तत्कपिसैन्यमासीत् न चात्र कश्चिन्न बभूव मत्तो न चात्र कश्चिन्न बभूव तृप्तः २० ततो वनं तत्परिभक्ष्यमाणं द्रुमांश्च विध्वंसितपत्रपुष्पान् समीक्ष्य कोपाद्दधिवक्त्रनामा निवारयामास कपिः कपींस्तान् २१ स तैः प्रवृद्धैः परिभर्त्स्यमानो वनस्य गोप्ता हरिवीरवृद्धः चकार भूयो मतिमुग्रतेजा वनस्य रक्षां प्रति वानरेभ्यः २२ उवाच कांश्चित्परुषाण्यभीतमसक्तमन्यांश्च तलैर्जघान समेत्य कैश्चित्कलहं चकार तथैव साम्नोपजगाम कांश्चित् २३ स तैर्मदाच्चाप्रतिवार्यवीर्यैर्बलाच्च तेनाप्रतिवार्यमाणैः प्रधर्षितस्त्यक्तभयैः समेत्य प्रकृष्यते चाप्यनवेक्ष्य दोषम् २४ नखैस्तुदन्तो दशनैर्दशन्तस्तलैश्च पादैश्च समापयन्तः मदात्कपिं ते कपयः समग्रा महावनं निर्विषयं च चक्रुः २५ सीतासम

वत्यक्तभयैः समेत्य प्रकृष्यते स्म २४ समापयन्तः मृतकल्पं कुर्वन्तः महावनं निर्विषयं नीतिमधुफलादिभोज्यं च कृतं सन्त्यक्तः

रा०वा०सुं० ३ त्र्येकषष्ठितमः सर्गः उक्तमेव पुनर्विस्तरेण हतानीति । आवारयिष्यामि निवारयिष्यामि १ २ ई दृष्ट्वा एतन्मात्रार्थ
२१५ पर्के ३५ यत्र मधुवनं यत्र मार्गे गमनेन मधुवनं प्राप्य तेतेन मार्गेण जग्मुः ५ ते पठवः स्वमर्थी हरयः मैथिलीं दृष्ट्वा स्ववर्गस्य

हरिः ॐ इत्यार्षे रामायणे सुंदरकांडे एकषष्ठितमः सर्गः ॥ ६१ ॥ तानुवाच हरिश्रेष्ठो वानरान्वा
नरर्षभः । अव्यग्रमनसो यूयं मधु सेवत वानराः । अहमावारयिष्यामि युष्माकं परिपंथि
नः १ श्रुत्वा हनुमतो वाक्यं हरीणां प्रवरोंगदः । प्रत्युवाच प्रसन्नात्मा पिबंतु हरयो मधु २
अवश्यं कृतकार्यस्य वाक्यं हनुमतो मया । अकार्यमपि कर्त्तव्यं किमंग पुनरीदृशम् ३ अंग
दस्य मुखाच्छ्रुत्वा वचनं वानरर्षभाः । साधु साध्विति संहृष्टा वानराः प्रत्यपूजयन् ४ पूजयि
त्वांगदं सर्वे पूपपापूपपर्षभम् । जग्मुर्मधुवनं यत्र नदीवेगा इव द्रुतम् ५ ते प्रविष्टा मधु
वनं पालानाक्रम्य वीर्यतः । अतिसर्गाच्च पटवो दृष्ट्वा श्रुत्वा च मैथिलीम् । पपुः सर्वे मधु॰ वने
तदा रसवत्फलमाददुः ६ हनुमद्दृष्टेनेन सवैदेह्यवेतः श्रुत्वा हनुमन्मुखेन अतिसर्गो दंगदाभ्यनुज्ञानान्म
धुवने प्रविष्टाः पालानाक्रम्य मधु पपुः रसवत्फलं चाददुर्भक्ष्य णार्थः मितिशेषः ६ ६ ६ ६ ६ रा०म०
२१५

मधुवने सङ्क्रान्तमनसां वानराणां ७ ते वानराः द्रोणमात्राणि आढकप्रमाणानि मधूनि मधुपटलानि बाहुभिः परिगृह्य

उत्पपात च ततः सर्वे वनपालाः समागताः । ताडयन्ति स्म शतशः सक्तान्मधुवने तदा ७ मधूनि
द्रोणमात्राणि बाहुभिः परिगृह्य ते । घ्नन्ति स्म सहिताः सर्वे भक्षयन्ति तथापरे ८ केचित्पी
त्वापविध्यन्ति मधूनि मधुपिङ्गलाः । मधूच्छिष्टेन केचिच्च जघ्नुरन्योन्यमुत्कटाः ९ अपरे
वृक्षमूले तु शाखां गृह्य व्यवस्थिताः । अत्यर्थं च मदग्लानाः पर्णान्यास्तीर्य शेरते १० ८
उन्मत्तभूताः प्लवगा मधुमत्ताश्च हृष्टवत् । क्षिपन्ति स्म तथान्योन्यं स्खलन्ति च तथापरे ११
केचित्क्ष्वेलां प्रकुर्वन्ति केचित्कूजन्ति हृष्टवत् । हरयो मधुना मत्ताः केचित्सुप्ता महीतले १२

सहिताः सर्वे घ्नन्ति स्म तथापरे भक्षयन्ति स्म सर्वे ८ अपविध्यन्ति प्रक्षिपन्ति मधूनि मधुपटलानि ९ १० मधुमत्ताः
अत एव उन्मत्तभूताः उन्मत्तसदृशा इत्यर्थः हृष्टवत् हृष्टाः ११ क्ष्वेलां सिंहनादं क्ष्वेला तु सिंहनादः स्यादिति अमरः १२

रा० वा० सुं० १४ अन्ये किंचिद् वा चकर्महृत्वा हसंति केचित् रतरतमाम्यकर्म कुर्वंति केचित् अन्यत्कर्म हृत्वा तद्वदंति केचिदन्यत्कर्म वु
२९६ ध्यंति मनसा सं कल्पयंति १४ प्रतिषिद्धाः ताडनादिना निरस्ताः १५ जानुभिः प्रहृष्टाः जानु युग्मं हीत्वा प्रहृष्टाः देवमा

हृत्वा केचिद्धसंत्यन्ये केचित्कुर्वंति चेतरत्
हृत्वा किंचिद्वदंत्यन्ये केचिद्बुध्यंति चेतरत् १४ ये
प्यत्र मधुपालाः स्युर्भृत्या दधिमुखस्य तु
तेपि तैर्वानरैर्भीमैः प्रतिषिद्धादिशो गताः १५ जा
नुभिस्त्वप्रहृष्टाश्च देवमार्गं च दर्शिताः
अब्रुवन्परमोद्विग्ना गत्वा दधिमुखं वचः १६ हनू
मता दत्तवरैर्हतं मधुवनं बलात्
वयं च तैर्महावीरैर्देवमार्गं च दर्शिताः १७ ततो दधिमुखः
क्रुद्धो वनपस्तत्र वानरः
हतं मधुवनं श्रुत्वा सांत्वयामास तान्हरीन् १८ इहागच्छत गच्छामो वानरानतिदर्पितान्
बलेना वारयिष्यामो मधु भक्षयतो वयम् १९ श्रुत्वा दधिमुखस्यादे वचनं वानरर्षभाः
पुनर्वीरा मधुवनं तेनैव सहिता ययुः २० गंदर्शिताः पादौ गृहीत्वा ऊर्ध्वं प्रक्षिप्ताः रसर्पः

२९१७ १ तान्सर्वसंबंधिनः पालान् १८ १९ २० २० २० २० २० २० २०

सर्वे ते च समभ्यधावन्निति शेषः २१ २२ २३ २४ २५ आर्यकं सुग्रीवमातुलत्वात्पूज्यं २६ २७ २८ सीतामातम

मध्ये चैषां दधिमुखः प्रगृह्य तु महातरुम् समभ्यधावद्वेगेन ते च सर्वे प्लवंगमाः २१ ते शिलाः पादपांश्चापि पाषाणांश्चापि वानराः गृहीत्वाभ्यागमन् क्रुद्धा यत्र ते कपिकुंजराः २२ ते स्वामिवचनं वीरा हृदयेष्ववसज्य तत् त्वरया चाभ्यधावंत सालतालशिलायुधाः २३ वृक्षस्थांश्च तलस्थांश्च वानरान्बलदर्पितान् अभ्याक्रमंस्ततो वीराः पालास्तत्र सहस्रशः २४ अथ दृष्ट्वा दधिमुखं क्रुद्धं वानरपुंगवाः अभ्यधावंत वेगेन हनूमत्प्रमुखास्ततः १५ तं सवृक्षं महाबाहुमापतंतं महाबलम् आर्यकं प्राहरत्तत्र बाहुभ्यां कुपितोंगदः २६ मदांधश्च न वेदैनमार्यकोयं ममेति सः अथैनं निष्पिपेषाशु वेगवद्वसुधातले २७ स भग्नबाहुर्विमुखो विह्वलः शोणितोक्षितः मुमोह स महावीर्यो मुहूर्तं कपिकुंजरः २८

२९ भर्तारं जा ३० ३१ ३२ ३३ ३४ न्पाज्ञापरिपंथिनः तदाज्ञाविरुद्धकर्तारः ऽमर्षप्रभवो ऽक्षमाजन्यः ३४ ३५

सकथंचिद्विमुक्तस्तैर्वानरैर्वानरर्षभः उवाचैकांतमागम्य भृत्यांस्तान्समुपागतान् २९ ए
तेगच्छतगच्छामो भर्ता नो यत्र वानरः सुग्रीवो विपुलग्रीवः सह रामेण तिष्ठति ३० सर्वं
चैवांगदे दोषं श्रावयिष्यामि पार्थिवे अमर्षी वचनं श्रुत्वा घातयिष्यति वानरान् ३१ इ
ष्टं मधुवनं ह्येतत्सुग्रीवस्य महात्मनः पितृपैतामहं दिव्यं देवैरपि दुरासदम् ३२ स वा
नरानिमान्सर्वान्मधुलुब्धान्गतायुषः घातयिष्यति दंडेन सुग्रीवः ससुहृज्जनान् ३३
वध्या ह्येते दुरात्मानो नृपाज्ञापरिलंघिनः अमर्षप्रभवो रोषः सफलो नो भविष्यति ३४
एवमुक्त्वा दधिमुखो वनपालो महाबलः जगाम सहसोत्पत्य वनपालैः समन्वितः ३५ नि
मिषांतरमात्रेण स हि प्राप्तो वनालयः सहस्रांशुसुतो धीमान् सुग्रीवो यत्र वानरः
३६

३६

२२ नन्वस्मिन्हतेऽन्यस्यानागमनेच काममक्षतिरित्यतआह अस्मिन्निति तौ राजपुत्रौ यायोपुत्रायो योजयेत्तत्तपरस्यामि ननु तद् योगाभावोपि
ममेष्ट एवनेत्याह पुत्रप्रियेतिसंबोधनेन रणपराक्रमविजयकीर्तीत वेष्टकिलउमेऽप्यताद्दिनास्तनरपत्तरत्याशयः एवमपेश्रीलस्पर्धे दुर्विनी

तस्मान्नास्मैवधेयक्तः कार्यः परपुरंजय मयोन्से दृष्टदेवेष्वपत्नमास्थातुमर्हति २२ अस्मिन्वि
नष्टे नहि दृतमन्यपरपामिप्रतौ नरराजपुत्रौ पुत्रायपुत्रप्रियदुर्विनीतानावृध्योजबदीर्घपपा
वरूढौ २३ हिताश्च शूराश्च समाहिताश्च कुलेषु जाताश्च महागुणाश्च मनस्विनः शास्त्र
तोवरिष्ठाः कोद्यग्रशास्त्रे सम्मताश्च योधाः २४ तदेकदेशेन बलेन तावत्केचित् वादेशान्
तोयपोतु तौराजपुत्रावपराह्यमूढौ परेषु तेभावपितुःप्रभावम् २५ ५५ ५५ ५ ५५५ ५८

ताविस्याद्युक्ति २३ ननुपुंश्च कदाचिद्विपरीतमपिस्यं भाव्यतत्राह हिताश्चेति समाहिताः दानादिभिर्वशीकृताः सुसंहताः सम्यक्पालि
ताः ताद्दशास्तस्य बलेनज्ञयसंभावीतिभावः २४ ततस्मात् उपगह्यआपालिवितिशेषः परेषु तेश्रभावे नावपितुपक्रमितिशेषः २५ २५२२

समप्रतिष्ठांसमन्तोजगतीं भूमींद्दष्ट्वा सन्तु कर्षः २७ २८ ३० इतिद्विषष्टितमःसर्गः ६२ १२ किं संभ्रमात् कस्माद्भया

रामं च लक्ष्मणं चैव दृष्ट्वा सुग्रीवमेव च॥ समप्रतिष्ठां जगतीमाकाशान्निपपात ह॥२७॥ स निप

त्य महावीर्यः सर्वैस्तैः परिवारितः॥ हरिर्दधिमुखः पालैः पालानां परमेश्वरः॥२८॥ स दीनवदनो

भूत्वा कृत्वा शिरसि चांजलिम्॥ सुग्रीवस्य ततो मूर्ध्ना चरणौ प्रत्यपीडयत्॥३०॥ हरिः ॐ इत्या

र्षे रामायणे वाल्मीकीये सुंदरकांडे द्विषष्टितमः सर्गः॥६२॥ ततो मूर्ध्ना निपतितं वानरं वानरर्ष

भः दृष्ट्वैवोद्विग्नहृदयो वाक्यमेतदुवाच ह १ उत्तिष्ठोत्तिष्ठ कस्मात्त्वं पतितः पादयोर्मम

अभयं ते भवेद्वीर सत्यमेवाभिधीयताम् २ किं संभ्रमाद्धितं कृत्स्नं ब्रूहि यद्वक्तुमर्हसि कच्चि

न्मधुवने स्वस्ति श्रोतुमिच्छामि वानर ३ स तु विश्वासितस्तेन सुग्रीवेण महात्मना उत्थाय

स महाप्राज्ञो वाक्यं दधिमुखोऽब्रवीत् ४ नैवर्क्षरजसा राजन्न त्वया नापि वालिना वनं निसृष्ट

पूर्वं हि भक्षितं तत्तु वानरैः ५

दिहागतोऽसीति प्राप्तः पल्ल्वं हितं तद्ब्रूहि यतस्त्वं सर्वमुचितमनुचितं च वक्तुमर्ह

सि ३ ४ नैव निसृष्टपूर्वं वानरेभ्यो पश्चाद्भोगाय कदाचिदपि नानाम् ५

विंशे द्विवतीमानक थ्या समाप्ताः

रा०वा०सुं० अचिंतयित्वा अविगणय्य ६ इमानपि अचिंतयित्वा अविगणय्य फलानि भक्षयंति मधूनि पिबंतीत्यर्थः ७ शि
२१८ ष्टमवशिष्टं मधुपटलं अपविध्यंति ध्वंसयंति अपरे भक्षयंति ध्वस्तमधुपटलमित्यर्थः भ्रुकुटिं वक्रे भ्रुवौ ८८

न्यवारयन्महंतस्ते सर्वे सह हि मिर्वनचारिभिः अचिंतयित्वा तान्संदृष्टा भक्षयंति पिबंति च ६ एभिः प्रधर्ष
माणाश्च वारिता वनरक्षिभिः मधून्यचिंतयित्वा ते भक्षयंति पिबंति च ७ शिष्टमत्रापविध्यंति
भक्षयंति तथापरे निवार्यमाणास्ते सर्वे भ्रुकुटिं दर्शयंति हि ८ इमे हि संरब्धतरास्तथा तैः संप्रध
र्षिताः प्रक्षेप्याश्च यथा कामं देवमार्गं च दर्शिताः ९ ततस्तैर्बहुभिर्वीरैर्वानरैर्वानरर्षभ संरब्धनयनैः
क्रूरैरस्मदीयाः प्रधर्षिताः १० पाणिभिर्निहताः केचित्केचिज्जानुभिराहताः प्रक्षेप्याश्च यथा कामं
देवमार्गं च दर्शिताः ११ एवं ते निहताः शूरास्त्वयि तिष्ठति भर्तरि कृत्स्नं मधुवनं चैव प्रकामं तैश्च
भक्ष्यते १२ एवं विज्ञाप्यमाने तु सुग्रीवं वानरर्षभम् अपृच्छत्तं महाप्राज्ञो लक्ष्मणः परवीरहा १३
किमयं वानरो राजन्वनपः प्रत्युपस्थितः कं चार्थमभिनिर्दिश्य दुःखितो वाक्यमब्रवीत् १४ १५ रा०म०
२१८

इमे मदीयाः संरब्धतराः निवारणामतिपत्नवंतः ९ १० ११ १२ विज्ञाप्यमाने दधिमुखेनेति शेषः १३ १४

१५ १६ १७ यथा वनमभिपन्नाः ता साधितुं प्रवृत्ताः १८ वारयंतः हतो प्राणा वारणाद्धतो जानुभिराहताः श्रान्ताः १९ देवीद

एवमुक्तस्तु सुग्रीवो लक्ष्मणेन महात्मना लक्ष्मणं प्रत्युवाचेदं वाक्यं वाक्यविशारदः १५
आर्य लक्ष्मणमेवं प्राह वीरो दधिमुखः कपिः अंगदप्रमुखैर्वीरैर्भक्षितं मधु वानरैः १६ वि
चित्य दक्षिणामाशामागतैर्हरिपुंगवैः आत्मोद्धतैः प्रहृष्टैश्च हतं मधुवनं हि तैः १७ नै
षामकृतकृत्यानामीदृशः स्यादुपक्रमः वनं यथाभिपन्नास्ते साधितं कर्म वानरैः १८ वारय
न्तो भृशं प्राप्ताः पाला जानुभिराहताः तथा न गणितश्चायं कपिर्दधिमुखो बली १९ पतिर्म
म वनस्यायमस्माभिः स्थापितः स्वयम् दृष्टा देवी न संदेहो न चान्येन हनूमता २० न ह्यन्यः
साधने हेतुः कर्मणोस्य हनूमतः कार्यसिद्धिर्मतिश्चैव तस्मिन्वानरपुंगवे व्यवसायश्च वीर्यं
च सूर्ये तेज इव ध्रुवम् २१ ष्टा सत्त्वन संदेहस्तत्राप्यन्येन न किंतु हनूमतेत्यर्थः २० अन्यः हनूमतोऽन्यः इत्यर्थः

हरिपुंगवे हनूमति कार्यसिद्धिर्मतिर्व्यवसायो वीर्यं च २१

नेताप्रधानः ईश्वरोनियंता अधिष्ठाता: कार्यकारणेयोगवान् अन्यथागतिः कार्यासिद्धिर्न २२ उपयुक्तं भुक्तं २३

जीववान्यत्रनेतास्मादंगादश्चहरीश्वरः हनूमांश्चाप्यधिष्ठातानतत्रगतिरन्यथा २२ अंगद
प्रमुखैर्वीरैर्हतंमधुवनंकिल धर्षितैश्चवनेकृत्स्नमुपयुक्तंचवानरैः २३ वारिताःस
हिताःपालास्तथाजानुभिराहताः एतदर्थमयंप्राप्तोवक्तुंमधुरयागिरा २४ नाम्नादधि
मुखोनामहरिप्रख्यातविक्रमः दृष्टासीतामहाबाहोसौमित्रेपश्यतत्वतः २५ अभिगम्य
यथासर्वेपिबंतिमधुवानराः नचाप्यदृष्ट्वावैदेहींविश्रुताःपुरुषर्षभः २६ वनंदत्तवरंदिव्यं
धर्षयेयुर्वनौकसः ततःप्रहृष्टोधर्मात्मालक्ष्मणःसहराघवः २७ श्रुत्वाकर्णसुखांवा
णींसुग्रीववदनाच्च्युताम् प्राहृष्यतभृशंरामोलक्ष्मणश्चमहायशाः २८ श्रु
त्वादधिमुखस्येदंसुग्रीवस्तुप्रहृष्यच वनपालंपुनर्वाक्यंसुग्रीवःप्रत्यभाषत २९
प्रीतोस्मिसौम्ययद्भुक्तंवनंतैःकृतकर्मभिः मर्षितंमर्षणीयंचचेष्टितंकृतकर्मणाम् ३०

यथामधुपिबंतितथासीतादृष्टेत्यर्थः तत्वतः अन्वयः २५ दत्तवरत्वेन देवैरस्माकंदत्तं २६ २७ २८ २९ एकः सुग्रीव प्राक्षः प्रोभ नतीवचयः २९ कृतकर्मभिः साधितं कृ
प्रामर्षणीयं सहनीयम् ३०

तान्द्रष्टुमिच्छामि सीताधिगमे तत्वाद्यो कृतं प्रयत्नं च श्रोतुमिच्छामि ३१ प्रयत्नम् अस्य उपकारार्थी हि सुग्रीवः स्वो घोषणा
फलं दर्शनाभ्युत्थानं नंदत्याह प्रीतितिति प्रीस्यां सतोष पत्तास्फीता क्षौवि कसित नेत्रो संप्रहृष्टो प्रत्नकित गात्रो रघुराज

इच्छामि प्रीघ्रं हनूमत्प्रधानान् शाखामृगांस्तान्मृगराज दर्पान् द्रष्टुं कृतार्थान् सह राघ
वाभ्यां श्रोतुं च सीताधिगमे प्रयत्नम् ३१ प्रीतिस्फीताक्षौ संप्रहृष्टौ कुमारौ दृष्ट्वा सिद्धार्थौ
वानराणां च राजा अंगैः संहृष्टैः कार्यसिद्धिं विदित्वा बाह्वोरासन्नां सोति मात्रे नंदनंद ॥३२॥ इति
श्रीमद्रामायणे वाल्मीकीये सुंदरकाण्डे त्रिषष्टितमः सर्गः ॥६३॥ सुग्रीवेणैवमुक्त
स्तु हृष्टो दधिमुखः कपिः राघवं लक्ष्मणं चैव सुग्रीवं चाभ्यवादयत् १ स प्रणम्य च सुग्री
वं राघवौ च महाबलौ वानरैः सहितः शूरैर्दिवमेवोत्पपात ह २ स यथैवागतः पूर्वं तथैव त्व
रितो गतः निपत्य गगनाद्भूमौ तद्वनं प्रविवेश ह ३

कुमारौ सिद्धार्थाविव दृष्ट्वा संप्रहृष्टैः प्रत्नकितैर्गात्रैः
५
प्रत्न क्षितो वानराणां राजा कार्यसिद्धिं वाक्योरासन्नां हत्त प्राप्तामिव विदित्वा प्रसेतेनानंदगणतदे स्वदेवी व्रतं येच
श्रेष्ठं छिन्नावेम्बदधीममोयो रतिर्न्नदत्तात ३२ ३ ति त्रिषष्टितमः सर्गः ६३ १ २ ३

विमदत्वे हेतुर्मेहमानान्मधूदकमिति मेहमानान्मूत्रयतः एतेन मूत्रणान्मधुनो जीर्णता विज्ञेया अतो विमदाः मधूनि चोदकानि च मधूदकमिति द्वन्द्वैकवद्भावः उदकानि चानुपानत्वेन पीतानीति द्रष्टव्यं तदुक्तं अनुपानं हिमं वारि यव

स प्रविष्टो मधुवने ददर्श हरियूथपान् विमदानुत्थितान्सर्वान्मेहमानान्मधूदकम् ४ स तानुपागमद्वीरो बध्वा करपुटाञ्जलिम् उवाच वचनं श्लक्ष्णमिदं हृष्टवदङ्गदम् ५ सौम्य रोषो न कर्तव्यो यदेभिरभिवारितः अज्ञानाद्रक्षिभिः क्रोधाद्भवन्तः प्रतिषेधिताः ६ युवराजस्त्वमीशश्च वनस्यास्य महाबलः श्रान्तो दूरादनुप्राप्तो भक्षयस्व स्वकं मधु ७ मौर्ख्यात्पूर्वं कृतो दोषस्तं भवान्क्षन्तुमर्हति यथैव हि पिता तेऽभूत्पूर्वं हरिगणेश्वरः तथा त्वमपि सुग्रीवो नान्यस्तु हरिसत्तम ९ आख्यातं हि मया गत्वा पितृव्यस्य तवानघ इहोपयानं सर्वेषामेतेषां वनचारिणाम् १० स त्वदागमनं श्रुत्वा सहैभिर्हरियूथपैः प्रहृष्टो न तु रुष्टोऽसौ वनं श्रुत्वा प्रधर्षितम् ११ प्रहृष्टो मां पितृव्यस्ते सुग्रीवो वानरेश्वरः शीघ्रं प्रेषय सर्वांस्तानिति होवाच पार्थिवः १२

गोधूमयोर्हितं दधि मद्ये विषे क्षौद्रे कोष्णं पिष्टमयेषु चेति ४ ५ एभी रक्षिभिरज्ञानात्क्रोधाच्च भवन्तः प्रतिषेधिता इति पदत्रयं तदभिवारणे प्रतिरोषो न कर्तव्य इत्यर्थः ६ ७ दोषः कृतो मदीयैरिति शेषः ८ तथा सुग्रीवः त्वं च हरीश्वरः ९ १० ११ १२

त्वमपि

वाक्यं

१३ शंके दधिमुखस्य पतत्क्समागमनात् किंचायं हर्षादाख्याति सुग्रीव सदेश इमिति शेषः तेन हेतुना जानामि रामेण श्रुतोयं वृत्तांत इति १४ तत्तस्मात् कार्ये वनविध्वंसनरूपे कृते सती हस्थातुं नोऽस्माकं न क्षमं न युक्तं किं शेषं न किंचिदवशिष्टं किं तु सुग्रीवो मे

श्रुत्वा दधिमुखस्येदं वचनं श्लक्ष्णमंगदः अब्रवीत्तान्हरिश्रेष्ठो वाक्यं वाक्यविशारदः १३ शंके श्रुतोयं वृत्तांतो रामेण हरियूथपाः अयं च हर्षादाख्याति तेन जानामि हेतुना १४ तत्क्षमं नेह नः स्थातुं कृते कार्ये परंतपाः पीत्वा मधु यथाकामं विश्रान्ता वनचारिणः किं शेषं गमनं तत्र सुग्रीवो यत्र मे गुरुः १५ सर्वे यथा मां वक्ष्यंति समेत्य हरियूथपाः तथास्मि कर्ता कर्तव्ये भवद्भिः परवानहम् १६ नाज्ञापयितुमीशोहं युवराजोस्मि यद्यपि अयुक्तं कृतकर्माणो यूयं धर्षयितुं बलात् १७ ब्रुवतश्चांगदस्यैवं श्रुत्वा वचनमुत्तमम् प्रहृष्टमनसो वाक्यमिदमूचुर्वनौकसः १८

गुरुर्यत्र वर्तते तत्र गमनमेवावशिष्टमित्यर्थः १५ विनयपूर्वकं सर्वसंमेलनमर्थयति सर्व इति कर्तव्ये कर्तव्येऽर्थे भवद्भिः परवानहं भवदधीन इत्यर्थः १६ यद्यप्यहं युवराजोस्मि तथापि युष्मानाज्ञापयितुं नेशः यतः कृतकर्माणो यूयं कृतकर्माणो युष्मान् बलाद्धर्षयितुं न युक्तं कृतकर्माणो यूयमिति द्विती यार्थे प्रथमा आर्षी १७ १८

 प्रहृष्टप्रमुदिता इति शेषः १९ सन्नतिर्विनयः नम्रता भविष्यच्छुभयोग्यताभाविनीं भाग्योन्नतिं प्राख्याति सूचयति २०
 प्रश्रवदेशो प्राप्ता वयं यत्र सुग्रीवस्तत्र गंतुं कृतक्षणाः कृतोत्साहाः २१ २२ महाबलास्ते गच्छाम इत्युक्त्वा खमुत्पेतुरित्यन्वयः

एवं वक्ष्यति को राजन् प्रभुः सन् वानरर्षभ ऐश्वर्यमदमत्तो हि सर्वोऽहमिति मन्यते १९ तव चेदं सुसदृशं वाक्यं नान्यस्य कस्यचित् सन्नतिर्हि तवाख्याति भविष्यच्छुभयोग्यताम् २० स वै वयमपि प्राप्तास्तत्र गंतुं कृतक्षणाः स यत्र हरिवीराणां सुग्रीवः प्रभुरव्ययः २१ त्वमाह्वतुं कैर्हरिभिर्नैव शक्यं पदात्पदम् कुत्रचिद्गंतुं हरिश्रेष्ठ ब्रूमः सत्यमिदं तु ते २२ एवं तु वदतां तेषामंगदः प्रत्यभाषत बाढं गच्छाम इत्युक्त्वा खमुत्पेतुर्महाबलाः २३ उत्पतंतमनूत्पेतुः सर्वे ते हरियूथपाः कृत्वाकाशं निराकाशं यंत्रोत्क्षिप्ता इवोपलाः २४ तेंगदं पुरतः कृत्वा हनूमंतं च वानरम् तें वरं सहसोत्पत्य वेगावंतः प्लवंगमाः २५

२३ तत्र क्रममाह उत्पतंतमिति निराकाशं निरवकाशं यं
त्रेत्यादिना दूरोत्पातेन शीघ्रगमनं सूचितं २४ तेंगदमित्यादि सार्द्धश्लोकमेकं वाक्यं तेषां नराः अंगदं हनूमंतं च पुरतः
कृत्वा अंबरं सहसोत्पत्य वातेरित घना इव विनदंतो जग्मुरिति शेषः शीघ्रगत्वा सादृश्यम् २५

समनुप्राप्तेनि कथमागते सुग्रीवो वानरर्षभ वाचे सन्नयः २६ २७ दृष्ट्वेहन्तुर्नागन्तुमिति अंगदप्रहर्षश्चहेत्वंतदम् २८ विनिपातिते
शसाधिते २९ प्रहृत्त हत्या नाम न्येषां वानराणां कपिस्वभावचांचल्यादीद ग्राम धु वन भंगादिरूप उपक्रमो व्यापारो

विनर्दतो महानादं घना वातेरिता यथा । अंगदे समनुप्राप्ते सुग्रीवो वानरेश्वरः २६ उवाच
शोकसंतप्तं रामं कमललोचनम् । समाश्वसिहि भद्रं ते दृष्टा देवी न संशयः २७ नागं
तुमिह शक्यं तैरतीते समये हि ह । अंगदस्य प्रहर्षाच्च जानामि शुभदर्शन २८ न मत्सका
शमागच्छेत्कृत्ये हि विनिपातिते । युवराजो महाबाहुः प्लवतामंगदो वरः २९ यद्यप्य
कृतकृत्यानामीदृशः स्यादुपक्रमः । भवेत्स दीनवदनो भ्रांतविप्लुतमानसः ३० पि
तृपैतामहं चैतत्पूर्वकैरभिरक्षितम् । न मे मधुवनं हन्यादहृष्टः प्लवगेश्वरः ३१ ।

यद्यपि त्यात पाप्यंगदो दीनवदनत्वादिगुणको भवेत् ३० कुतस्तत्राह पितृेति पितृ पैतामहं पितृपितामहपरंपरा
गतं मे मधुवनं जनका मजाम दृष्टानहन्यात् ३१

रा० वा० सुं० हे राम कौशल्यासुप्रजा सीतायाः स्थितिपरिज्ञानेन भवतः सत्तालाभादिदानीं कौशल्यासुप्रजात्व समभूदिति भावः तत्रा
२२२

कौशल्यासुप्रजा राम समाश्वासिहि सुव्रत १ ब्रह्मादेवी न संदेहो न चान्येन हनूमता ३२ न ह्यस्य
कर्मणो हेतुः साधने तद्विधो भवेत् हनूमति मतिश्चैव कर्मसिद्धिश्च सत्तम ३३ व्यवसाय
श्च शौर्यं च सूर्ये तेज इव ध्रुवम् जाम्बवान्यत्र नेता स्यादङ्गदश्च हरीश्वरः ३४ हनूमांश्चा
प्यधिष्ठाता न तस्य गतिरन्यथा मा भूश्चिन्तासमायुक्तः सम्प्रत्यमितविक्रम ३५ यदा हि
दर्पितोदग्राः सङ्गताः काननौकसः नैषामकृतकार्याणामीदृशः स्यादुपक्रमः ३६ वने
भग्नेन जानामि मधुनो भक्षणेन च ततः किलकिलाशब्दं शुश्रावासन्नमम्बरे ३७ हनू
मत्कर्मदृप्तानां नर्दतां काननौकसाम् किष्किन्धामुपयातानां सिद्धिं कथयतामिव ३८

पि हनूमतैव न तु ततोऽन्येनेत्यर्थः ३२ ह्यस्य कर्मणः साधने तद्विधो हेतुरपरो न भवेत् नास्ति हहनूमति तत्कार्यसाधि
कासिद्धिर्बल वरजन्यामतिश्चास्तीति हि यतः ३३ ३४ ३५ यदा हि यत इत्यर्थः ३६ ३७ ३८

राम०
२२२

रा० वा० सुं० उत्तमवाक्यमिष्टंतत्प्रतिपाद्यमर्थः तत्त्वेजग्राह ३६ इतिद्विपंचाशःसर्गः तस्यविभीषणस्य १ दूतवध्याद्दूतवधः ग्राह्यःमिदंसाधु २ गच्छे
१८२

निशाचराणामधिपोनुजस्यविभीषणस्योत्तमवाक्यमिष्टम्॥ जग्राहबुद्ध्यासुरलोकशत्रुर्महा
बलोराक्षसराजमुख्यः॥२६॥हरिःॐ इत्यार्षेरामायणेवाल्मीकीयेसुंदरकांडेद्विपंचाशःसर्गः
५२॥तस्यतद्वचनंश्रुत्वादशग्रीवोमहाबलः देशकालहितेवाक्यंभ्रातुरुत्तरमब्रवीत् १ स
म्यगुक्तंहिभवतादूतवध्याविगर्हिता अवश्यंतुवधादन्यःक्रियतामस्यनिग्रहः २ कपीनां
किललांगूलमिष्टंभवतिभूषणम् तदस्यदीप्यतांशीघ्रंतेनदंडेनगच्छतु ३ ततःपश्यं
त्विमंदीनमंगवैकल्यकर्शितम् मित्राणिज्ञातयःसर्वेबांधवाःससुहृज्जनाः ४ आज्ञाप
यद्राक्षसेंद्रःपुरंसर्वंसचत्वरम् लांगूलेनप्रदीप्तेनरक्षोभिःपरिणीयताम् ५

तु स्वस्वामिसमीपमितिशेषः ३ ततः स्वीयसमीपागमनानंतरं मित्राणिसमसुखदुःखाः ज्ञातयोभ्रात्रादयबांधवाः संबंधिनः सुहृ
ज्जनाः स्निग्धजनाः ४ परिणीयतां परितोनीयतामित्याज्ञापयत् ५

॰आयतः दीर्घीकृतः ॰अंचितः मान्येव चक्रे गेतमास्फालितः लांगूलो येन सः स्वभावोक्त्यलंकारोऽत्र ३९ ४० ४१ निय

तत्र श्रुत्वा निनादं तं कपीनां कपिसत्तमः ॥ ॰आयतांचितलांगूलः सोभवद्धृष्टमानसः ॥३९॥ आ
जग्मुस्तेपि हरयो रामदर्शनकांक्षिणः ॥ ॰अंगदं पुरतः कृत्वा हनूमंतं च वानरम् ॥४०॥ तेंगद
प्रमुखा वीराः प्रहृष्टाश्च मुदान्विताः ॥ निपेतुर्हरिराजस्य समीपे राघवस्य च ॥४१॥ हनू
मांश्च महाबाहुः प्रणम्य शिरसा ततः ॥ नियतामक्षतां देवीं राघवाय न्यवेदयत् ॥४२॥ दृष्टा
देवीति हनुमद्वदनादमृतोपमम् ॥ ॰आकर्ण्य वचनं रामो हर्षमाप सलक्ष्मणः ॥४३॥ निश्चि
तार्थस्ततस्तस्मिन्सुग्रीवं पवनात्मजे ॥ लक्ष्मणः प्रीतिमान् प्रीतं बहुमानादवैक्षत ॥४४॥
प्रीत्या च रममाणोथ राघवः परवीरहा ॥ बहुमानेन महता हनूमंतमवैक्षत ॥४५॥ हरिःॐ इत्या
र्षे रामायणे सुंदरकांडे चतुःषष्टितमः सर्गः ॥६४॥ ततः प्रस्रवणं शैलं ते गत्वा चित्रकाननम् प्र
णम्य शिरसा रामं लक्ष्मणं च महाबलम् १ ॰तां पातिव्रत्यसंपन्नां ॰अक्षतां शरीरारोग्यकुशलिनीम् ४२
४३ ४४ ४५ इति चतुःषष्टितमः सर्गः ॥६४॥

१४ र्तिवार्त्तां २ रोधं वलिरोधं २ समयोरावणाकृतावधिरूपाद् शमोवर्त्ततेमासोद्धोत्तु शेषोत्र वंगमेतितीतोक्रूः तेचेतिशेषः ३

प्रवणाज्ञेपरस्तस्यसुग्रीवमभिवाद्यच प्रवृत्तिमथसीतायाः प्रवक्तुमुपचक्रमुः २ रावणा
न्तःपुरेरोधंराक्षसीभिश्चतर्जनम् रामेसमनुरागंचयश्चापिसमयःकृतः ३ एतदाख्यांतिते
सर्वेहरयोरामसन्निधौ वैदेहीमक्षतांश्रुत्वारामस्तूत्तरमब्रवीत् ४ क्वसीतावर्त्ततेदेवी
कथंचमयिवर्त्तते एतन्मेसर्वमाख्यातवैदेहींप्रतिवानराः ५ रामस्यगदितंश्रुत्वाहरयो
रामसन्निधौ चोदयंतिहनूमंतंसीतावृत्तांतकोविदम् ६ श्रुत्वातुवचनंतेषांहनूमान्
मारुतात्मजः प्रणम्यशिरसादेव्यैसीतायैतांदिशंप्रति उवाचवाक्यंवाक्यज्ञःसीताया
दर्शनंयथा ७ तंमणिंकांचनंदिव्यंदीप्यमानंस्वतेजसा दत्वारामायहनूमांस्ततःप्रांजलि
रब्रवीत् ८

रामसन्निधौस्थितारतिशेषः ४ ५ चोदयंतिप्रेरयंतिस्म ६ सीतायैतांदिशंप्रतिप्रणम्ययथायेन
प्रकारेणसीतायादर्शनंजातंतत्परंवाक्यमुवाचेत्यर्थः ७ ८

देव्या दिदृक्षया तां मार्गमाणोऽगच्छं ९ तीरे दक्षिणसमुद्रस्य वधिद्वीपसंनद्धतीरे १० हे राम रामा सा सीता त्वयि मनोरथं

समुद्रं लंघयित्वाहं शतयोजनमायतम् अगच्छं जानकीं सीतां मार्गमाणो दिदृक्षया ९ तत्र
लंकेति नगरी रावणस्य दुरात्मनः दक्षिणस्य समुद्रस्य तीरे वसति दक्षिणे १० तत्र सीता मया
दृष्टा रावणांतःपुरे सती सन्यस्य त्वयि जीवंती रामा राम मनोरथः ११ दृष्टा सा राक्षसीमध्ये
तर्ज्यमाना मुहुर्मुहुः राक्षसीभिर्विरूपाभी रक्षिता प्रमदावने १२ दुःखमापद्यते देवी
त्वयावीर सुखोचिता रावणांतःपुरे रुद्धा राक्षसीभिः सुरक्षिता १३ एकवेणीधरा
दीना त्वयि चिंतापरायणा अधःशय्या विवर्णांगी पद्मिनीव हिमोदये १४ रावणा
द्विनिवृत्तार्था मर्तव्यकृतनिश्चया देवी कथंचित्काकुत्स्थ त्वन्मना मार्गिता मया १५ इ
क्ष्वाकुवंशविख्यातिं शनैः कीर्तयता मया सा मया नरशार्दूल विश्वासमुपपादिता १६

सम्यक् न्यस्य त्वदतिरिक्तमनोरथाभाववती भूत्वा जीवंती धृतप्राणा मया दृष्टा ११ १२ सुखोचिता देवी त्वया विना दुः
खमापद्यते इत्यन्वयः १३ अधःशय्या भूमिशयना १४ १५ १६

रा० वा० सुं०
२२४

सर्वमर्थं रामसुग्रीवसख्यादि दर्शिता ज्ञापिता १७ समुदाचारः गोत्रास्खलनादि व्यवहारो भक्तिः स्नेहस्त्वयि त्वय्येव सदा नियतौ नान्यत्रेत्यर्थः १८ उग्रेण तपसा त्वद्भक्त्या च युक्ता १९ २० यद्दृष्टं रामस्य सीतर्जनादि तत् आख्येयमित्यन्वयः २१ सु-

ततः संभाषिता देवी सर्वमर्थं च दर्शिता रामसुग्रीवसख्यं च श्रुत्वा हर्षमुपागता १७ नियतिः समुदाचारो भक्तिश्चास्यास्तथा त्वयि १८ एवं मया महाभागा दृष्टा जनकनंदिनी उग्रेण तपसा युक्ता त्वद्भक्त्या रघुनंदन १९ अभिज्ञानं च मे दत्तं यथावृत्तं तवांतिके चित्रकूटे महाप्राज्ञ वायसं प्रति राघव २० विज्ञाप्यश्च नरव्याघ्रो रामो वायुसुत त्वया अखिलेनेह दृष्टमिति मामाह जानकी २१ अयं चास्मै प्रदातव्यो यत्नात्सुपरिरक्षितः ब्रुवता वचनान्येवं सुग्रीवस्योपशृण्वतः २२ एष चूडामणिः श्रीमान्मया ते परिरक्षितः मनःशिलायास्तिलकं तत्स्मरस्वेति चाब्रवीत् २३ एष निर्यातितः श्रीमान्मया ते वारिसंभवः एतं दृष्ट्वा प्रमोदिष्ये व्यसने त्वामिवानघ २४

ग्रीवस्योपशृण्वतः सुग्रीवे उपशृण्वति एवं वचनानि ब्रुवता कपयता त्वया प्रदातव्य इत्यब्रवीदिति शेषः २२ एष इति मया ते दत्तस्तेऽपश्यन्मनःशिलायास्तिलकं त्वया कृतं तत्स्मरस्वेति चाब्रवीत् २३ एष वारिसंभवो मणिर्निर्यातितः प्रेषितः

एतत्त्वत्प्रेषितमंगुलीयकं दृष्ट्वा त्वां दृष्ट्वेव व्यसने प्रमोदिष्य इति संबंधः २४

रा० म०
२२४

मासाद्दिह्यमानाद्दूशमादूर्ध्वमित्यर्थः २५ म्रगीवोत्फुल्ललोचनाऽऽसातिशयादिति भावः २६ सेतारः सेताराेपायः प्रविधीयतां शविचार्यतां २७ तावित्यादि पूर्ववद्देव्वदेवीवृत्ते २८ इतिपंचषष्ठितमः सर्गः ६५ १ नेत्राभ्यामश्रुपूर्णाभ्या

जीवितं धारयिष्यामि मासं दशरथात्मज ऊर्ध्वं मासान्न जीवेयं रक्षसां वशमागता २५ इति मामब्रवीत्सीता कृशांगी वरवर्णिनी एवं सा तेऽब्रवीद्राम मृगीवोत्फुल्ललोचना २६ एतदेव मयाख्यातं सर्वं राघव यद्यथा सर्वथा सागरजले संतारः प्रविधीयताम् २७ तौ जाताश्वासौ राजपुत्रौ विदित्वा तच्चाभिज्ञानं राघवाय प्रदाय देव्या चाख्यातं सर्वमेवानुपूर्व्याद्वाचा संपूर्णं वायुपुत्रः शशंस ॥२८॥ इति श्रीमद्रामायणे वाल्मीकीये सुंदरकाण्डे पंचषष्ठितमः सर्गः ॥६५॥ एवमुक्तो हनुमता रामो दशरथात्मजः तं मणिं हृदये कृत्वा रुरोद सहलक्ष्मणः १ तं तु दृष्ट्वा मणिश्रेष्ठं राघवः शोककर्शितः नेत्राभ्यामश्रुपूर्णाभ्यां सुग्रीवमिदमब्रवीत् २ यथैव धेनुः स्रवति स्नेहाद्वत्सस्य वत्सला तथा ममापि हृदयं मणिश्रेष्ठस्य

दर्शनात् ३ स्रवतीत्यर्थः । वत्सलता नित्यवत्सः यथा वत्सस्य वत्सला वत्सवती धेनुः वत्सस्य स्नेहात्स्रवति स्तन्यं तथा ममापि मणिश्रेष्ठस्य दर्शनात् हृदयं स्रवति

रा० वा० सुं०
२२५

मणेरागतिमाह मणीति त्रिभिः श्वशुरेण जनकेन वधूकाले वैदेह्याः शिरोभूषणाय सीतामातृहस्ताद्धि त्वा दशरथ इह स्तिदत्तं तच्च तस्मिन्काले यथाऽधिकं शोभते तथा मूर्ध्नि बद्धमित्यर्थः ४ जनकस्यापि कुत आगतोऽत आह अपां हीति प्रवरैः श्रेष्ठैः देवैः पूजितः तथा यथा सीतादर्शनमवगतेः प्राप्तस्तथा तातस्य दशरथस्य प्राप्तः तद्दत्ते जनकेन

मणिरत्नमिदं दत्तं वैदेह्याः श्वशुरेण मे वधूकाले यथा बद्धमधिकं मूर्ध्नि शोभते ४ अपां हि जलसंभूतो मणिः प्रवरपूजितः यज्ञे परमतुष्टेन दत्तः शक्रेण धीमता ५ इमं दृष्ट्वा मणिश्रेष्ठं तथा तातस्य दर्शनं अद्यास्म्यवगतः सौम्य वैदेहस्य तथा विभोः ६ अयं हि शोभते तस्याः प्रियाया मूर्ध्नि मे मणिः अद्यास्य दर्शनेनाहं प्राप्तां तामिव चिंतये ७ किमाह सीता वैदेही ब्रूहि सौम्य पुनः पुनः पिपासुमिव तोयेन सिंचंती वाक्यवारिणा ८ इतस्तु किं दुःखतरं यदिमं वारिसंभवम् मणिं पश्यामि सौमित्रे वैदेहीमागतं विना ९ सीतागमाभावेन मणेः मः

दानात्तस्य स्मरणं तथा वैदेहस्य राज्ञो जनकस्य तत्पत्नीकस्य दर्शनं प्राप्त इत्यर्थः ६ ७ पिपासुं मूर्छितं मां जीवनाय वाक्यवारिणा सिंचंती किमाह तद्ब्रूहि ८ वैदेहीं विनाऽऽगतं मणिं पश्यामि इतः किं दुःखतरं ९ एम० २२५

सौमित्र

यदि मासं धरिष्यति जीविष्यति तदा चिरं जीवति जीविष्यतीत्यर्थः तां विना यथाहं न जीवेयं तथा मां विना सापि न जीविष्यती
त्यर्थः १० प्रवृत्तिमुपलभ्य च क्षणमपि न तिष्ठेयं स्थातुं न शक्यमित्यर्थः ११ भीरु हे भीरुः स्वसंतं भीरुः १२ अंबुदैरावृत

चिरंजीवति वैदेही यदि मासं धरिष्यति क्षणं सौम्य न जीवेयं विना तामसितेक्षणाम् १० नय माम
पि तं देशं यत्र दृष्टा मम प्रिया न तिष्ठेयं क्षणमपि प्रवृत्तिमुपलभ्य च ११ कथं सा मम सुश्रो
णी भीरु भीरुः सती सदा भयावहानां घोराणां मध्ये तिष्ठति रक्षसाम् १२ शारदस्तिमिरोन्मु
क्तो नूनं चंद्र इवांबुदैः आवृतो वदनं तस्या न विराजति राक्षसैः १३ किमाह सीता हनुमंस्तत्त्व
तः कथयस्व मे एतेन खलु जीविष्ये भेषजेनातुरो यथा॥१४ मधुरा मधुरालापा किमाह मम भामि
नी मद्विहीना वरारोहा हनुमन् कथयस्व मे॥१५॥हरिः ॐ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये सुं
दरकांडे षट्षष्ठितमः सर्गः॥६६॥ एवमुक्तस्तु हनुमान् राघवेण महात्मना सीताया भाषितं स
र्वं न्यवेदयत राघवे १

स्तिमिरोन्मुक्तः शारदश्चंद्र इव तस्या वदनं न राजति १३ तत्वतः संकोचेन न किंचिद्गोपनीय
मिति भावः एतेन तया कथ्यमानरूपेण भेषजेन खलु जीविष्ये १४ मधुरा मधुरालापा १५ इति षट्षष्ठितमः सर्गः॥६६॥ १

 रामानुज्ञाना पूर्वसंकुचिते विस्तृणोति इदमिति यथातथं यथा पूर्वव तेन योक्तवती २ ३ ४ ५ ६ ७ ८ ९ धरांतरगतः

इदसुक्तवतीदेवीजानकीपुरुषर्षभ पूर्ववृत्तमभिज्ञानंचित्रकूटे यथातथम् २ सुखसुप्तात्वया
सार्धंजानकीपूर्वमुत्थिता वायसःसहसोत्पत्यविददारस्तनांतरे ३ पर्यायेणप्रसुप्तस्त्वंदे
व्यंकेभरताग्रज पुनश्चकिलपक्षीसदेव्याजनयतिव्यथाम् ४ ततःपुनरुपागम्यविददारभृ
शंकिल ततस्त्वंबोधितस्तस्याःशोणितेनसमुक्षितः ५ वायसेनचतेनैवसततंबाध्य
मानया बोधितःकिलदेव्यात्वंसुखसुप्तःपरंतप ६ तांतुदृष्ट्वामहाबाहोदारितांचस्तनां
तरे आशीविषइवक्रुद्धोनिश्वसन्नभ्यभाषत ७ नखाग्रैःकेनतेभीरुदारितंवैस्तनांत
रे कःक्रीडतिसरोषेणपंचवक्त्रेणभोगिना ८ निरीक्ष्यमाणःसहसावायसंसमुदैक्षत
नखैःसरुधिरैस्तीक्ष्णैस्तामेवाभिमुखंस्थितम् ९ सुतःकिलसशक्रस्यवायसःपततांवरः ध
रांतरगतःशीघ्रंपवनस्यगतौसमः १० ततस्तस्मिन्महाबाहोकोपसंवर्तितेक्षणः वायसे
त्वंकृथाःक्रूरांमतिंमतिमतांवर ११ सदर्भंसंस्तराद्गृह्यब्राह्मेणास्त्रेणयोजयः सदीप्तइवकालाग्नि

पातालस्थः १० व्यधाः प्रभूपाः ११ दर्भसंस्तरादेकंकुशंगृहीत्वेत्यर्थः १२

चिक्षेप चिक्षेपिथेत्यर्थः स्वार्थे प्रयोगः १३ १४ पर्यपालयः शरणं वधेनेति भावः १६ रक्षःसु रक्षितेहेतोः ततस्तदा मनोतरं हिनस्ति

सत्वं प्रदीप्तं च विक्षेप दर्भं तं वायसं प्रति ततस्तु वायसं दीप्तः स दर्भो ऽभिजगाम तम् १३ स पित्रा
च परित्यक्तः सुरैः सर्वैश्च वायसः त्रीँल्लोकान्संपरिक्रम्य त्रातारं नाधिगच्छति १४ पुनरेवागत
स्त्रस्तस्त्वत्समीपमरिंदम १५ तं निपतितं भूमौ शरण्यः शरणागतम् वधार्हमपि काकुत्स्थ कृपया
पर्यपालयः १६ मोघमस्त्रं न शक्यं तु कर्तुमित्येव राघवः ततस्तस्याक्षि काकस्य हिनस्ति
स्म स दक्षिणम् १७ राम त्वां स नमस्कृत्य राज्ञो दशरथस्य च विसृष्टस्तु तदा काकः प्रतिपे
दे स्वमालयम् १८ एवमस्त्रविदां श्रेष्ठः सत्ववाञ्छीलवानपि किमर्थमस्त्रं रक्षःसु न योजयति
राघवः १९ न नागा नापि गन्धर्वा नासुरा न मरुद्गणाः तव राम रणे शक्तास्तथा प्रतिसमा
सितुम् २० तव वीर्यवतः कश्चिद्यद्यस्ति मयि संभ्रमः क्षिप्रं सुनिशितैर्बाणैर्हन्यतां युधि रावणः
२१

स्म प्रहिनः १७ १८ १९ हे राम तोत वन्यो प्रति समासितुं प्रतिमुखं स्थातुं न शक्ता तथा न दत् काक वदित्यर्थः २० संभ्रमः प्रादरः २१

रा०वा०सु० २२ २३ २४ २५ त्वच्छोकविमुखः त्वच्छोकेन कार्यान्तरविमुखः २६ भवतीमया दृष्टा अतः परं परिश्रोचितुं न कालस्त
२२७

भ्रातुरादेशमाज्ञाय लक्ष्मणो वा परंतपः स किमर्थं नरवरो न मां रक्षति राघवः २२ शक्तौ तौ पुरुष
व्याघ्रौ वाय्वग्निसमतेजसौ सुराणामपि दुर्धर्षौ किमर्थं मामुपेक्षतः २३ ममैव दुष्कृतं किंचि
न्महदस्ति न संशयः समर्थौ सहितौ यन्मामुपेक्षेते परंतपौ २४ वैदेह्या वचनं श्रुत्वा करुणं सा
श्रुभाषितम् पुनरप्यहमार्यां तामिदं वचनमब्रुवम् २५ त्वच्छोकविमुखो रामो देवि सत्ये
न ते शपे रामे दुःखाभिभूते तु लक्ष्मणः परितप्यते २६ कथंचिद्भवती दृष्टा न कालः परिश्रोचि
तुम् इमं मुहूर्तं दुःखानामन्तं द्रक्ष्यसि भामिनि २७ तावुभौ पुरुषव्याघ्रौ राजपुत्रौ महाबलौ त्व
द्दर्शनकृतोत्साहौ लंकां भस्मीकरिष्यतः २८ हत्वा च समरे क्रूरं रावणं सहबान्धवम् राघवस्त्वां
वरारोहे स्वां पुरीं नयते ध्रुवम् २९ यत्तु रामो विजानीयादभिज्ञानमनिन्दिते प्रीतिसंजननं तस्य प्रदा
तुं तत्त्वमर्हसि ३०

वधागमरतिश्रोषः इमं मुहूर्तमस्मिन्नेव मुहूर्ते इत्यर्थः २७ २८ २९ ३०

रा०म०
२२७